(७) आदाननिक्षेपसमितिमें––मयूरपिच्छ के अभावमें वस्त्रादिके द्वारा प्रतिलेखनका विधान किया गया है, यह दिगम्बर परम्पराके अनुकूल नहीं है ।

(८) सूत्र ८।४७ में द्रव्यलिंगकी व्याख्या करते हुए श्रुतसागरसूरिने असमर्थ मुनियोंको अपवाद-रूपसे वस्त्रादिग्रहण इन शब्दोमें स्वीकार किया है––

"केचिदसमर्था महर्षयः शीतकालादौ कम्बलशब्दवाच्यं कौशेयादिकं गृहणन्ति, न तत् प्रक्षालयन्ति, न तत् सीव्यन्ति, न प्रयत्नादिकं कुर्वन्ति, अपरकाले परिहरन्ति । केचिच्छरीरे उत्पन्नदोषा लज्जितत्वात् तथा कुर्वन्तीति व्याख्याना माराधनाभगवतीप्रोक्ताभिप्रायेण अपवादरूपं ज्ञातव्यम् । 'उत्सर्गापवादयोरपवादो विधिर्बलवान्' इत्युत्सर्गेण तावद् यथोक्तमाचेलक्यं प्रोक्तमस्ति, आर्यासमर्थदोषवच्छरीराद्यपेक्षया अपवाद-व्याख्याने न दोषः ।"

अर्थात् भगवती आराधनाके अभिप्रायानुसार असमर्थ या दोषयुक्त शरीरवाले साधु शीतकालमें वस्त्र ले लेते हैं, पर वे न तो उसे धोते हैं न सीते हैं और न उसके लिए प्रयत्न ही करते हैं, दूसरे समयमें उसे छोड़ देते हैं। उत्सर्गलिंग तो अचेलकता है पर आर्या असमर्थ और दोषयुक्त शरीरवालोंकी अपेक्षा अपवादलिंगमें भी दोष नहीं है।

भगवती आराधना (गा० ४२१) की अपराजितसूरिकृत विजयोदया टीकामें कारणापेक्ष यह अपवादमार्ग स्वीकार किया गया है। इसका कारण स्पष्ट है कि अपराजितसूरि यापनीयसंघके आचार्य थे और यापनीय आगमवाचनाओंको प्रमाण मानते थे। उन आगमोंमें आए हुए उल्लेखोंके समन्वयके लिए अपराजितसूरिने यह व्यवस्था स्वीकार की है। परन्तु श्रुतसागरसूरि तो कट्टर दिगम्बर थे, वे कैसे इस चक्करमें आ गये ?

भाषा और शैली–तत्त्वार्थवृत्तिकी शैली सरल और सुबोध है। प्रत्येक स्थानमें नूतन पर सुमिल शब्दोंका प्रयोग दृष्टिगोचर होता है। सैद्धान्तिक बातोंका खुलासा और दर्शनगुत्थियोंके सुलझानेका प्रयत्न स्थान स्थान पर किया गया है। भाषाके ऊपर तो श्रुतसागरसूरिका अद्भुत अधिकार है। जो क्रिया एक जगह प्रयुक्त है वही दूसरे वाक्यमें नहीं मिल सकती। प्रमाणोंको उद्धृत करनेमें तो इनके श्रुतसागरत्वका पूरा पूरा परिचय मिल जाता है। इस वृत्ति में निम्नलिखित ग्रन्थों और ग्रन्थकारोंका उल्लेख नाम लेकर किया गया है। अनिर्दिष्टकर्तृक गाथाएँ और श्लोक भी इस वृत्तिमें पर्याप्त रूपमें संगृहीत है। इस वृत्तिमें उमास्वामी (उमास्वाति भी) समन्तभद्र पूज्यपाद अकलंकदेव विद्यानन्दि प्रभाचन्द्र नेमिचन्द्रदेव योगीन्द्रदेव मतिसागर देवेन्द्रकीर्तिभट्टारक आदि ग्रन्थकारोंके तथा सर्वार्थसिद्धि राजवार्तिक अष्टसहस्री भगवतीआराधना संस्कृतमहापुराणपंजिका प्रमेयकमलमार्तण्ड न्यायकुमुदचन्द्र आदि ग्रन्थोंके नामोल्लेख हैं। इनके अतिरिक्त सोमदेवके यशस्तिलकचम्पू आशाधरके प्रतिष्ठापाठ वसुनन्दिश्रावकाचार आत्मानुशासन आदिपुराण त्रिलोकसार पंचास्तिकाय प्रवचनसार नियमसार पंचसंग्रह प्रमेयकमलमार्तण्ड बारसअणुवेक्खा परमात्मप्रकाश आराधनासार गोम्मटसार बृहत्स्वयंभूस्तोत्र रत्नकरण्डश्रावकाचार श्रुतभक्ति पुरुषार्थसिद्धयुपाय नीतिसार द्रव्यसंग्रह कातन्त्रसूत्र सिद्धभक्ति हरिवंशपुराण षड्दर्शनसमुच्चय पाणिनिसूत्र इष्टोपदेश न्यायसंग्रह ज्ञानार्णव अष्टांगहृदय द्वात्रिंशद्द्वात्रिंशतिका शाकटायनव्याकरण तत्त्वसार सागारधर्मामृत आदि ग्रंथोंके श्लोक गाथा आदि उद्धृत किये गये हैं।

इस प्रकार यह वृत्ति अतिशयपाण्डित्यपूर्ण और प्रमाणसंग्रहा है। श्रुतसागरसूरिने इसे सर्वोपयोगी बनानेका पूरा पूरा प्रयत्न किया है।

ग्रन्थकार

इस विभागमें सूत्रकार उमास्वामी और वृत्तिकारके समय आदिका परिचय कराना अवसरप्राप्त है। सूत्रकार उमास्वामीके संबंधमें अनेक विवाद हैं—वे किस आम्नायके थे ? क्या तत्त्वार्थभाष्यके अन्तमें पाई जानेवाली प्रशस्ति उनकी लिखी है ? क्या तत्त्वार्थभाष्य स्वोपज्ञ नहीं है ? मूल सूत्रपाठ कौन है ? वे कब हुए थे ? आदि। इस संबंधमें श्रीमान् पं० सुखलालजीने अपने तत्त्वार्थसूत्रकी प्रस्तावनामें पर्याप्त विवेचन किया है और उमास्वामीको श्वे० परम्पराका बताया है, तत्त्वार्थभाष्य स्वोपज्ञ है और उसकी प्रशस्तिमें सन्देह करनेका कोई कारण नहीं है। इनने उमास्वामीके समयकी अवधि विक्रमकी दूसरीसे पांचवीं सदी तक निर्धारित की है।

श्री पं० नाथूरामजी प्रेमीने भारतीय विद्याके सिंघी स्मृति अंकमें "उमास्वातिका तत्त्वार्थसूत्र और उनका सम्प्रदाय" शीर्षक लेखमें उमास्वातिको यापनीय संघका आचार्य सिद्ध किया है। इसके प्रमाणमें उनने मैसूरके नगरतालुके ४६ नं०के शिलालेखमें आया हुआ यह श्लोक उद्धृत किया है—

"तत्त्वार्थसूत्रकर्त्तारम् उमास्वामिमुनीश्वरम्।
श्रुतिकेवलिदेशीयं वन्देऽहं गुणमन्दिरम्॥"

इस श्लोकमें उमास्वामीको 'श्रुतकेवलिदेशीय' विशेषण दिया है और यही विशेषण यापनीय-संघाग्रणी शाकटायन आचार्यको भी लगाया जाता है। अतः उमास्वामी यापनीयसंघकी परम्परामें हुए हैं। इधर पं० जुगलकिशोरजी मुख्तार उमास्वामीको दिगम्बर परम्पराका स्वीकार करते हैं तथा भाष्यको स्वोपज्ञ नहीं मानते। यद्यपि यह भाष्य अकलंकदेवसे पुराना है क्योंकि इनने राजवार्तिकमें भाष्यगत कारिकाएँ उद्धृत की है और भाष्यमान्य सूत्रपाठकी आलोचना की है तथा भाष्यकी पंक्तियोंको वार्तिक भी बनाया है।

इस तरह तत्त्वार्थसूत्र, भाष्य और उमास्वामीके संबंधके अनेक विवाद हैं जो गहरी छानबीन और स्थिर गवेषणाकी अपेक्षा रखते हैं। मैंने जो सामग्री इकट्ठी की है वह इस अवस्थामें नहीं है कि उससे कुछ निश्चित परिणाम निकाला जा सके। अतः तत्त्वार्थवार्तिककी प्रस्तावनाके लिए यह विषय स्थगित कर रहा हूँ।

वृत्तिकर्ता श्रुतसागरसूरि वि० १६वीं शताब्दीके विद्वान् हैं। इनके समय आदिके सम्बन्धमें श्रीमान् प्रेमीजीने 'जैन साहित्य और इतिहास'में सांगोपांग विवेचन किया है। उनका वह लेख यहां साभार उद्धृत किया जाता है।

श्रुतसागरसूरि

ये मूलसंघ, सरस्वतीगच्छ, बलात्कारगणमें हुए हैं और इनके गुरुका नाम विद्यानन्दि था। विद्यानन्दि-देवेन्द्रकीर्तिके और देवेन्द्रकीर्ति पद्मनन्दिके* शिष्य और उत्तराधिकारी थे। विद्यानन्दिके बाद मल्लिभूषण और उनके बाद लक्ष्मीचन्द्र भट्टारक-पदपर आसीन हुए थे। श्रुतसागर शायद गद्दीपर बैठे ही नही, फिर भी वे भारी विद्वान् थे। मल्लिभूषणको उन्होंने अपना गुरुभाई लिखा है।

विद्यानन्दिका भट्टारक-पट्ट गुजरातमें ही किसी स्थानपर था, परन्तु कहां पर था, इसका उल्लेख नहीं मिला§।

श्रुतसागरके भी अनेक शिष्य होंगे, जिनमें एक शिष्य श्रीचन्द्र थे जिनकी बनाई हुई वैराग्य-मणिमाला उपलब्ध है। आराधनाकथाकोश, नेमिपुराण आदि ग्रन्थोंके कर्ता ब्रह्म नेमिदत्तने भी जो मल्लि-भूषणके शिष्य थे–श्रुतसागरको गुरुभावसे स्मरण किया है और मल्लिभूषणकी वही गुरुपरपम्परा दी है जो श्रुतसागरके ग्रन्थोंमें मिलती है। उन्होंने सिंहनन्दिका भी उल्लेख किया है जो मालवाकी गद्दीके भट्टारक थे और जिनकी प्रार्थनासे श्रुतसागरने यशस्तिलककी टीका लिखी थी।

श्रुतसागरने अपनेको कलिकालसर्वज्ञ, कलिकालगौतम, उभयभाषाकविचक्रवर्ती, व्याकरणकमल-मार्तण्ड, तार्किकशिरोमणि, परमागमप्रवीण, नवनवतिमहामहावादिविजेता आदि विशेषणोंसे अलंकृत किया है। ये विशेषण उनकी अहम्मन्यताको खूब अच्छी तरह प्रकट करते हैं।

वे कट्टर तो थे ही असहिष्णु भी बहुत ज्यादा थे। अन्य मतोंका खण्डन और विरोध तो औरोंने भी किया है, परन्तु इन्होंने तो खण्डनके साथ बुरी तरह गालियां भी दी है। सबसे ज्यादा आक्र-मण इन्होंने मूर्तिपूजा न करनेवाले लोंकागच्छ (ढूंढ़ियों)पर किया है।........

अधिकतर टीकाग्रन्थ ही श्रुतसागरने रचे हैं, परन्तु उन टीकाओंमें मूल ग्रन्थकर्ताके अभिप्रायोंकी अपेक्षा उन्होंने अपने अभिप्रायोंको ही प्रधानता दी है। दर्शनपाहुडकी २४वीं गाथाकी टीकामें उन्होंने

---

*. ये पद्मनन्दि वही मालूम होते हैं जिनके विषय में कहा जाता है कि गिरिनार पर सरस्वती देवी से उन्होंने कहला दिया था कि दिगम्बर पन्थ ही सच्चा है। इन्हीं की एक शिष्य शाखा में सकलकीर्ति, विजयकीर्ति और शुभचन्द्र भट्टारक हुए हैं।

§. इनकी गद्दी सूरत में थी। देखो 'दानवीर माणिकचन्द्र' पृ० ३७।

जो अपवाद वेषकी व्याख्या की है, वह यही बतलाती है। वे कहते हैं कि दिगम्बर मुनि चर्याके समय चटाई आदिसे अपने नग्नत्वको ढांक लेता है। परन्तु यह उनका खुदका ही अभिप्राय है, मूलका नहीं। इसी तरह तत्त्वार्थटीका (संयमश्रुतप्रतिसेवनादि सूत्रकी टीका)में जो द्रव्यलिंगी मुनिको कम्बलादि ग्रहणका विधान किया है वह भी उन्हींका अभिप्राय है, मूल ग्रन्थकर्ताका नहीं।

श्रुतसागरके ग्रन्थ–

(१) यशस्तिलकचन्द्रिका–आचार्य सोमदेवके प्रसिद्ध यशस्तिलक चम्पूकी यह टीका है और निर्णयसागर प्रेसकी काव्यमालामें प्रकाशित हो चुकी है। यह अपूर्ण है। पांचवें आश्वासके थोड़ेसे अंशकी टीका नहीं है। जान पड़ता है, यही उनकी अन्तिम रचना है। इसकी प्रतियां अन्य अनेक भण्डारोंमें उपलब्ध हैं, परन्तु सभी अपूर्ण है।

(२) तत्त्वार्थवृत्ति–यह श्रुतसागरटीकाके नामसे अधिक प्रसिद्ध है। इसकी एक प्रति बम्बईके ऐ० पन्नालाल सरस्वतीभवनमें मौजूद है जो वि० सं० १८४२ की लिखी हुई है। श्लोकसंख्या नौ हजार है। इसकी एक भाषावचनिका भी हो चुकी है।

(३) तत्त्वत्रयप्रकाशिका–श्री शुभचन्द्राचार्यके ज्ञानार्णव या योगप्रदीपके अन्तर्गत जो गद्यभाग है, यह उसीकी टीका है। इसकी एक प्रति स्व० सेठ माणिकचन्द्रजीके ग्रन्थसंग्रहमें है।

(४) जिनसहस्रनामटीका–यह पं० आशाधरकृत सहस्रनामकी विस्तृत टीका है। इसकी भी एक प्रति उक्त सेठजीके ग्रन्थसंग्रहमें है। पं० आशाधरने अपने सहस्रनामकी स्वयं भी एक टीका लिखी है जो उपलब्ध है।

(५) औदार्य चिन्तामणि–यह प्राकृतव्याकरण है और हेमचन्द्र तथा त्रिविक्रमके व्याकरणोंसे बड़ा है। इसकी प्रति बम्बईके ऐ० पन्नालाल सरस्वतीभवनमें है (४६८ क), जिसकी पत्रसंख्या ५६ है। यह स्वोपज्ञवृत्तियुक्त है।

(६) महाभिषेक टीका–पं० आशाधरके नित्यमहोद्योतकी यह टीका है। यह उस समय बनाई गई है जबकि श्रुतसागर देशव्रती या ब्रह्मचारी थे।

(७) व्रतकथाकोश–इसमें आकाशपञ्चमी, मुकुटसप्तमी, चन्दनषष्ठी, अष्टाह्निका आदि व्रतों की कथायें हैं। इसकी भी एक प्रति बम्बईके सरस्वतीभवनमें है और यह भी उनकी देशव्रती या ब्रह्मचारी अवस्थाकी रचना है।

(८) श्रुतस्कन्धपूजा–यह छोटीसी नौ पत्रोंकी पुस्तक है। इसकी भी एक प्रति बंबईके सरस्वती-भवनमें है।

इसके सिवाय श्रुतसागरके और भी कई ग्रन्थोंके* नाम ग्रन्थसूचियोंमें मिलते हैं। परन्तु उनके विषयमें जबतक वे देख न लिये जायें, निश्चय पूर्वक कुछ नहीं कहा जा सकता।

समय विचार–

इन्होंने अपने किसी भी ग्रन्थमें रचनाका समय नहीं दिया है परन्तु यह प्रायः निश्चित है कि ये विक्रमकी १६वीं शताब्दीमें हुए हैं। क्योंकि––

---

* पं० परमानन्दजी ने अपने लेख में सिद्धभक्ति टीका सिद्धचक्राष्टक पूजा टीका श्रीपालचरित यशोधर चरित ग्रन्थों के भी नाम दिए हैं। इन्होंने व्रतकथाकोश के अन्तर्गत २४ कथाओं को स्वतन्त्र ग्रन्थ मानकर ग्रन्थ संख्या ३६ कर दी है। इसका कारण बताया है कि–चूंकि भिन्न भिन्न कथाएं भिन्न भिन्न व्यक्तियों के लिए विभिन्न व्यक्तियों के अनुरोध से बनाई हैं अतः वे सब स्वतन्त्र ग्रन्थ हैं। यथा पल्यविधान व्रत कथा ईडर के राठौर वंशी राजा भानुभूपति (समय वि० स० १५५२ के बाद) के राज्य काल में मल्लिभूषण गुरु के उपदेश से रची गई है।

१–महाभिषेककी टीकाकी जिस प्रतिकी प्रशस्ति आगे दी गई है वह विक्रम संवत् १५८२की लिखी हुई है और वह भट्टारक मल्लिभूषणके उत्तराधिकारी लक्ष्मीचन्द्रके शिष्य ब्रह्मचारी ज्ञानसागरके पढ़नेके लिये दान की गई है और इन लक्ष्मीचन्द्रका उल्लेख श्रुतसागरने स्वयं अपने टीकाग्रन्थोंमें कई जगह किया है।

२–ब्र० नेमिदत्तने श्रीपालचरित्रकी रचना वि० सं० १५८५में की थी और वे मल्लिभूषणके शिष्य थे। आराधनाकथाकोशकी प्रशस्तिमें उन्होंने मल्लिभूषणका †गुरुरूपमें उल्लेख किया है और साथही श्रुतसागरका भी जयकार‡ किया है, अर्थात् कथाकोशकी रचनाके समय श्रुतसागर मौजूद थे।

३–स्व० बाबा दुलीचन्दजीकी सं० १९५४में लिखी गई ग्रन्थसूचीमें श्रुतसागरका समय वि० सं० १५५० लिखा हुआ है।

४–षट्प्राभृतटीकामें लोंकागच्छपर तीव्र आक्रमण किये गये हैं और यह गच्छ वि० सं० १५३० के लगभग स्थापित हुआ था। अतएव उससे ये कुछ समय पीछे ही हुए होंगे। सम्भव है, ये लोंकाशाहके समकालीन ही हों।§

ग्रन्थप्रशस्तियाँ––

(१) **श्री विद्यानन्दिगुरोर्बुद्धिगुरोः पादपङ्कजभ्रमरः।**
श्री श्रुतसागर इति देशव्रती तिलकष्टीकते स्मेदम्॥

इति ब्रह्मश्रीश्रुतसागर कृता महाभिषेक टीका समाप्ता।

(२) **संवत् १५५२ वर्षे चैत्रमासे शुक्लपक्षे पञ्चम्यां तिथौ रवौ श्रीआदिजिनचैत्यालय श्रीमूलसंघे सरस्वतीगच्छे बलात्कारगणे श्रीकुन्दकुन्दाचार्यान्वये भट्टारकश्रीपद्मनन्दिदेवास्तत्पट्टे भट्टारकश्रीदेवेन्द्रकीर्तिदेवास्तत्पट्टे भट्टारकश्रीविद्यानन्दिदेवास्तत्पट्टे भट्टारकश्रीमल्लिभूषणदेवास्तत्पट्टे भट्टारकश्रीलक्ष्मीचन्द्रदेवास्तेषां शिष्यवरब्रह्मश्रीज्ञानसागरपठनार्थं आर्याश्रीविमलचेली भट्टारकश्रीलक्ष्मीचन्द्रदीक्षिता विनयश्रिया स्वयं लिखित्वा प्रदत्तं महाभिषेकभाष्यम्। शुभं भवतु। कल्याणं भूयात् श्रीरस्तु॥**

–आशाधरकृतमहाभिषेककी टीका*

(३) **इति श्रीपद्मनन्दि-देवेन्द्रकीर्ति-विद्यानन्दि-मल्लिभूषणाम्नायेन भट्टारकश्रीमल्लिभूषणगुरुपरमाभीष्टगुर्वभ्रात्रा गुर्जरदेशसिंहासनस्थभट्टारकश्रीलक्ष्मीचन्द्रकाभिमतेन मालवदेशभट्टारकश्रीसिंहनन्दिप्रार्थनया यतिश्रीसिद्धान्तसागरव्याख्याकृतिनिमित्तं नवनवतिमहावादिस्याद्वादलब्धविजयेन तर्क-व्याकरणछन्दोलंकार-सिद्धान्तसाहित्यादिशास्त्रनिपुणमतिना व्याकरणाद्यनेकशास्त्रचुञ्चुना सूरिश्रीश्रुतसागरेण विरचितायां यशस्तिलकचन्द्रिकाभिधानायां यशोधरमहाराजचरितचम्पूमहाकाव्यटीकायां यशोधरमहाराजराजलक्ष्मीविनोदवर्णनं नाम तृतीयाश्वासचन्द्रिका परिसमाप्ता।**

–यशस्तिलकटीका

† श्री भट्टारक मल्लिभूषणगुरुर्भूयात्सतां शर्मणे॥६॥

‡ जीयान्मे सूरिवर्यो व्रतिनिचयलसत्पुण्यपण्यः श्रुताब्धिः॥७१॥

§ प० परमानन्दजी शास्त्री सरसावा ने अपने 'ब्रह्मश्रुत सागर और उनका साहित्य लेख में लिखा है कि––भट्टारक विद्यानन्दी के वि० सं० १४९९ से वि० १५२१ तक के ऐसे मूर्ति लेख पाए जाते हैं जिनकी प्रतिष्ठाएँ विद्यानन्दी ने स्वयं की हैं अथवा जिनमें आ० विद्यानन्दी के उपदेश से प्रतिष्ठित होने का समुल्लेख पाया जाता है। आदि। श्रीमान् प्रेमीजी की सूचनानुसार मैंने मूर्ति लेखों की खोज की तो नाहरजी कृत जैनलेखसंग्रह लेख नं० ९८० में संवत् १५३३ में विद्यानन्दि भट्टारक का उल्लेख है तथा लेख नं० २८९ में संवत् १५३५ में विद्यानन्दि गुरु का उल्लेख है। इसी तरह 'दानवीर माणिकचन्द' पुस्तक पृ० ४ पर एक धातु की प्रतिमा का लेख सं० १४२९ का है जिसमें विद्यानन्दि गुरु का उल्लेख है। यदि यह संवत् ठीक है तो भट्टारक विद्यानन्दि का समय १४२९ से १५३४ तक मानना होगा और इनके शिष्य श्रुत सागर का समय भी १६ वीं सदी।

* स्व० सेठ माणिकचन्द्रजी जौहरी के भण्डार की प्रति।

(४) श्रीपद्मनन्दिपरमात्मपरः पवित्रो देवेन्द्रकीर्तिरथ साधुजनाभिवन्द्यः ।
विद्याविनन्दिवरसूरिरनल्पबोधः श्रीमल्लिभूषण इतोऽस्तु च मङ्गलं मे ।।
अदः पट्टे भट्टादिकमतघटापट्टनपटु-
घटद्धर्मध्यान्तः स्फुटपरमभट्टारकपदः ।
प्रभापुञ्जः सयद्विजितवरवीरस्मरनरः
सुधीर्लक्ष्मीचन्द्रश्चरणचतुरोऽसौ विजयते ।। ३ ।।
आलम्बनं सुविदुषां हृदयाम्बुजानामानन्दनं मुनिजनस्य विमुक्तिहेतोः ।
सट्टीकनं विविधशास्त्रविचारचारुचेतश्चमत्कृतकृतं श्रुतसागरेण ।। ४ ।।
श्रुतसागरकृतिवरवचनामृतपानमत्र यैर्विहितम् ।
जन्मजरामरणहरं निरन्तरं तैः शिवं लब्धम् ।। ५ ।।
अस्ति स्वस्ति समस्तसङ्घतिलकं श्रीमूलसङ्घोऽनघं
वृत्तं यत्र मुमुक्षुवर्गशिवदं संसेवितं साधुभिः ।
विद्यानन्दिगुरुस्त्विहास्ति गुणवद्गच्छे गिरः साम्प्रतं
तच्छिष्यश्रुतसागरेण रचिता टीका चिरं नन्दतु ।। ६ ।।

इति सूरिश्रीश्रुतसागरविरचितायां जिननामसहस्रटीकायाम् तकृच्छतविवरणो नाम दशमोऽध्यायः ।। १० ।। श्रीविद्यानन्दिगुरुभ्यो नमः ।

–जिनसहस्रनामटीका

(५) आचार्यैरिह शुद्धतत्त्वमतिभिः श्रीसिंहनन्द्याह्वयैः
सम्प्रार्थ्य श्रुतसागरं कृतिवरं भाष्यं शुभं कारितम् ।
गद्यानां गुणवत्प्रियं विनयतो ज्ञानार्णवस्यान्तरे
विद्यानन्दिगुरुप्रसादजनितं देयादमेयं सुखम् ।।

इति श्री ज्ञानार्णवस्थितगद्यटीका तत्त्वत्रयप्रकाशिका समाप्ता ।

–तत्त्वत्रयप्रकाशिका

(६) इत्युभयभाषाकविचक्रवर्तिव्याकरणकमलमार्तण्डतार्किकशिरोमणि-परमागमप्रवीण-सूरिश्रीदेवेन्द्रकीर्ति-प्रशिष्यमुमुक्षुविद्यानन्दिभट्टारकान्तेवासिश्रीमूलसंघपरमात्मविदुष (?) सूरिश्रीश्रुतसागरविरचिते औदार्य-चिन्तामणिनाम्नि स्वोपज्ञवृत्तिनि प्राकृतव्याकरणे संयुक्ताव्ययनिरूपणो नाम द्वितीयोऽध्यायः ।

–औदार्य चिन्तामणि

(७) सुदेवेन्द्रकीर्तिश्च विद्याविन्दी गरीयान् गुरुर्मेऽर्हवादिप्रवन्दी ।
तयोर्विद्धि मां मूलसङ्घे कुमारं श्रुतस्कन्धमीडे त्रिलोकैकसारम् ।।
सम्यक्त्वसुरत्नं सकलजन्तुकरुणाकरणम् ।
श्रुतसागरमेतं भजत समेतं निखिलजने परितः शरणम् ।।

इति श्रुतस्कन्धपूजाविधिः ।

इसतरह ग्रन्थ और ग्रन्थकारके सम्बन्धमें उपलब्ध सामग्रीके अनुसार कुछ विचार लिखकर इस प्रस्तावनाको यहीं समाप्त किया जाता है। तत्त्वार्थसूत्र सम्बन्धी अन्य मुद्दोंपर तत्त्वार्थवार्तिककी प्रस्तावनामें प्रकाश डालनेका विचार है।

भारतीय ज्ञानपीठ काशी
वसन्त पंचमी वीर सं० २४७५
३।२।१९४९

–महेन्द्रकुमार जैन

विषयसूची

सातवाँ अध्याय

आठवाँ अध्याय

त त्त्वा र्थ वृ त्तिः

"तत्त्वार्थसूत्रकर्तारम् उमास्वातिमुनीश्वरम् ।
श्रुतकेवलिदेशीयं वन्देऽहं गुणमन्दिरम् ॥"

—नगरताल्लुक-शिलालेख नं० ४६

"श्रुतसागरकृतिवरवचनामृतपानमत्र यैर्विहितम् ।
जन्मजरामरणहरं निरन्तरं तैः शिवं लब्धम् ॥"

—जिनसहस्रनामटीका

श्रीमदुमास्वामिविरचितस्य

तत्त्वार्थसूत्रस्य

श्रीश्रुतसागरसूरिरचिता

तत्त्वार्थवृत्तिः

[प्रथमोऽध्यायः]

सिद्धोमास्वामिपूज्यं जिनवरवृषभं वीरमुत्तीरमाप्तं
श्रीमन्तं पूज्यपादं गुणनिधिमधियन् सत्प्रभाचन्द्रमिन्द्रम् ।
श्रीविद्यानन्द्यधीशं गतमलमकलङ्कार्यमानम्य रम्यं
वक्ष्ये तत्त्वार्थवृत्तिं निजविभवतयाऽहं [१]श्रुतोदन्वदाख्यः ॥ १ ॥

अथ श्रीमदुमास्वामिभट्टारकः कलिकालगणधरदेवो महामुनिमण्डलीसंसेवित- ५
पादपद्मः कस्मिंश्चिदाश्रमपदे सुस्थितः मनोवाक्कायसरलतया [२]वाचंयमोऽपि निजमूर्त्या साक्षान्मोक्षमार्गं कथयन्निव सर्वप्राणिहितोपदेशैककार्यः समार्य[३]जनसमाश्रितः नि[४]र्ग्रन्थाचार्यवर्यः अतिनिकटीभवत्परमनिर्वाणेनासन्नभव्येन [५]द्वैयाकनाम्ना भव्यवरपुण्डरीकेण सम्पृष्टः '[६]भगवन्, किमात्मने हितम् ?' इति । भगवानपि तत्प्रश्नवशात् 'सम्यग्दर्शनज्ञानचारित्रलक्षणोपलक्षितसन्मार्गसम्प्राप्यो मोक्षो हितः' इति प्रतिपादयितुकाम इष्टदेवता- १०
विशेषं नमस्करोति–

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥ १ ॥

वन्दे नमस्करोमि । कः ? कर्ताहमुमास्वामिनामाचार्यः भव्यजीवविश्रामस्थानप्रायः । किमर्थं वन्दे ? तद्गुणलब्धये । तस्य भगवतः सर्वज्ञवीतरागस्य गुणास्तद्गुणाः, तेषां १५
लब्धिः प्राप्तिः तद्गुणलब्धिः, तस्यै तद्गुणलब्धये । 'के तस्य गुणाः' इति प्रश्ने भगवद्गुणत्रयगर्भितं विशेषणत्रयमाह । कथम्भूतं सर्वज्ञवीतरागम् ? मोक्षमार्गस्य नेतारम् । मोक्षः सर्वकर्मविप्रयोगलक्षणः, तस्य मार्गः सम्यग्दर्शनज्ञानचारित्रलक्षणो वक्ष्यमाणो मोक्षमार्गः,

---

१ श्रुतसागरः । २ मौनवानपि । ३–जनमाश्रि–व० । ४ निग्र–ता० । ५ द्वैयाक–व० । द्वैयायिक–आ० । एतन्नामा श्रावकः । ६ भगवन्नत्र कि–व० ।

तस्य नेतारं प्रापकं नायकम्। पुनरपि कथम्भूतम् ? भेत्तारं चूर्णीकर्तारं मूलादुन्मूलकमित्यर्थः। केषाम् ? कर्मभूभृताम्। कर्माणि ज्ञानावरणादीनि, तान्येव भूभृतः पर्वताः कर्मभूभृतः, तेषां कर्मभूभृतां कर्मगिरीणाम्। भूयोऽपि किंविशिष्टम् ? ज्ञातारं सम्यक् स्वरूपज्ञायकम्। केषाम् ? विश्वतत्त्वानाम्, विश्वानि समस्तानि तानि च[1] तानि तत्त्वानि

५ विश्वतत्त्वानि, तेषां विश्वतत्त्वानाम्। अत्रायं भावः-सर्वज्ञवीतरागशब्दोऽध्याहारेण लब्धः, तस्यानन्तगुणस्यासाधारणगुणा[2] मुख्यत्वेन मोक्षमार्गनेतृत्व-कर्मभूभृद्भेतृत्वविश्वतत्त्वज्ञातृत्वलक्षणास्त्रयः, तत्प्राप्तये इत्यर्थः।

अथ द्वैयाकः[3] प्राह-यद्यात्मने[4] हितो मोक्षः, किं तर्हि तस्य स्वरूपम् ? तस्य च मोक्षस्य प्राप्तेरुपायः कः ? भगवानाह[5]— मोक्षस्येदं स्वरूपम्। इदं किम् ? जीवस्य

१० समस्तकर्ममलकलङ्करहितत्वम्, अशरीरत्वम्, अचिन्तनीयनैसर्गिकज्ञानादिगुणसहिताव्याबाधसौख्यम्[6], ईदृशमात्यन्तिकमवस्थान्तरं मोक्ष उच्यते। स तु मोक्षोऽतीव परोक्षः छद्मस्थानां प्रवादिनाम्। ते तु तीर्थकरम्मन्यास्तीर्थकरमात्मानं मन्यन्ते न तु ते तीर्थकराः परस्परविरुद्धार्थाभिधायित्वात्, तेषां वाचः मोक्षस्वरूपं[7] न स्पृशन्ति। कस्मात् ? युक्त्याभासनिबन्धना यस्मात्। कस्माद्युक्त्याभासनिबन्धनास्तद्वाचः ?

१५ यतः केचित्[8] चैतन्यं पुरुषस्य स्वरूपमिति परिकल्पयन्ति। तच्चैतन्यं ज्ञेयाकारपरिच्छेदपराङ्मुखम्[9]। तच्चैतन्यं विद्यमानमप्यविद्यमानम्। किंवत् ? खरविषाणवत्। कस्मात् ? निराकारत्वात्। कोऽर्थः ? स्वरूपव्यवसायलक्षणाकारशून्यत्वात्।

केचिच्च[10] पुरुषस्य बुद्ध्यादिवैशेषिकगुणोच्छेदो मोक्ष इति परिकल्पयन्ति। तदपि परिकल्पनं मिथ्यैव। कस्मात् ? विशेषलक्षणशून्यस्य वस्तुनोऽवस्तुत्वात्।

---

१ च तत्त्वानि आ०। २-णस्य गुणा ता०। ३ द्वैयायकः आ०, ब०। द्वैवायानामकः व०। द्वैपायकः द०। ४ यथात्म-द०। ५ स भग-आ०, ब०। ६-य स्वाभाविकनै-व०। -यं नै-द०। ७ मोक्षं स्व-ता०। ८ सांख्याः। "चैतन्यं पुरुषस्य स्वरूपमिति"-योगभा० १।९। "तदा द्रष्टुः स्वरूपेऽवस्थानम्" -योगसू० १।३। ९ "तावेतौ भोगापवर्गौ बुद्धिकृतौ बुद्धावेव वर्तमानौ कथं पुरुषे व्यपदिश्येते इति ? यथा विजयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते स हि तस्य फलस्य भोक्तेति, एवं बन्धमोक्षौ बुद्धावेव वर्तमानौ पुरुषे व्यपदिश्येते, स हि तस्य फलस्य भोक्तेति, बुद्धेरेव पुरुषार्थापरिसमाप्तिर्बन्धः तदर्थावसायो मोक्ष इति। एतेन ग्रहणधारणोहापोहतत्त्वज्ञानाभिनिवेशा बुद्धौ वर्तमानाः पुरुषेऽध्यारोपितसद्भावाः स हि तत्फलस्य भोक्तेति।"-योगभा० १।१८। १० वैशेषिकाः। "नवानामात्मविशेषगुणानामत्यन्तोच्छित्तिर्मोक्षः।।"-प्रश० व्यो० पृ० ६३८। "आत्यन्तिकी दुःखव्यावृत्तिरपवर्गो न सावधिका द्विविधदुःखावमर्शिना सर्वनाम्ना सर्वेषामात्मगुणानां दुःखावमर्शाद् अत्यन्तग्रहणेन च सर्वात्मना तद्वियोगाभिधानात्। नवानामात्मगुणानां बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां निर्मूलोच्छेदोऽपवर्ग इत्युक्तं भवति। यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः। तावदात्यन्तिकी दुःखव्यावृत्तिर्नावकल्पते।।"-न्यायमं०। पृ० ५०८।

[1]केचित्तु आत्मनिर्वाणं प्रदीपनिर्वाणकल्पं परिकल्पयन्ति । तैरात्मनिर्वाणस्य खरविषाणकल्पनासदृशी परिकल्पना स्वयमा[3]हत्य समर्थिता, हठात् [4]समर्थितेत्यर्थः । यद्येवं मोक्षस्वरूपं मिथ्या, तर्हि परमार्थं मोक्षस्वरूपं किम् ? [5]तदग्रे कथयिष्यामो वयम् ।

मोक्षस्य प्राप्तेरुपायमपि प्रवादिनो विसंवदन्ते । [6]केचिच्चारित्रनिरपेक्षं ज्ञानमेव मोक्षोपायं [7]मन्वते । केचित् श्रद्धानमात्रमेव मोक्षोपायं जानन्ति । [8]केचित् ज्ञाननिरपेक्षं ५ चारित्रमेव मोक्षोपायं जल्पन्ति । तदपि मिथ्या । [9]व्यस्तैर्ज्ञानादिभिर्मोक्षप्राप्तेरुपायो न भवति । यथा कश्चिद् व्याधिपराभूतो व्याधिविनाशकभेषजज्ञानेनैवोल्लाघो न भवति भेषजोपयोगं विना, तथा चारित्रहीनो ज्ञानमात्रान्मोक्षं न लभते । यथा कश्चिदौषधमाचरन्नपि औषधस्वरूपमजानन् उल्लाघो न भवति तथाऽऽचारवान[10]प्यात्मज्ञानरहितो[11] मोक्षं न लभते । यथा कश्चिदौषधरुचिरहितः तत्स्वरूपं जानन्नप्यौषधं नाचरति सोप्यु- १० ल्लाघो न भवति, तथात्मा श्रद्धानरहितो ज्ञानचारित्राभ्यां मोक्षं न लभते[12] । तदुक्तम्—

"ज्ञानं पङ्गौ क्रिया चान्धे निःश्रद्धे नार्थकृद्द्वयम् ।
ततो ज्ञानक्रियाश्रद्धात्रयं तत्पदकारणम् ॥" [यश० उ० पृ० २७१]

---

१ बौद्धाः । "यस्मिन् न जातिर्न जरा न मृत्युर्न व्याधयो नाप्रियसंप्रयोगः । नेच्छा विपन्न प्रियविप्रयोगः क्षेमं पदं नैष्ठिकमच्युतं तत् ॥ दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् । दिशं न काञ्चिद्विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ॥ एवं कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् । दिशं न काञ्चिद्विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ॥" -सौन्दर० १६।२७-२९ ।"प्रदीपस्येव निर्वाणं विमोक्षस्तस्य चेतसः ।"-प्र० वार्तिकाल० १।४५ । २-र्णं परि-ब० । ३-माहृत्य आ०, द०, ब० । ४ समर्थ्यते इ-ब० । ५ १।४, १०।१ सूत्रयोः । ६ नैयायिकादयः । ७ मन्यन्ते आ०, ब०, ब, द० । ८ मीमांसकाः । ९ तैर्ज्ञा-आ० ब०, द० । १०-प्यात्मज्ञा-आ०, ब०, द० । ११-तो आत्मानादिज्योतिःस्वरूपममन्यमानो मोक्षं लभते । कस्मात् ? आत्मनोऽनादिज्योतिस्त्वात्, आत्मा आत्मानमनादिज्योतिस्त्वं मन्यमानो मोक्षं लभते यथा- आ०, द०, ब० । १२ "तथा हि-सकलनिष्कलाप्तप्राप्तमन्त्रतन्त्रापेक्षदीक्षालक्षणात् श्रद्धामात्रानुसरणान्मोक्ष इति सिद्धान्तवैशेषिकाः । द्रव्यगुणकर्मसामान्यसमवायान्त्यविशेषाभावाभिधानानां साधर्म्यवैधर्म्यावबोधतन्त्रात् ज्ञानमात्रान्मोक्ष इति तार्किकवैशेषिकाः । त्रिकालभस्मोद्धूलनेज्यालड्डुकप्रदानप्रदक्षिणीकरणात्मविडम्बनादिक्रियाकाण्डमात्रानुष्ठानादेव मोक्ष इति पाशुपताः । सर्वेषु पेयापेयभक्ष्याभक्ष्यादिषु निश्शङ्कचित्तत्वान्मोक्ष इति कालाचार्यकाः । तथा च त्रिविक्रमतोक्तिः-मदिरामोदमेदुरवदनसरसप्रसन्नहृदयः सव्यपार्श्वसमीपविनिवेशितशक्तिः शक्तिमुद्रासनधरः स्वयमुमामहेश्वरायमाणो नित्यामन्त्रेण पार्वतीश्वरमाराधयेदिति मोक्षः । प्रकृतिपुरुषयोर्विवेकाख्यातेर्मोक्ष इति साङ्ख्याः । नैरात्म्यादिनिवेदितसम्भावनातो मोक्ष इति दशबलशिष्याः । अङ्गाराञ्जनादिवत् स्वभावादेव कालुष्योत्कर्षप्रवृत्तस्य चित्तस्य न कुतश्चिद्विशुद्धिरिति जैमिनीयाः । सति धर्मिणि धर्माश्चिन्त्यन्ते ततः परलोकिनोऽभावात् परलोकाभावे कस्यासौ मोक्ष इति समवाप्तसमस्तनास्तिकाधिपत्या बार्हस्पत्याः । परमब्रह्मदर्शनवशादशेषभेदसंवेदनाऽविद्याविनाशान्मोक्ष इति वेदान्तवादिनः ।"-ब० आद्य० १।१ ।

अथ 'येन समस्तेन मोक्षो भवति तत्किम् ?' इति प्रश्ने सूत्रमिदमाचार्याः प्राहुः–

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १ ॥

सम्यक्शब्दः प्रत्येकं प्रयुज्यते। तेन सम्यग्दर्शनं च सम्यग्ज्ञानं च सम्यक्चारित्रं च सम्यग्दर्शनज्ञानचारित्राणि, समीचीनानि सम्यग्दर्शनज्ञानचारित्राणीत्यर्थः। तत्र जीवादि-
५ पदार्थानां यथावत् प्रतिपत्तिविषयं श्रद्धानं सम्यग्दर्शनम्। येन येन प्रकारेण जीवादयः पदार्था व्यवस्थिता वर्तन्ते तेन तेन प्रकारेण मोहसंशयविपर्ययरहितं परिज्ञानं सम्यग्ज्ञानम्। मोह इति अनध्यवसाय[1]पर्यायः। संशयः सन्देहः। विपर्ययो विपरीतत्वम्। तैः रहितं सम्यग्ज्ञानमित्यर्थः। संसारहेतुभूतक्रियानिवृत्त्युद्यतस्य तत्त्वज्ञानवतः पुरुषस्य कर्मादानकारणक्रियोपरम[2]णमज्ञानपूर्वकाचरणरहितं सम्यक्चारित्रम्। एतानि समुदितानि
१० मोक्षस्य मार्गो[3] भवति।

अथ सम्यग्दर्शनलक्षणोपलक्षणार्थं[4] सूत्रमिदं निर्दिशन्ति सूरयः–

तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥ २ ॥

योऽर्थो यथा व्यवस्थितस्तस्यार्थस्य तथाभावो [4]भवनं तत्त्वमुच्यते। अर्यते गम्यते ज्ञायते निश्चीयते इत्यर्थः। "[5]**उषिकुषिगर्तिभ्यस्थः।**" [कात० उ० ५।६३] तत्त्वेन अर्थः
१५ तत्त्वार्थः। तत्त्वमेव वाऽर्थस्तत्त्वार्थः। तत्त्वार्थस्य परमार्थभूतस्य पदार्थस्य [6]श्रद्धा रुचिः तत्त्वार्थश्रद्धानं सम्यग्दर्शनं भवतीति वेदितव्यम्। तत्त्वार्थस्तु जीवादिर्वक्ष्यते। [7]न तु अर्थशब्देन प्रयोजनाभिधेयधनादिकं ग्राह्यम्, [8]तच्छ्रद्धानस्य मोक्षप्राप्तेरयुक्तत्वात्। अर्थशब्दस्यानेकार्थत्वम्। [9]तदुक्तम्—

"हेतौ प्रयोजने वाच्ये निवृत्तौ विषये तथा।
२० प्रकारे वस्तुनि द्रव्ये अर्थशब्दः प्रवर्तते ॥" [ ]

ननु [10]दर्शनमवलोकनं श्रद्धानं कथं घटते ? सत्यम्; धातूनामनेकार्थत्वात्। रुच्यर्थे दृशिधातुर्वर्तते। 'दृशिर् प्रेक्षणे' प्रेक्षणार्थस्तु प्रसिद्धोऽप्यर्थोऽत्र मोक्षमार्गप्रकरणे त्यज्यते। तत्त्वार्थश्रद्धानमात्मपरिणामः सिद्धिसाधनं घटते। स तु परिणामो भव्यात्मन एव भवति। प्रेक्षणलक्षणस्त्वर्थः चक्षुरादिनिमित्तो वर्तते। स तु सर्वेषां संसारिणां जीवानां
२५ साधारणोऽस्ति। स मोक्षमार्गावयवो न सङ्गच्छते।

तत्सम्यग्दर्शनं द्विप्रकारम्–सरागम्, वीतरागञ्च। तत्र सरागं सम्यग्दर्शनं प्रशमसंवेगानुकम्पास्तिक्यैरभिव्यज्यते। तत्र रागादिदोषेभ्यश्चेतोनिवर्तनं प्रशमः। शारीर-

---

१–यः संश–आ०, ब०, द०। २–रमसज्ञा–आ०, ब०, ब०, द०। ३ भवन्ति ता०। ४ भवो ता०। भवं त–द०। ५ उषिअषिग—आ०, ब०। उषिकृषि—द०। ६ श्रद्धार्थं रु–ता०। ७ ननु अ–आ०, ब०। ८ प्रयोजनादिश्रद्धानस्य। ९ तुलना–"अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिषु"—अमरः, नाममा०। "अर्थः प्रयोजने वित्ते हेत्वभिप्रायवस्तुषु। शब्दाभिधेये विषये स्यान्निवृत्तिप्रकारयोः॥"—विश्वलो०। १० सम्यग्दर्शनं ब०।

मानसागन्तुवेदनाप्रसारात् संसाराद्भयं संवेगः। सर्वेषु प्राणिषु चित्तस्य दयार्द्रत्वमनुकम्पा। आप्तश्रुतव्रततत्त्वेषु अस्तित्वयुक्तं मन आस्तिक्यमुच्यते। तथा चोक्तम्—

"यद्रागादिषु दोषेषु चित्तवृत्तिनिवर्हणम्।
तं प्राहुः प्रशमं प्राज्ञाः समस्तव्रतभूषणम्॥ १॥
शारीरमानसागन्तुवेदनाप्रभवाद्भवात्[१]।
स्वप्नेन्द्रजालसङ्कल्पाद्भीतिः[२] संवेग उच्यते॥ २॥
सत्त्वे सर्वत्र चित्तस्य दयार्द्रत्वं दयालवः।
धर्मस्य परमं मूलमनुकम्पां प्रचक्षते॥ ३॥
आप्ते श्रुते व्रते तत्त्वे चित्तमस्तित्वसंयुतम्[४]।
आस्तिक्यमास्तिकैरुक्तं मुक्तियुक्तिधरे नरे॥ ४॥" १०

[यश० उ० पृ० ३२३] इति।

वीतरागं सम्यग्दर्शनम् आत्मविशुद्धिमात्रम्।

'अथेदृशं[५] सम्यग्दर्शनं जीवादिपदार्थगोचरं कथमुत्पद्यते' इति प्रश्ने सूत्रमिदं ब्रुवन्ति[६]—

तन्निसर्गादधिगमाद्वा॥ ३॥

तत्–सम्यग्दर्शनम्, निसर्गात् स्वभावात् उत्पद्यते। वा-अथवा, अधिगमात्– १५ अर्थावबोधात् उत्पद्यते।

ननु निसर्गजं सम्यग्दर्शनम् अर्थाधिगमं प्राप्योत्पद्यते, [७]न वा? यदि अर्थाधिगमं प्राप्योत्पद्यते; तर्हि तदपि निसर्गजमपि अधिगमजमेव भवति, अर्थान्तरं न वर्तते, किमर्थं सम्यग्दर्शनोत्पत्तेर्द्वैविध्यम्? अविज्ञाततत्त्वस्य अर्थश्रद्धानं न सङ्गच्छत एव। सत्यम्; निसर्गजेऽधिगमजे च सम्यग्दर्शनेऽन्तरङ्गं कारणं दर्शनमोहस्योपशमः [८]दर्शनमोहस्य क्षयो २० वा दर्शनमोहस्य क्षयोपशमो वा सदृशमेव कारणं वर्तते। तस्मिन् सदृशे कारणे सति यत्सम्यग्दर्शनं बाह्योपदेशं विनोत्पद्यते तत् सम्यग्दर्शनं निसर्गजमुच्यते। यत् सम्यग्दर्शनं परोपदेशेनोत्पद्यते तदधिगमजमुच्यते। नैसर्गिकमपि सम्यग्दर्शनं गुरोरक्लेशकारित्वात् स्वाभाविकमुच्यते न तु गुरूपदेशं विना प्रायेण तदपि जायते।

ननु तच्छब्दस्य ग्रहणं किमर्थम्? "अनन्तरस्य विधिः प्रतिषेधो वा" [पा० २५ महा० १।२।४७] इति परिभाषणात् 'निसर्गादधिगमाद्वा' ईदृशेनैव सूत्रेण अनन्तरं सम्यग्दर्शनमेव लभ्यते तेन सूत्रे तच्छब्दस्य वैयर्थ्यम्; सत्यम्; यथा सम्यग्दर्शनमनन्तरं वर्तते तथा मोक्षमार्गशब्दोऽपि प्रत्यासन्नो वर्तते, "प्रत्यासत्तेः प्रधानं बलीयः" [ ] इति परिभाषणात् मोक्षमार्गो निसर्गादधिगमाद्वा भवतीत्यर्थ उत्पद्यते। तच्छब्देन तु सम्यग्दर्शनमेवाकृष्यते तेन तच्छब्दग्रहणे दोषो नास्ति। ३०

१–तत-ब०। २ "प्रभवाद्भयात्"-यश०। ३-द्भातिः ता०। ४–त्वसंस्तुतम् ता०, ब०। ५ अथेदं स-आ०, ब०। ६ ब्रुवन्त्याचार्याः आ०, द०, ब०। ७ न च आ०, ब०, द०, ब०। ८ 'दर्शनमोहस्य क्षयो वा' इति नास्ति ता०। ९ सदृशका-ब०।

अथ 'किं[1] तत् तत्त्वम्, यस्य श्रद्धानं सम्यग्दर्शनं भवति ?' इति प्रश्ने सूत्रमिदमुच्यते[2]–

जीवाजीवाऽऽस्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥ ४ ॥

जीवश्चाजीवश्चाऽऽस्रवश्च बन्धश्च संवरश्च निर्जरा च मोक्षश्च जीवाजीवाऽऽस्रवबन्धसंवरनिर्जरामोक्षाः, एते सप्त पदार्थाः तत्त्वं [3]भवति । तत्र ज्ञानादिभेदेनानेकप्रकारा चेतना, सा लक्षणं यस्य स जीव उच्यते । यस्य तु ज्ञानदर्शनादि[4]लक्षणं नास्ति [5]स पुद्गलधर्माधर्माऽऽकाशकाललक्षणोऽजीवः । शुभाशुभकर्मागमनद्वारलक्षण आस्रव उच्यते । आत्मनः कर्मणश्च [6]परस्परप्रदेशानुप्रवेशस्वभावो बन्धः । आस्रवनिरोधरूपः संवरः । एकदेशेन कर्मक्षयो निर्जरा । सर्वकर्मक्षयलक्षणो मोक्षः ।

सर्वं फलं जीवाधीनं तेन जीवस्य ग्रहणं प्रथमम् । जीवस्योपकारकोऽजीवः, तेन जीवानन्तरमजीवग्रहणम् । जीवाजीवोभयगोचरत्वात् तत्पश्चादास्रवोपादानम् । आस्रवपूर्वको बन्धो भवतीति कारणात् [7]आस्रवादनन्तरं बन्धस्वीकारः । बन्धप्रतिबन्धकः संवरः, तेन बन्धादनन्तरं संवराभिधानम् । संवृतस्य निर्जरा भवतीति कारणात् संवरानन्तरं निर्जराकथनम् । मोक्षस्त्वन्ते प्राप्यते तेन मोक्षस्याभिधानमन्ते कृतम् ।

आस्रवबन्धयोरन्तर्भावात् पुण्यपापपदार्थद्वयस्य ग्रहणं न कृतम् । एवं चेदास्रवोऽपि जीवाजीवयोरन्तर्भवति, तद्ग्रहणमप्यनर्थकम्; तन्न; इह मोक्षशास्त्रे प्रधानभूतो मोक्षः, स तु अवश्यमेव वक्तव्यः । मोक्षस्तु संसारपूर्वको भवति । संसारस्य मुख्यहेतुरास्रवो बन्धश्च । मोक्षस्य [8]मुख्यं कारणं संवरो निर्जरा च । तेन कारणेन प्रधानहेतुमन्तौ संसारमोक्षौ, संसारमोक्षलक्षणफलप्रदर्शनार्थमास्रवादयः पृथग्व्यपदिश्यन्ते । तत्रास्रवबन्धयोः फलं संसारः, संवरनिर्जरयोः फलं मोक्षः, हेतुहेतुमतोः फलत्वेन निदर्शनम्, [9]दृष्टान्तभूताश्चत्वारः तेषां चतुर्णामास्रवादीनां पृथग्व्यपदेशो विहितः विशेषेण प्रदर्शनार्थम् ।

यदि संसारमोक्षयोर्मध्य एते चत्वारोऽन्तर्भवन्ति तर्हि पृथक् किमिति व्यपदिश्यन्ते ? साधूक्तं भवता, सामान्येऽन्तर्भूतस्यापि विशेषस्य भिन्नोपादानं कार्यार्थं[10] हि दृश्यते, यथा क्षत्रियाः समागताः, तन्मध्ये शूरवर्मापि समागत इत्युक्ते [11]शूरवर्मा किं क्षत्रियो न भवति ? तथा आस्रवादयश्च ।

जीवादयः सप्त द्रव्यवचनानि, तत्त्वशब्दस्तु भाववाची[12], तेषां तस्य च समानाधिकरणता कथं घटते-'जीवादयः किल तत्त्वम्' इति ? सत्यम्; अव्यतिरेकतया तत्त्व[13]भावाध्यारोपतया च समानाधिकरणता भवत्येव । [14]लिङ्गसङ्ख्याव्यतिक्रमस्तु न दूष्यते, अजहल्लिङ्गादित्वात् । एवं 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इत्यत्रापि योजनीयम् ।

---

१ किं तत्वं द० । २–ते स्वामिना आ०, ब०, द० । ३ भवन्ति ता० । ४–नालक्ष–आ०, ब० । ५ स तु ब० । ६ परस्परं प्र–ब० । ७ आश्रवान–द० । ८ मुख्यका–ता०, द० । ९ दृष्टान्ताश्च–द०, ब० । १०–र्थे द–द० । ११ शूरवर्मापि किं ब० । १२–वाची समा–ता० । –वाचकः ते–आ०, द०, ब० । १३–भावाध्याहारोपचारतया आ०, ब०, द० । १४ मोक्षाः इत्यत्र पुल्लिङ्गत्वं बहुवचनञ्च 'तत्त्वम्' इत्यत्र च नपुंसकैकवचनत्वम् इति व्यतिक्रमः ।

अथ सम्यग्दर्शनादिजीवादिव्यवहारव्यभिचारप्रतिषेधनिमित्तं सूत्रमुच्यते—

नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ॥

नाम च स्थापना च द्रव्यं च भावश्च नामस्थापनाद्रव्यभावाः, तेभ्यो नामस्थापनाद्रव्यभावतः, तेषां सम्यग्दर्शनादीनां जीवादीनाञ्च न्यासः प्रमाणनयैर्निक्षेपः[1] तन्न्यासः। अस्यायमर्थः—अतद्गुणे वस्तुनि संव्यवहारप्रवर्तननिमित्तं पुरुषकारात्[2] हठात् नियुज्यमानं संज्ञाकर्म[3] नामकर्म कथ्यते। अतद्गुणे वस्तुनीति कोऽर्थः ? न विद्यन्ते शब्दप्रवृत्तिनिमित्तास्ते जगत्प्रसिद्धा[4] जातिगुणक्रियाद्रव्यलक्षणा गुणा विशेषणानि यस्मिन् वस्तुनि तद्वस्तु 'अतद्गुणम्' तस्मिन् अतद्गुणे। तदुक्तम्—

> "द्रव्यक्रियाजातिगुणप्रभेदैर्डवित्थकर्तृद्विजपाटलादौ[5]।
> शब्दप्रवृत्तिं मुनयो वदन्ति चतुष्टयीं शब्दविदः पुराणाः ॥ १ ॥" [ ]

काष्ठकर्मणि पुस्तकर्मणि[6] लेपकर्मणि[7] अक्षनिक्षेपे। कोऽर्थः ? सारिनिक्षेपे वराटकादिनिक्षेपे च सोऽयं मम गुरुरित्यादि स्थाप्यमाना या सा स्थापना कथ्यते। गुणैर्द्रुतं गतं प्राप्तं द्रव्यम्, गुणान् वा द्रुतं गतं प्राप्तं द्रव्यम्, गुणैर्द्रोष्यते द्रव्यम्, गुणान्वा द्रोष्यतीति द्रव्यम्। द्रव्यमेव वर्तमानपर्यायसहितं भाव उच्यते।

तथा हि—कोऽर्थः ? नामस्थापनाद्रव्यभावान् दर्शयति—नामजीवः, स्थापनाजीवः, द्रव्यजीवः, भावजीवश्चेति चतुर्विधो जीवशब्दो न्यस्यते। जीवनगुणं विनापि यस्य कस्यचित् जीवसंज्ञा विधीयते स नामजीव उच्यते। अक्षनिक्षेपादिषु जीव इति वा मनुष्यजीव इति वा व्यवस्थाप्यमानः स्थापनाजीव उच्यते। सारिचालनसमये 'अयमश्वः' 'अयं गजः' 'अयं पदातिः' इति जीवस्थापनैव वर्तते।

द्रव्यजीवो द्विप्रकारः—आगमद्रव्यजीव-नोआगमद्रव्यजीवभेदात्। तत्र जीवप्राभृतज्ञायी मनुष्यजीवप्राभृतज्ञायी वानुपयुक्तो निःकार्य आत्मा आगमद्रव्यजीव उच्यते। नोआगमद्रव्यजीवस्त्रिप्रकारः—ज्ञायकशरीर-भावि-तद्व्यतिरिक्तभेदात्। तत्र ज्ञायकशरीरं त्रिकालगोचरं यत् ज्ञातुः शरीरं तत् ज्ञायकशरीरमुच्यते। सामान्यत्वेन नोआगमद्रव्यभाविजीवो न विद्यते। कस्मात् ? जीवनसामान्यस्य सदैव विद्यमानत्वात्। विशेषापेक्षया तु नोआगमद्रव्यभाविजीवस्तु विद्यत एव। कोऽसौ विशेषः ? कश्चित् जीवो गत्यन्तरे स्थितो वर्तते, स मनुष्यभवप्राप्तिं प्रति सम्मुखो मनुष्यभाविजीव उच्यते। अथवा, यदा जीवादिप्राभृतं न जानाति अग्रे तु ज्ञास्यति तदा भाविनोआगमद्रव्यजीव उच्यते। तद्व्यतिरिक्तः

१—नयैर्नि—द०। २ पुरुषाकारात् आ०, ब०, व०, द०। ३ संज्ञा नामकर्म ब०। ४ "नामजात्यादियोजना। यदृच्छाशब्देषु नाम्ना विशिष्टोऽर्थ उच्यते डित्थ इति। जातिशब्देषु जात्या गौरयमिति, गुणशब्देषु गुणेन शुक्ल इति। क्रियाशब्देषु क्रियया पाचक इति। द्रव्यशब्देषु द्रव्येण दण्डी विषाणीति।" —प्र० समु० टी० १।३। ५ डवित्थः काष्ठमयो मृगः। काष्ठादिद्रव्यनिमित्तको डवित्थ इति, करोतिक्रियानिमित्तकः कर्त्तेति, द्विजत्वजातिनिमित्तको द्विज इति, ईषद्रक्तगुणनिमित्तकः पाटल इति व्यवहारः। ६ पुस्तकादिसूत्रचीवरादिविरचिते। ७ गोमयादिना लेपे।

कोऽर्थः ? कर्म-नोकर्मभेदः । तत्र कर्म तावत् प्रसिद्धम् । नोकर्मस्वरूपं निरूप्यते-औदारिक-वैक्रियिकाहारकशरीरत्रयस्य षट्पर्याप्तीनाञ्च योग्यपुद्गलानामादानं नोकर्म ।

भावजीवो द्विप्रकारः-आगमभावजीव-नोआगमभावजीवभेदात् । तत्रागमभाव-जीवप्राभृतविषयोपयोगाविष्टः परिणत आत्मा आगमभावजीवः कथ्यते । मनुष्यजीव-
५ प्राभृतविषयोपयोगसंयुक्तो वाऽऽत्मा आगमभावजीवः कथ्यते । नोआगमभावजीवस्वरूपं निरूप्यते-जीवनपर्यायेण समाविष्ट आत्मा नोआगमभावजीवः । मनुष्यजीवपर्यायेण वा समाविष्ट आत्मा नोआगमभावजीवः कथ्यते ।

एवमजीवास्रवबन्धसंवरनिर्जरामोक्षाणां षण्णां सम्यग्दर्शनज्ञानचारित्राणां त्रयाणाञ्च नामादिनिक्षेपविधानं संयोजनीयम् । [1]तत्किमर्थम् ? अप्रस्तुतनिराकरणार्थं प्रस्तु-
१० तस्य नामस्थापना[2]जीवादेर्निरूपणार्थं च ।

ननु 'नामस्थापनाद्रव्यभावतो न्यासः' इति सूत्रं क्रियताम्, तच्छब्दग्रहणं किमर्थम् ? साधूक्तम् भवता; तच्छब्दग्रहणं सर्वसङ्ग्रहणार्थम् । तच्छब्दं विना प्रधानभूतानां सम्यग्दर्शनज्ञानचारित्राणामेव न्यासविधिः स्यात्, तद्विषयाणां जीवादीनामप्रधानानां न्यासविधिर्न स्यात् । तच्छब्दग्रहणे सति समर्थतया प्रधानानामप्रधाना[3]नाञ्च
१५ न्यासविधि[4]र्निषेद्धुं न शक्यते ।

अथ 'नामादिप्रस्तीर्णाधिकृततत्त्वानामधिगमः कुतो भवति ?' इति प्रश्ने सूत्रमिदं-[5]मुच्यते—

प्रमाणनयैरधिगमः ॥ ६ ॥

प्रमाणे च नयाश्च प्रमाणनयाः, तैः प्रमाणनयैः कृत्वा अधिगमः नामादिनिक्षेप-
२० विधिकथितजीवादिस्वरूपपरिज्ञानं भवति । ते प्रमाणे नयाश्च वक्ष्यन्ते । तत्र [6]प्रमाणं द्विप्रकारम्—स्वपरार्थभेदात् । तत्र स्वार्थं प्रमाणं श्रुतरहितम् । श्रुतं तु स्वार्थं परार्थं च भवति । ज्ञानात्मकं श्रुतं स्वार्थम्, वचनात्मकं परार्थम् । [7]वचनविकल्पास्तु नया उच्यन्ते ।

ननु नयशब्दः अल्पस्वरः प्रमाणशब्दो बहुस्वरः, "[8]अल्पस्वरतरं तत्र पूर्वम्" [का० २।५।१२] इति वचनात्—नयशब्दस्य कथं पूर्वनिपातो न भवति ? साधूक्तं भवता ।
२५ तत्रैवापवादभूतं "यच्चार्चितं द्वयोः" [का० २।५।१३] इति सूत्र वर्तते । तेन प्रमाणस्यार्चितत्वात् पूर्वनिपातः । अभ्यर्चितं तु सर्वथा बलीयः । प्रमाणस्यार्चितत्वं कस्मात् ? नयानां निरूपणप्रभवयोनित्वात् । प्रमाणेनार्थं ज्ञात्वाऽर्थावधारणं नय उच्यते । तेन [9]सकलादेशः

---

१ "उक्तं हि-अवगयणिवारणट्ठं पयदस्स परूवणाणिमित्तं च । संसयविणासणट्ठं तच्चत्थवधारणट्ठं च ॥"-ध० टी० भा० १ पृ० ३१ । अक० टि० पृ० १५३ । २-जीवादिनि-आ०, ब०, द० । ३-नानाञ्च न्या-आ०, ब०, द० । ४-विधिं निषेधं कर्तुं शक्यते आ०, ब०, द० । ५ सूत्रमु-आ०, ब० । ६ "प्रमाणं द्विविधं स्वार्थं परार्थञ्च"-स० सि० १।६ । ७ "जावइया वयणवहा तावइया चेव होंति णयवाया ।"-सम्मति० ३।४७ । ८ अल्पस्वरं तन्त्रं च पूर्वं-आ० ब० द० । ९ "तथा प्रोक्तं सकलादेशः प्रमाणाधीनो विकलादेशो नयाधीनः"-स०सि० १।६ ।

प्रमाणाधीनो विकलादेशो नयाधीनः। स नयो द्विप्रकारः[1] द्रव्यार्थिक-पर्यायार्थिकभेदात्। [2]भावस्वरूपं पर्यायार्थिकनयेन ज्ञातव्यम्। नामस्थापनाद्रव्याणां त्रयाणां तत्त्वं द्रव्यार्थिकनयेन ज्ञातव्यम्। नामस्थापनाद्रव्यभावचतुष्टयं समुदितं सर्वं प्रमाणेन ज्ञातव्यम्। तेन प्रमाणं सकलादेशो नयस्तु विकलादेश इति युक्तम्।

अथ प्रमाणनयैरधिगता अपि जीवादयः पदार्था भूयोऽपि उपायान्तरेणाधिगम्यन्ते इत्यर्थं चेतस्यवधार्य सूत्रमिदं सूरयः प्राहुः- ५

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ ७ ॥

निर्दिश्यत इति निर्देशः। निर्देशश्च स्वरूपकथनम्, स्वामित्वं च अधिपतित्वम्, साधनं चोत्पत्तिकारणम्, अधिकरणं चाधारः-अधिष्ठानमिति यावत्, स्थितिश्च कालावधा[3]रणम्, विधानं च प्रकारः, निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानानि, तेभ्यः निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः। एभ्यः षड्भ्यः अधिगमसम्यग्दर्शनमुत्पद्यते। १०

तत्र 'सम्यग्दर्शनं किम्?' इति केनचित् प्रश्ने कृते तं[4] प्रति सम्यग्दर्शनस्वरूपं निरूप्यते-तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति निर्देशः। नाम स्थापना द्रव्यं भावो वा निर्देश उच्यते। 'कस्य सम्यग्दर्शनं भवति?' इति सम्यग्दर्शनस्वामित्वप्रश्ने केनचित् कृते सति तं प्रत्युच्यते-'सामान्येन सम्यग्दर्शनस्य स्वामी जीवो भवति' इति स्वामित्वमुच्यते। १५

विशेषेण[5] तु चतुर्दशमार्गणानुवादेन स्वामित्वमुच्यते। तत्र गत्यनुवादेन नरकगतौ सप्तस्वपि पृथ्वीषु नारकाणां पर्याप्तकानां द्वे सम्यक्त्वे भवतः-औपशमिकं क्षायोपशमिकं च वेदनानुभवनादित्यर्थः। प्रथमपृथिव्यां पर्याप्तकानामपर्याप्तकानाञ्च क्षायिकं क्षायोपशमिकञ्च सम्यक्त्वं[6]मस्ति। कथम्? नरकगतौ [7]पूर्वं बद्धायुष्कस्य पश्चात् गृहीतक्षायिकक्षायोपशमिकसम्यक्त्वस्य अधःपृथ्वीषूत्पादाभावात् प्रथमपृथिव्यामपर्याप्तकानां क्षायिकं क्षायोपशमिकञ्च वर्तते। ननु वेदकयुक्तस्य तिर्यङ्मनुष्यनरकेषूत्पादाभावात् कथमपर्याप्तकानां तेषां क्षायोपशमिकमिति? सत्यम्; क्षपणायाः प्रारम्भकेन वेदकेन युक्तस्य तत्रोत्पादे विरोधाभावात्। एवं तिरश्चामप्यपर्याप्तकानां क्षायोपशमिकत्वं ज्ञातव्यम्। २०

तिर्यग्गतौ तिरश्चां पर्याप्तकानामौपशमिकं भवति। क्षायिकं क्षायोपशमिकं पर्याप्तापर्याप्तकानामस्ति। तिरश्चीनां क्षायिकं नास्ति। कस्मादिति चेत्? उच्यते-कर्मभूमिजो मनुष्य एव दर्शनमोहक्षपणायाः प्रारम्भको भवति। क्षपणायाः प्रारम्भकालात् पूर्वं तिर्यक्षु बद्धायुष्कोऽपि उत्कृष्टभोगभूमिजतिर्यङ्मनुष्येष्वेवोत्पद्यते न तिर्यक्स्त्रीषु। तदुक्तम्- २५

---

१ -कारो भवति पर्यायार्थिकद्रव्यार्थिकभेदात् आ०, ब०, द०। -कारो भवति द्रव्या-ब०। २ "णामं ठवणा दविए त्ति एस दव्वट्ठियस्स निक्खेवो। भावो उ पज्जवट्ठिअस्स परूवणा एस परमत्थो॥"-सन्मति० १।६। स० सि० १।६। जयध० पृ० २६०। ३ कालावधानम् ता०। ४ तं प्रति सम्यग्दर्शनमि-आ०, ब०, द०। ५-ण चतु-ब०, द०। ६-क्त्वमिति आ०, ब०, द०। ७ पूर्वबद्धा-ब०।

"दंसणमोहक्खवणापट्ठवगो कम्मभूमिजादो दु।
मणुसो केवलिमूले णिट्ठवगो चावि सव्वत्थ ॥"

[गो० जी० गा० ६४७]

औपशमिकं क्षायोपशमिकं च सम्यग्दर्शनं पर्याप्तिकानामेव तिरश्चीनां भवति, ५ न त्वपर्याप्तिकानां तिरश्चीनाम्।

एवं मनुष्यगतौ मनुष्याणां पर्याप्तापर्याप्तकानां क्षायिकं क्षायोपशमिकं च भवति। औपशमिकं पर्याप्तकानामेव, न त्वपर्याप्तकानाम्। मानुषीणां त्रितयमपि पर्याप्तिकानामेव, न त्वपर्याप्तिकानाम्। क्षायिकं तु सम्यक्त्वं यत् मानुषीणामुक्तं तत् भाववेदापेक्षयैव, द्रव्यस्त्रीणां तु सम्यग्दर्शनं न भवत्येव।

१० देवगतौ देवानां पर्याप्तापर्याप्तकानां सम्यग्दर्शनत्रयमपि भवति। अपर्याप्तावस्थायां देवानां कथमौपशमिकं भवति, औपशमिकयुक्तानां मरणासम्भवात्? सत्यम्; मिथ्यात्वपूर्वकौपशमिकयुक्तानामेव मरणासम्भवोऽस्ति, वेदकपूर्वकौपशमिकयुक्तानां तु मरणसम्भवोऽस्त्येव। कथम्? वेदकपूर्वकोपशमयुक्ता नियमेन श्रेण्यारोहणं कुर्वन्ति, श्रेण्यारूढात् (न्) चारित्रमोहोपशमेन सह मृतानपेक्ष्य अपर्याप्तावस्थायामपि देवानामौपशमिकं सम्भ-१५ वति। विशेषेण तु भवनवासिनां व्यन्तराणां ज्योतिष्काणां च देवानां तद्देवीनां च क्षायिकं न वर्तते। सौधर्मैशानकल्पवासिनीनां च देवीनां क्षायिकं सम्यग्दर्शनं नास्ति। सौधर्मैशानकल्पवासिनीनाञ्च देवीनां पर्याप्त(प्ति)कानामौपशमिकं क्षायोपशमिकं च वर्तते ॥ १ ॥

इन्द्रियानुवादेन पञ्चेन्द्रियसंज्ञिनां सम्यग्दर्शनत्रितयमप्यस्ति। एकेन्द्रियद्वीन्द्रिय-२० त्रीन्द्रियचतुरिन्द्रियाणामेकमपि नास्ति ॥ २ ॥

कायानुवादेन त्रसकायिकानां त्रितयमपि भवति। स्थावराणामेकमपि नास्ति ॥३॥

योगानुवादेन त्रयाणां योगानां त्रितयमपि भवति। अयोगिनां क्षायिकमेकमेव ॥४॥

वेदानुवादेन वेदत्रयस्य दृक्त्रयमपि भवति। अवेदानामौपशमिकं क्षायिकं च ॥ ५ ॥

२५ कषायानुवादेन चतुःकषायाणां त्रितयमपि विद्यते। अकषायाणामौपशमिकं क्षायिकं च ॥ ६ ॥

ज्ञानानुवादेन मतिश्रुतावधिमनःपर्ययज्ञानिनां त्रितयमपि दीयते। केवलिनां क्षायिकमेव ॥ ७ ॥

१-जादो उ आ०। २-पर्याप्तका-आ०, ब०, व०, द०। ३ वेदपूर्वकोप-ता०। वेदकपूर्वकोपशमकसंयु-द०। वेदकपूर्वकोपशमिकसंयु-ब०। ४ कुर्वन्तु व०। ५ श्रेण्यारोहात् आ०, ब, द०। ६-कं भ-व०। ७-वासिनां देवानां पर्या-ता०।-वासिनीनां दे-ब०। वासिनीनां देवानां व०।

संयमानुवादेन सामायिकछेदोपस्थापनासंयमिनां त्रितयम्। परिहारविशुद्धिसंयमिनां वेदकं क्षायिकं च। परिहारविशुद्धिसंयतानामौपशमिकं कस्मान्न भवतीति चेत्? मनःपर्ययपरिहारविशुद्ध्यौपशमिकसम्यक्त्वाहारकर्द्धीनां मध्येऽन्यतरसम्भवे परं त्रितयं न भवति। एकस्मिन् मनःपर्यये तु मिथ्यात्वपूर्वकौपशमिकप्रतिषेधो द्रष्टव्यो न वेदकपूर्वकस्य। उक्तं च–　　५

"मणपंज्जवपरिहारा उवसमसम्मत्त आहारया दोण्णि।
एदेसिं य एगदरे सेसाणं संभवो णत्थि॥ १ ॥"

[गो० जी० गा० ७२८]

आहारया दोण्णि आहारकाहारकमिश्रौ सूक्ष्मसाम्परायिकयथाख्यातसंयमिनामौपशमिकं क्षायिकं च वर्तते। संयतासंयतानामसंयतानां च त्रितयं वर्तते॥ ८ ॥　　१०

दर्शनानुवादेन चक्षुरचक्षुरवधिदर्शनिनां सद्दृष्टित्रयमपि स्यात्। केवलिनां क्षायिकमेव॥ ९ ॥

लेश्यानुवादेन षड्लेश्यानां सम्यक्त्वत्रयमपि स्यात्। निर्लेश्यानां क्षायिकमेव॥ १० ॥

भव्यानुवादेन भव्यानां त्रयमपि। अभव्यानामेकमपि नास्ति॥ ११ ॥　　१५

सम्यक्त्वानुवादेन यत्र यत्सम्यक्त्वं तत्र तदेव॥ १२ ॥

संज्ञानुवादेन संज्ञिनां सम्यग्दर्शनत्रयमपि असंज्ञिनामेकमपि नास्ति। ये तु न संज्ञिनो नाप्यसंज्ञिनस्तेषां क्षायिकमेव॥ १३ ॥

आहारानुवादेन आहारकाणां सम्यग्दर्शनत्रयमपि। छद्मस्थानाम नाहारकाणां त्रितयमपि सम्यग्दर्शनम्। समुद्घातप्राप्तानां केवलिनां क्षायिकमेव॥ १४ ॥　　२०

सम्यग्दर्शनस्य साधनं द्विप्रकारम्–आभ्यन्तर–बाह्यभेदात्। तत्राभ्यन्तरं सम्यग्दर्शनस्य साधनं दर्शनमोहस्योपशमः, क्षयोपशमः, क्षयो वा।

बाह्यं सम्यग्दर्शनस्य साधनं नारकाणां प्रथमद्वितीयतृतीयनरकभूमिषु केषाञ्चिज्जातिस्मरणं केषाञ्चिद्धर्मश्रवणं केषाञ्चिद्वेदनानुभवनम्। चतुर्थ्यादिसप्तमीपर्यन्तासु नरकभूमिषु नारकाणां जातिस्मरणवेदनाभिभवौ सम्यग्दर्शनस्य साधनम्। तिर्यङ्मनुष्याणां जातिस्मरणधर्मश्रवणजिनबिम्बदर्शनानि। देवानां सम्यग्दर्शनस्य साधनं केषाञ्चिज्जातिस्मरणम्, अन्येषां धर्मश्रवणम्, अपरेषां जिनमहिमदर्शनम्, इतरेषां देवर्द्धिदर्शनं सहस्रारपर्यन्तम्। आनतप्राणतारणाच्युतदेवानां देवर्द्धिदर्शनं सम्यग्दर्शनस्य साधनं　　२५

१–पर्याय–ब०। २–हारशुद्धौ–ता०, द०, ब०। ३ एकयतौ म–ब०, ता०। ४–कस्य प्रतिषेधो दृष्टो न आ०, ब०, द०।–कस्य प्रतिषेधो द्रष्ट–ब०। ५–पज्जय–ब०। ६ दोणि व०, आ०, द०, ब०। ७–मिश्रैः द०, आ०, ब०। ८ त्रितयं च व–ब०। ९–पि नि–ता०, ब०। १० क्षायिकम् ता०, ब०। ११–नामाहार–आ०।

नास्ति, जातिस्मरण-धर्मश्रवण-जिनमहिमदर्शनानि[1] च वर्तन्ते। नवग्रैवेयकदेवानां केषाञ्चिज्जातिस्मरणम्, अपरेषां धर्मश्रवणम्। ग्रैवेयकवासिनामहमिन्द्रत्वात् कथं धर्मश्रवणमिति चेत्? उच्यते–तत्र कश्चित् सम्यग्दृष्टिः परिपाटीं करोति, शास्त्रगुणनिकां करोति, तामाकर्ण्यान्यः कोऽपि तत्र स्थित एव सम्यग्दर्शनं गृह्णाति। अथवा, प्रमाणनयनिक्षेपास्तेषां
५ न विद्यन्ते, तत्त्वविचारस्तु लिङ्गिनामिव विद्यत इति नास्ति दोषः। अनुदिशानुत्तरविमानदेवास्तु पूर्वमेव गृहीतसम्यक्त्वास्तत्रोत्पद्यन्ते[2]। तेन तेषां जातिस्मरणधर्मश्रवणकल्पना नास्ति।

अधिकरणं द्विप्रकारम्–अभ्य(आभ्य)न्तर-बाह्यभेदात्। अ(आ)भ्यन्तरं सम्यग्दर्शनस्याधिकरणमात्मैव। बाह्यमधिकरणं सम्यग्दर्शनस्य चतुर्दशरज्ज्वायामा एकरज्जुविष्कम्भा
१० लोकनाडी वेदितव्या। जीवाकाशपुद्गलकालधर्माधर्माणां निश्चयनयेन स्वप्रदेशा एवाधिकरणम्। व्यवहारेण आकाशरहितानामाकाशमधिकरणम्। जीवस्य शरीरक्षेत्रादिरप्यधिकरणम्। कुटलकुटादिपुद्गलानां भूम्यादिरप्याधारः। जीवादिद्रव्यगुणपर्यायाणां ज्ञानसुखादिरूपादिर्रधिकरणं[3]–घटादीनां (रूपादिघटादीनां) जीवादिद्रव्यमेवाधिकरणम्। इत्याद्यधिकरणं वेदितव्यम्।

१५ औपशमिकस्य सम्यग्दर्शनस्य उत्कृष्टा निकृष्टा च स्थितिरन्तर्मुहूर्तः। क्षायिकस्य सम्यग्दर्शनस्य स्थितिः संसारिजीवस्य जघन्यान्तर्मुहूर्तिकी (न्तर्मौहूर्तिकी)। उत्कृष्टा तु त्रयस्त्रिंशत्सागरोपमानि। कथम्भूतानि त्रयस्त्रिंशत्सागरोपमानि? अन्तर्मुहूर्ताधिकाष्टवर्षहीनपूर्वकोटिद्वयसहितानि। तत्पश्चात् क्षायिकसद्दृष्टेः[4] संसारो निवर्तते। तथा हि–कश्चित् कर्मभूमिजो मनुष्यः पूर्वकोट्यायुरुत्पन्नो गर्भाष्टमवर्षानन्तरमन्तर्मुहूर्तेन
२० दर्शनमोहं क्षपयित्वा क्षायिकसद्दृष्टिर्भूत्वा तपो विधाय सर्वार्थसिद्धावुत्पद्य ततश्च्युत्वा[5] पूर्वकोट्यायुरुत्पद्य कर्मक्षयं कृत्वा मोक्षं याति, भवत्रयं नातिक्रामति। मुक्तजीवस्य साद्यनन्ता क्षायिकसम्यग्दर्शनस्य स्थितिर्वेदितव्या।

वेदकस्य जघन्या स्थितिरान्तर्मौहूर्तिकी[6]। वेदकस्योत्कृष्टा स्थितिः षट्षष्टिसागरोपमानि। सा कथम्? सौधर्मे द्वौ सागरौ, शुक्रे षोडश सागराः, शतारे अष्टादश सागराः,
२५ अष्टमग्रैवेयके त्रिंशत्सागराः, एवं षट्षष्टिसागराः। अथवा, सौधर्मे द्विरुत्पन्नस्य चत्वारः[7] सागराः, सनत्कुमारे सप्त सागराः, ब्रह्मणि दश सागराः, लान्तवे चतुर्दश सागराः, नवमग्रैवेयके एकत्रिंशत्सागराः, एवं षट्षष्टिः। अन्त्यसागरशेषे मनुष्यायुर्हीनं क्रियते तेन षट्षष्टिसागराः साधिका न भवन्ति।

सर्वजीवानां द्रव्यापेक्षयाऽनाद्यनन्ता स्थितिः, पर्यायापेक्षया एकसमयादिका[8]
३० स्थितिः। वागास्रवस्य मानसास्रवस्य[9] च जघन्येन एकसमयः, उत्कर्षेण घटिकाद्वयम्, मध्यमा

१–नि व–द०, आ०, ब०। २–न्ते तेषां आ०, द०, ब०। ३–'रधिकरणम्' इति पाठः निरर्थको भाति। ४–सम्यग्दृष्टेः आ०, ब०। ५–श्चुत्वा ता०, ब०। ६–रन्तर्मुहूर्तिकी आ०, ब०, व०, द०। ७–रः स–आ०, ब०, द०। ८–समयादिकस्थितिः द०, आ०, ब०। ९ मनसास्रवस्य आ०, ब०।

स्थितिरन्तर्मुहूर्तः[1]। कायास्रवस्य च जघन्येन एकसमयः, उत्कर्षेणानन्तकालः। तत्कथ-मनन्तकालः स्थितेः?[2] एकस्मिन्नेव काये मृत्वा मृत्वा स एव जीव उत्पद्यते, अन्ये अन्ये वा[3]। बन्धस्थितिर्वेदनीयस्य जघन्या द्वादश मुहूर्ताः। नामगोत्रयोरष्टौ मुहूर्ताः। शेषाणामन्तर्मुहूर्तो जघन्या स्थितिः। ज्ञानदर्शनावरणवेदनीयान्तरायाणामुत्कृष्टा स्थितिः त्रिंशत्सागरोपमकोटीकोट्यः। मोहनीयस्योत्कृष्टा स्थितिः सप्ततिसागरोपमकोटीकोट्यः। नामगोत्रयोरुत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोट्यः। आयुष्कर्मण[4] उत्कृष्टा स्थितिः त्रयस्त्रिंशत्सागरा एव। संवरस्य जघन्या स्थितिरन्तर्मुहूर्तः। उत्कृष्टा पूर्वकोटी देशोना। निर्जराया जघन्या स्थितिरेकसमयः, उत्कृष्टा अन्तर्मुहूर्तः। मोक्षस्य स्थितिः साद्यनन्ता।

विधानम्–'सम्यग्दर्शनं कतिभेदम्?' इति केनचित् पृष्टे सामान्येन सम्यग्दर्शनमेकमेव। विशेषेण निसर्गजाधिगमजविकल्पात् द्विविधम्[5]। उपशम-वेदक-क्षायिकभेदात् त्रिविधम्। दशविधञ्च। तदुक्तम्–

"आज्ञामार्गसमुद्भवमुपदेशात् सूत्रबीजसंक्षेपात्।
विस्तारार्थाभ्यां[6] भवमवपरमावादि गाढं च ॥ १ ॥"

[आत्मानु० श्लो० ११]

[7]अस्या आर्याया विवरणार्थं वृत्तत्रयमाह। तथा हि–

"आज्ञासम्यक्त्वमुक्तं यदुत विरुचितं वीतरागाज्ञयैव
त्यक्तग्रन्थप्रपञ्चं शिवममृतपथं श्रद्दधन्मोहशान्तेः।
मार्गश्रद्धानमाहुः पुरुषवरपुराणोपदेशोपजाता
या संज्ञा नागमाब्धिप्रसृतिभिरुपदेशादिरादेशि दृष्टिः ॥ १ ॥
आकर्ण्याचारसूत्रं मुनिचरणविधेः सूचनं श्रद्दधानः
सूक्तासौ सूत्रदृष्टिर्दुरधिगमगतेरर्थसार्थस्य बीजैः।
कैश्चिज्जातोपलब्धैरसमसमवशाद्[8] बीजदृष्टिः पदार्थान्
संक्षेपेणैव बुद्ध्वा रुचिमुपगतवान् साधुसंक्षेपदृष्टिः ॥ २ ॥
यः श्रुत्वा द्वादशाङ्गीं कृतरुचिरिह तं विद्धि विस्तारदृष्टिं
संजातार्थात्कुतश्चित्प्रवचनवचनान्यन्तरेणार्थदृष्टिः।
दृष्टिः साङ्गाङ्गबाह्यप्रवचनमवगाह्योत्थिता याऽवगाढा
कैवल्यालोकितार्थे रुचिरिह परमावादिगाढेति रूढा ॥ ३ ॥"

[आत्मानु० श्लो० १२-१४]

१–रन्तर्मुहूर्ताः द०, आ०, ब०। २ कथं तत्कालस्थितिः आ०, ब०। कथमनन्तकालस्थितिः द०, ब०। ३ अन्यो वा द०, आ०, ब०। ४ आयुकर्मणः ता०। ५ द्विधम् आ०, ब०। ६ विस्तरा–ब०। ७ वाक्यमिदं ता० प्रतौ नास्ति। ८–तोपलब्धेर–ता०।

एवं संख्येयविकल्पं सम्यग्दर्शनप्ररूपकशब्दानां संख्यातत्वात्। श्रद्धायक-श्रद्धातव्य-भेदादसंख्येया अनन्ताश्च सम्यग्दर्शनस्य भेदा भवन्ति। तदपि कस्मात्? श्रद्धायकानां भेदोऽसंख्यातानन्तमानावच्छिन्नः श्रद्धायकवृत्तित्वात् श्रद्धेयस्याप्येतदवच्छिन्नत्वम्, असंख्येयानन्तभेदस्तद्विषयत्वात्। एवं निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानविधिर्यथा ५ योजितस्तथा ज्ञाने चारित्रे च सूत्रानुसारेण योजनीयः।

आस्रवो द्विविधः–शुभाशुभविकल्पात्। तत्र कायिक आस्रवः हिंसानृतस्तेया-ब्रह्मादिषु प्रवृत्तिनिवृत्ती। वाचिकास्रवः परुषाक्रोशपिशुनपरोपघातादिषु वचस्सु प्रवृत्तिनिवृत्ती। मानस आस्रवो मिथ्याश्रुत्यभिघातेर्ष्यासूयादिषु मनसः प्रवृत्तिनिवृत्ती।

बन्धो द्विविधः–शुभाशुभभेदात्। चतुर्धा–प्रकृतिस्थित्यनुभवप्रदेशभेदात्। १० पञ्चधा–मिथ्यादर्शनाविरतिप्रमादकषाययोगभेदात्। अष्टधा–ज्ञानावरणादिभेदात्।

आस्रवभेदात् संवरोऽपि तद्भेदः। "आस्रवनिरोधः संवरः" [त० सू० ९।१] इति वचनात्।

निर्जरा द्विधा–यथाकालौपक्रमिकभेदात्। अष्टधा–ज्ञानावरणादिभेदात्।

ज्ञानं सामान्यादेकम्। द्विधा–प्रत्यक्षपरोक्षतः। पञ्चधा–मत्यादिभेदात्।

१५ चारित्रं सामान्यादेकम्। द्विधा–बाह्याभ्यन्तरनिवृत्तिभेदात्। त्रिधा–उप (औप) शमिक-क्षायिक-मिश्रभेदात्। पञ्चधा–सामायिक-छेदोपस्थापना-परिहारविशुद्धि-सूक्ष्मसाम्पराय-यथाख्यातभेदात्। इत्यादिविधानं वेदितव्यम्।

अथ जीवादीनामधिगमो यथा प्रमाणनयैर्भवति तथा निर्देशादिभिः षड्भिश्च भवति तथान्यैरपि कैश्चिदुपायैरधिगमो भवति न वा? इति प्रश्ने सूत्रमिदमुच्यते–

२० **सत्सङ्ख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥ ८ ॥**

'सत्' शब्दो यद्यप्यनेकार्थो वर्तते, "साध्वर्चितप्रशस्तेषु सत्येऽस्तित्वे च सन्मतः।" [ ] इति वचनात्, तथाप्यत्रास्तित्वे गृह्यते नान्यत्र। सङ्ख्याशब्देन भेदगणना वेदितव्या। क्षेत्रं निवास उच्यते। स तु वर्तमानकालविषयः। क्षेत्रमेव त्रिकालगोचरं स्पर्शनमुच्यते। मुख्य-व्यावहारिकविकल्पात् कालो द्विप्रकारः। विरहकालोऽन्तरं कथ्यते। २५ औपशमिकादिलक्षणो भावः। परस्परापेक्षया विशेषपरिज्ञानमल्पबहुत्वम्। सच्च संख्या च क्षेत्रं च स्पर्शनं च कालश्चान्तरं च भावश्चाल्पबहुत्वं च सत्संख्याक्षेत्रस्पर्शनकालान्तर-भावाल्पबहुत्वानि, तैस्तथोक्तैः। चकारः परस्परं समुच्चये वर्तते। तेनायमर्थः–न केवलं

१–त्वात् एवं आ०, ब०, द०। २–विधानतः वि–आ०, ब०, द०। ३ हिंसास्तेया–ता०, ब०। ४–दात् आस्रव–आ०, ब०, द०। ५ द्विविधा आ०, ब०, द०। ६–कालोपक्रमिकानोपक्रमिकभे–आ०, ब०, द०। ७ "संतपरूवणा दव्वपमाणाणुगमो खेत्ताणुगमो फोसणाणुगमो कालाणुगमो अंतराणुगमो भावाणुगमो अप्पाबहुगाणुगमो चेदि।"–षट्खं० १।७। ८ "सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्चिते च सत्।" इत्यमरः।

प्रमाणनयैर्निर्देशादिभिश्च सम्यग्दर्शनादीनां जीवादीनाञ्चाधिगमो भवति । किन्तु सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च अष्टभिरनुयोगैश्चाधिगमो भवति ।

ननु निर्देशात् सत् सिद्धम्, विधानात् संख्यापि ज्ञायते, अधिकरणात् क्षेत्रस्पर्शनद्वयस्वीकारो भविष्यति, स्थितिग्रहणात् कालो विज्ञायते, नामादिसङ्गृहीतो भावश्च वर्तते, पुनः सदादीनां ग्रहणं किमर्थम् ? साधूक्तं भवता । शिष्याभिप्रायवशादेषां ग्रहणम् । केचिच्छिष्याः संक्षेपरुचयः, केचिद्विस्तरप्रियाः, अन्ये मध्यमत्वसन्तोषिणः । सत्पुरुषाणां तूद्यमः सर्वजीवोपकारार्थ इति कारणादधिगमस्याभ्युपायः कृतः । अन्यथा प्रमाणनयै[1]रेवाधिगमो भवति, अपरग्रहणमनर्थकं भवति ।

तत्र तावज्जीवद्रव्यमुद्दिश्य सदाद्यधिकारो विधीयते । ते तु जीवाश्चतुर्दश[2]सु गुणस्थानेषु तिष्ठन्ति । कानि तानीति चेत् ? उच्यते[3]-मिथ्यादृष्टिः ॥ १ ॥ सासादनसम्यग्दृष्टिः ॥ २ ॥ सम्यग्मिथ्यादृष्टिः ॥ ३ ॥ असंयतसम्यग्दृष्टिः ॥ ४ ॥ देशसंयतः ॥ ५ ॥ प्रमत्तसंयतः ॥ ६ ॥ अप्रमत्तसंयतः ॥ ७ ॥ अपूर्वकरणगुणस्थाने उपशमकः क्षपकः ॥ ८ ॥ अनिवृत्तिबादरसाम्परायगुणस्थाने उपशमकः क्षपकः ॥ ९ ॥ सूक्ष्मसाम्परायगुणस्थाने उपशमकः क्षपकः ॥ १० ॥ उपशान्तकषायवीतरागछद्मस्थः ॥ ११ ॥ क्षीणकषायवीतरागछद्मस्थः ॥ १२ ॥ सयोगकेवली ॥ १३ ॥ अयोगकेवली[4] चेति ॥ १४ ॥ अमीषां[5] जीवसमासानां प्ररूपणार्थं चतुर्दशमार्गणास्थानानि ज्ञातव्यानि । तथा हि—गतयः ॥ १ ॥ इन्द्रियाणि ॥ २ ॥ कायाः ॥ ३ ॥ योगाः ॥ ४ ॥ वेदाः ॥ ५ ॥ कषायाः ॥ ६ ॥ ज्ञानानि ॥ ७ ॥ संयमाः ॥ ८ ॥ दर्शनानि ॥ ९ ॥ लेश्याः ॥ १० ॥ भव्याः ॥ ११ ॥ सम्यक्त्वानि ॥ १२ ॥ संज्ञाः ॥ १३ ॥ आहारकाश्चेति[6] ॥ १४ ॥

गुणस्थानेषु सत्प्ररूपणा द्विप्रकारा[7] सामान्यविशेषभेदात् । तत्र सामान्येन अस्ति मिथ्यादृष्टिः, अस्ति सासादनसम्यग्दृष्टिः, अस्ति सम्यग्मिथ्यादृष्टिः, अस्ति असंयतसम्यग्दृष्टिः, अस्ति संयतासंयतः, अस्ति प्रमत्तसंयत इत्यादि[8] चतुर्दशसु गुणस्थानेषु वक्तव्यम् ।

विशेषेण गत्यनुवादेन[9] नरकगतौ सप्तस्वपि पृथिवीषु मिथ्यादृष्ट्यादिचत्वारि गुणस्थानानि वर्तन्ते । तिर्यग्गतौ देशसंयतान्तानि पञ्च गुणस्थानानि सन्ति । मनुष्यगतौ चतुर्दशापि जाग्रति । देवगतौ आद्यानि चत्वारि विद्यन्ते ।

इन्द्रियानुवादेन[10] एकद्वित्रिचतुरिन्द्रियेषु प्रथमं गुणस्थानं ध्रियते । पञ्चेन्द्रियेषु चतुर्दशाप्यासते ।

कायानुवादेन[11] पृथिव्यादिपञ्चकायेषु प्रथमं गुणस्थानं जागर्ति । त्रसकायेषु चतुर्दशापि विद्यन्ते ।

१-नयैरधि-आ०, व०, द० । २-र्दशगुण-आ०, ब०, व०, द० । ३ उच्यन्ते आ०, ब०, द० । ४-ली अमी-आ०, ब०, द० । ५ षट्खण्डा० १।२-४ । ६-कश्चेति आ०, ब०, द० । ७ षट्खं० १।८-२२ । ८ चतुर्दश गुण-आ०, ब०, व०, द० । ९ षट्खं० १।२५-२९ । १० षट्खं० १।३३, ३७ । ११ षट्खं० १।४३, ४४ ।

योगानुवादेन[1] त्रिषु योगेषु सयोगकेवल्यन्तानि त्रयोदश गुणस्थानानि ध्रियन्ते। तत्पश्चादयोगकेवली।

वेदानुवादेन[2] त्रयाणां वेदानाम् अनिवृत्तिबादरान्तानि नव विद्यन्ते। वेदरहितेषु[3] अनिवृत्तिबादराद्ययोगकेवल्यन्तानि षट् गुणस्थानानि ज्ञातव्यानि। ननु एकस्यैव अनि-
५ वृत्तिबादरगुणस्थानस्य सवेदत्वमवेदत्वञ्च कथमिति चेत्? भण्यते-अनिवृत्तिगुणस्थानं षट्भागीक्रियते। तत्र प्रथमभागत्रये वेदानामनिवृत्तित्वात् सवेदत्वम्। अन्यत्र वेदानां निवृत्तित्वादवेदत्वम्।

कषायानुवादेन[4] क्रोधमानमायासु अनिवृत्तिबादरगुणस्थानान्तानि नव ज्ञातव्यानि। लोभकषाये मिथ्यादृष्ट्यादीनि दश। उपशान्तकषायक्षीणकषायसयोगकेवल्ययोगके-
१० वलिचतुष्टये[5] अकषायाः।

ज्ञानानुवादेन[6] मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानेषु आद्यं[7] गुणस्थानद्वयमस्ति। सम्यग्[8]-मिथ्यादृष्टेः ज्ञानमज्ञानञ्च केवलं न सम्भवति तस्याज्ञानत्रयाधारत्वात्। उक्तञ्च—

"मिस्से णाणत्तयं मिस्सं अण्णाणत्तयेण" [ ] इति।

तेन ज्ञानानुवादे मिश्रस्यानभिधानम्, तस्याज्ञानप्ररूपणायामेवाभिधानं ज्ञानं
१५ ज्ञातव्यम्, ज्ञानस्य[9] यथावस्थितार्थविषयत्वाभावात्। मतिश्रुतावधिज्ञानेषु क्षीणकषायान्तानि असंयतसम्यग्दृष्ट्यादीनि नव वर्तन्ते। मनःपर्ययज्ञाने प्रमत्तसंयतादीनि क्षीणकषायान्तानि सप्त गुणस्थानानि सन्ति। केवलज्ञाने[10] सयोगोऽयोगश्च गुणस्थानद्वयं वर्तते।

संयमानुवादेन[11] सामायिकच्छेदोपस्थानशुद्धिसंयमद्वये प्रमत्तादीनि चत्वारि गुणस्थानानि। परिहारविशुद्धिसंयमे[12] प्रमत्ताप्रमत्तद्वयम्। सूक्ष्मसाम्परायशुद्धिसंयमे सूक्ष्मसा-
२० म्परायगुणस्थानमेकमेव। यथाख्यातविहारशुद्धिसंयमे उपशान्तकषायादीनि चत्वारि गुणस्थानानि भवन्ति। देशसंयमे देशसंयमगुणस्थानमेकमेव। असंयता आदिगुणस्थानचतुष्टये भवन्ति।

दर्शनानुवादेन[13] चक्षुरचक्षुर्दर्शनयोः आदितो द्वादश गुणस्थानानि भवन्ति। अवधिदर्शने असंयतसद्दृष्ट्यादीनि[14] गुणस्थानानि नव भवन्ति। केवलदर्शने[15] सयोगायो-
२५ गद्वयं भवति।

---

१ षट्खं० १।४७-१००। २ षट्खं० १।१०१-१०३। ३ षट्खं० १।१०४। ४ षट्खं० १।१११-११४। ५-लिनश्च ये ते क-आ०, ब०, द०। ६ षट्खं० १।११५-२२। ७ आद्यगुण-ता०। ८ "सम्मामिच्छाइट्ठिट्ठाणे तिण्णि वि णाणाणि अण्णाणेण मिस्साणि। आभिणिबोहियणाणं मदि-अण्णाणेण मिस्सियं, सुदणाणं सुदअण्णाणेण मिस्सियं, ओहिणाणं विभंगणाणेण मिस्सियं, तिण्णि वि णाणाणि अण्णाणेण मिस्साणि वा॥"-षट्खं० १।११९। ९ सम्यग्मिथ्यादृष्टेर्ज्ञानस्य। १० "केवलणाणी तिसु ट्ठाणेसु सजोगकेवली अजोगकेवली सिद्धा चेदि।"-षट्खं० १।१२२। ११ षट्खं० १।१२४-१२९। १२ परिहारशुद्धि-ता०। १३ षट्खं० १।१३२-१३४। १४-नि नव गुणस्थानानि भव-आ०, ब०, द०। १५ "केवलदंसणी तिसु ट्ठाणेसु सजोगिकेवली अजोगिकेवली सिद्धा चेदि।"-षट्खं० १।१३५।

लेश्यानुवादेन[1] कृष्णनील[2]कापोतलेश्यासु मिथ्यादृष्ट्यादीनि चत्वारि गुणस्थानानि भवन्ति। तेजःपद्मलेश्ययोरादितः सप्त गुणस्थानानि[3]। शुक्ललेश्यायामादितस्त्रयोदश गुणस्थानानि सन्ति। चतुर्दशं गुणस्थानमलेश्यम्।

भव्यानुवादेन[4] भव्येषु चतुर्दशापि गुणस्थानानि भवन्ति। अभव्येषु प्रथममेव गुणस्थानं सत्।

सम्यक्त्वानुवादेन[5] क्षायिकसम्यक्त्वे असंयतसद्दृष्ट्यादीनि एकादश गुणस्थानानि भवन्ति। वेदकसम्यक्त्वे चतुर्थादीनि चत्वारि। औपशमिकसम्यक्त्वे चतुर्थादीनि अष्ट गुणस्थानानि सन्ति। [6]सासादनसम्यग्दृष्टौ सासादनगुणस्थानमेकमेव। सम्यग्मिथ्यादृष्टौ सम्यग्मिथ्यादृष्टिगुणस्थानमेकमेव। मिथ्यादृष्टौ मिथ्यादृष्टिगुणस्थानमेकमेव।

संज्ञ्यनुवादेन[7] संज्ञिषु आदितः द्वादश गुणस्थानानि सन्ति। असंज्ञिषु [8]प्रथममेव गुणस्थानं सत्। अन्त्यगुणस्थानद्वयं [9]संज्ञ्यसंज्ञिव्यपदेशरहितम्।

आहारानुवादेन[10] आहारकेषु आदितः त्रयोदश गुणस्थानानि सन्ति। अनाहारकेषु विग्रहगतिषु मिथ्यादृष्टि-सासादनसद्दृष्टि-असंयतसद्दृष्टिगुणस्थानत्रयमस्ति। समुद्घातावसरे सयोगकेवली अयोगकेवली सिद्धाश्च गुणस्थानरहिताः। इति सत्प्ररूपणा समाप्ता।

अथ संख्याप्ररूपणा प्रारभ्यते। संख्या द्विप्रकारा-सामान्यविशेषभेदात्। सामान्येन मिथ्यादृष्टयो[11] जीवा अनन्तानन्तसंख्याः। सासादनसम्यग्दृष्टयः[12] सम्यग्मिथ्यादृष्टयः असंयतसम्यग्दृष्टयो देशसंयताश्च पल्योपमासंख्येयभागसंख्याः। तथाहि-[13]द्वितीये गुणस्थाने द्वापञ्चाशत्कोटयः ५२००००००० । [14]तृतीये गुणस्थाने चतुरधिकशतकोटयः १०४०००००००। चतुर्थगुणस्थाने सप्तशतकोटयः ७०००००००००। पञ्चमगुणस्थाने त्रयोदशकोटयः १३००००००० । उक्तञ्च[15]—

"तेरहकोडी देसे बावण्णा सासणा मुणेयव्वा।
मिस्सम्मि य[16] ते दूणा असंजया सत्तसयकोडी[17] ॥" [ ]

प्रमत्तसंयताः[18] कोटिपृथक्त्वसंख्याः। पृथक्त्वमिति कोऽर्थः ? आगमभाषया

---

१ षट्खं० १।१३६-१४० । २-लकपो-आ०, ब०, द०। ३-नि भवन्ति शु-ब०। ४ षट्खं० १।१४२-१४३। ५ षट्खं० १।१४५-१५०। ६ सासादनस्य सम्य-ता०। ७ षट्खं० १।१७३-१७४। ८ प्रथममेकमेव आ०, ब०। ९ संज्ञासंज्ञि-आ०, ब०, द०। १० षट्खं० १।१७६-१७७। ११ षट्खं० द्र० २। १२ षट्खं० द्र० ६। १३ द्वितीयगु-आ०, ब०, द०। १४ तृतीयगु-आ०, ब०, द०। १५ "वुत्तं च तेरहकोडी देसे बावण्णं ...॥ अहवा, तेरहकोडी देसे पण्णास सासणे मुणेयव्वा। मिस्से वि य तद्दुगुणा असंजदे सत्तकोडिसया॥"-ध० टी० द्र० पृ० २५२। त्रयोदशकोटयो देशे द्वापञ्चाशत् सासादना मन्तव्याः। मिश्रे च ते द्विगुणा असंयताः सप्तशतकोटयः॥ १६-य त दू-आ०, ब०, ज०, द०। १७ गो० जी० गा० ६४२। १८ षट्खं० द्र० ७। स० सि० १.८। गो० जी० गा० ६२५।

-तिसृणां कोटीनामुपरि नवानां कोटीनामधस्तात्[1] पृथक्त्वमिति संज्ञा[2]। तथापि प्रमत्तसंयता न निर्धारयितुं शक्याः[3]। तेन तत्संख्या कथ्यते—कोटिपञ्चकं त्रिनवतिलक्षा अष्टानवतिसहस्राः शतद्वयं षट् च वेदितव्याः ५९३९८२०६। अप्रमत्तसंयताः[4] संख्येयाः। सा संख्या न ज्ञायत इति चेत्; उच्यते—कोटिद्वयं षण्णवतिलक्षा नवनवतिसहस्राः
५ शतमेकं[5] त्र्याधिकम्। प्रमत्तसंयतार्धपरिमाणा इत्यर्थः। २९६९९१०३। तदुक्तम्[6]—

"छस्सुण्ण-बेण्णि-अट्ठ य णव-तिय-णव-पंच होंति पम्मत्ता।
ताणद्धमप्पमत्ता गुणठाणजुगे[7] जिणुद्दिट्ठा॥" [ ]

अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायोपशान्तकषायाः चत्वार उपशमकाः। [8]ते प्रत्येकं एकत्रैकत्र गुणस्थाने [9]अष्टसु अष्टसु समयेषु एकस्मिन्नेकस्मिन्समये यथासंख्यं
१० षोडश-चतुर्विंशति-त्रिंशत्-षट्त्रिंशत्-द्विचत्वारिंशत्-अष्टचत्वारिंशत्-चतुष्पञ्चाशत्-चतुष्पञ्चाशत् भवन्तीति। अष्टसमयेषु चतुर्गुणस्थानवर्तिनां सामान्येन [10]उत्कृष्टा संख्या-१६।२४।३०।३६।४२।४८।५४।५४। विशेषेण तु प्रथमादिसमयेषु एको वा द्वौ वा त्रयो वा चेत्यादि षोडशाद्युत्कृष्टसंख्या यावत् प्रतिपत्तव्याः। उक्तञ्च—

"सोलसगं चदुवीसं तीसं छत्तीसमेव जाणाहि।
१५ बादालं अडदालं दो चउवण्णा य उवसमग्गा[11]॥" [ ]

ते तु स्वकालेन समुदिताः संख्येया भवन्ति नवनवत्यधिकशतद्वयपरिमाणा [12]एकत्रैकत्र गुणस्थाने भवन्तीत्यर्थः। २९९। तदुक्तम्—

"णवणवदो एक्कठाण[13] उवसंता।" [ ]

ननु [14]चाष्टसमयेषु षोडशादीनां समुदितानां चतुरधिकं शतत्रयं भवति कथमुक्तं
२० नवनवत्यधिकं[15] शतद्वयम्? सत्यम्; [16]अष्टसमयेषु औपशमिका निरन्तरा भवन्ति परिपूर्णा

१-स्तात्तु पृ-आ०, ब०, द०। २ "पुधत्तमिदि तिण्हं कोडीणमुवरि णवण्हं कोडीणं हेट्ठदो जा संखा सा घेतव्वा।"-ध० टी०, द्र० पृ० ८९। ३ शक्ताः आ०, ब०, द०। ४ षट्खं० द्र० ८। ५-मेकं अधि-आ०, ब०। ६ "वुत्तं च-तिगहियसदणवणउदी छण्णउदी अप्पमत्त बे कोडी। पंचेव य तेणउदी णवट्ठविसया छ उत्तरा चे य॥"-ध० टी० द्र० पृ० ८९। गो० जी० गा० ६२४। ७ जिणुदिट्ठा ता०, ब०, ब०, द०। षट् शून्यम् द्वौ अष्ट च नव त्रीणि नव पञ्च भवन्ति प्रमत्ताः। तेषामर्द्धमप्रमत्ता गुणस्थानयुगे जिनोद्दिष्टाः॥ ८ "चदुण्हमुवसामगा दव्वपमाणेण केवडिया? पवेसेण एक्को वा दो वा तिण्णि वा उक्कस्सेण चउवण्णं।"-षट्खं० द्र० ९। ९ अष्टगुणसमयेषु एक-आ०, ब०, द०। १० ध० टी० द्र० पृ० ९०। ११ षोडशचतुर्विंशतित्रिंशत्षट्त्रिंशदेव जानीहि द्विचत्वारिंशत् अष्टचत्वारिंशत् द्वौ चतुःपञ्चाशत् च उपशमकाः॥ १२ एकत्रयिक गुण-ता०। १३-ठाणे उ-आ०, द०, ब०। नव नव द्वौ एकस्थाने उपशान्ताः। १४ चाष्टमस-आ०, ब०, द०। १५-धिकशत-आ०, ब०, द०। १६ अष्टमस-आ०, ब०।

न लभ्यन्ते किन्तु पञ्चहीना भवन्ति, इति चतुर्गुणस्थानवर्तिनामपि उपशमकानां समुदितानां षण्णवत्यधिकानि एकादश शतानि भवन्ति ॥ ११९६ ॥

अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायक्षीणकषायायोगकेवलिनश्च – एतेषामष्टधा समयक्रमः पूर्ववद् द्रष्टव्यः, केवलं तेषामुपशमकेभ्यो [2]द्विगुणसंख्या । तदुक्तम्—

"[3]बत्तोसं अडदालं सट्ठी [4]बाहत्तरी य चुलसीदी ।
छण्णउदी अट्ठुत्तरअट्ठुत्तरसयं च [5]बोधव्वा[5] ॥" ५

३२।४८।६०।७२।८४।९६।१०८।१०८ ।

अत्रापि एको वा द्वौ वा त्रयो वा [5]इत्याद्युत्कृष्टाष्टसमयप्रवेशापेक्षयोक्तम् , स्वकालेन समुदिताः प्रत्येकम् अष्टनवत्युत्तरपञ्चशतपरिमाणा भवन्ति ॥ ५९८ ॥ नन्वत्रापि षट्शतानि अष्टाधिकानि भवन्ति कथमष्टनवत्यधिकानि पञ्चशतान्युक्तानि ? सत्यम् ; उपशमकेषु यथा पञ्च हीयन्ते तथा क्षपकेषु द्विगुणहानौ [6]दश हीयन्ते । तेन एकगुणस्थाने पञ्चशतानि अष्टनवत्यधिकानि भवन्ति । ।५९८। गुणस्थानपञ्चकवर्तिनां क्षपकाणां गुणसमुदितानां दशोनानि त्रीणि सहस्राणि भवन्ति । तदुक्तम्— १०

"[7]खीणकसायाण पुणो तिण्णि सहस्सा दसूणया भणिया ।" [ ] ॥ २९९० ॥

सयोगकेवलिनामपि[8] उपशमकेभ्यो द्विगुणत्वात् समयेषु प्रथमादिसमयक्रमेण एको वा द्वौ वा त्रयो वा [9]चत्वारो वा इत्यादिद्वात्रिंशदाद्युत्कृष्टसंख्यायावत् संख्याभेदः प्रतिपत्तव्यः । १५

नन्वेवमुदाहृतक्षपकेभ्यो भेदेनाभिधानमेषामनर्थकमिति चेत् ; न ; स्वकालसमुदितसंख्यापेक्षया तेषां तेभ्यो विशेषसम्भवात् । सयोगकेवलिनो हि स्वकालेन समुदिता लक्षपृथक्त्वसंख्या भवन्ति । अष्टलक्षाष्टनवतिसहस्रद्व्यधिकपञ्चशतपरिमाणा भवन्तीत्यर्थः ॥ ८९८५०२ ॥ [10]तदुक्तम्— २०

---

१ "सउक्कस्सपमाणजीवसहिदा सव्वे समया जुगवं ण लब्भंति त्ति के वि पुव्वुत्तपमाणं पंचूणं करेंति । एदं पंचूणं वक्खाणं पवाइज्जमाणं दक्खिणमाइरियपरंपरागयमिदि जं वुत्तं होइ । पुव्वुत्तवक्खाणमपवाइज्जमाणं वाउं आइरियपरंपरा-अणागदमिदि णायव्वं ।"-ध० टी० द्र० पृ० ९२ । पञ्चसं० श्लो० ६८ । २ द्विगुणा सं-आ०, ब०, द०, ब० । "चउण्हं खवा अजोगिकेवली दव्वपमाणेण केवडिया ? पवेसेण एक्को वा दो वा तिण्णि वा, उक्कस्सेण अट्ठोत्तरसदं ।"–षट्खं० द्र० ११ । ३ बावत्त– आ०, ब० । ४ उद्धृतेयम्-ध० टी० द्र० पृ० ९३ । गो० जी० गा० ६२७ । द्वात्रिंशत् अष्टचत्वारिंशत् षष्टिः द्वासप्ततिश्च चतुरशीतिः । षण्णवतिरष्टोत्तराष्टोत्तरशतं च बोद्धव्याः ॥ ५ इत्याद्युक्त्वष्टाष्टसमय– ता० । ६ "एत्थ दस अवणिदे दक्खिणपडिवत्ती हवदि ।"-ध० टी० द्र० ९४ । ७ क्षीणकषायाणां पुनः त्रीणि सहस्राणि दशोनानि भणितानि । ८ "सजोगिकेवली दव्वपमाणेण केवडिया; पवेसणेण एक्को वा दो वा तिण्णि वा, उक्कस्सेण अट्ठुत्तरसयं ।"-षट्खं० द्र० १३ । ९ चत्वारो इत्याद्युत्कृष्टसंख्यायावत् आ०, ब०, द० । १० उद्धृतेयम्-ध० टी० द्र० पृ० ९६ । गो० जी० गा० ६२८ ।

"अट्ठेव सयसहस्सा अट्ठाणउदो य तह सहस्साइं ।
सखा जात्र जिणाणं पंचेत्र सया बिउत्तरा होंति[1] ॥" [ ]

सर्वेऽप्येते प्रमत्ताद्ययोगकेवल्यन्ताः समुदिता उत्कर्षेण यदि कदाचिदेकस्मिन् समये भवन्ति तदा त्रिहीननवकोटिसंख्या एव भवन्ति ॥ ८९९९९९९७ ॥ [2]उक्तञ्च—

५ "सत्ताइं अट्ठंता छण्णवमज्झा य संजदा सव्वे ।
अंजुलिमउलियहत्थो[3] तियरणसुद्धो णमंसामि[4] ॥" [ ]

इति सामान्यसंख्या समाप्ता ।

अथ विशेषसंख्या [5]प्रोच्यते–विशेषेण गत्यनुवादेन[6] नरकगतौ प्रथमनरकभूमौ नारका मिथ्यादृष्टयोऽसंख्याताः श्रेणयः । कोऽर्थः ? प्रतरासंख्येयभागप्रमिता इत्यर्थः ।
१० अथ केयं[7] श्रेणिरिति चेत् ? उच्यते—सप्तरज्जुकमयी मुक्ताफलमालावत् आकाशप्रदेशपङ्क्तिः श्रेणिरुच्यते । मानविशेष इत्यर्थः । प्रतरासंख्येयभागप्रमिता इति यदुक्तं स प्रतरः कियान् भवति ? श्रेणिगुणिता श्रेणिः प्रतर उच्यते । प्रतरासंख्यातभागप्रमितानामसंख्यातानां श्रेणीनां यावन्तः प्रदेशाः तावन्तस्तत्र नारका इत्यर्थः । [8]द्वितीयनरकभूम्यादिषु सप्तमीभूमिर्यावत् मिथ्यादृष्टयो नारकाः श्रेण्यसंख्येयभागप्रमिताः ।
१५ स चासंख्येयभागः असंख्येययोजनकोटिकोटयः । सर्वासु नरकभूमिषु सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः असयंतसम्यग्दृष्टयश्च पल्योपमस्याऽसंख्येयभागप्रमिताः सन्ति । अथ सासादनादयः पुनरुच्यन्ते । तथा हि—देशविरतानां त्रयोदशकोटयः । सासादनानां द्विपञ्चाशत्कोटयः । मिश्राणां चतुरधिककोटिशतम् । असंयतसम्यग्दृष्टीनां कोटिशतानि सप्त । उक्तञ्च—

२० "तेरसकोटी देसे बावण्णं सासणे मुणेयव्वा ॥
तद्दूणा मिस्सगुणे असंजदा सत्तकोडिसया ॥" [ ]

अत्र बालावबोधनार्थत्वात् पुनरुक्तदोषो न ग्राह्यः ।

अथ [10]तिर्यग्गतिजीवसंख्या कथ्यते । तत्र मिथ्यादृष्टयोऽनन्तानन्ताः,[11] सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयोऽसंयतसम्यग्दृष्टयो देशसंयताः पल्यासंख्येयभागमिताः ।
२५ मनुष्यगतौ[12] मिथ्यादृष्टयः श्रेण्यसंख्येयभागमिताः । स त्वसंख्येयभागः असंख्ये[13]ययोजनकोटिकोटयः । सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः असंयतसम्यग्दृष्टयो

---

१ अष्टैव शतसहस्राणि अष्टनवतिश्च तथा सहस्राणि । संख्या यावत् जिनानां पञ्चैव शतं द्व्युत्तरं भवति ॥ २ गो० जी० गा० ६२२ । ३–हत्थे तियरणशुद्धे आ०, द०, ब० । ४ सप्तादि अष्टान्ताः षट्नवमध्याश्च संयताः सर्वे । अञ्जलिमुकुलितहस्तः त्रिकरणशुद्धः नमस्करोमि ॥ ५ प्रारभ्यते आ०, ब०, द० । ६ षट्खं० द्र० १७, १९ । ७ "का सेढी सत्तरज्जूमेत्तायामो ।"–ध० टी० द्र० पृ० ३३ । ८ षट्खं० द्र० २२ । ९ तेरहको–आ०, ब०, ब०, द० । गो० जी० गा० ६४१ । १० षट्खं० द्र० २४–२९ । ११–योऽनन्ताः आ०, ब०, द० । १२ षट्खं० द्र० ४०–४२ । १३–ख्येया यो–आ०, ब०, द० ।

देशसंयताः संख्येयाः । प्रमत्तसंयतादीनां सामान्योक्ता संख्या ।

देवगतौ[1] मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टयः पल्यासंख्येयभागप्रमिताः ।

इन्द्रियानुवादेन[2] एकेन्द्रिया[3] मिथ्यादृष्टयोऽनन्तानन्ताः । द्वित्रिचतुरिन्द्रिया असंख्येयाः श्रेणयः, प्रतराऽसंख्येयभागप्रमिताः । पञ्चेन्द्रियेषु प्रथमगुणस्थाना असंख्येयाः श्रेणयः, ५ प्रतरासंख्येयभागप्रमिताः । पञ्चेन्द्रियेषु सासादनसम्यग्दृष्ट्यादयस्त्रयोदशगुणस्थानवर्तिनः सामान्योक्तसंख्याः ।

कायानुवादेन[5] पृथिव्यप्तेजोवायुकायिका असंख्येया लोकाः । अथ कोऽयं लोको नाम ? मानविशेषः, प्रतरश्रेणिगुणितो लोको भवति । वनस्पतिकायिका अनन्तानन्ताः । त्रसकायिकसंख्या पञ्चेन्द्रियवत् । १०

योगानुवादेन[6] मनोयोगिनो वाग्योगिनश्च मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः, प्रतरासंख्येयभागप्रमिताः । काययोगिनो मिथ्यादृष्टयोऽनन्ताऽनन्ताः । त्रियोगवतां मध्ये सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयोऽसंयतसम्यग्दृष्टयो देशसंयताः पल्यासंख्येयभागप्रमिताः । प्रमत्ताद्यष्टगुणस्थानवर्तिनः संख्येयाः । अयोगकेवलिनः सामान्योक्तसंख्याः ।

वेदानुवादेन[8] स्त्रीवेदाः पुंवेदाश्च मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । नपुंसकवेदा मिथ्यादृष्टयोऽनन्तानन्ताः । स्त्रीवेदा नपुंसकवेदाश्च सासादनसम्यग्दृष्ट्यादिचतुर्गुणस्थानवर्तिनः सामान्योक्तसंख्याः । प्रमत्तसंयतादयश्चतुर्गुणस्थानवर्तिनः संख्येयाः । पुंवेदाः सासादनसम्यग्दृष्ट्यादिचतुर्गुणस्थानवर्तिनः[10] सामान्योक्तसंख्याः । प्रमत्तसंयतादिचतुर्गुणस्थानवर्तिनः संख्येयाः सामान्योक्तसंख्याः । अवेदा अनिवृत्तिबादरादयः षड्गुणस्थानाः सामान्योक्तसंख्याः । २०

कषायानुवादेन[11] क्रोधमानमायासु मिथ्यादृष्टि-ससादनसम्यग्दृष्टि-सम्यग्मिथ्यादृष्टि[12]-असंयतसम्यग्दृष्टि-संयतासंयताः सामान्योक्तसंख्याः । प्रमत्तसंयतादयश्चत्वारः संख्येयाः । लोभकषायाणामपि उक्त एव क्रमोऽस्ति, परन्तु अयं विशेषो यत् सूक्ष्मसाम्परायसंयताः सामान्योक्तसंख्याः । अकषाया उपाशान्तकषायादयश्चत्वारः सामान्योक्तसंख्याः ।

ज्ञानानुवादेन[13] मत्यज्ञानिनः श्रुताज्ञानिनो मिथ्यादृष्टयः सासादनसम्यग्दृष्टयः २५ सामान्योक्तसंख्याः । कदवधयो मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयप्रमिताः । सासादनसम्यग्दृष्टयो विभङ्गज्ञानिनः पल्योपमासंख्येयभागप्रमिताः । मतिश्रुतज्ञानिनोऽसंयतसम्यग्दृष्ट्यादयो नवगुणस्थानाः सामान्योक्तसंख्याः । तृतीयज्ञानिनः चतुर्थपञ्चमगुणस्था-

---

१-षट्खं० टी० ४३-७३ । २ षट्खं० टी० ७४-८६ । ३-न्द्रियमि-आ०, ब०, ब०, द० । ४-दयोदेश-आ०, ब०, द० । ५ षट्खं० टी० ८७-१०२ । ६ षट्खं० टी० १०३-१२३ । ७-गुणवर्तिनः आ०, ब०, द० । ८ षट्खं० टी० १२४-१३४ । ९ सामान्योक्तसंख्या आ०, ब०, द० । १०-नः संख्येयाः सा-आ०, ब०, द० । ११ षट्खं० टी० १३५-१४० । १२-ष्टिसंय-ता० । १३ षट्खं० टी० १४१-१४७ ।

नाः सामान्योक्तसंख्याः। प्रमत्तसंयतादयः सप्तगुणस्थानाः संख्येयाः। चतुर्थज्ञानाः प्रमत्तसं-
यतादयः[1] सप्तगुणस्थानाः संख्येयाः। पञ्चमज्ञानाः[2] सयोगा अयोगाश्च सामान्योक्तसंख्याः।

संयमानुवादेन[3] सामायिकच्छेदोपस्थापनशुद्धिसंयताः प्रमत्तसंयतादयश्चतुर्गुणस्थानाः
सामान्योक्तसंख्याः। परिहारशुद्धिसंयताः प्रमत्तसंयता अप्रमत्तसंयताश्च संख्येयाः। सूक्ष्म-
५ साम्परायशुद्धिसंयता यथाख्यातविहारशुद्धिसंयता देशसंयता असंयताश्च सामान्यो-
क्तसंख्याः।

दर्शनानुवादेन[4] चक्षुर्दर्शनिनो मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः, प्रतरासंख्येयभाग-
प्रमिताश्च। अचक्षुर्दर्शनिनो मिथ्यादृष्टयोऽनन्तानन्ताः। चक्षुर्दर्शनिनोऽचक्षुर्दर्शनिनश्च सा-
सादनसम्यग्दृष्ट्यादय एकादशगुणस्थानाः सामान्योक्तसंख्याः। अवधिदर्शनिनस्तृतीय-
१० ज्ञानिवत्। केवलदर्शनिनः केवलज्ञानिवत्।

लेश्यानुवादेन[5] कृष्णनीलकापोतलेश्यासु आदितश्चतुर्गुणस्थानाः सामान्योक्तसंख्याः।
तेजःपद्मलेश्ययोरादितः पञ्चगुणस्थानाः स्त्रीवेदवद् वेदितव्याः—मिथ्यादृष्टयोऽसंख्येयाः
श्रेणयः प्रतरासंख्येयभागप्रमिताः, सासादनसम्यग्दृष्टि-सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टि-
संयतासंयताः सामान्योक्तसंख्या वेदितव्या इत्यर्थः। तेजःपद्मलेश्ययोः प्रमत्ताऽप्रमत्त-
१५ संयताः संख्येयाः। शुक्ललेश्यायामादितः पञ्चगुणस्थानाः पल्योपमासंख्येयभागप्रमिताः[6]।
शुक्ललेश्यायां प्रमत्ताऽप्रमत्तसंयता संख्येयाः। शुक्ललेश्यायामपूर्वकरणादिसप्तगुणस्था-
नाः सामान्योक्तसंख्याः।

भव्यानुवादेन[7] भव्येषु[8] चतुर्दशसु गुणस्थानेषु सामान्योक्तसंख्याः। अभव्या अन-
न्तानन्ताः।

२० सम्यक्त्वानुवादेन[9] क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टयः पल्यासंख्येयभागप्र-
मिताः। क्षायिकसम्यग्दृष्टिषु देशसंयतादयः सप्तगुणस्थानाः संख्येयाः। अपूर्वकरणक्षपका
अनिवृत्तिकरणक्षपका सूक्ष्मसाम्परायक्षपकाः क्षीणकषायाश्चेति चत्वारः सयोगकेवलिनोऽ-
योगकेवलिनश्च सामान्योक्तसंख्याः।

[10]वेदकसम्यग्दृष्टिषु असंयतसम्यग्दृष्ट्यादयश्चतुर्गुणस्थानाः[11] सामान्योक्तसंख्याः।
२५ औपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टयो[12] देशसंयताश्च पल्यासंख्येयभागप्रमिताः[13]।
औपशमिकसम्यग्दृष्टिषु प्रमत्ताप्रमत्तसंयताः संख्येयाः। अपूर्वकरणौपशमिका अनिवृत्ति-
करणौपशमिकाः सूक्ष्मसाम्परायौपशमिका उपशान्तकषायाश्च सामान्योक्तसंख्याः। सासा-
दनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयो मिथ्यादृष्टयश्च सामान्योक्तसंख्याः।

१–यःक्षीणकषायान्ताः सं–द०। २ पञ्चम ज्ञानिनः द०। ३ षट्खं० द्र० १४८–१५४। ४ षट्खं०द्र०१५५–१६१। ५ षट्खं० द्र० १६२–१७१। ६–पमाः असंख्येय–आ०, ब०, द०। ७ षट्खं० द्र० १७२–१७३। ८ चतुर्दशगु–आ०, ब०, द०। ९ षट्खं० द्र० १७४–१८४। १० क्षायो-पशमिकसम्यग्दृष्टिषु द०। ११–दयः अप्रमत्तान्ताः सा–द०। १२–दृष्टि संयतासंयताः प–द०। १३–ताः प्रमत्ताप्रमत्तसंयताः संख्येयाः चत्वारः उपशमकाः सामान्योक्तसंख्याः संज्ञानुवादेन द०।

संज्ञानुवादेन[1] संज्ञिषु मिथ्यादृष्ट्यादयो द्वादशगुणस्थानाः चक्षुर्दर्शनिवत् । तथाहि—मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः । अन्ये एकादश सामान्योक्तसंख्याः । असंज्ञिनो मिथ्यादृष्टयोऽनन्तानन्ताः । न संज्ञिनो नाप्यसंज्ञिनः ये[2] ते सामान्योक्तसंख्याः ।

आहारानुवादेन[3] आहारकेषु आदितस्त्रयोदशगुणस्थानाः सामान्योक्तसंख्याः । अनाहारकेषु मिथ्यादृष्टयः सासादनसम्यग्दृष्टयोऽसंयतसम्यग्दृष्टयश्च सामान्योक्तसंख्याः । मिश्रास्तु अनाहारका न भवन्ति मृतेरभावात् । तथा[4] चोक्तम्—

"मिश्रे क्षीणकषाये च मरणं नास्ति देहिनाम् ।
शेषेष्वेकादशस्वस्ति मृतिरित्यूचिरे विदः ॥" [ ]

अनाहारकेषु सयोगकेवलिनः संख्येयाः, यतः केषुचित् सयोगकेवलिषु समुद्घातो वर्तते केषुचित् समुद्घातो नास्ति । ये समुद्घाताः ते अनाहारकाः । अनाहारकेषु अयोगकेवलिनः सामान्योक्तसंख्याः । इति संख्यानुयोगः समाप्तः ।

अथेदानीं क्षेत्रप्ररूपणा कथ्यते । सामान्यविशेषभेदात् क्षेत्रं द्विप्रकारम् । तत्र[5] तावत् सामान्येन[6] मिथ्यादृष्टीनां क्षेत्रं सर्वलोकः । सासादनसम्यग्दृष्टीनां सम्यग्मिथ्यादृष्टीनाम[7]संयतसम्यग्दृष्टीनां संयतासंयतानां प्रमत्तसंयतानामप्रमत्तसंयतानामपूर्वकरणानामनिवृत्तिबादरसाम्परायाणां सूक्ष्मसाम्परायाणामुपशान्तकषायाणां क्षीणकषायाणाम[8]योगकेवलिनां क्षेत्रं लोकस्यासंख्येयभागः । सयोगकेवलिनां लोकस्यासंख्येयभागः लोकस्यासंख्येयभागा वा सर्वलोको वा । स तु लोकस्याऽसंख्येयभागो दण्डकपाटापेक्षया ज्ञातव्यम्[9] । तत्कथम् ? दण्डसमुद्घातं कायोत्सर्गेण [10]स्थितश्चेत् द्वादशाङ्गुलप्रमाणसमवृत्तं मूलशरीरप्रमाणसमवृत्तं वा । उपविष्टश्चेत्, शरीरत्रिगुणबाहुल्यं वायूनलोकोदयं वा प्रथमसमये करोति । कपाटसमुद्घातं धनुःप्रमाणबाहुल्योदयं[11] पूर्वाभिमुखश्चेत् दक्षिणोत्तरतः करोति । उत्तराभिमुखश्चेत् पूर्वापरत आत्मप्रसर्पणं द्वितीयसमये करोति । एष विचारः[12] संस्कृतमहापुराणपञ्जिकायामस्ति । प्रतरावस्थापेक्षया असंख्येया भागा ज्ञातव्याः । प्रतरावस्थायां सयोगकेवली वातवलयत्रयादर्वागेव आत्मप्रदेशैर्निरन्तरं लोकं व्याप्नोति । लोकपूरणावस्थायां वातवलयत्रयमपि व्याप्नोति । तेन सर्वलोकः क्षेत्रम् ।

विशेषेण तु गत्यनुवादेन[13] नरकगतौ नारकाणां चतुर्षु गुणस्थानेषु सर्वासु पृथिवीषु लोकस्यासंख्येयभागः । तिर्यग्गतौ तिरश्चामादितः पञ्चगुणस्थानानां सामान्योक्तं क्षेत्रम्[14] ।

१ षट्खं० द्र० १८५–१८१ । २ एते आ०, ब०, व०, द० । ३ षट्खं० द्र० १९०–१९२ । ४ तथाहि चोक्तम् आ०, ब०, द० । ५ तत्र सा–आ०, ब०, द० । ६ षट्खं० खे० २–४ । ७ 'सम्यग्मिथ्यादृष्टीनाम्' नास्ति ता० । ८–मयोगिके–ब०, ता० । ९ द्रष्टव्यम्–षट्खं० ध० टी० खे० पृ० ४८ । १० स्थितश्चेति द्वा–आ०, ब०, द० । ११–दयः पू–आ०, ब०, द० । १२ द्रष्टव्यम्–षट्खं० ध० टी० खे० पृ० ४९–५६ । १३ षट्खं० खे० ५–१६ । १४ क्षेत्रम् ता०, व० पुस्तकयोः नास्ति ।

कोऽर्थः ? मिथ्यादृष्टीनां सर्वलोकः । सासादनादीनां संयतासंयतान्तानां[1] लोकस्यासंख्येय-भागः । मनुष्यगतौ मनुष्याणां सयोगकेवलिवर्जानां सर्वगुणस्थानानां लोकस्यासंख्येय-भागः । सयोगकेवलिनां तु सामान्योक्तं क्षेत्रमसंख्येयभागोऽसंख्येया[2] भागा वा सर्वलोको वा इत्यर्थः । देवगतौ देवानां [3]चतुर्षु गुणस्थानेषु सर्वेषां लोकस्यासंख्येयभागः ।

५ इन्द्रियानुवादेन[4] एकेन्द्रियाणां सर्वत्र संभवात् सर्वो लोकः क्षेत्रम् । विकलेन्द्रियाणां लोकस्यासंख्येयभागः क्षेत्रम्, देवनारकमनुष्यवत् तेषां नियतोत्पादस्थानत्वात् । विकला हि अर्धतृतीये द्वीपे लवणोदकालोदसमुद्रद्वये स्वयम्भूरमणद्वीपार्धपरभागे स्वयम्भूरमणसमुद्रे चोत्पद्यन्ते न पुनरसंख्यद्वीपसमुद्रेषु न च नरकस्वर्गभोगभूम्यादिषु । पञ्चेन्द्रियाणां मनुष्यवन्नियतं क्षेत्रम् । तथाहि "प्राङ्मानुषोत्तरान्मनुष्याः" [त० सू० ३।४५] इति

१० वक्ष्यमाणसूत्रबलेन यथा मनुष्याणां लोकस्यासंख्येयभागः क्षेत्रं नियतं वर्तते तथा पञ्चेन्द्रियाणां नरके तिर्यग्लोके देवलोके च त्रसनाडीमध्ये नियतेष्वेव [6]स्थानेषु उत्पादो वर्तते तेन लोकस्यासंख्येयभागः क्षेत्रं पञ्चेन्द्रियाणां ज्ञातव्यम् ।

[7]कायानुवादेन पृथिव्यप्तेजोवायुवनस्पतिकायानां सर्वलोकः क्षेत्रम् । त्रसकायिकानां पञ्चेन्द्रियवल्लोकस्यासंख्येयभागः क्षेत्रम् ।

१५ [8]योगानुवादेन वाङ्मनसयोगिनामादितः सयोगकेवल्यन्तानां लोकस्यासंख्येयभागः क्षेत्रम् । काययोगानामादितः त्रयोदशगुणस्थानानामयोगकेवलिनाञ्च सामान्योक्तं क्षेत्रम् । मिथ्यादृष्टीनां सर्वलोकः । सासादनादीनामयोगिकेवल्यन्तानां लोकस्यासंख्येयभागः । सयोगकेवलिनां लोकस्यासंख्येयभागोऽसंख्येया[9] भागा [10]वा सर्वलोको वा इत्यर्थः ।

[11]वेदानुवादेन स्त्रीपुंसवेदानां मिथ्यादृष्ट्यादिनवमगुणस्थानान्तानां लोकस्यासंख्येय-

२० भागः क्षेत्रम् । नपुंसकवेदानां मिथ्यादृष्ट्यादिनवमगुणस्थानान्तानामवेदानाञ्च सामान्योक्तं क्षेत्रम् ।

[12]कषायानुवादेन क्रोधमानमायाकषायाणां[13] लोभकषायाणाञ्च मिथ्यादृष्ट्यादिनवमगुणस्थानान्तानां दशमगुणस्थानान्तानां व्यपगतकषायाणाञ्च सामान्योक्तं क्षेत्रम् ।

ज्ञानानुवादेन[14] कुमतिकुश्रुतयज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां सामान्योक्तं

२५ क्षेत्रम् । [15]कदवध्यज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां लोकस्यासंख्येयभागः क्षेत्रम् । मतिश्रुतावधिज्ञानिनामसंयतसम्यग्दृष्ट्यादीनां मनःपर्ययज्ञानिनां[16] षष्ठगुणस्थानादिद्वादशगुणस्थानान्तानां केवलज्ञानिनां सयोगानामयोगानाञ्च सामान्योक्तं क्षेत्रम् ।

---

१ सयतानां द०, आ०, ब०, व० । २–संख्येयभा–आ०, ब०, व०, द० । ३ चतुर्गुण–आ०, ब०, द० । ४ षट्खं० खे० १७–२१ । ५ सर्वसं–द०, आ०, ब० । ६ स्थानकेषु ता०, ब० । ७ षट्खं० खे० २२–२८ । ८ षट्खं० खे० २९–४२ । ९–संख्येयभा–आ०, ब०, द० । १० वा सर्वलोका वा इत्यर्थः ब० । ११ षट्खं० खे० ४३–४६ । १२ षट्खं० खे० ४७–५० । १३–मायानां आ०, द०, ब० । १४ षट्खं० खे० ५१–५७ । १५ कुदवध्य–आ०, ब०, ब० । कुवध्य–द० । १६–नां च षष्ठमगुणस्थानादीनां द० । च षट्गुणस्थानानि ब० ।

[1]संयमानुवादेन सामायिकच्छेदोपस्थापनशुद्धिसंयतानां प्रमत्ताप्रमत्ताऽपूर्वकरणानिवृत्तिबादरसाम्परायाणां सामान्योक्तं क्षेत्रम्। परिहारविशुद्धिसंयतानां [2]प्रमत्ताप्रमत्तानां सामान्योक्तं क्षेत्रम्। सूक्ष्मसाम्परायशुद्धिसंयतानां यथाख्यातविहारशुद्धिसंयतानामुपशान्तकषायक्षीणकषायसयोगकेवल्ययोगकेवलिनां चतुर्णां सामान्योक्तं क्षेत्रम्। देशसंयतानां सामान्योक्तं क्षेत्रम्। असंयतानाञ्च मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टीनां ५ चतुर्णां सामान्योक्तं क्षेत्रम्।

[3]दर्शनानुवादेन चक्षुर्दर्शनिनामादितो द्वादशगुणस्थानानां लोकस्यासंख्येयभागः क्षेत्रम्। अचक्षुर्दर्शनिनामादितो द्वादशगुणस्थानान्तानां सामान्योक्तं क्षेत्रम्। अवधिदर्शिनामवधिज्ञानिवत् सामान्योक्तं क्षेत्रम्। केवलदर्शनिनां केवलज्ञानिवत् सयोगानां त्रिविधम्। अयोगानां लोकस्यासंख्येयभाग इत्यर्थः। १०

[4]लेश्यानुवादेन कृष्णनीलकापोतलेश्यानामादितश्चतुर्गुणस्थानानां सामान्योक्तं क्षेत्रम्। तेजःपद्मलेश्यानामादितः षड्गुणस्थानानां लोकस्यासंख्येयभागः क्षेत्रम्। शुक्ललेश्यानामादितो द्वादशगुणस्थानानां लोकस्यासंख्येयभागः क्षेत्रम्। सयोगकेवलिनामलेश्यानां सामान्योक्तं क्षेत्रम्।

[5]भव्यानुवादेन भव्यानां चतुर्दशगुणस्थानानां सामान्योक्तं क्षेत्रम्। अभव्यानां सर्वलोकः क्षेत्रम्। १५

[6]सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टीनां [7]चतुर्थगुणस्थानादारभ्य [8]अयोगकेवलिगुणस्थानान्तेषु सामान्योक्तं क्षेत्रम्। वेदकसम्यग्दृष्टीनां चतुर्थ[9]पञ्चमषष्ठसप्तमगुणस्थानेषु सामान्योक्तं क्षेत्रम्। औपशमिकसम्यग्दृष्टीनां चतुर्थगुणस्थानादारभ्य एकादशगुणस्थानं यावत् सामान्योक्तं क्षेत्रम्। सासादनसम्यग्दृष्टीनां मिश्राणां मिथ्यादृष्टीनाञ्च सामान्योक्तं क्षेत्रम्।

[10]संज्ञ्यनुवादेन संज्ञिनां चक्षुर्दर्शनिवत् आदितो द्वादशान्तेषु गुणस्थानेषु लोकस्यासंख्येयभागः क्षेत्रमित्यर्थः। असंज्ञिनां सर्वलोकः क्षेत्रम्। ये न संज्ञिनो नाप्यसंज्ञिनस्तेषां सामान्योक्तं क्षेत्रम्। २०

[11]आहारानुवादेन आदितो द्वादशगुणस्थानेषु सामान्योक्तं क्षेत्रम्। सयोगकेवलिनां लोकस्यासंख्येयभागः क्षेत्रम्, समुद्घातरहितत्वादित्यर्थः। अनाहारकाणां मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्ट्ययोगकेवलिनां सामान्योक्तं क्षेत्रम्। सयोगकेवलिनां लोकस्यासंख्येयभागः सर्वलोको वा असमुद्घातसमुद्घातापेक्षया सिद्धम्। २५

[12]अथ स्पर्शनं कथ्यते। सामान्यविशेषभेदात् तत् [13]द्विप्रकारम्। तत्र तावत्

१ षट्खं० खे० ५८-६६। २ प्रमत्तानां सा-ब०। प्रमत्तानां च सा-ब०। अप्रमत्तानां सा-आ०। ३ षट्खं० खे० ६७-७१। ४ षट्खं० खे० ७२-७६। ५ षट्खं० खे० ७७-७८। ६ षट्खं० खे० ७९-८५। ७ चतुर्गुणस्थाना-आ०, ब०। ८ सयोग-आ०, ब०। ९-नां सा-आ०, द०, ब०। १० षट्खं० खे० ८६-८७। ११ षट्खं० खे० ८८-९२। १२ अथ तस्य-द०, आ०, ब०। १३ द्विप्रकारः ता०।

[1]सामान्येन मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः। अथ कोऽसौ लोक इति चेत्? उच्यते– असंख्यातयोजनकोट्याकाशप्रदेशपरिमाणा[2] रज्जुस्तावदुच्यते। तल्लक्षणसमचतुरस्ररज्जु-[3] त्रिचत्वारिंशदधिकशतत्रयपरिमाणो लोक उच्यते। स लोको मिथ्यादृष्टिभिः सर्वः स्पृष्ट इति। उक्तलक्षणे लोके स्वस्थानविहारः परस्थानविहारः मारणान्तिकमुत्पादश्च प्राणिभिर्वि-
५ धीयते। तत्र स्वस्थानविहारापेक्षया सासादनसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः स्पृष्टः। एवमग्रेऽपि[4] सर्वत्र स्वस्थानविहारापेक्षया लोकस्यासंख्येयभागो ज्ञातव्यः। परस्थानविहारापेक्षया तु सासादनदेवानां प्रथमपृथिवीत्रये विहारात् रज्जुद्वयम्। अच्युतान्तोपरिविहारात् षड् रज्जव इत्यष्टौ द्वादश वा चतुर्दशभागा देशोनाः स्पृष्टाः। द्वादशभागाः कथं स्पृष्टा इति चेत्? उच्यते– सप्तमपृथिव्यां परित्यक्तसासादनादिगुणस्थान एव मारणान्तिकं विदधातीति नियमात् षष्ठीतो
१० मध्यलोके पञ्च रज्जवः सासादनो मारणान्तिकं करोति। मध्यलोकाच्च लोकाग्रे बादरपृथिवीकायिकबादराप्कायिकबादरवनस्पतिकायिकेषु[5] [6]उत्पद्यते इति सप्त रज्जवः। एवं द्वादश रज्जवो भवन्ति। सासादनसम्यग्दृष्टिर्हि वायुकायिकेषु तेजःकायिकेषु नरकेषु सर्वसूक्ष्मकायिकेषु च [7]चतुर्षु स्थानकेषु नोत्पद्यत इति नियमः। तथा चोक्तम्—

"वज्जिअ ठाणचउक्कं तेऊ वाऊ य णरयसुहुमं च।
१५ अण्णत्थ सव्वठाणे उववज्जदि सासणो [8]जीवो॥" [ ]

देशोना इति कथम्? केचित् प्रदेशाः सासादनसम्यग्दर्शनयोग्या न भवन्तीति देशोनाः। एवमुत्तरत्र[9] सर्वत्रापि [10]अस्पर्शनयोग्यापेक्षया देशोनत्वं वेदितव्यम्। सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लोकस्य असंख्येयभागः, अष्टौ वा चतुर्दशभागा देशोनाः स्पृष्टाः। तत्कथम्? सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्देवैः परस्थानविहारापेक्षया अष्टौ रज्जवः
२० स्पृष्टाः। संयतासंयतैः लोकस्य असंख्येयभागः, षट् चतुर्दशभागा[11] वा देशोनाः। तत्कथम्? संयतासंयतैः स्वयम्भूरमणतिर्यग्भिरुच्चतो मारणान्तिकापेक्षया षट् रज्जवः स्पृष्टाः। प्रमत्तसंयताद्ययोगिकेवल्यन्तानां स्पर्शनं क्षेत्रवत्। तत्कथम्? प्रमत्तादीनां नियतक्षेत्रत्वात् भवान्तरे नियतोत्पादस्थानत्वाच्च समचतुरस्ररज्जुप्रदेशव्याप्त्यभावात् लोकस्यासंख्येयभागः। सयोगकेवलिनां क्षेत्रवत् लोकस्यासंख्येयभागः लोकस्यासंख्येयभागा
२५ वा सर्वलोको वा स्पर्शनम्। इति सामान्येन स्पर्शनमुक्तम्।

अथ विशेषेण स्पर्शनमुच्यते। [12]गत्यनुवादेन नरकगतौ प्रथमपृथिव्यां नारकैश्चतुर्गुणस्थानैर्लोकस्य असंख्येयभागः स्पृष्टः। तत्कथम्? सर्वेषां नारकाणां नियमेन संज्ञिपर्याप्तकपञ्चेन्द्रियेषु तिर्यक्षु मनुष्येषु प्रादुर्भावः। तत्र प्रथमपृथिव्याः सन्निहितत्वेन अर्द्धरज्जु-

---

१ षट्खं० फो० १-१०। २–माणरज्जुः आ०, द०, ब०। ३ तल्लक्षणम–ब०। तल्लक्षम–ता०। ४–पि स्व–आ०, द०, ब०। ५ कायेषु द०। ६ उत्पद्यन्ते आ०, द०, ब०। ७ चतुर्थस्थानकेषु आ०, ब०। चतुर्थस्थानेषु द०। ८ "ण हि सासणो अपुण्णे साहारणसुहुमगे य तेउदुगे।" –गो० क० गा० ११५। ९–रमत्र ब०। १० स्पर्शन–ब०। ११ भागा दे–आ०, ब०, व०, द०। १२ षट्खं० फो० ११–५६।

परिमाणाभावात्, [1]तत्रत्यनारकैश्चतुर्गुणस्थानैः लोकस्यासंख्येयभागः स्पृष्टः। द्वितीयतृतीयचतुर्थपञ्चमषष्ठभूमीनां मिथ्यादृष्टिसासादनसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः एको द्वौ त्रयश्चत्वारः पञ्च चतुर्दशभागा वा देशोनाः स्पृष्टाः। तत्कथम्? द्वितीयपृथिव्यास्तिर्यग्लोकादधः रज्जुपरिमाणत्वात् एको भागः। तृतीयपृथिव्यास्तिर्यग्लोकादधः द्विरज्जुपरिमाणत्वात् द्वौ भागौ। चतुर्थपृथिव्यास्तिर्यग्लोकादधः त्रिरज्जुपरिमाणत्वात् त्रयो भागाः। पञ्चमपृथिव्यास्तिर्यग्लोकादधः चतूरज्जुपरिमाणत्वात् चत्वारो भागाः। षष्ठपृथिव्यास्तिर्यग्लोकादधः पञ्चरज्जुपरिमाणत्वात् पञ्च भागाः। तत्रत्यमिथ्यादृष्टिसासादनसम्यग्दृष्टिभिर्यथासंख्यमेते भागाः स्पृष्टाः। सम्यग्मिथ्यादृष्टीनां मारणान्तिकोत्पादायुर्ब[2]न्धकाले नियमेन तद्गुणस्थानत्यागात् स्वस्थानविहारापेक्षया लोकस्यासंख्येयभागः। तेषां सम्यग्मिथ्यादृष्टीनां नियमेन मनुष्येष्वेवोत्पादान्मनु[3]ष्याणामल्पक्षेत्रत्वात् सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः स्पृष्टः, स्वक्षेत्रविहारापेक्षया इत्यर्थः। सप्तम्यां पृथिव्यां मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः षट्चतुर्दशभागा वा देशोनाः स्पृष्टाः। असंख्येयभागः स्वस्थानविहारापेक्षया। षट् रज्जवो मारणान्तिकापेक्षया स्पृष्टा इत्यर्थः। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिः सप्त[4]मपृथिव्या नारकैः स्वस्थानविहारापेक्षया लोकस्यासंख्येयभागः स्पृष्टः। मारणान्तिकापेक्षयापि एषां स्पर्शनं कस्मान्न प्रतिपादितमिति चेत्? सप्तमपृथिवीनारकाणां मारणान्तिकोत्पादायुर्बन्धकाले नियमेन सासादनादिगुणस्थानत्रयत्यागात् सासादनोऽधो गच्छतीति नियमात्। तिर्यग्गतौ, तिरश्चां मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः। सासादनसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः सप्त चतुर्दशभागा वा देशोनाः स्पृ[5]ष्टाः। तत्कथम्? तिर्यक्सासादनस्य लोकाग्रे बादरपृथिव्यब्वनस्पतिषु मारणान्तिकापेक्षयापि सप्त रज्जवः। सम्यग्मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः स्पृष्टः। असंयतसम्यग्दृष्टिभिः संयतासंयतैः लोकस्यासंख्येयभागः षट् चतुर्दशभागा वा देशोनाः स्पृष्टाः। मनुष्यगतौ मनुष्यैर्मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः सर्वलोको वा स्पृष्टः। तत्कथम्? मारणान्तिकापेक्षया पृथिवीकायिकादेस्तत्रोत्पादापेक्षया वा। यो हि यत्रोत्पद्यते तस्योत्पादावस्थायां तद्व्यपदेशो भवति। सर्वलोकस्पर्शनं च अग्रे सर्वत्रेत्थं द्रष्टव्यम्। सासादनसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः सप्त चतुर्दशभागा वा देशोनाः स्पृष्टाः। सम्यग्मिथ्यादृष्ट्याद्ययोगिकेवल्यन्तानां स्पर्शनं क्षेत्रवद्वेदितव्यम्।

देवगतौ देवैर्मिथ्यादृष्टिभिः सासादनसम्यग्दृष्टिभिर्लोकस्याऽसंख्येयभागः अष्टौ नव चतुर्दशभागा वा देशोनाः स्पृष्टाः। तत्कथम्? मिथ्यादृष्टिसासादनसम्यग्दृष्टिदेवानां कृततृतीयनरकभूमिवि[6]हृतीनां लोकाग्रे बादरपृथिव्यब्वनस्पतिमारणान्तिकापेक्षया नव रज्जवः स्पर्शनम्। एवमुत्तरत्रापि नवर[7]ज्जुप्रक्लृप्तिर्वेदितव्या। सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः स्पृष्टाः। तत्कथम्? सम्यग्मिथ्यादृष्ट्यसंयतसम्य-

---

१ तत्र ना-आ०, द०, ब०। २ बन्धनका-आ०। ३ मानुष्याणां ता०। ४ सप्तपृ-आ०, द०, ब०। ५-ष्टाः ति-द०, आ०, ब०। ६ विकृतीनाम् आ०, ब०, द०। ७ रज्जवः स-आ०, ब०, द०। रज्जुपृथ्विर्वे-ब०।

ग्दृष्टीनाम् एकेन्द्रियेषूत्पादाभावात् परक्षेत्रविहारापेक्षया अष्टरज्जुस्पर्शनं वेदितव्यम्।

[1]इन्द्रियानुवादेन, एकेन्द्रियैः सर्वलोकः स्पृष्टः। विकलेन्द्रियैर्लोकस्यासंख्येयभागः सर्वलोको वा। तन्मारणान्तिकापेक्षया ज्ञातव्यम्। पञ्चेन्द्रियेषु मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः स्वक्षेत्रविहारापेक्षया स्पृष्टः। परक्षेत्रविहारापेक्षया अष्टौ चतुर्दशभागा वा देशोनाः। ५ मारणान्तिकोत्पादापेक्षया सर्वलोको वा। सासादनसम्यग्दृष्ट्यादित्रयोदशगुणस्थानानां पञ्चेन्द्रियाणां सामान्योक्तं स्पर्शनम्।

[2]कायानुवादेन स्थावरकायिकैः सर्वलोकः स्पृष्टः। त्रसकायिकानां स्पर्शनं पञ्चेन्द्रियवत्।

[3]योगानुवादेन वाङ्मनसयोगिनां [4]मिथ्यादृष्टीनां लोकस्याऽसंख्येयभागः अष्टौ चतु- १० र्दशभागा वा देशोनाः सर्वलोको वा स्पर्शनम्। सासादनसम्यग्दृष्ट्यादिक्षीणकषायान्तानां सामान्योक्तं स्पर्शनम्। सयोगकेवलिनां लोकस्यासंख्येयभागः। तत्कथम्? सयोगकेवलिनां दण्डकपाटप्रतरलोकपूरणावस्थायां वाङ्मनसवर्गणामवलम्ब्य आत्मप्रदेशपरिस्पन्दाभावात् लोकस्यासंख्येयभागः स्पर्शनं वेदितव्यम्। काययोगिनां मिथ्यादृष्ट्यादित्रयोदशगुणस्थानानामयोगकेवलिनाञ्च सामान्योक्तं स्पर्शनम्।

१५ [5]वेदानुवादेन स्त्रीपुंवेदैर्मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः स्पृष्टः अष्टौ नव चतुर्दशभागा वा देशोनाः सर्वलोको वा। तन्[6]मारणान्तिकोत्पादापेक्षया ज्ञातव्यम्। सासादनसम्यग्दृष्टिभिः स्त्रीपुंवेदैः लोकस्यासंख्येयभागः अष्टौ नव चतुर्दशभागा वा देशोनाः। ते तु नवभागास्तृतीयभूमिलोकाग्रोत्पादापेक्षया वेदितव्याः। सम्यग्मिथ्यादृष्ट्यनिवृत्तिबादरान्तानां स्त्रीपुंवेदैः सामान्योक्तं स्पर्शनं कृतम्। नपुंसकवेदेषु मिथ्यादृष्टीनां सासादनसम्यग्दृष्टीनाञ्च २० सामान्योक्तं स्पर्शनम्। सम्यग्मिथ्यादृष्टिभिर्नपुंसकवेदैर्लोकस्यासंख्येयभागः स्पृष्टः। असंयतसम्यग्दृष्टिसंयतासंयतैर्नपुंसकवेदैर्लोकस्यासंख्येयभागः षट् चतुर्दशभागा वा देशोनाः। प्रमत्ताद्यनिवृत्तिबादरान्तानामवेदानाञ्च सामान्योक्तं स्पर्शनम्।

[7]कषायानुवादेन चतुःकषायाणा[8]मेकैककषायाणामकषायाणाञ्च सामान्योक्तं स्पर्शनम्।

[9]ज्ञानानुवादेन मत्यज्ञानिनां श्रुताज्ञानिनां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनाञ्च[10] सामा- २५ न्योक्तं स्पर्शनम्। विभङ्गज्ञानिनां मिथ्यादृष्टीनां लोकस्यासंख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः सर्वलोको वा तन्मारणान्तिकोत्पादापेक्षया। सासादनसम्यग्दृष्टीनां सामान्योक्तं स्पर्शनम्। आभिनिबोधिकादिपञ्चज्ञानिनां सामान्योक्तं स्पर्शनम्।

[11]संयमानुवादेन पञ्चप्रकारसंयतानां देशसंयतानामसंयतानाञ्च सामान्योक्तं स्पर्शनम्।

---

१ षट्खं० फो० ५७-६५। २ षट्खं० फो० ६६-७३। ३ षट्खं० फो० ७४-१०१। ४ मिथ्यादृष्टिभिः ता०, ब०। ५ षट्खं फो० १०२-११९। ६-मारणान्तिकापेक्षया आ०, द०, ब०। ७ षट्खं० फो० १२०-१२२। ८-मेकककषायाणां च ता-आ०, द०, ब०। ९ षट्खं० फो० १२३-१३१। १०-नां ता-ता०, ब०। ११ षट्खं० फो० १३२-१३९।

[1]दर्शनानुवादेन चक्षुर्दर्शनिनामादितो द्वादशगुणस्थानानां पञ्चेन्द्रियवत्। तत्कथम्? पञ्चेन्द्रियेषु मिथ्यादृष्टिभिर्लोकस्यासंख्येयभागः [2]स्वक्षेत्रविहारापेक्षया। अष्टौ चतुर्दशभागा वा देशोनाः परक्षेत्रविहारापेक्षया। सर्वलोको वा मारणान्तिकोत्पादापेक्षया। शेषाणां सामान्योक्तमिति पञ्चेन्द्रियवत्। अचक्षुर्दर्शनिनामादितो द्वादशगुणस्थानानां[3]मवधिकेवलदर्शनिनाञ्च सामान्योक्तं स्पर्शनम्। ५

[4]लेश्यानुवादेन सप्तनरकेषु तावत् प्रथमे नरके कापोती लेश्या। द्वितीये च नरके कापोती लेश्या। तृतीये नरके उपरि कापोती, अधो नीला। चतुर्थे नरके नीलैव लेश्या। पञ्चमे नरके उपरि नीला, अधः कृष्णा। षष्ठे नरके कृष्णलेश्या। सप्तमे नरके परमकृष्णलेश्या। तथा चोक्तम्—

"[5]काऊ काऊ य तहा णीला णीला य णीलकिण्हा य। १०
किण्हा य परमकिण्हा लेस्सा पढमादिपुढवीसु॥"

[गो० जी० गा० ५२८]

इति सप्तनरकेषु लेश्याप्रदानम्। तत्र लेश्यानुवादेन कृष्णनीलकापोतलेश्यैर्मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः। सासादनसम्यग्दृष्टिभिः कृष्णनीलकापोतलेश्यैर्लोकस्यासंख्येयभागः पञ्च चत्वारो द्वौ चतुर्दशभागा[6] वा देशोनाः स्पृष्टाः। तत्कथम्? षष्ठ्यां पृथिव्यां कृष्णलेश्यैः[7] सासादनसम्यग्दृष्टिभिर्मारणान्तिकोत्पादापेक्षया पञ्च रज्जवः स्पृष्टाः। पञ्चमपृथिव्यां कृष्णलेश्याया अविवक्षया[8] नीललेश्यैश्चतस्रो रज्जवः स्पृष्टाः। तृतीय-पृथिव्यां नीललेश्याया अविवक्षया कापोतलेश्यैः द्वे रज्जू स्पृष्टे। सप्तमपृथिव्यां यद्यपि कृष्णलेश्या वर्तते तथापि मारणान्तिकावस्थायां सासादनस्य नियमेन मिथ्यात्वग्रहणादिति[9] नोदाहृता। अत्र पञ्च चत्वारो द्वौ चतुर्दशभागा वा देशोनाः। १५ २०

सासादनसम्यग्दृष्टीनामादित्रिलेश्यानां[10] दत्ता द्वादश भागाः कस्मान्न लभ्यन्त इति चेत्? 'षष्ठीतो मध्यलोकं यावत् पञ्च लोकाग्रं यावत्सप्त इति द्वादशभागाः कुतो न दत्ताः' इति चेन् पृच्छसि? तत्र षष्ठनरके अवस्थितलेश्यापेक्षया पञ्चैव रज्जवः स्पृष्टा भवन्ति, यतो मध्यलोकादुपरि कृष्णलेश्या नास्ति। "पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु" [त० सू० ४।२२] इति वचनात्। अथवा येषां मते सासादनसम्यग्दृष्टिरेकेन्द्रियेषु नोत्पद्यते तन्मतापेक्षया द्वादशभागा न दत्ता। २५

सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिः कृष्णनीलकापोतलेश्यैर्लोकस्यासंख्येयभागः

---

१ षट्खं० फो० १४०-१४५। २ स्वक्षेत्रव्यवहा–द०। ३–मवधिदर्शनके-ता०,व०। ४ षट्खं० फो० १४६-१६४। ५ कापोती कापोती च तथा नीला नीला च नीलकृष्णा च। कृष्णा च परमकृष्णालेश्या प्रथमादिपृथिवीषु॥ ६ भागाः आ०। ७ कृष्णनीलैः सा–द०। कृष्णलेश्या सा–आ०। ८ अविवक्षितत्वात् आ०, द०, व०। ९–दिति कारणात् नो–आ०, व०, द०। १०–मादितो लेश्यानाम् आ०, व०, द०।

स्पृष्टः । तेजोलेश्यैर्मिथ्यादृष्टिसासादनसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागोऽष्टौ[1] नव चतुर्दशभागा वा देशोनाः स्पृष्टाः । तेजोलेश्यैः सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागोऽष्टौ[2] नव चतुर्दशभागा वा[3] स्पृष्टाः । तेजोलेश्यैः संयतासंयतैर्लोकस्यासंख्येयभागः अष्टौ नव चतुर्दशभागा वा देशोनाः । संयतासंयतैर्लोकस्यासंख्येयभागो [4]अध्यर्धचतुर्दशभागो वा देशोनाः । अस्यायमर्थः-तेजोलेश्यैः संयतासंयतैः प्रथमस्वर्गे[5] मारणान्तिकोत्पादापेक्षया अध्यर्धचतुर्दशभागः [6]सार्धरज्जुः स्पृष्टा । तेजोलेश्यैः प्रमत्ताप्रमत्तैर्लोकस्यासंख्येयभागः[7] । पद्मलेश्यैरादितश्चतुर्गुणस्थानैर्लोकस्यासंख्येयभागोऽष्टौ चतुर्दशभागा वा देशोनाः स्पृष्टाः । पद्मलेश्यैः संयतासंयतैर्लोकस्यासंख्येयभागः पञ्च चतुर्दशभागा वा देशोनाः । तत्कथम् ? पद्मलेश्यैः संयतासंयतैः सहस्रारे मारणान्तिकादिविधानात् पञ्च रज्जवः स्पृष्टाः । पद्मलेश्यैः प्रमत्ताप्रमत्तैर्लोकस्यासंख्येयभागः स्पृष्टः । शुक्ललेश्यैरादितः पञ्चगुणस्थानैर्लोकस्यासंख्येयभागः षट् चतुर्दशभागा वा देशोनाः । तत्कथम् ? शुक्ललेश्यैर्मिथ्यादृष्ट्यादि[9] संयतासंयतान्तैर्मारणान्तिकाद्यपेक्षया । सम्यग्मिथ्यादृष्टिभिस्तु मारणान्तिके तद्गुणस्थानत्यागात् विहारापेक्षया षट् रज्जवः स्पृष्टाः । अष्टावपि कस्मान्न स्पृष्टा इति नाशङ्कनीयम् ? शुक्ललेश्यानामधो विहाराभावात् । तदपि कस्मात् ? यथा कृष्णनीलकापोतलेश्यात्रयापेक्षया अवस्थितलेश्या नारका वर्तन्ते [10]तथा तेजः-पद्मशुक्ललेश्यात्रयापेक्षया देवा अपि अवस्थितलेश्या वर्तन्ते ।

[11]"तेऊ तेऊ य तहा तेऊ पउमा य पउमसुक्का य ।
सुक्का य परमसुक्का लेस्सा भवणादिदेवाणं ॥१॥"

[गो० जी० गा० ५३४]

[12]अस्यायमर्थः—भवनवासिव्यन्तरज्योतिष्केषु जघन्या तेजोलेश्या । सौधर्मैशानयोः मध्यमा तेजोलेश्या । सनत्कुमारमाहेन्द्रयोरुत्कृष्टा तेजोलेश्या ? जघन्यपद्मलेश्याया अविवक्षया । ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्टशुक्रमहाशुक्रेषु[13] मध्यमा पद्मलेश्या जघन्यशुक्ललेश्याया अविवक्षया । शतारसहस्रारयोर्जघन्या शुक्ललेश्या उत्कृष्टपद्मलेश्याया अविवक्षितत्वात् । आनतप्राणतारणाच्युतनवग्रैवेयकेषु मध्यमा शुक्ललेश्या । नवानुदिशपञ्चानुत्तरेषु उत्कृष्टा शुक्ललेश्या । तथा चोक्तम्—

१-ष्टौ च-आ०, द०, व०, ज० । २-ष्टौ च-आ०, द०, व० । ३ वा देशोनाः व० । ४ "दिवड्ढ चोद्दसभागा वा देसूणा"-षट्खं० फो० १५५ । ५-स्वर्गमा-आ०, व०, द० । स्वर्गः व० । ६ सा अर्ध-आ०, द०, व० । ७ भागः स्पृष्टः । ८ पद्मलेश्यैः मिथ्यादृष्ट्याद्यसंयत सम्यग्दृष्ट्यन्तैः लोक-द० । ९-दिसंयतान्तैः द०, व०, आ०, ब० । १० तथा पद्म-आ०, ब० । तथा पीतपद्म-द० । ११ "तेऊ तेऊ तेऊ पम्मा पम्मा य पम्मसुक्का य । सुक्का य परमसुक्का भवणतिया पुण्णगे असुहा ।"-गो० जी० गा० ५३४ । तेजस्तेजश्च तथा तेजः [illegible] च पद्मशुक्ला च । शुक्ला च परमशुक्ला लेश्या भवनादिदेवानाम् ॥ १२ अस्य गाथात्रयस्य अयमर्थः । अथायमर्थः ज० । १३-कापिष्ठशुक्रमहाशुक्रेषु-ब०, द० ।

"[1]तिण्हं दोण्हं दुण्हं च्छण्हं दोण्हं च तेरसण्हं च।
एत्तो य चोद्दसण्हं लेस्सा भवणादिदेवाणं॥ १॥"

[गो० जी० गा० ५३३]

ततोऽन्यत्र तिर्य्यङ्मनुष्येषु लेश्यानियमाभावः।

प्रमत्तादिसयोगकेवल्यन्तानामलेश्यानाञ्च सामान्योक्तं स्पर्शनम्। ५

[2]भव्यानुवादेन भव्यानां सर्वगुणस्थानानां सामान्योक्तं स्पर्शनम्। अभव्यैः सर्वलोकः स्पृष्टः।

[3]सम्यक्त्वानुवादेन क्षायिकसद्दृष्टीनामेकादशगुणस्थानानां सामान्योक्तं स्पर्शनमेव वर्तते, किन्तु देशसंयतानां क्षायिकसद्दृष्टीनां लोकस्यासंख्येयभागः स्पर्शनम्। क्षायिक-सम्यक्त्वयुक्तानां देशसंयतानां षडपि रज्जवः कुतो नेति नाशङ्कनीयम्? तेषां नियतक्षेत्रत्वात्। १० कर्म्मभूमिजो हि मनुष्यः सप्तप्रकृतिक्षयप्रारम्भको भवति। क्षायिकसम्यक्त्वलाभात् पूर्वमेव तिर्यक्षु बद्धायुष्कस्तु संयतासंयतत्वं न लभते।

"अणुव्वयमहव्वयाइं ण लंभइ देवाउगं मोत्तुं"

[गो० कर्म० गा० ३३४]

इत्यभिधानात् तिर्यगल्पतरस्थितिं परिहर्त्तुं न शक्नोतीत्यर्थः। वेदकसम्यग्दृष्टीनां १५ सामान्योक्तं स्पर्शनम्। औपशमिकयुक्तानामसंयतसम्यग्दृष्टीनां सामान्योक्तं स्पर्शनम्। देश-संयतादीनामौपशमिकसम्यक्त्वयुक्तानां लोकस्यासंख्येयभागः स्पर्शनम्। औपशमिकसम्यक्त्व-युक्तानां देशसंयतानां कुतो लोकस्यासंख्येयभाग इति[6] यदि पृच्छसि? [7]मनुजेष्वेतत्सम्भ-वात्। वेदकपूर्वकौपशमिकयुक्तो हि श्रेण्यारोहणं विधाय मारणान्तिकं करोति, मिथ्यात्वपूर्व-कौपशमिकयुक्तानां मारणान्तिकासम्भवात् लोकस्यासंख्येयभागः। सासादनसम्यग्दृष्टिसम्य- २० ग्मिथ्यादृष्टिमिथ्यादृष्टीनां सामान्योक्तं स्पर्शनम्।

[8]संज्ञानुवादेन संज्ञिनां चक्षुर्दर्शनिवत्। असंज्ञिभिः सर्वलोकः स्पृष्टः। ये तु न संज्ञिनः नाप्यसंज्ञिनस्तेषां सामान्योक्तं स्पर्शनम्।

[9]आहारानुवादेन आहारकाणामादितो द्वादशगुणस्थानानां सामान्योक्तं स्पर्शनम्। सयोगकेवलिनां लोकस्यासंख्येयभागः। तत्कथम्? आहारकावस्थायां समचतुरस्ररज्ज्वादिव्या- २५ प्तेरभावात्। दण्डकपाटावस्थायां कपाटप्रतरावस्थायाञ्च सयोगकेवली औदारिकौदारिक-मिश्रशरीरयोग्यपुद्गलादानादाहारकः। तथा चोक्तम्—

---

१ त्रयाणां द्वयोः द्वयोः षण्णां द्वयोः त्रयोदशानाञ्च। एतस्माच्चतुर्दशानां लेश्या भवनादि-देवानाम्॥ २ षट्खं० फो० १६५, १६६। ३ षट्खं० फो० १६७–१७६। ४–सम्य-ग्दृष्टीनाम् द०, व०। ५ लहइ आ०, ब०, द०, व०। अणुव्रतमहाव्रतानि न लभते देवायुर्मुक्त्वा। ६–ति चेत् पृ–आ०, ब०, द०, ज०। ७ मनुष्यक्षेत्रे–आ०, ब०, द०, ज०। ८ षट्खं० फो० १७७-१८०। ९ षट्खं० फो० १८१-१८५।

"दंडजुगे ओरालं कवाटजुगले य पदरसंवरणे।
मिस्सोरालं भणियं सेसतिए जाण कम्मइयम्॥ १॥"

[पञ्चसं० १।१९९]

दण्डकपाटयोश्च पिण्डिते अल्पक्षेत्रतया समचतुरस्ररज्ज्वादिव्याप्तेरभावात् सिद्धो लोक-
५ स्यासंख्येयभागः। अनाहारकेषु मिथ्यादृष्टिभिः सर्वलोकः स्पृष्टः। सासादनसम्यग्दृष्टिभिर्लो-
कस्यासंख्येयभागः एकादश चतुर्दशभागा वा देशोनाः स्पृष्टाः। तत्कथम्? अनाहारकेषु सासा-
दनस्य षष्ठपृथिवीतो निःसृत्य तिर्यग्लोके प्रादुर्भावात् पञ्च रज्जवः, अच्युतादागत्य तिर्यग्लोके
प्रादुर्भावात् षडित्येकादश। ननु पूर्वं द्वादशोक्ता इदानीं त्वेकादशेति पूर्वापरविरोध इति
चेत्; न; मारणान्तिकापेक्षया पूर्वं तथाभिधानात्। न च मारणान्तिकावस्थायामनाहारकत्वं
१० किन्तूत्पादावस्थायाम्। सासादनश्च मारणान्तिकमेवैकेन्द्रियेषु करोति नोत्पादम्, उत्पादाव-
स्थायां सासादनत्वत्यागात्। अनाहारकेषु असंयतसम्यग्दृष्टिभिर्लोकस्यासंख्येयभागः षट् चतु-
र्दशभागा वा देशोनाः स्पृष्टाः। सयोगकेवलिनां लोकस्यासंख्येयभागः सर्वलोको वा। अयोग-
केवलिनां लोकस्यासंख्येयभागः स्पर्शनम्। इति स्पर्शनव्याख्यानं समाप्तम्।

अथ कालस्वरूपं निरूप्यते[2]। स काल[3]ः सामान्यविशेषभेदात् द्विप्रकारः। सामान्यतस्ता-
१५ वत् मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकजीवापेक्षया त्रयो भङ्गा[4]ः। ते के? अनाद्य-
नन्तः कस्यचित्[5], कस्यचिदनादिसान्तः[6], कस्यचित्सादिसान्तः[7]। स तु सादिसान्तो जघन्येना-
न्तर्मुहूर्त्तः। अन्तर्मुहूर्त्त इति कोऽर्थः? त्रीणि सहस्राणि सप्त शतानि त्र्यधिकसप्ततिरुच्छ्वा-
साः मुहूर्त्तः कथ्यते॥ ३७७३॥ तस्यान्तरन्तर्मुहूर्त्तः। समयाधिकामावलिकामादिं[8] कृत्वा
समयोनमुहूर्त्तं यावत्। स च अन्तर्मुहूर्त्त इत्थमसंख्यातभेदो भवति। तथा चोक्तम्–

२० "तिण्णि सहस्सा सत्त य सदाणि तेहत्तरिं च उस्सासा।
एसो[9] भवदि मुहुत्तो सव्वेसिं चेव मणुयाणं[10]॥ १॥" [ ]

उत्कर्षेण अर्द्धपुद्गलपरिवर्त्तो[11] देशोनः।

सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण पल्योपमाऽसंख्येय-
भागः। [12]एकजीवं प्रति जघन्येनैकः[13] समयः। उत्कर्षेण [14]षडावलिकाः। आवलिका च
२५ असंख्यातसमयलक्षणा भवति। तथा चोक्तम्—[15]

---

१ परदसं–ता०। पयरसं०–व०। दण्डयुगे औदारिकं कपाटयुगले च प्रतरसंवरणे। मिश्रौदारं भणितं शेषत्रये जानीहि कार्मणम्॥ २–ते कालः आ०, ब०, द०, ज०। ३ षट्खं० का० १–३२। ४ भागाः ज०। ५ अभव्यस्य। ६ भव्यस्य। ७ सादिमिथ्यादृष्टेः पुनरुत्पन्नसम्यग्दर्शनस्य। ८ समयाधिकानामावलि–आ०, द०, ब०। ९ एसे ता०। १० मणुयाणां ता०। त्रीणि सहस्राणि सप्त च शतानि त्रिसप्ततिश्च उच्छ्वासाः। एतत् भवति मुहूर्त्तं सर्वेषाञ्चैव मनुजानाम्॥ ११–र्त्तो सा–द०, ब०। १२ एकं जीवं आ०, ब०, ज०। १३–नैकस–आ०, ब०, द०, व०, ज० १४ साधिकषडावलिकालशेषे सासादनगुणस्थानप्राप्त्यभावनियमात्। द्रष्टव्यम्–ध० टी० का० पृ० ३४२। १५ गो० जीव० गा० ५७३-५७४।

"आवलि असंखसमया [1]संखेज्जावलिसमूह उस्सासो ।
सत्तुस्सासो थोओ सत्तत्थोवो लवो भणिओ ॥ १ ॥
अट्ठत्तीसद्धलवा नाली दोनालिया मुहुत्तं तु ।
समऊणं तं भिण्णं अंतमुहुत्तं अणेयविहं ॥ २ ॥"

[जम्बू० प० १३।५, ६] ५

सम्यग्मिथ्यादृष्टेर्नानाजीवापेक्षया जघन्येनान्तर्मुहूर्तः, उत्कर्षेण पल्योपमासङ्ख्येयभागः । एकं जीवं प्रति जघन्योत्कृष्टश्चान्तर्मुहूर्तकालः । अस्यायमर्थः– सम्यग्मिथ्यादृष्टेरेकजीवं प्रति [2]जघन्येन [3]जघन्यान्तर्मुहूर्तः, उत्कर्षेण च [4]उत्कृष्टोऽन्तर्मुहूर्तः ।

असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया [5]सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि सातिरेकाणि । [6]तत्कथम् ? कश्चिज्जीवः पूर्वकोट्यायुरुत्पन्नः १० सान्तर्मुहूर्ताष्टवर्षानन्तरं सम्यक्त्वमादाय तपोविशेषं विधाय सर्वार्थसिद्धावुत्पद्यते । ततश्च्युत्वा पूर्वकोट्यायुरुत्पन्नोऽष्टवर्षानन्तरं संयमम[7]ादाय निर्वाणं गच्छति ।

देशसंयतस्य नानाजीवापेक्षया सर्वः कालः । एकजीवं प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण पूर्वकोटी [8]देशोना ।

प्रमत्ताप्रमत्तयोर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनैकः समयः । १५ तत्कथम् ? सर्वो जीवः परिणामविशेषवशात् प्रथमतोऽप्रमत्तगुणस्थानं प्रतिपद्यते, पश्चात् तत्प्रतिपक्षभूतप्रमत्तगुणस्थानान्तरस्थितो निजायुःसमयशेषेऽप्रमत्तगुणं[10] प्रतिपद्य म्रियते इति

---

१ असंखे–ज० । आवलिः असंख्यसमया संख्यातावलिसमूह उच्छ्वासः । सप्तोच्छ्वासाः स्तोकः, सप्तस्तोकाः लवो भणितः ॥ अष्टत्रिंशदर्धलवाः नाली द्वे नालिके मुहूर्त्तं तु । समयोन तत् भिन्नमन्तर्मुहूर्त्तमनेकविधम् ॥ २ प्रति जघन्येनान्तर्मुहूर्तः द० । प्रति जघन्येन जघन्यमु–ज० । ३ जघन्योऽन्त–व० । ४ उत्कृष्टान्त–व०, ता० । ५ सर्वका–आ०, ब०, व०, ज० । ६ "तं कध ? एक्को पमत्तो अप्पमत्तो वा चदुण्हमुवसामगाणमेक्कदरो वा समऊणतेत्तीससागरोवमाउट्ठिदिएसु अणुत्तरविमाणवासियदेवेसु उववण्णो । सा संजमसम्मत्तस्स आदी जादो । तदो चुदो पुव्वकोडाउएसु मणुसेसु उववण्णो । तत्थ असंजदसम्मादिट्ठी होदूण तावट्ठिदो जाव अंतोमुहुत्तमेत्ताउअं सेसं ति । तदो अप्पमत्तभावेण संजमं पडिवण्णो । (१) तदो पमत्तापमत्तपरावत्तसहस्सं कादूण (२)खवगसेढिपाओग्गविसोहीए विसुद्धो अप्पमत्तो जादो । (३) अपुव्वखवगो (४) अणियट्टिखवगो (५) सुहुमखवगो (६) खीणकसाओ (७) सजोगी (८) अजोगी (९) होदूण सिद्धो जादो । एदेहि णवहि अंतोमुहुत्तेहि ऊणपुव्वकोडीए अदिरित्ताणि समऊणतेत्तीससागरोवमाणि असंजदसम्मादिट्ठिस्स उक्कस्सकालो होदि ।" –ध० टी० का० पृ० ३४७ । ७–माददाति ता० । ८–र्तः काल उ–आ० । ९ "एवमादिल्लेहिं तीहिं अंतोमुहुत्तेहिं ऊणा पुव्वकोडी संजमासंजमकालो होदि ।" –ध० टी० का० पृ० ३५० । १० गुणस्थानं प्र–अ० ।

अप्रमत्तैकजीवं प्रति जघन्येनैकः समयः। तथा अप्रमत्तस्थाने स्थितो निजायुःकालान्तसमये प्रमत्तगुणस्थानं प्रतिपद्य म्रियते इति प्रमत्तैकजीवं प्रत्यपि जघन्येनैकः समयः, उत्कर्षेणा-न्तर्मुहूर्तः।

चतुर्णामुपशमकानां नानाजीवापेक्षया एकजीवापेक्षया[1] च जघन्येनैकः समयः,
५ उत्कर्षेणान्तर्मुहूर्तः। तत्कथम्? चतुर्णामुपशमकानां चतुःपञ्चाशत् यावत् यथासम्भवं भवन्तो [2]युगपदपि प्रवेशे मरणासम्भवात् नानाजीवापेक्षया एकजीवापेक्षया च जघन्येनैकसमयः। नन्वेवं मिथ्यादृष्टेरप्येकसमयः कस्मान्न सम्भवतीत्यनुपपन्नम्; कोऽर्थः? मिथ्यादृष्टेरेक-समयः कालो न घटते इत्यर्थः। कस्मात्? प्रतिपन्नमिथ्यात्वस्य अन्तर्मुहूर्तमध्ये मरणासम्भ-वात्। तदुक्तम्–

१० "मिथ्यात्वं दर्शनात् प्राप्ते[3] नास्त्यनन्तानुबन्धिनाम्।
यावदावलिकां पाकान्तर्मुहूर्ते मृतिर्न च ॥ १ ॥" [ ]

सम्यग्मिथ्यादृष्टेः परिमरणकाले तद्गुणस्थानत्यागान्नैकः समयः सम्भवति इति प्रतिपन्नासंयतसंयतासंयतगुणोऽपि अन्तर्मुहूर्तमध्ये न म्रियते। अतोऽसंयतसंयतासंयतयोरपि एकः समयो न भवति।

१५ चतुर्णां क्षपकाणामयोगकेवलिनाञ्च नानाजीवापेक्षया एकजीवापेक्षया च जघन्यश्च उत्कृष्टश्च कालोऽन्तर्मुहूर्तः। तत् कथम्? चतुर्णां क्षपकाणामपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्प-रायक्षीणकषायाणामयोगकेवलिनाञ्च मोक्षगामित्वेन[4] अन्तरे मरणासम्भवात् नानैकजीवा-पेक्षया जघन्यश्चोत्कृष्टश्चान्तर्मुहूर्तः[5] कालः।

सयोगिकेवलिनां नानाजीवापेक्षया सर्वः कालः, एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः[6]।
२० कुतः? सयोगिकेवलिगुणस्थानानन्तरमन्तर्मुहूर्तमध्ये अयोगिकेवलिगुणस्थानप्राप्तेः उत्कर्षेण पूर्वकोटी देशोना[7]। कुतः? अष्टवर्षानन्तरं तपो गृहीत्वा केवलमुत्पादयतीति कियद्वर्षहीनत्वात् पूर्वकोटी वेदितव्या।

विशेषेण [8]गत्यनुवादेन नरकगतौ [9]नारकेषु सप्तसु[10] भूमिषु मिथ्यादृष्टेर्नानाजीवा-पेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः कालः, पश्चात् मिथ्यादृष्टिगुणस्थानत्याग[11]-
२५ सम्भवात्। उत्कर्षेण प्रथमभूम्यादिषु यथासङ्ख्यमेकः सागरः, त्रयः सागराः, सप्त सागराः, दश सागराः, सप्तदश सागराः, द्वाविंशति सागराः त्रयस्त्रिंशत्सागराश्चेति। सासादनसम्यग्दृष्टेः सम्यग्मिथ्यादृष्टेश्च सामान्योक्तः कालः। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः कालः। एक-

---

१–या ज–द०, आ०, ज०। २ युगपदेकस्मिन्नपि प्रदेशे आ०, ब०, व०, ज०, द०। ३ प्राप्तेर्ना–व०। ४–न च अ–आ०, ब०, व०, ज०, द०। ५–र्तका–आ०, ब०, व०, द०, ज०। ६ र्तः कालः कु–आ०। ७ 'अट्ठहि वस्सेहि अट्ठहि अंतोमुहुत्तेहि य ऊणपुव्वकोडी सजोगकेवलि-कालो होदि।"–ध० टी० का० पृ० ३५७। ८ षट्खं० का० ३३–१०६। ९ नरकेषु आ०, द०, व०, ज०। १० सप्तभू–आ०। ११–न त्यागासं–व०। –नर्योगसं–आ०।

जीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कृष्टो देशोनः [1]अन्तर्मुहूर्तः (?)। कस्मात्? देशोनादन्तर्मुहूर्तात् परं तद्गुणस्थानत्यागात्।

तिर्य्यग्गतौ तिरश्चां मिथ्यादृष्टीनां नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेण [2]अनन्तः कालः। असङ्ख्येयाः पुद्गलपरिवर्त्ताः[3]। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिसंयतासयतानां सामान्योक्तः कालः। असंयतसम्यग्दृष्टेस्तिरश्चः नानाजीवापेक्षया सर्वः कालः। एकजीवं तिर्य्यञ्चं प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण त्रीणि पल्योपमानि। कथमिति चेत्? उच्यते–तिर्य्यगसंयतसम्यग्दृष्टय्येकजीवं प्रति उत्कर्षेण दर्शनमोहक्षपकवेदकापेक्षया [4]त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वैरभ्यधिकानि, सप्तचत्वारिंशत्पूर्वकोटिभिरभ्यधिकानीत्यर्थः। तथा हि–पुंनपुंसकस्त्रीवेदेन अष्टावष्टौ वारान् पूर्वकोट्यायुषा [5]उत्पद्य अवान्तरे अपर्याप्तमनुष्यक्षुद्रभवेन अष्टौ वारान् उत्पद्यते। पुनरपि [6]नपुंसकस्त्रीवेदेन अष्टावष्टौ पुंवेदेन सप्तेति। ततो भोगभूमौ त्रिपल्योपमायुषि भोगभूमिजानां नियमेन देवेषु उत्पादात् पश्चात् गत्यतिक्रमः[7]। पूर्वकोटिपृथक्त्वाधिक्यं देवगतिग्रहणेन[8] पूर्यत इति वेदितव्यम्।

मनुष्यगतौ मनुष्येषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वैरभ्यधिकानि। सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकः समयः उत्कर्षेणान्तर्मुहूर्तः। एकं जीवं प्रति जघन्येनैकः समयः, उत्कर्षेण षडावलिकाः। सम्यग्मिथ्यादृष्टेर्नानाजीवापेक्षया एकजीवापेक्षया च जघन्यश्चोत्कृष्टश्च कालोऽन्तर्मुहूर्तः। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण त्रीणि पल्योपमानि सातिरेकाणि। तत्कथम्? कर्म्मभूमिजो हि मनुष्यः क्षायिकसम्यक्त्वयुक्तो दर्शनमोहक्षपकवेदकयुक्तो[9] वा भोगभूमिजमनुष्येषूत्पद्यते इति [ततः] मनुष्यगतिपरित्यागात् [10]सातिरेकाणि पश्चाद्गत्यतिक्रमः। देशसंयतादीनां दशानां गुणस्थानानां सामान्योक्तः कालः।

---

१ नारकेषु सम्यग्दृष्टेरयं कालः चिन्त्यः। यतः षट्खण्डागमादिषु तस्येत्थं निरूपणम्—"उक्कस्सं सागरोपमं तिण्णि सत्त दस सत्तारस बावीस तेत्तीसं सागरोवमाणि देसूणाणि।" ४६। ......"एवं तीहि अंतोमुहुत्तेहि ऊणा अप्पप्पणो उक्कस्साउट्ठिदी असंजदसम्मादिट्ठिउक्कस्सकालो होदि। णवरि सत्तमाए छहि अंतोमुहुत्तेहि ऊणा उक्कस्सट्ठिदित्ति वत्तव्वं।" –षट्खं०, ध० टी० का० पृ० ३६२। "उत्कर्षेण उक्त एवोत्कृष्टो देशोनः।"–स० सि० पृ० २२। २ अनन्तकालः आ०, द०, व०, ब०। ३ परावर्ताः ज०। ४ अयं कालः त्रिविधपञ्चेन्द्रियतिर्यञ्चमिथ्यादृष्टेर्भाति। यथा–"उक्कस्सं तिण्णि पलिदोवमाणि पुव्वकोडिपुधत्तेणब्भहियाणि।" –षट्खं० का० ५९। ५ उत्पद्यते आ०। ६ नपुंसकस्त्रीवेदे आ०, द०, ब०। नपुंसकवेदे ज०। ७–विक्रमः आ०, द०, ब०, ज०। ८ ग्रहणेन वेदि–आ०, द०, ब०, ज०। ग्रहणेन पूर्वतः वेदि–ब०। ९ क्षपकयुक्तः आ०, द०, ब०, ज०। १० "तिण्णि पलिदोवमाणमुवरि देसूणपुव्वकोडितिभागुवलंभा।"–ध० टी० का० पृ० ३७८।

देवगतौ देवेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः उत्पन्नमात्रापेक्षया, अन्तर्मुहूर्तानन्तरं सद्दृष्टिर्भवति[1] यतः। उत्कर्षेण एकत्रिंशत्सागरोपमानि [2]नवमग्रैवेयकेऽपि कश्चिन्मिथ्यादृष्टिर्भवति यतः। सासादनसम्यग्दृष्टेः सम्यग्मिथ्यादृष्टेश्च[3] सामान्योक्तः कालः। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं
५ प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि।

[4]इन्द्रियानुवादेन, एकेन्द्रियाणां नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येन क्षुद्रभवग्रहणम्। तत्कीदृशमिति चेत्? उक्तलक्षणमुहूर्त्तमध्ये तावदेकेन्द्रियो भूत्वा कश्चिज्जीवः षट्षष्टिसहस्रद्वात्रिंशदधिकशतपरिमाणानि ६६१३२ जन्ममरणानि अनुभवति, तथा स एव जीवः तस्यैव मुहूर्तस्य मध्ये द्वित्रिचतुःपञ्चेन्द्रियो भूत्वा यथासंख्यमशीति-
१० षष्टि-चत्वारिंशत्-चतुर्विंशतिजन्ममरणान्यनुभवति। सर्वेऽप्येते समुदिताः क्षुद्रभवा एतावन्त एव भवन्ति-६६३३६। उक्तञ्च-

"[5]तिण्णि सया छत्तीसा छावट्ठि सहस्स जम्ममरणानि।
एवदिया खुद्दभवा हवंति अंतोमुहुत्तस्स॥ १॥
वियलिंदिएसु सीदिं सट्ठिं चालीसमेव जाणाहि।
१५ पंचेंदियचउवीसं खुद्दभवंतोमुहुत्तस्स॥ २॥" [ ]

यदा [6]चैवान्तर्मुहूर्तस्य मध्ये एतावन्ति जन्ममरणानि भवन्ति तदैकस्मिन्नुच्छ्वासे अष्टादश जन्ममरणानि लभ्यन्ते। तत्रैकस्य क्षुद्रभवसंज्ञा। उत्कर्षेण अनन्तकालोऽसङ्ख्येयाः पुद्गलपरिवर्ताः। तत्कथम्? उत्कर्षेण अनन्तकालः असंख्यातपुद्गलपरिवर्तनलक्षणो निरन्तरमेकेन्द्रियत्वेनैव [7]मृत्वा मृत्वा पुनर्भवनात्, ततो विकलेन्द्रियः पञ्चेन्द्रियो वा भवति। विकलेन्द्रियाणां
२० नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येन क्षुद्रभवग्रहणम्। उत्कर्षेण सङ्ख्येयानि वर्षसहस्राणि। पञ्चेन्द्रियेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेण सागरोपमसहस्रं पूर्वकोटिपृथक्त्वैरभ्यधिकम्। तत्कथम्? पञ्चेन्द्रियमिथ्यादृष्ट्येकजीवं प्रति उत्कर्षेण सागरोपमसहस्रं पूर्वकोटिपृथक्त्वैः षण्णवतिपूर्वकोटिभिरभ्यधिकमित्यर्थः। तथा हि- नपुंसकस्त्रीपुंवेदे हि संज्ञित्वेन अष्टावष्टौ वारान् पूर्व-
२५ कोट्यायुषा समुत्पद्यते। [8]तथैव [9]चासञ्ज्ञिकत्वे एवमष्टचत्वारिंशद्वाराः। अवान्तरे अन्तर्मुहूर्त-

---

१ सम्यग्दृष्टिर्भ-आ०, ब०, द०, ज०। २ नवग्रैवेयकेषु क-आ०, द०, ब०, ज०। ३ सम्यग्मिथ्यादृष्टेश्च आ०, ज०। सम्यग्मिथ्यादृष्टेः द०, ब०, ब०। ४ षट्खं० का० १०७-१३८। ५ गो० जी० गा० १२२-१२३। कल्याणा० गा० ५, ६। त्रीणि शतानि षट्त्रिंशत् षट्षष्टिसहस्रजन्ममरणानि। एतावन्तः क्षुद्रभवा भवन्ति अन्तर्मुहूर्त्तस्य॥ विकलेन्द्रियेष्वशीतिं षष्टिं चत्वारिंशदेव जानीहि। पञ्चेन्द्रियचतुर्विंशतिं क्षुद्रभवानन्तर्मुहूर्त्तस्य॥ ६ चैव आ०, ब०, द०, ज०। चैवं मुहू-ता०। ७ मृत्वा पुनर्भवात् आ०, द०, ब०, ज०। ८ यथैव आ०, ब०, ज०। ९ चासंज्ञित्वे ब०। च संज्ञिकत्वे ज०।

मध्ये पञ्चेन्द्रिये क्षुद्रभवेन अष्टौ वारान्, पुनरपि द्वितीयवारं नपुंसकस्त्रीपुंवेदे[1] सञ्ज्ञित्वासञ्ज्ञित्वाभ्यामष्टचत्वारिंशत् पूर्वकोटयो भवन्ति। एवं षण्णवति कोटयः। पञ्चेन्द्रियसासादनादीनां सामान्योक्तः कालो वेदितव्यः।

[2]कायानुवादेन पृथिव्यप्तेजोवायुकायिकानां नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येन क्षुद्रभवग्रहणम्। उत्कर्षेण [3]असङ्ख्येया लोकाः। वनस्पतिकायिकानाम् एकेन्द्रियवत्॥ ६६१३२॥ त्रसकायिकेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः, उत्कर्षेण द्वे सागरोपमसहस्रे पूर्वकोटिपृथक्त्वैरभ्यधिके। सासादनादीनां पञ्चेन्द्रियवत् कालो वेदितव्यः।

[4]योगानुवादेन वाङ्मनसयोगिषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताप्रमत्तसयोगकेवलिनां नानाजीवापेक्षया सर्वः कालः। एकजीवापेक्षया जघन्येनैकः समयः। तत्कथम्? वाङ्मनसयोगिषु मिथ्यादृष्ट्यादीनां षण्णां [5]योगपरावर्त्तगुणस्थानपरावर्त्तापेक्षया जघन्येनैकसमयः। तथा हि–अविवक्षितत्वादिगुणस्थानकालान्त्यसमये वाङ्मनसान्यतरयोगसङ्क्रमणं योगपरावर्त्तः। गुणान्तरयुक्तवाङ्मनसान्यतरयोगकालान्त्यसमये मिथ्यात्वादिगुणसङ्क्रमो गुणपरावर्त्तः। तदपेक्षया वा एकः समयः। उत्कर्षेण अन्तर्मुहूर्त्तः। तत्कथम्? योगकालं यावदित्यर्थः, पश्चात्तेषां योगान्तरसङ्क्रमः। सासादनसम्यग्दृष्टेः सामान्योक्तः कालः।

सम्यग्मिथ्यादृष्टेर्नानाजीवापेक्षया जघन्येनैकः समयः। तत्कथम्? सम्यग्मिथ्यादृष्टेर्नानाजीवापेक्षया योगगुणपरावर्तनमपेक्ष्य जघन्येनैकसमयः। तथा हि–केषाञ्चित् गुणान्तरयुक्तवाङ्मनसान्यतरयोगकालान्त्यसमये यदा सम्यग्मिथ्यात्वसङ्क्रमणं तदैव अन्येषां योगान्तरानुभूतम्, सम्यग्मिथ्यात्वकालान्त्यसमये वाङ्मनसान्यतरयोगसङ्क्रम इति कारणादेकः समयः। सम्यग्मिथ्यादृष्टेर्नानाजीवापेक्षया उत्कर्षेण पल्योपमासङ्ख्येयभागः। एकं जीवं प्रति सम्यग्मिथ्यादृष्टेर्जघन्येनोत्कर्षेण[7] च अन्तर्मुहूर्त्तः।

चतुर्णामुपशमकानां क्षपकाणाञ्च नानाजीवापेक्षया एकजीवापेक्षया च जघन्येनैकसमयः योगगुणपरावर्त्तनापेक्षया पूर्ववत्। उत्कर्षेणान्तर्मुहूर्त्तः। काययोगिषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनैकः समयः। उत्कर्षेणानन्तः कालोऽसंख्येयाः पुद्गलपरिवर्ताः। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यादीनां जघन्योत्कृष्टः कालो मनोयोगिवत्। अयोगानां सामान्यवत्।

वेदानुवादेन[8] स्त्रीवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति

१ वेदसंज्ञित्वाभ्याम् आ०, द०, ब०, ज०। २ षट्खं० का० १३९–१६१। ३ असङ्ख्येयकालः ब०। असङ्ख्येयलोकः आ०, ब०, ज०, द०। ४ षट्खं० का० १६२–२२६। ५–दृष्ट्यसंयतासंयत–आ०। –दृष्टिसंयतासंयत–ज०। ६ "एत्थ ताव जोगपरावत्ति-गुणपरावत्ति-मरणवाघादेहि मिच्छत्तगुणट्ठाणस्स एगसमओ परूविज्जदे।"–ध० टी० का० पृ० ४०९। ७ "एगजीवं पडुच्च जहण्णेण एगसमयं उक्कस्सेण अंतोमुहुत्तं।" –षट्खं० का० १६८,१६९। स० सि० पृ० २४। ८ षट्खं० का० २२७–२४९।

जघन्येनान्तर्मुहूर्त्तः । तत्कथम् ? एकजीवस्य मिथ्यात्वयुक्तः स्त्रीवेदकालः जघन्येनान्तर्मुहूर्त्तः, ततो गुणान्तरसङ्क्रम इत्यर्थः । उत्कर्षेण पल्योपमशतपृथक्त्वम् । तत्कथम् ? स्त्रीवेदयुक्तो मिथ्यादृष्टिर्देवेष्वायुर्बध्नाति, ततस्तिर्यङ्मनुष्येषु नारकसम्मूर्च्छनवर्जं तावत् पल्योपमशतपृथक्त्वम्, ततो वेदपरित्यागः । सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबादरान्तानां सामान्योक्तः कालः, किन्तु
५ असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः, उत्कर्षेण पञ्चपञ्चाशत्पल्योपमानि देशोनानि । देशोनानि कथमिति चेत् ? स्त्रीवेदासंयतैकजीवं प्रति उत्कर्षेण पञ्चपञ्चाशत्पल्योपमानि, गृहीतसम्यक्त्वस्य स्त्रीवेदेनोत्पादाभावात्[1], पर्याप्तः सन् सम्यक्त्वं गृहीष्यतीति पर्याप्तिसमापकान्तर्मुहूर्त्तहीनत्वात् देशोनानि तानि पञ्चपञ्चाशत्पल्योपमानि स्त्रीवेदे षोडशे[2] स्वर्गे सम्भवन्तीति वेदितव्यम् । पुंवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः
१० कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण सागरोपमशतपृथक्त्वम् । सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबादरान्तानां सामान्योक्तः कालः । नपुंसकवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेणानन्तः कालोऽसंख्येयाः पुद्गलपरिवर्त्ताः । सासादनसम्यग्दृष्ट्याद्यनिवृत्तिबादरान्तानां सामान्यवत् । किन्त्वसंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः, उत्कर्षेण त्रयस्त्रिंशत्सा-
१५ गरोपमानि देशोनानि । तत्कथम् ? कश्चिज्जीवः सप्तमनरके पतितः, तत्र नपुंसकः सन्नुत्कर्षेण त्रयस्त्रिंशत्सागरोपमायुरुत्पद्यते, स पर्याप्तः सन् सम्यक्त्वं गृहीष्यतीति कियत्कालं विश्रम्य विशुद्धो भूत्वा सम्यक्त्वं गृह्णाति, अन्ते त्यजति चेति देशोनानि[3] । अपगतवेदानां सामान्यवत् ।

कषायानुवादेन[4] चतुष्कषायाणां मिथ्यादृष्ट्याद्यप्रमत्तान्तानां मनोयोगिवत् जघन्ये-
२० नैकसमयः, उत्कर्षेण अन्तर्मुहूर्त्त इत्यर्थः । स तु कालः एकं जीवं प्रति काषायगुणपरावर्त्तापेक्षया ज्ञातव्यः । द्वयोरुपशमकयोर्द्वयोः क्षपकयोः केवललोभस्य वाऽकषायाणाञ्च सामान्योक्तः कालः ।

[5]ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानिषु मिथ्यादृष्टिसासादनसम्यग्दृष्ट्योः सामान्यवत् कालः । [6]विभङ्गज्ञानिषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येना-
२५ न्तमुहूर्त्तः, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि [7]देशोनानि । देशोनानीति कथम् ? विभङ्गज्ञानिमिथ्यादृष्ट्येकजीवं प्रति उत्कर्षेण नारकापेक्षया त्रयस्त्रिंशत्सागरोपमानि, पर्याप्तश्च विभङ्गज्ञानं प्रतिपद्यत इति पर्य्याप्तिसमापकान्तर्मुहूर्त्तहीनत्वात् देशोनानि । सासादनसम्यग्दृष्टेः सामान्योक्तः कालः । आभिनिबोधिकश्रुतावधिमनःपर्य्ययज्ञानिनां केवलज्ञानिनाञ्च सामान्योक्तः कालः ।

---

१ स्त्रीवेदोत्पा–आ०, द०, ब०, ज० । २ षोडशस्व–आ०, ब०, द०, ब०, ज० । ३ "छहि अंतोमुहुत्तेहि ऊणतेत्तीससागरोवलंभा ।" –ध० टी० का० पृ० ४४३ । ४ षट्खं० का० २५०–२५९ । ५ षट्खं० का० २६०–२६८ । ६ विभंगाज्ञा–ता०, आ०, ब०, व०, ज० । ७ "एवमंतोमुहुत्तूण तेत्तीससागरोवमाणि विभंगणाणस्स उक्कस्सकालो होदि ।" –ध० टी० का० पृ० ४५० ।

[1]संयमानुवादेन सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्परायथाख्यातसंयतानां संयताऽसंयतानामसंयतानाञ्च चतुर्णां सामान्योक्तः कालः ।

[3]दर्शनानुवादेन चक्षुर्दर्शनिषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः, एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण द्वे सागरोपमसहस्रे । सासादनसम्यग्दृष्ट्यादीनामेकादशानां सामान्योक्तः कालः । अचक्षुर्दर्शनिषु मिथ्यादृष्ट्यादीनां द्वादशानां सामान्योक्तः कालः । ५ अवधिकेवलिदर्शनिनोरवधिज्ञानिकेवलज्ञानिवत् ।

लेश्यानुवादेन कृष्णनीलकापोतलेश्यासु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः[4] । स तु कालः तिर्यङ्मनुष्यापेक्षया तेषामेव लेश्यापरावर्तसम्भवात् । एवं सर्वत्र च लेश्यायुक्तस्यान्तर्मुहूर्त्तस्तिर्यग्मनुष्यापेक्षया वेदितव्यः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि सप्तदशसागरोपमानि सप्तसागरोपमानि [5]सातिरेकाणि । १० तत्कथम् ? नारकापेक्षया यथासङ्ख्यं सप्तपञ्चमतृतीयपृथिव्यां त्रयस्त्रिंशत्सप्तदश सप्तसागरोपमानि । देवनारकाणामवस्थितलेश्यत्वात् व्रजन् नियमेन तल्लेश्यायुक्तो व्रजति आगच्छतो नियमो नास्तीति सातिरेकाणि । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योः सामान्योक्तः कालः । असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः उत्कर्षेण त्रयस्त्रिंशत्सप्तदशसप्तसागरोपमानि [6]देशोनानि । तत्कथम् ? उक्तलेश्यायुक्ताऽसंय- १५ तसम्यग्दृष्ट्येकजीवं प्रति उत्कर्षेण नारकापेक्षया उक्तान्येव सागरोपमानि, पर्याप्तिसमापकान्तर्मुहूर्ते सप्तम्यां मारणान्तिके च सम्यक्त्वाभावात् देशोनानि । तेजःपद्मलेश्ययोर्मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया सर्वः कालः । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण द्वे सागरोपमे अष्टादश[7] च सागरोपमानि [8]सातिरेकाणि । कथमेतत् ? तेजःपद्म-

---

१ षट्खं० का० २६९–२७५ । २–स्थापन–ता०, व०, द० । षट्खं० का० २७६–२८२ । ३ षट्खं० का० २८३–३०८ । ४–मुहूर्तः कालः स तु ति–आ० । ५ "एवं दोहि अंतोमुहुत्तेहि सादिरेयाणि तेत्तीसं सागरोवमाणि किण्हलेस्साए उक्कस्सकालो होदि । एवं दोहि अंतोमुहुत्तेहि सादिरेयाणि सत्तारस सागरोवमाणि णीललेस्साए उक्कस्सकालो होदि । ...... एवं दोहि अंतोमुहुत्तेहि सादिरेयाणि सत्त सागरोवमाणि काउलेस्साए उक्कस्सकालो होदि ।" –ध० टी० का० पृ० ४५७, ४५८ । ६ "एवं छहि अंतोमुहुत्तेहि ऊणाणि तेत्तीसं सागरोवमाणि किण्हलेस्साए उक्कस्सकालो होदि । ......पच्छिल्लमंतोमुहुत्तं पुव्विल्लतिसु अंतोमुहुत्तेसु सोहिय सुद्धसेसेणं ऊणाणि सत्तारस सागरोवमाणि असंजदसम्मादिट्ठिस्स णीललेस्साए उक्कस्सकालो होदि । ......पच्छिल्लं अंतोमुहुत्तं पुव्विल्लतिसु अंतोमुहुत्तेसु सोहिय सुद्धसेसेण ऊणाणि सत्तसागरोवमाणि काउलेस्साए उक्कस्सकालो होदि ।" –ध० टी० का० पृ० ४६०–४६२ । ७–श सा–आ०, द०, ब०, ज० । ८ "लद्धा सगट्ठिदी पुव्विल्लंतो मुहुत्तेण अब्भहिया ।...... लद्धाणि अंतोमुहूत्तूणअड्ढाइज्ज सागरोवमाणि संपुण्णानि ।......तत्थ अट्ठारह सागरोवमाणि पलिदोवमस्स असंखेज्जदिभागेणब्भहियाणि जीविदूण चुदस्स णट्ठा पम्मलेस्सा । ......लद्धाणि अंतोमुहूत्तूणद्धसागरोवमेण अहियाणि अट्ठारस सागरोवमाणि ।" –ध० टी० का० पृ० ४६३–४६५ ।

लेश्यामिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्येकजीवं प्रति उत्कर्षेण प्रथमस्वर्गपटलापेक्षया द्वे सागरोपमे। द्वादशस्वर्गपटलापेक्षया अष्टादशसागरोपमानि च, तल्लेश्यायुक्तानां मारणान्तिकोत्पादसम्भवात् सातिरेकतत्सागरोपमयुक्तत्वाच्च सातिरेकाणि किञ्चिदधिकानीत्यर्थः । सासादनसम्यग्दृष्टि-सम्यग्मिथ्यादृष्ट्योः सामान्योक्तः कालः। संयताऽसंयतप्रमत्ताप्रमत्तान्तानां नानाजीवापेक्षया ५ सर्वः कालः । एकं जीवं प्रति जघन्येनैकसमयः । उत्कर्षेणान्तर्मुहूर्तः । शुक्लेश्यानां मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण एकत्रिंशत्सागरोपमानि सातिरेकाणि। तत्कथम्? शुक्ललेश्यमिथ्यादृष्ट्येकजीवं प्रति उत्कर्षेण एकत्रिंशत्सागरोपमानि, ग्रैवेयकदेवापेक्षया तेषां मारणान्तिकोत्पादावस्थायामपि शुक्लेश्या-सम्भवात् [1]सातिरेकाणि। सासादनसम्यग्दृष्ट्यादिसयोगकेवल्यन्तानामलेश्यानाञ्च सामा-१० न्योक्तः कालः । किन्तु संयतासंयतस्य नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघन्येनैकः समयः उत्कर्षेणान्तर्मुहूर्त्तः। कथमेतत्? संयतासंयतशुक्लेश्यैकजीवं प्रति गुण-लेश्यापरावर्त्तापेक्षेतराभ्यां जघन्येनैकसमयः। उत्कर्षेणान्तर्मुहूर्त्तः।

[2]भव्यानुवादेन भव्येषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वकालः। एकजीवापेक्षया द्वौ भङ्गौ अनादिः सपर्य्यवसानः, सादिपर्य्यवसानश्च। तत्र [3]सादिपर्य्यवसानः जघन्येनान्त-१५ र्मुहूर्त्तः। उत्कर्षेण अर्धपुद्गलपरिवर्त्तो [4]देशोनः। सासादनसम्यग्दृष्ट्याद्ययोगकेवल्यन्तानां सामान्योक्तः कालः। अभव्यानामनादिरपर्यवसानः। अयं तु तृतीयो भङ्गः।

[5]सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टीनामसंयतसम्यग्दृष्ट्याद्ययोगकेवल्यन्तानां सामा-न्योक्तः। क्षयोपशमसम्यग्दृष्टीनां चतुर्णां सामान्योक्तः कालः। के ते चत्वारः? असंयतसम्य-ग्दृष्टि-संयतासंयत-प्रमत्तसंयता अप्रमत्तसंयताश्चेति। औपशमिकसम्यक्त्वेषु असंयतसम्यग्दृष्टि-२० संयतासंयतयोर्नानाजीवापेक्षया जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण पल्योपमासङ्ख्येयभागः। एकं जीवं प्रति जघन्यश्चोत्कृष्टश्चान्तर्मुहूर्त्तः। प्रमत्ताप्रमत्तयोश्चतुर्णामुपशमकानाञ्च नानाजीवापेक्षया एकजीवापेक्षया च जघन्येनैकः समयः। उत्कर्षेणान्तर्मुहूर्त्तः। सासादनसम्यग्मिथ्यादृष्टि-मिथ्यादृष्टीनाञ्च सामान्योक्तः कालः।

[6]सञ्ज्ञ्यनुवादेन सञ्ज्ञिषु मिथ्यादृष्ट्यादिनवगुणस्थानानां पुंवेदवत्। शेषाणां सामा-२५ न्योक्तः कालः। असञ्ज्ञिनां मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकं जीवं प्रति जघ-न्येन क्षुद्रभवग्रहणम्। उत्कर्षेण अनन्तः कालः, असङ्ख्येयाः पुद्गलपरिवर्त्ताः। ये तु न सञ्ज्ञिनो नाप्यसंज्ञिनस्तेषां सामान्योक्तः कालः।

[7]आहारानुवादेन आहारकेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकजीवं प्रति

---

१ "एवं पढमिल्लंतोमुहुत्तेण सादिरेगएक्कत्तीस सागरोवममेत्तोच्चि मिच्छत्तसहिदसुक्क-लेस्सुक्कस्सकालो होदि।" -ध० टी० का० पृ० ४७२। २ षट्खं० का० ३०९-३१६। ३ सादिः सप-ता०, व०। ४ "जादं देसूणमद्धपोग्गलपरियट्टं।" -ध० टी० का० पृ० ४८०। ५ षट्खं० का० ३१७-३२९। ६ षट्खं० का० ३३०-३३६। संज्ञानु-आ०, द०, ब०, व०, ज०। ७ षट्खं० का० ३३७-३४२।

जघन्येनान्तर्मुहूर्त्तः। [1]वक्रेण गतः क्षुद्रभवेषु पुनरपि वक्रेण गतः। उत्कर्षेण अङ्गुल्यसंख्येयभागः संख्येयाऽसंख्येया उत्सर्पिण्यवसर्पिण्यः। अस्यायमर्थः–उत्कर्षेण सङ्ख्याताऽसङ्ख्यातमानावच्छिन्नोत्सर्पिण्यवसर्पिणीलक्षणाङ्गुल्यसंख्येयभागः शश्वदृजुगतिमत्त्वात्। शेषाणां सासदनसम्यग्दृष्ट्यादीनां त्रयोदशगुणस्थानानां सामान्योक्तः कालः। अनाहारकेषु मिथ्यादृष्टेर्नानाजीवापेक्षया सर्वः कालः। एकजीवं प्रति जघन्येनैकसमयः। उत्कर्षेण त्रयः समयाः, ५ **"एकं द्वौ त्रीन् वाऽनाहारकः।"** [त० सू० २।३०] इति वक्ष्यमाणत्वात्। सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण आवलिकाया असंख्येयभागः। तच्चावलिकाया असंख्येयभागः समयमानलक्षणत्वात् एकसमय एव स्यात्, आवल्या असंख्यातसमयलक्षणत्वादिति। एकजीवं प्रति जघन्येनैकः समयः। उत्कर्षेण द्वौ समयौ। सयोगकेवलिनो नानाजीवापेक्षया जघन्येन त्रयः समयाः समये समये दण्डादिप्रारम्भकत्वात्। उत्क- १० र्षेण सङ्ख्येयाः समयाः जघन्योत्कृष्टसङ्ख्यातमानावच्छिन्नाः निरन्तरं विषमसमये दण्डादिप्रारम्भकत्वात्। एकं जीवं प्रति जघन्यश्चोत्कृष्टश्च कालस्त्रयः समयाः प्रतरद्वयलोकपूरणलक्षणाः। अयोगकेवलिनां सामान्योक्तः कालः। [2]इति कालवर्णनं सम्पूर्णम्।

अथ अनन्तरमन्तरं निरूप्यते। विवक्षितस्य गुणस्थानस्य गुणस्थानान्तरसङ्क्रमे सति पुनरपि तद्गुणस्थानप्राप्तिः यावन्न भवति तावान् कालोऽन्तरमुच्यते। तदन्तरं सामान्यविशेष- १५ भेदात् द्विप्रकारं भवति। [3]सामान्येन तावदन्तरमुच्यते–मिथ्यादृष्टेर्नानाजीवापेक्षया अन्तरं नास्ति। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेण द्वे षट्षष्टी [4]देशोने सागरोपमानाम्। तत्कथम्? वेदकसम्यक्त्वेन युक्तः एकां षट्षष्टिं तिष्ठति। वेदकसम्यक्त्वस्य उत्कर्षेण एता[5]वन्मात्रकालत्वात्। पुनरवान्तरे अन्तर्मुहूर्त्तं यावत् सम्यग्मिथ्यात्वं गतस्य पुनरौपशमिकसम्यक्त्वग्रहणयोग्यता पल्योपमासङ्ख्येयभागे गते सति। एतावदन्तरे तत्र वेदकसम्यक्त्वग्रहण- २० योग्यता, ग्रहणे योग्यताया एवं सम्भवात्। सासादनसम्यग्दृष्टेरन्तरं नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण पल्योपमासङ्ख्येयभागः। एकं जीवं प्रति जघन्येन पल्योपमासङ्ख्येयभागः। उत्कर्षेण अर्द्धपुद्गलपरिवर्त्तो [6]देशोनः। सम्यग्मिथ्यादृष्टेरन्तरं नानाजीवापेक्षया सासादनवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण अर्द्धपुद्गलपरिवर्त्तो [7]देशोनः।

---

१ "जहण्णेण खुद्दाभवग्गहणं तिसमयूणं। २११। तिण्णि विग्गहे काऊण सुहुमेइंदिएसुप्पज्जिय चउत्थसमए आहारी होदूण भुंजमाणाउअं कदलीघादेण घादिय अवसाणे विग्गहं करिय णिग्गयस्स तिसमऊणखुद्दाभवग्गहणमेत्ताहारकालुवलंभादो।"–षट्खं० खु० पृ० १८४। २ इति कालव्यावर्णना समाप्ता आ०। इति कालव्यावर्णनं समाप्तम् ब०। ३ षट्खं अ० २–२०। ४ "लद्धमंतरं अंतोमुहुत्तूण वेछावट्ठिसागरोवमाणि।" –ध० टी० अ० पृ० ७। ५–मानका–आ०, द०, ब०, ज०। ६ "एवं समयाहियचोद्दसअंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टं सासणसम्मादिट्ठिस्स उक्कस्संतरं होदि।" –ध० टी० अ० पृ० १२। ७ "एदेहि चोद्दसअंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टं सम्मामिच्छत्तुक्कस्संतरं होदि।" –ध० टी० अ० पृ० १३।

असंयतसम्यग्दृष्टिसंयताऽसंयतप्रमत्तसंयताप्रमत्तसंयतानां नानाजीवापेक्षया[1] अन्तरं नास्ति। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण अर्द्धपुद्गलपरिवर्त्तो[2] देशोनः। चतुर्णामुपशमकानां नानाजीवापेक्षया जघन्येनैकसमयः[3]। उत्कर्षेण वर्षपृथक्त्वम्। त्रिभ्य उपरि नवभ्योऽधः पृथक्त्वसञ्ज्ञा आगमस्य। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण अर्द्धपुद्गलपरिवर्त्तो
५ [4]देशोनः। चतुर्णां क्षपकाणामयोगिकेवलिनाञ्च नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण षण्मासाः। एकं जीवं प्रत्यन्तरं नास्ति। सयोगकेवलिनां नानाजीवापेक्षया[5] एकजीवापेक्षया चान्तरं नास्ति।

विशेषेण [6]गत्यनुवादेन नरकगतौ नारकाणां सप्तसु नरकभूमिषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण
१० एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमानि [7]देशोनानि। [8]सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण पल्योपमासङ्ख्येयभागः। एकं जीवं प्रति जघन्येन पल्योपमासङ्ख्येयभागः अन्तर्मुहूर्त्तश्च। उत्कर्षेण एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमानि [9]देशोनानि।

तिर्यग्गतौ, तिरश्चां मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघ-
१५ न्येनान्तर्मुहूर्त्तः। उत्कर्षेण त्रीणि पल्योपमानि [10]देशोनानि। अधिकमपि कस्मान्नेति चेत्?

१–संयतानां नाना–**आ०, द०, ब०, ज०**। २ "एवमेक्कारसेहि अंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टमसंजदसम्मादिट्ठीणमुक्कस्संतरं होदि।......एवमेक्कारसेहि अन्तोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टमुक्कस्संतरं संजदासंजदस्स होदि......एवं दसहि अंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टं पमत्तस्सुक्कस्संतरं होदि।......एवं दसहि अंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टं अप्पमत्तस्सुक्कस्संतरं होदि।" –**ध० टी० अ० पृ०** १५–१७। ३–कः सम–**ब०**। ४ "एवमट्ठावीसेहि अंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टमपुव्वकरणस्सुक्कस्संतरं होदि। एवं तिण्हमुवसामगाणं। णवरि परिवाडीए छव्वीसं चउवीसं बावीसं अंतोमुहुत्तेहि ऊणमद्धपोग्गलपरियट्टं तिण्हमुक्कस्संतरं होदि।" –**ध० टी० अ० पृ०** २०। ५–पेक्षया नास्त्यन्तरं विशे –**आ०, द०, ब०, ज०**। ६ **षट्खं० अ०** २१–१००। ७ "उक्कस्सेण तेत्तीसं सागरोवमाणि देसूणाणि।२३। एवं छहि अंतोमुहुत्तेहि ऊणाणि तेत्तीसं सागरोवमाणि मिच्छत्तुक्कस्संतरं होदि।......एवं छहि अंतोमुहुत्तेहि ऊणाणि तेत्तीसं सागरोवमाणि असंजदसम्मादिट्ठि-उक्कस्संतरं होदि।" –**ध० टी० अ० पृ०** २३। ८ सासादनसम्यग्मिथ्या –**आ०, द०, ब०, ज०**। ९ "एवं समयाहियचदुहि अंतोमुहुत्तेहि ऊणाओ सगसगुक्कस्सट्ठिदीओ सासणाणुक्कस्संतरं होदि।......छहि अंतोमुहुत्तेहि ऊणाओ सगसगुक्कस्सट्ठिदीओ सम्मामिच्छत्तुक्कस्संतरं होदि।" –**ध० टी० अ० पृ०** ३०–३१। १० "आदिल्लेहि मुहुत्तपुधत्तब्भहिय-वेमासेहि अवसाणे उवलद्ध वे अंतोमुहुत्तेहि य ऊणाणि तिण्णि पलिदोवमाणि मिच्छत्तुक्कस्संतरं होदि।" –**ध० टी० अ० पृ०** ३२।

क्षपणारम्भकवेदकयुक्तस्य तिर्यक्षूत्पादाभावात्, तद्युक्तो हि देवेष्वेवोत्पद्यते। अतो मिथ्यात्वयुक्तस्त्रिपल्योपमायुष्को भोगभूमिषु उत्पद्यते। तत्र चोत्पन्नानां तिर्यग्मनुष्याणां किञ्चिदधिकाष्टचत्वारिंशद्दिनेषु सम्यक्त्वग्रहणयोग्यता [1]भवति, नियमादेतावद्दिनेषु[2] मिथ्यात्वपरित्यागात् सम्यक्त्वं गृह्णाति। त्रिपल्योपमायुःशेषे पुनर्मिथ्यात्वं प्रतिपद्यते इति [3]गर्भकालेन किञ्चिदधिकाष्टचत्वारिंशद्दिनैः अवसानकालशेषेण च हीनत्वात् देशोनानि ज्ञातव्यानि। ५ सासादनसम्यग्दृष्ट्यादीनां चतुर्णां सामान्योक्तमन्तरम्।

मनुष्यगतौ मनुष्याणां मिथ्यादृष्टेस्तिर्यग्वत्। यतो मनुष्या अपि भोगभूमौ तथाविधा भवन्ति। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वैरभ्यधिकानि। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम्। एकजीवापेक्षया १० जघन्येनान्तर्मुहूर्तः। उत्कर्षेण त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वैरभ्यधिकानि। संयतासंयतप्रमत्ताप्रमत्तानां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः उत्कर्षेण पूर्वकोटिपृथक्त्वानि। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवदन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटिपृथक्त्वानि। शेषाणां क्षीणकषायादीनां सामान्यवत्। १५

देवगतौ देवानां मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण एकत्रिंशत्सागरोपमानि देशोनानि[4]। तत्कथम्? मिथ्यात्वयुक्तो अग्रग्रैवेयकेषु उत्पद्यते, पश्चात्सम्यक्त्वमादाय एकत्रिंशत्सागरोपमानि तिष्ठति। अवसानकालशेषे पुनर्मिथ्यात्वं प्रतिपद्यते। अन्यथा गत्यनुक्रमः[5] स्यादिति[6] देशोनानि। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमसंख्येयभागः अन्तर्मुहूर्त्तश्च। उत्कर्षेण एकत्रिंशत्सागरोपमानि [7]देशोनानि। २०

[8]इन्द्रियानुवादेन एकेन्द्रियाणां नानाजीवापेक्षया नास्त्यन्तरम्। एकजीवापेक्षया जघन्येन क्षुद्रभवग्रहणम्। उत्कर्षेण द्वे सागरोपमसहस्रे पूर्वकोटिपृथक्त्वैरभ्यधिके पण्णवतिपूर्वकोटिभिरभ्यधिके इत्यर्थः। विकलेन्द्रियाणां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येन क्षुद्रभवग्रहणम्, उत्कर्षेण अनन्तः कालोऽसंख्येयाः पुद्गलपरिवर्त्ताः। एकमिन्द्रियं २५

१ भवति एता–द०, ब०, ज०। २–दिनेषु सम्यक्त्वमिथ्या –आ०, द०, ब०, ज०। ३ गर्भकाले कि –आ०, द०, ब०, ज०। ४ "चदुहि अंतोमुहुत्तेहि ऊणाणि एक्कत्तीसं सागरोवमाणि उक्कस्संतरं होदि। ......पंचहि अंतोमुहुत्तेहि ऊणाणि एक्कत्तीसं सागरोवमाणि असंजदसम्मादिट्ठिस्स उक्कस्संतरं होदि।" –ध० टी० अ० पृ० ५८। ५–नुगमः ज०। ६ इति शेषोनादे –आ०। ७ "तिहि समएहि ऊणाणि एक्कत्तीसं सागरोवमाणि सासणुक्कस्संतरं होदि। ......छहि अंतोमुहुत्तेहि ऊणाणि एक्कत्तीसं सागरोवमाणि सम्मामिच्छत्तस्सुक्कस्संतरं होदि।" –ध० टी० अ० पृ० ६०। ८ षट्खं० अं० १०१–१२९।

प्रति अन्तरमुक्तम्। गुणं प्रति उभयतोऽपि नास्त्यन्तरम्। उभयत इति कोऽर्थः ? एकेन्द्रियविकलेन्द्रियतोऽपि, यतस्ते एकेन्द्रियविकलेन्द्रिया मिथ्यादृष्टय एव। एकेन्द्रियविकलेन्द्रियाणां चतुर्णां[1] गुणस्थानान्तरासम्भवात्। पञ्चेन्द्रियाणां तु तत्सम्भवात् मिथ्यात्वादेः सम्यक्त्वादिना अन्तरं द्रष्टव्यम्। पञ्चेन्द्रियेषु मिथ्यादृष्टेः सामान्यवत्। सासादनसम्यग्दृष्टिसम्य-
५ ग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण सागरोपमसहस्रं पूर्वकोटिपृथक्त्वैरभ्यधिकम्। असंयतसम्यग्दृष्ट्याद्यप्रमत्तानां चतुर्णां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण सागरोपमसहस्रं पूर्वकोटिपृथक्त्वैरभ्यधिकम्। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण सागरोपमसहस्रं
१० पूर्वकोटिपृथक्त्वैरभ्यधिकम्। शेषाणां चतुर्णां क्षपकाणां सयोग्ययोगिकेवलिनाञ्च सामान्योक्तमन्तरम्।

[3]कायानुवादेन पृथिव्यप्तेजोवायुकायिकानां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येन क्षुद्रभवग्रहणम्। उत्कर्षेण अनन्तः कालोऽसंख्येयाः पुद्गलपरिवर्त्ताः। वनस्पतिकायिकानां नानाजीवापेक्षया नास्त्यन्तरम्, एकजीवापेक्षया जघन्येन क्षुद्रभवग्रहणम्।
१५ उत्कर्षेण असंख्येया लोकाः। तत्कथम् ? पृथिव्यादिकायानां वनस्पतिकायिकैरन्तरमुत्कर्षेणासंख्येयाः पुद्गलपरिवर्त्ताः। तेषां नैरन्तरमुत्कर्षेण असंख्येया लोकाः वनस्पतिकायिकेभ्यः अन्येषामल्पकालत्वात्। एवं कायं प्रत्यन्तरमुक्तम्। गुणस्थानं प्रति पृथिव्यादिचतुर्णां वनस्पतिकायिकानाञ्च अन्तरं नास्ति, यतः पृथिव्यप्तेजोवायुकायिकास्तथा वनस्पतिकायिकाश्च उभयेऽपि मिथ्यादृष्टयो वर्त्तन्ते। त्रसकायिकेषु मिथ्यादृष्टेः सामान्यवत्। सासादनसम्यग्दृष्टि-
२० सम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण द्वे सागरोपमसहस्रे[2] पूर्वकोटिपृथक्त्वैरभ्यधिके। असंयतसम्यग्दृष्ट्यादीनां चतुर्णां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण द्वे सागरोपमसहस्रे पूर्वकोटिपृथक्त्वैरभ्यधिके। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण द्वे सागरोपमसहस्रे पूर्व-
२५ कोटिपृथक्त्वैरभ्यधिके। चतुर्णां क्षपकाणां सयोग्ययोगिनाञ्च[4] पञ्चेन्द्रियवत्।

[5]योगानुवादेन कायवाङ्मनसयोगिनां मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ताऽप्रमत्तसयोगकेवलिनां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। कायवाङ्मनसयोगिनां मिथ्यादृष्ट्याद्युक्तषड्गुणस्थानानां नानैकजीवापेक्षया[6] अन्तरं कथं नास्तीति चेत् ? [7]कायादियोगिनोऽन्तर्मुहूर्त्तकालत्वात्, कायादियोगे स्थितस्यात्मनो मिथ्यात्वादिगुणस्य गुणा-

१ चतुर्गु-ता०। २-सहस्रे पू -आ०, द०, ब०, ज०। ३ षट्खं० अं० १३०-१५२। ४-गिनां पञ्चे-आ०, द०, ब०, ज०। ५ षट्खं० अ० १५३-१७७। ६-पेक्षया कथमन्तरम् आ०, द०, ब०, ज०। ७ काययोगेनान्त -ता०। काययोगिनान्त -ब०।

न्तरेणान्तरं पुनस्तत्प्राप्तिश्च न सम्भवतीति कारणात् । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् । [1]एकं जीवं प्रति नास्त्यन्तरम् । सासादनसम्यग्दृष्ट्यादीनामप्येकजीवापेक्षया अत एव पुनस्तत्प्राप्त्यसंभवकारणात् नास्त्यन्तरम् । चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति नास्त्यन्तरम् । चतुर्णां क्षपकाणाम[2]योगकेवलिनाञ्च सामान्यवत् ।

[3]वेदानुवादेन स्त्रीवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण पञ्चपञ्चाशत्पल्योपमानि [4]देशोनानि । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति जघन्येन[5] पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च । उत्कर्षेण पल्योपमशतपृथक्त्वम् । असंयतसम्यग्दृष्ट्याद्यप्रमत्तान्तानां नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण पल्योपमशतपृथक्त्वम् । द्वयो[6]रुपशमकयोर्नानाजीवापेक्षया सामान्यवत् । ननु उपशमकाश्चत्वारो वर्तन्ते द्वयोरिति कस्मात् ? सत्यम्; अपूर्वकरणाऽनिवृत्तिकरणाभ्यामुपरि वेदाऽसम्भवात् । एवं द्वयोः क्षपकयोरपि चर्चनीयम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण पल्योपमशतपृथक्त्वम् । द्वयोः क्षपकयोर्नानाजीवापेक्षया जघन्येनैकः समयः । उत्कर्षेण वर्षपृथक्त्वम् । एकं जीवं प्रति नास्त्यन्तरम् । पुंवेदेषु मिथ्यादृष्टेः सामान्यवत् । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति जघन्येन पल्योपमासङ्ख्येयभागोऽन्तर्मुहूर्त्तश्च । उत्कर्षेण सागरोपमशतपृथक्त्वम् । असंयतसम्यग्दृष्ट्याद्यप्रमत्तान्तानां नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण सागरोपमशतपृथक्त्वम् । द्वयोरुपशमकयोर्नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण सागरोपमशतपृथक्त्वम् । द्वयोः क्षपकयोर्नानाजीवापेक्षया जघन्येनैकः समयः । उत्कर्षेण संवत्सरः सातिरेकः, अष्टादश मासा इत्यर्थः । एकं जीवं प्रति नास्त्यन्तरम् । नपुंसकवेदेषु मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम् । [7]एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि देशोनानि[8] । सासादनसम्यग्दृष्ट्याद्यनिवृत्त्युपशमकान्तानां सामान्योक्तम् । अनिवृत्ति च तदुपशमकश्च तद्गुणस्थानमन्ते येषामिति ग्राह्यम् । नवमगुणस्थानस्य नवभागीकृतस्य तृतीये भागे नपुंसकवेदो निवर्त्तते, चतुर्थे भागे स्त्रीवेदो निवर्त्तते, षष्ठे भागे पुंवेदो [9]निवर्त्तते यतः । द्वयोः क्षपकयोः स्त्रीवेदवत् । तत्कथम् ? नानाजीवापेक्षया जघन्येनैकः समयः । [10]उत्कर्षेण अष्टादश मासाः । एकं

---

१ एकं प्रति आ० । २-मयोगिके -ता०, व०, ब०, द०, ज० । ३ षट्खं० अ० १७८-२२२ । ४ "पंचहि अंतोमुहुत्तेहि ऊणाणि पणवण्णपलिदोवमाणि उक्कस्संतरं होदि ।"- ध० टी० अ० पृ० ९५ । ५ पल्योपमानि सं-ज० । ६-रुपशमयोः आ०, द०, ब०, ज० । ७ एकं प्रति आ० । ८ "एवं छहि अंतोमुहुत्तेहि ऊणाणि तेत्तीसं सागरोवमाणि उक्कस्संतरं होदि ।" ध० टी० अ० पृ० १०७ । ९ विद्यते ता०, ब० । वर्तते आ०, ब०, द० । १० "उक्कस्सेण वासपुधत्तं" -षट्खं० अ० २१२ ।

जीवं प्रति नास्त्यन्तरमित्यर्थः। वेदरहितेषु अनिवृत्तिबादरोपशमकसूक्ष्मसाम्परायोपशमकयोर्नानाजीवापेक्षया सामान्योक्तम्। एकं जीवं प्रति जघन्यमुत्कृष्टञ्च अन्तर्मुहूर्त्तः। उपशान्तकषायस्य नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति नास्त्यन्तरम्। तस्याधो गुणस्थाने सवेदत्वात्। क्षीणकषायादीनामवेदानां सामान्यवत्।

५ [1]कषायानुवादेन क्रोधमानमायालोभकषायाणां मिथ्यादृष्ट्याद्यनिवृत्त्युपशमकानां मनोयोगिवत्। द्वयोः क्षपकयोर्नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण संवत्सरः सातिरेकः। केवललोभस्य सूक्ष्मसाम्परायोपशमकस्य नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति नास्त्यन्तरम्। केवललोभस्य सूक्ष्मसाम्परायक्षपकस्य सामान्यवत्। एकं जीवं प्रति नास्त्यन्तरम्। अकषायेषूपशान्तकषायस्य नानाजीवापेक्षया सामान्यवत्। एकं जीवं
१० प्रति नास्त्यन्तरम्। क्षीणकषायसयोगाऽयोगकेवलिनां सामान्यवत्।

[2]ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानिषु मिथ्यादृष्टेर्नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया सामान्यवत्, जघन्येनैकसमयः। उत्कर्षेण पल्योपमासंख्येयभाग[3] इत्यर्थः। एकं जीवं प्रति नास्त्यन्तरम्। यतो ज्ञानत्रययुक्तैकजीवेऽपि मिथ्यात्वस्यान्तरं नास्ति, गुणान्तरे ज्ञानत्रयव्यभिचारात्। सासादने
१५ अस्तीति [4]चेत्; न; तस्य सम्यक्त्वग्रहणपूर्वत्वात्, सम्यग्दृष्टेश्च मिथ्याज्ञानविरोधात्। आभिनिबोधिकश्रुतावधिज्ञानिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटी [5]देशोना। तत्कथम्? देशविरतादिगुणस्थाने अन्तरम्, अवसानकालशेषे[6] पुनरसंयतत्वं प्रतिपद्यत इति देशोना। सयताऽसंयतस्य नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण षट्षष्टिसागरोप-
२० मानि सातिरेकाणि[7]। षट्षष्टिसागरोपमानन्तरं पुनः संयतासंयतो भवति यतः। तत्कथम्? असंयतप्रमत्तादिगुणस्थानेन अन्तरं पूर्वकोटिचतुष्टयाष्टवर्षैः सातिरेकाणि, मनुष्येषु उत्पन्नो हि अष्टवर्षानन्तरं संयतासंयतत्वं प्रतिपद्यत इति। प्रमत्ताऽप्रमत्तयोर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि [8]सातिरे-

---

१ षट्खं० अ० २२३-२२८। २ षट्खं० अ० २२९-२५७। ३-भागः एकं आ०, द०, ब०, ज०। ४ चेत् तस्य आ०। ५ "लद्धं चदुहि अंतोमुहुत्तेहि ऊणिया पुव्वकोडी अंतरं। ओहिणाणिअसंजदसम्मादिट्ठिस्स पंचहि अंतोमुहुत्तेहि ऊणिया पुव्वकोडी लद्धमन्तरं।" -ध० टी० अ० पृ० ११५, ११६। ६ शेषेमु पु -आ०, द०, ब०। ७ "एवमट्ठवस्सेहि एक्कारस अंतोमुहुत्तेहि य ऊणियाहि तीहि पुव्वकोडीहि सादिरेयाणि छावट्ठिसागरोवमाणि उक्कस्संतरं।...... णवरि आभिणिबोहियणाणस्स आदीदो अंतोमुहुत्तेण आदिकादूण अंतराविय बारसअंतोमुहुत्तेहि समहिय अट्ठवस्सूण तीहि पुव्वकोडीहि सादिरेयाणि छावट्ठिसागरोवमाणि त्ति वत्तव्वं।" -ध० टी० अ० पृ० ११७। ८ "तेत्तीसं सागरोवमाणि एगेणंतोमुहुत्तेण अब्भहिय पुव्वकोडीए सादिरेयाणि उक्कस्संतरं।......अवसिट्ठेहि अद्धछट्ठंतोमुहुत्तेहि ऊणपुव्वकोडीए सादिरेयाणि तेत्तीसं सागरोवमाणि उक्कस्संतरं होदि।" -ध० टी० अ० पृ० १२१, १२२।

काणि। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण षट्षष्टिसागरोपमानि [1]सातिरेकाणि। चतुर्णां क्षपकाणां सामान्यवत्। किन्तु अवधिज्ञानिनो नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण वर्षपृथक्त्वम्। एकं जीवं प्रति नास्त्यन्तरम्।

मनःपर्ययज्ञानिषु प्रमत्ताऽप्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं ५ प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः। अधिकमपि कस्मान्नेति चेत्? अधोगुणस्थानेषु वर्तमानानां मनःपर्य्ययासंभवात्, तेषु वर्तमानानाञ्च अधिकमन्तरं सम्भवतीति। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटी [2]देशोना। तत्कथम्? उपशमश्रेणीतो हि पतितास्ते मनःपर्य्ययज्ञानमपरित्यजन्तः प्रमत्ताप्रमत्तगुणस्थाने वर्तन्ते यावत्पूर्वकोटिकालशेषः, पुनस्तदारोहणं कुर्वन्तीति देशोना। चतुर्णां १० क्षपकाणामवधिज्ञानिवत् नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण वर्षपृथक्त्वम्। एकं जीवं प्रति नास्त्यन्तरमित्यर्थः। [3]सयोगायोगकेवलिज्ञानिनोः सामान्यवत्।

[4]संयमानुवादेन सामायिकच्छेदोपस्थापनशुद्धिसंयतेषु प्रमत्ताऽप्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्यमुत्कृष्टश्च अन्तर्मुहूर्त्तः। द्वयोरुपशमकयोर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्तः। उत्कर्षेण पूर्वकोटी १५ [5]देशोना। तत्कथम्? अष्टवर्षानन्तरं तपो गृहीत्वा उपशमश्रेणिमारुह्य पतितः प्रमत्ताऽप्रमत्तयोः पूर्वकोटिकालशेषं यावत् वर्त्तित्वा पुनस्तदारोहणं करोतीति देशोना। द्वयोः क्षपकयोः सामान्यवत्। [6]परिहारशुद्धिसंयतेषु प्रमत्ताऽप्रमत्तयोर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः। सूक्ष्मसाम्परायशुद्धिसंयमे उपशमकस्य नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति नास्त्यन्तरम्। कस्मात्? गुणान्तरे सूक्ष्मसाम्पराय- २० संयमाभावात्। सूक्ष्मसाम्परायक्षपकस्य सामान्यवत्। [7]यथाख्याते अकषायवत्। संयताऽसंयतस्य नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। असंयतेषु मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि [8]देशोनानि। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टीनां सामान्यवत्।

१ "अट्ठहि वस्सेहि छव्वीसंतोमुहुत्तेहि य ऊणा तीहि पुव्वकोडीहि सादिरेयाणि छावट्ठिसागरोवमाणि उक्कस्संतरं होदि।......णवरि चदुवीसबावीसबीसं अंतोमुहुत्ता ऊणा कादव्वा।" –ध० टी० अ० पृ० १२३, १२४। २ "अट्ठवस्सेहिं वारसअंतोमुहुत्तेहि य ऊणिया पुव्वकोडी उक्कस्संतरं। एवं तिण्हमुवसामगाणं। णवरि जहकमेण दसणवअट्ठअंतोमुहुत्ता समओ य पुव्वकोडीदो ऊणा त्ति वत्तव्वं।" –ध० टी० अ० पृ० १२६। ३ सयोग्ययोगिके–आ०, द०, ब०, ज०। ४ षट्खं० अ० २५८–२८१। ५ "अट्ठहि वस्सेहि एक्कारसअंतोमुहुत्तेहिय ऊणिया पुव्वकोडी अंतरं। एवमणियट्टिस्स वि णवरि समयाहिय णव अंतोमुहुत्ता ऊणा कादव्वा।" –ध० टी० अ० पृ० १३०। ६ परिहारसंयतेषु आ०, द०, ब०, ज०। ७ तथाख्याते ता०। ८ 'छहि अंतोमुहुत्तेहि ऊणाणि तेत्तीसं सागरोवमाणि मिच्छत्तुक्कस्संतरं।" –ध० टी० अ० पृ० १३४।

[1]दर्शनानुवादेन चक्षुर्दर्शनिषु मिथ्यादृष्टेः सामान्यवत् । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागः अन्तर्मुहूर्त्तश्च । उत्कर्षेण द्वे सागरोपमसहस्रे [2]देशोने । असंयतसम्यग्दृष्टिसंयताऽसंयतप्रमत्तसंयताऽप्रमत्तसंयतानां नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । ५ उत्कर्षेण द्वे सागरोपमसहस्रे [3]देशोने । चतुर्णामुशमकानां नानाजीवापेक्षया सामान्योक्तम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण द्वे सागरोपमसहस्रे [4]देशोने । चतुर्णां क्षपकाणां क्षीणकषायान्तानां सामान्योक्तम् । अचक्षुर्दर्शनिषु मिथ्यादृष्ट्यादिक्षीणकषायान्तानां सामान्योक्तमन्तरम् । अवधिदर्शनिनोऽवधिज्ञानिवत् । केवलदर्शनिनः केवलज्ञानिवत् ।

१० [5]लेश्यानुवादेन कृष्णनीलकापोतलेश्येषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण [6]त्रयस्त्रिंशत्सप्तदशसप्तसागरोपमानि[7] देशोनानि । सासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च । उत्कर्षेण त्रयस्त्रिंशत्–सप्तदश–सप्तसागरोपमाणि [8]देशोनानि । तेजःपद्मलेश्ययोर्मिथ्यादृष्ट्यसंयतसम्य- १५ ग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण द्वे सागरोपमे अष्टादश च[9] सागरोपमानि[10] । सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजी-

---

१ षट्खं० अ० २८२–२९५ । २ "एवं णवहि अंतोमुहुत्तेहि आवलियाए असंखेज्जदिभागेण य ऊणिया चक्खुदंसणट्ठिदी सासणुक्कस्संतरं ।'''''' एवं बारसअंतोमुहुत्तेहि ऊणिया चक्खुदंसणट्ठिदी उक्कस्सन्तरं ।" –ध० टी० अ० पृ० १३७ । ३ "दसहि अंतोमुहुत्तेहि ऊणिया सगट्ठिदी असंजदसम्मादिट्ठीणमुक्कस्संतरं । ''''''एवमडदालीसदिवसेहि बारसअंतोमुहुत्तेहिय ऊणा सगट्ठिदी संजदासंजदुक्कस्संतरं । ''''''एवमट्ठवस्सेहि दसअंतोमुहुत्तेहि ऊणिया सगट्ठिदी पमत्तस्सुक्कस्संतरं । ''''''एवमट्ठवस्सेहि दस अंतोमुहुत्तेहि ऊणिया चक्खुदंसणट्ठिदी अप्पमत्तुक्कस्संतर होदि ।" –ध० टी० अ० पृ० १४०–१४१ । ४ "एवमट्ठवस्सेहि एगूणत्तीस अंतोमुहुत्तेहिय ऊणिया सगट्ठिदी अपुव्वकरणुक्कस्संतरं । एवं तिण्हमुवसामगाणं । णवरि सत्तावीसपंचवीसतेवीसअंतोमुहुत्ता ऊणा कायव्वा ।" –ध० टी० अ० पृ० १४२ । ५ षट्खं–अ० २९६–३२७ । ६ एकत्रिंशत् द० । त्रयस्त्रिंशत्सागरोपमानि आ०, ब० । ७ "एवं छ-चदुचदुअंतोमुहुत्तेहि ऊणाणि तेत्तीस-सत्तारस-सत्तसागरोवमाणि किण्ह-णील-काउलेस्सियमिच्छादिट्ठिउक्कस्संतरं होदि । एवमसंजदसम्मादिट्ठिस्स वि वत्तव्वं । णवरि अट्ठ-पंच-पंच अंतोमुहुत्तेहि ऊणाणि तेत्तीस-सत्तारस-सत्तसागरोवमाणि उक्कस्संतरं ।" –ध० टी० अ० पृ० १४४ । ८ "एवं पंच-चदु-चदु अंतोमुहुत्तेहि ऊणाणि तेत्तीस-सत्तारस-सत्तसागरोवमाणि किण्ह-णीलकाउलेस्सियसासणुक्कस्संतरं होदि । एवं सम्मामिच्छादिट्ठिस्सवि । णवरि छहि अंतोमुहुत्तेहि ऊणाणि तेत्तीस-सत्तारस-सत्त सागरोवमाणि किण्ह-णील-काउलेस्सियसम्मामिच्छादिट्ठि उक्कस्संतरं ।" –ध० टी० अ० पृ० १४६ । ९–दश सागरो–आ०, द०, ब०, व०, ज० । १०–रोपमाः आ०, द०, ब०, ज० ।

वापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण द्वे सागरोपमे अष्टादश[1] च सागरोपमाणि [2]सातिरेकाणि। संयतासंयतप्रमत्ताऽप्रमत्तसंयतानां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। [3]कस्मात्? परावर्त्तमानलेश्यत्वात्। शुक्ललेश्येषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण एकत्रिंशत्सागरोपमाणि [4]देशोनानि। सासादनसम्यग्दृष्टि- ५ सम्यग्मिथ्यादृष्टयोर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण एकत्रिंशत्सागरोपमाणि[5] [6]देशोनानि। संयताऽसंयतप्रमत्तसंयतयोस्तेजोलेश्यावत् शुक्ललेश्यायाः अन्तरम्। अप्रमत्तसंयतस्य नानाजीवापेक्षया नास्त्यन्तरम्। शुक्ललेश्येषु अप्रमत्तादीनामुपशमश्रेण्यारोहणाभिमुख्यारोहणसद्भावाभ्यां लेश्यान्तरपरावर्त्ताभावात्। एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः। अपूर्वकरणाऽनिवृत्तिकरण- १० सूक्ष्मसाम्परायोपशमकानां त्रयाणां नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः। उपशान्तकषायस्य नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति नास्त्यन्तरम्। कस्मात्? उपशान्तकषायस्य पतितस्य प्रमत्ते लेश्यान्तरम् [8]असंस्पृश्य श्रेण्यारोहणात् एकजीवं प्रति नास्त्यन्तरम्। चतुर्णां क्षपकाणां सयोगकेवलिनामलेश्यानाञ्च सामान्यवत्।

[9]भव्यानुवादेन भव्येषु मिथ्यादृष्ट्याद्ययोगिकेवल्यन्तानां सामान्यवत्। अभव्यानां १५ नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्।

[10]सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया च नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण पूर्वकोटी [11]देशोना। कस्मात्? गुणपरावर्त्तात्। संयताऽसंयतप्रमत्ताऽप्रमत्तसंयतानां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि [12]सातिरेकाणि। कस्मात्? गुण- २०

१–दशसागरो–आ०, द०, ब०, ज०। २ "एवं सादिरेय-वेअट्ठारस-सागरोवमाणि दुसमऊणाणि सासणुक्कस्संतरं होदि। एवं सम्मामिच्छादिट्ठिस्स वि। णवरि छहि अंतोमुहुत्तेहि ऊणियाओ उत्तट्ठीदीओ अंतरं।"–ध० टी० अ० पृ० १४८। ३ "कुदो एगजीवस्सवि लेस्सद्धादो गुणद्धाए बहुत्तुवदेसा।"–ध० टी० अ० पृ० १४९। ४ "चदुपंचअंतोमुहुत्तेहि ऊणाणि एक्कत्तीसं सागरोवमाणि मिच्छादिट्ठि-असंजदसम्मादिट्ठीणमुक्कस्सन्तरं।"–ध० टी० अ० पृ० १५०। ५–माणि संय–आ०, द०, ब०, ज०। ६ "उक्कस्सेण एक्कत्तीसं सागरोवमाणि देसूणाणि।"–षट्खं० अ० ३१४। ७–लेश्या–आ०। ८ असंस्पृशन् ज०। संस्पृश्य ता०। ९ षट्खं० अ० ३२८–३३०। १० षट्खं० अ० ३३१–३७८। ११ "अट्ठवस्सेहि वि अंतोमुहुत्तेहि य ऊणिया पुव्वकोडी अंतरं।" –ध० टी० अ० पृ० १५७। १२ "अट्ठवस्सेहि चोद्दस-अंतोमुहुत्तेहि य ऊणदोपुव्वकोडीहिं सादिरेयाणि तेत्तीसं सागरोवमाणि उक्कस्संतरं संजदासंजदस्स। ......अंतरस्स बाहिरा अट्ठ अंतोमुहुत्ता अंतरस्स अब्भंतरिया वि णव, तेणेगंतोमुहुत्तब्भहियपुव्वकोडीए सादिरेयाणि तेत्तीसं सागरोवमाणि उक्कस्संतरं। अथवा अवसेसा अद्धट्ठा अंतोमुहुत्ता। तेहि ऊणियाए पुव्वकोडीए सादिरेयाणि तेत्तीसं सागरोवमाणि पमत्तस्सुक्कस्संतरं। ...... अवसेसाए अद्धछट्ठअंतोमुहुत्ता। एदेहि ऊणपुव्वकोडीए सादिरेयाणि तेत्तीसं सागरोवमाणि अप्पमत्तुक्कस्संतरं।"–ध० टी० अ० पृ० १५८–१६०।

प्रावर्त्तापेक्षया । तथैव चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि । शेषाणां सामान्यवत् । [2]क्षायोपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण पूर्वकोटी देशोना[3] । संयताऽसंयतस्य नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण षट्षष्टिसागरोपमाणि[4] [5]देशोनानि । प्रमत्ताऽप्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यन्तरम् । एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः । उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि [6]सातिरेकाणि । औपशमिकसम्यग्दृष्टिष्वसंयतसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकः समयः । उत्कर्षेण सप्तरात्रिन्दिनानि[7] । एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः । संयतासंयतस्य नानाजीवापेक्षया जघन्येनैकः समयः । उत्कर्षेण चतुर्दश रात्रिन्दिनानि । एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः । प्रमत्ताऽप्रमत्तसंयतयोर्नानाजीवापेक्षया जघन्येनैकसमयः । उत्कर्षेण पञ्चदश रात्रिन्दिनानि । एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः । [8]एतत्कथम् ? औपशमिकाऽसंयतस्य सम्यग्दृष्टीनां सान्तरत्वात् । नानाजीवापेक्षया सप्त रात्रिन्दिनानि । औपशमिकसम्यक्त्वं हि यदि कश्चिदपि न गृह्णाति तदा सप्त रात्रिन्दिनान्येव । संयतासंयतस्य चतुर्दश रात्रिन्दिनानि । प्रमत्ताऽप्रमत्तयोः पञ्चदश रात्रिन्दिनानि । एकं जीवं प्रति जघन्येनोत्कर्षेण[9] चान्तर्मुहूर्त्तान्तरम् । तथा चोक्तम्—

> "सम्मत्ते सत्तदिणा विरदाविरदेसु चउदसा होंति ।
> विरदेसु दोसु पणरस विरहणकालो य बोद्धव्वो[10] ॥ १ ॥" [पञ्चसं० १-२०५]

त्रयाणामुपशमकानां नानाजीवापेक्षया जघन्येनैकः समयः । उत्कर्षेण वर्षपृथक्त्वम् । एकं जीवं प्रति जघन्यमुत्कृष्टश्चान्तर्मुहूर्त्तः । उपशान्तकषायस्य नानाजीवापेक्षया सामान्यवत् । एकं जीवं प्रति नास्त्यन्तरम् । तत्कथम् ? उपशान्तकषायैकजीवं प्रति नास्त्यन्तरम् । वेदकपूर्वकौपशमिकेन हि श्रेण्यारोहणभाग् भवति, तस्याः पतितो न तेनैव श्रेण्यारोहणं करोति,

---

१ "एवमट्ठवस्सेहि सत्तावीसअंतोमुहुत्तेहि ऊणदोपुव्वकोडीहि सादिरेयाणि तेत्तीसं सागरोवमाणि अंतरं । एवं चेव तिण्हमुवसामगाणं । णवरि पंचवीस तेवीस एक्कवीस मुहुत्ता ऊणा कादव्वा ।" **–ध० टी० अ० पृ० १६१** । २ "वेदकसम्मादिट्ठीसु असंजदसम्मादिट्ठीणं सम्मादिट्ठिभंगो ।"**–षट्खं० अ० ३४९** । पृ० १६२ । ३ "एवं चदुहि अंतोमुहुत्तेहि ऊणिया पुव्वकोडी उक्कस्संतरं ।" **–ध० टी० अ० पृ० १५५** । ४–माणि सातिरेकाणि **आ०, द०, ब०, ब०, ज०** । ५ "उक्कस्सेण छावट्ठिसागरोवमाणि देसूणाणि ।"**–षट्खं० अ० ३५२** । **पृ० १६२** । "एदेहि तीहि अंतोमुहुत्तेहि ऊणाणि छावट्ठिसागरोवमाणि संजदासंजदुक्कस्संतरं ।" **–ध० टी० अ० पृ० १६३** । ६ "अवसेसा सत्त अंतोमुहुत्ता । एदेहि ऊणपुव्वकोडीए सादिरेयाणि तेत्तीसं सागरोवमाणि पमत्तसंजदुक्कस्संतरं । ··· अवसेसा अट्ठ । एदेहि ऊणपुव्वकोडीए सादिरेयाणि तेत्तीस सागरोवमाणि अप्पमत्तुक्कस्संतरं ।" **ध० टी० अ० पृ० १६४–१६५** । ७ "किमत्थो सत्तरादिंदियविरहणियमो ? सभावदो ।" **–ध० टी० अ० पृ० १६५** । ८ तत्कथम् **आ०** । ९–न्येन चोत्कर्षेण **आ०** । १० सम्यक्त्वे सप्तदिनानि विरताविरतेषु चतुर्दश भवन्ति । विरतयोर्द्वयोः पञ्चदश विरहकालश्च बोद्धव्यः ॥

सम्यक्त्वान्तरं मिथ्यात्वं वा गत्वा पश्चात् [1]तदादाय करोतीत्यतो नास्ति तस्यान्तरम्। सासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्ट्योर्नानाजीवापेक्षया जघन्येनैकसमयः। उत्कर्षेण पल्योपमासंख्येयभागः। एकं जीवं प्रति नास्त्यन्तरम्। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टित्वयुक्तैकजीवं प्रति नास्त्यन्तरम्[2]। तत् कथमिति चेद् ? गुणे गुणान्तरविरोधतः सासादनादिगुणे स्थितस्य मिथ्यात्वादिना अन्तराऽसम्भवात्। मिथ्यादृष्टेर्नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। ५

[3]संज्ञ्यनुवादेन संज्ञिषु मिथ्यादृष्टेः सामान्यवत्। सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागः अन्तर्मुहूर्त्तश्च। उत्कर्षेण सागरोपमशतपृथक्त्वम्। असंयतसम्यग्दृष्टिसंयताऽसंयतप्रमत्तसंयताऽप्रमत्तसंयतानां नानाजीवापेक्षया अन्तरं नास्ति। एकं जीवं प्रति जघन्यतयाऽन्तर्मुहूर्त्तः। उत्कर्षेण सागरोपमशतपृथक्त्वम्। चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत्। एकं १० जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण सागरोपमशतपृथक्त्वम्। चतुर्णां क्षपकाणां सामान्यवत्। असंज्ञिनां नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। तत्कथम् ? एकगुणस्थानवर्त्तित्वेन तेषां [4]सासादनादिना अन्तराऽसम्भवात्। ये न संज्ञिनो नाप्यसंज्ञिनस्तेषां सामान्यवत्।

[5]आहारानुवादेन आहारकेषु मिथ्यादृष्टेः सामान्यवत्। सासादनसम्यग्दृष्टिसम्य- १५ ग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येन पल्योपमासंख्येयभागोऽन्तर्मुहूर्त्तश्च। उत्कर्षेण घनाङ्गुलासंख्येयभागः। घनाङ्गुलासंख्येयभाग इति कोऽर्थः ? असंख्येयाः संख्येया उत्सर्प्पिण्यवसर्प्पिण्यः। असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्ता[6]प्रमत्तसंयतानां नानाजीवापेक्षया नास्त्यन्तरम्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण अङ्गुल्यसंख्येयभागः, असंख्येयाः संख्येया उत्सर्प्पिण्यवसर्प्पिण्यः। चतुर्णामुपशमकानां नाना- २० जीवापेक्षया सामान्यवत्। एकं जीवं प्रति जघन्येनान्तर्मुहूर्त्तः। उत्कर्षेण अङ्गुलासंख्येयभागोऽसंख्येयाः[7] संख्येया उत्सर्प्पिण्यवसर्प्पिण्यः। चतुर्णां क्षपकाणां सयोगकेवलिनाञ्च सामान्यवत्। अनाहारकेषु मिथ्यादृष्टेर्नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यन्तरम्। कथमेतत् ? अनाहारकेषु मिथ्यादृष्ट्येकजीवं प्रति नास्त्यन्तरम्, अनाहारकत्वस्य एकद्वित्रिसमयत्वात् गुणस्थानस्य च ततो बहुकालत्वात्, तत्र तस्य गुणान्तरेण अन्तरासम्भवादिति। २५ सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण पल्योपमासंख्येयभागः। एकं जीवं प्रति नास्त्यन्तरम्। असंयतसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण[8] मासपृथक्त्वम्। एकं जीवं प्रति नास्त्यन्तरम्। सयोगकेवलिनो नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण वर्षपृथक्त्वम्। एकं जीवं प्रति नास्त्यन्तरम्। अयोगिनां

---

१ तद्यत्क- आ०, ब०, द०। २–रम् कथ- आ०, द०, ब०, ज०। ३ षट्खं० अ० ३७९–३८३। ४ सासादनादीनां ब०, ज०। ५ षट्खं० अ० ३८४–३९७। ६ प्रमत्तसंयतानां आ०, द०, ब०, ज०। प्रमत्तसंप्रमत्त व०। ७ असंख्येया उत्सर्पि– आ०, द०, ब०, ज०। ८–ण वर्षपृथक्त्वम् आ०, द०, ब०, ज०।

नानाजीवापेक्षया जघन्येनैकः समयः। उत्कर्षेण षण्मासाः। एकं जीवं प्रति नास्त्यन्तरम्। अन्तरं विज्ञातं समाप्तमित्यर्थः।

अथ भावस्वरूपं निरूप्यते। सामान्यविशेष[1]भेदात् स भावो द्विप्रकारः। [2]सामान्येन तावत् मिथ्यादृष्टिरिति औदयिको भावः। कस्मात्? मिथ्यात्वप्रकृत्युदयप्रादुर्भावात्। सासादनसम्यग्दृष्टिरिति पारिणामिको भावः। ननु अनन्तानुबन्धिक्रोधाद्युदये अस्य प्रादुर्भावादौदयिकत्वं कस्मान्नोच्यत इति चेत्? अविवक्षितत्वात्। दर्शनमोहापेक्षया हि मिथ्यादृष्ट्यादिगुणस्थानचतुष्टये भावो निरूपयितुमभिप्रेतोऽतः सासादने सम्यक्त्वमिथ्यात्वतदुभयलक्षणस्य त्रिविधस्याऽपि दर्शनमोहस्य उदयक्षयक्षयोपशमाभावात् पारिणामिकत्वम्। सम्यग्मिथ्यादृष्टिरिति क्षायोपशमिको भावः। तथा चोक्तम्–

"मिच्छे खलु ओदइओ विदिए खलु परिणामिओ भावो।
मिस्से खओवसमिओ अविरदसम्मम्मि तिण्णेव[3]॥" [गो० जी० गा० ११]

ननु सर्वघातिनामुदयाभावे देशघातिनाञ्चोदये य उत्पद्यते भावः स क्षायोपशमिकः। न च सम्यग्मिथ्यात्वप्रकृतेर्देशघातित्वं सम्भवति, सर्वघातित्वेन आगमे [4]तस्याः प्रतिपादितत्वात्। सत्यम्; उपचारतस्तस्या देशघातित्वस्यापि सम्भवात्। उपचारनिमित्तञ्च देशतः सम्यक्त्वव्याघातित्वम्। न हि मिथ्यात्वप्रकृतिवत् सम्यग्मिथ्यात्वप्रकृत्या सर्वस्य सम्यक्त्वस्वरूपस्य घातः सम्भवति, सर्वज्ञोपदिष्टतत्त्वेषु रुच्यन्तरस्याऽपि सम्भवात्। तदुपदिष्टतत्त्वेषु रुच्यरुच्यात्मको हि परिणामः सम्यग्मिथात्वमित्यर्थः। असंयतसम्यग्दृष्टिरिति औपशमिको वा क्षायिको वा क्षायोपशमिको वा भावः। असंयतः पुनरौदयिकेन भावेन। संयताऽसंयतः प्रमत्तसंयतोऽप्रमत्तसंयत इति च क्षायोपशमिको भावः। चतुर्णामुपशमकानामिति औपशमिको भावः। चतुर्षु क्षपकेषु सयोग्ययोगिकेवलिनोश्च क्षायिको भावः।

विशेषेण [5]गत्यनुवादेन नरकगतौ [6]प्रथमायां पृथिव्यां नारकाणां मिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यन्तानां सामान्यवत्। द्वितीयादिष्वासप्तम्याः मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टीनां सामान्यवत्। असंयतसम्यग्दृष्टेरौपशमिको वा क्षायोपशमिको वा भावः। असंयतः पुनरौदयिकेन भावेन। तिर्यग्गतौ तिरश्चां [7]मिथ्यादृष्ट्यादिसंयतासंयतान्तानां सामान्यवत्। मनुष्यगतौ मनुष्याणां मिथ्यादृष्ट्याद्ययोगकेवल्यन्तानां सामान्यमेव। देवगतौ देवानां मिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यन्तानां सामान्यवत्।

[8]इन्द्रियानुवादेन एकेन्द्रियविकलेन्द्रियाणामौदयिको भावः। पञ्चेन्द्रियेषु मिथ्यादृष्ट्याद्ययोगकेवल्यन्तानां सामान्यवत्।

[9]कायानुवादेन स्थावरकायिकानामौदयिको भावः। त्रसकायिकानां सामान्यमेव।

१–प्रभावात् आ०। २ षट्खं० भा० २-९। ३ मिथ्यात्वे खल्वौदयिकः द्वितीये पुनः पारिणामिको भावः। मिश्रे क्षायोपशमिकः अविरतसम्यक्त्वे त्रीण्येव॥ ४ अस्याः आ०, ब०, द०, ज०। ५ षट्खं० भा० १०–२९। ६ प्रथमा पृथिव्याम् आ०, ब०, द०, ज०। ७ मिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यन्तानाम् आ०, द०, ब०, ज०। ८ षट्खं० भा० ३०। ९ षट्खं० भा० ३१।

[1]योगानुवादेन कायवाङ्मनसयोगिनां मिथ्यादृष्ट्यादिसयोगिकेवल्यन्तानामयोगिकेवलिनाञ्च सामान्यवत्।

[2]वेदानुवादेन स्त्रीपुंनपुंसकवेदानामवेदानाञ्च सामान्यवत्।

[3]कषायानुवादेन क्रोधमानमायालोभकषायाणामकषायाणाञ्च सामान्यवत्।

[4]ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानिनां मतिश्रुतावधिमनःपर्ययकेवलज्ञानि- ५ नाञ्च सामान्यवत्।

[5]संयमानुवादेन[6] सर्वेषां [7]संयतानां संयतासंयतानाञ्च सामान्यवत्।

[8]दर्शनानुवादेन चक्षुर्दर्शनाऽचक्षुर्दर्शनावधिदर्शनकेवलदर्शनिनाञ्च सामान्यवत्।

[9]लेश्यानुवादेन षट्लेश्यानामलेश्यानाञ्च सामान्यवत्।

[10]भव्यानुवादेन भव्यानां मिथ्यादृष्ट्याद्ययोगकेवल्यन्तानां सामान्यवत्। अभव्यानां १० पारिणामिको भावः।

[11]सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः क्षायिको भावः क्षायिकसम्यक्त्वम्। असंयतत्वं पुनरौदयिकेन भावेन। संयताऽसंयतप्रमत्ताप्रमत्तसंयतानां क्षायोपशमिको भावः, क्षायिकं सम्यक्त्वम्। चतुर्णामुपशमकानामौदयिको भावः, क्षायिकं सम्यक्त्वम्। शेषाणां सामान्यवत्। क्षयोपशमसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः क्षायोपशमिको १५ भावः, क्षायोपशमिकं सम्यक्त्वम्। असंयतः पुनरौदयिकेन भावेन। संयताऽसंयतप्रमत्ताऽप्रमत्तसंयतानां क्षायोपशमिको भावः, क्षायोपशमिकं सम्यक्त्वम्। औपशमिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेरौपशमिको भावः, औपशमिकं सम्यक्त्वम्। असंयतः पुनरौदयिकेन भावेन। संयताऽसंयतप्रमत्ताऽप्रमत्तसंयतानामौपशमिको भावः, औपशमिकं सम्यक्त्वम्। चतुर्णामुपशमकानाम् औपशमिको भावः, औपशमिकं सम्यक्त्वम्। सासादनसम्यग्दृष्टेः २० पारिणामिको भावः। सम्यग्मिथ्यादृष्टेः [12]क्षायोपशमिको भावः। मिथ्यादृष्टेरौदयिको भावः।

[13]संज्ञ्यनुवादेन संज्ञिनां सामान्यवत्। असंज्ञिनामौदयिको भावः। ये न संज्ञिनो नाप्यसंज्ञिनस्तेषां सामान्यवत्।

[14]आहारानुवादेन आहारकाणामनाहारकाणां च सामान्यवत्। इति भावो विभावितः।

अथ [15]अल्पबहुत्वं[16] परिवर्ण्यते—तद् द्विप्रकारम्—सामान्यविशेषभेदात्। [17]सामान्येन २५ तावत् सर्वतः स्तोकाः त्रय उपशमकाः, अष्टसु समयेषु क्रमात् [18]प्रवेशे एको वा द्वौ वा त्रयो वा इत्यादि जघन्याः। उत्कृष्टास्तु १६।२४।३०।३६।४२।४८।५४।५४। स्वगुणस्थानकालेषु

१ षट्खं० भा० ३२-४०। २ षट्खं० भा० ४१, ४२। ३ षट्खं० भा० ४३, ४४। ४ षट्खं० भा० ४५-४८। ५ संयता—ता०। ६ षट्खं० भा० ४९-५५। ७ संयताना च आ०, ब०, ज०। ८ षट्खं० भा० ५६-५८। ९ षट्खं० भा० ५९-६१। १० षट्खं० भा० ६२-६३। ११ षट्खं० भा० ६४-८८। १२ क्षायिको भावः आ०, ब०, ज०। १३ षट्खं० भा० ८९, ९०। १४ षट्खं० भा० ९१-९३। १५ अल्पं ता०। १६—बहुत्वञ्च प— ब०। १७ षट्खं० अ० २-२६। १८ प्रवेशको आ०। प्रवेशेको ब०। प्रवेशैको द०। प्रवेशो एको ता०।

प्रवेशेन तुल्यसंख्याः। उपशान्तकषायास्तावन्त एव संख्याकथनावसरे प्रोक्ताः। उपशमकानां इतरगुणस्थानवर्त्तिभ्योऽल्पत्वात् प्रथमतः कथनम्। तत्रापि त्रय उपशमकाः सकषायत्वात् उपशान्तकषायेभ्यो भेदेन निर्दिष्टाः प्रवेशेन तुल्यसंख्याः। सर्वेऽप्येते षोडशादिसंख्याः। त्रयः क्षपकाः संख्येयगुणाः। कोऽर्थः? उपशमकेभ्यो द्विगुणाः इत्येवमादिसंख्याविचारे
५ विचारितमिह द्रष्टव्यम्। सूक्ष्मसाम्परायसंयता विशेषाधिकाः। तत्संयमयुक्तानामुपशमकानामिव क्षपकानामपि ग्रहणात्। क्षीणकषायवीतरागच्छ[1]द्मस्थास्तावन्त एव। सयोगकेवलिनोऽयोगकेवलिनश्च प्रवेशेन तुल्यसंख्याः। सयोगकेवलिनः स्वकाले समुदिताः संख्येयगुणाः ८९८५०२। अप्रमत्तसंयताः संख्येयगुणाः। प्रमत्तसंयताः संख्येयगुणाः। संयतासंयताः संख्येयगुणाः। संयताऽसंयतानां नास्त्यल्पबहुत्वमेकगुणस्थानवर्त्तित्वात्, [2]संयतानामिव गुण-
१० स्थानभेदाऽसम्भवात् १३०००००००। सासादनसम्यग्दृष्टयः संख्येयगुणाः ५२००००००। सम्यग्मिथ्यादृष्टयः संख्येयगुणाः १०४००००००० । असंयतसम्यग्दृष्टयः संख्येयगुणाः ७००००००००० । मिथ्यादृष्टय अनन्तगुणाः।

विशेषेण [3]गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु नारकेषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः। सम्यग्मिथ्यादृष्टयः संख्येयगुणाः। असंयतसम्यग्दृष्टयः असंख्येयगुणाः।
१५ मिथ्यादृष्टयोऽसंख्येयगुणाः। तिर्यग्गतौ तिरश्चां सर्वतः स्तोकाः संयताऽसंयताः। इतरेषां सामान्यवत्। मनुष्यगतौ मनुष्याणामुपशमकादिप्रमत्ताऽप्रमत्तसंयतान्तानां सामान्यवत्। ततः संख्येयगुणाः संयताऽसंयताः। सासादनसम्यग्दृष्टयः संख्येयगुणाः। सम्यग्मिथ्यादृष्टयः संख्येयगुणाः। असंयतसम्यग्दृष्टयः संख्येयगुणाः। [4]मिथ्यादृष्टयः [अ] संख्येयगुणाः। देवगतौ देवानां नारकवत्।

२० [5]इन्द्रियानुवादेन एकेन्द्रियविकलेन्द्रियेषु गुणस्थानभेदो नास्तीति अल्पबहुत्वाऽभावः। इन्द्रियं प्रत्युच्यते पञ्चेन्द्रियेभ्यः चतुरिन्द्रियाः बहवः। चतुरिन्द्रियेभ्यस्त्रीन्द्रिया बहवः। त्रीन्द्रियेभ्यो द्वीन्द्रिया बहवः। तेभ्य एकेन्द्रिया बहवः। पञ्चेन्द्रियाणां सामान्यवत्। अयं तु विशेषः। मिथ्यादृष्टयोऽसंख्येयगुणाः।

[6]कायानुवादेन स्थावरकायेषु गुणस्थानभेदाभावात् अल्पबहुत्वाभावः। कायं प्रत्युच्यते
२५ सर्वेभ्यः तेजःकायिका [7]अल्पे। तेभ्यः पृथिवीकायिका बहवः। तेभ्योऽप्कायिका बहवः। तेभ्यो वायुकायिका बहवः। सर्वेभ्यो वनस्पतयोऽनन्तगुणाः। त्रसकायिकानां पञ्चेन्द्रियवत्।

[8]योगानुवादेन वाङ्मनसयोगिनां पञ्चेन्द्रियवत्। काययोगिनां सामान्यवत्।

[9]वेदानुवादेन स्त्रीपुंवेदानां पञ्चेन्द्रियवत्। नपुंसकवेदानामवेदानाञ्च च सामान्यवत्।

१–छद्मस्थावस्थावन्तः ता–आ०, द०, ब०, ज०। २ संयतासंयतानामिव आ०, ब०, द०, ज०। ३ षट्खं० अ० २७–१०२। ४ संख्येय–आ०, ब०, द०, ज०। ५ "मिच्छादिट्ठी असंखेज्जगुणा, मिच्छादिट्ठीसु संखेज्जगुणा।"–षट्खं० अ० ६५। सर्वार्थ० पृ० ३७। ६ षट्खं० अ० १०३। ७ षट्खं० अ० १०४। ८ अल्पा–ब०। बहवः आ०, द०, ब०, ज०। ९ षट्खं० अ० १०५–१४३। षट्खं० अ० १४४–१९६।

[1]कषायानुवादेन [2]क्रोधमानमायाकषायाणां पुंवेदवत् । अयं तु विशेषः । मिथ्यादृष्ट्योऽनन्तगुणाः । लोभकषायाणां द्वयोरुपशमकयोस्तुल्यसंख्याः । ततो द्वयोः बहवः । क्षपकाः संख्येयगुणाः सूक्ष्मसाम्परायेषु[3] ह्यु पशमकसंयता [4]विशेषाधिकाः । सूक्ष्मसाम्परायक्षपकाः संख्येयगुणाः । शेषाणां सामान्यवत् ।

[5]ज्ञानानुवादेन मत्यज्ञानिश्रुताज्ञानिषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः । मिथ्यादृष्टयोऽनन्तगुणाः । विभङ्गज्ञानिषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः । मिथ्यादृष्टयोऽसङ्ख्येयगुणाः मतिश्रुतावधिज्ञानिषु सर्वतः स्तोकाश्चत्वार उपशमकाश्चत्वारः क्षपकाः सङ्ख्येयगुणाः । अप्रमत्तसंयताः संख्येयगुणाः । प्रमत्तसंयताः संख्येयगुणाः । संयतासंयता असङ्ख्येयगुणाः, तिर्य्यगपेक्षयेत्यर्थः । असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः, देवनारकतिर्य्यग्मनुष्यापेक्षया । मनःपर्य्ययज्ञानिषु सर्वतः स्तोकाश्चत्वार उपशमकाः । चत्वारः क्षपकाः सङ्ख्येयगुणाः । अप्रमत्ताः संख्येयगुणाः । प्रमत्तसंयताः संख्येयगुणाः । केवलज्ञानिषु [6]अयोगकेवलिभ्यः सयोगकेवलिनः सङ्ख्येयगुणाः । तत्कथम् ? अयोगकेवलिनः एको वा द्वौ वा त्रयो वा उत्कर्षेण अष्टोत्तरशतसङ्ख्याः । स्वकालेन [7]समुदिताः सङ्ख्येयाः । तेभ्यः सङ्ख्येयाः सयोगकेवलिनः ८९८५०२ ।

[8]संयमानुवादेन सामायिकच्छेदोपस्थापनशुद्धिसंयतेषु द्वयोरुपशमकयोस्तुल्यसङ्ख्याः । ततः सङ्ख्येयगुणाः क्षपकाः । अप्रमत्ताः सङ्ख्येयगुणाः । प्रमत्ताः सङ्ख्येयगुणाः । परिहारशुद्धिसंयतेषु अप्रमत्तेभ्यः प्रमत्ताः सङ्ख्येयगुणाः । सूक्ष्मसाम्परायशुद्धिसंयतेषु उपशमकेभ्यः क्षपकाः सङ्ख्येयगुणाः । यथाख्यातविहारशुद्धिसंयतेषु उपशान्तकषायेभ्यः क्षीणकषायाः सङ्ख्येयगुणाः । अयोगकेवलिनस्तावन्त एव, उपशान्तकषायेभ्यः सङ्ख्येयगुणा इत्यर्थः । सयोगकेवलिनः सङ्ख्येयगुणाः । संयताऽसंयतानां नास्त्यल्पबहुत्वम् । असंयतेषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः । सम्यग्मिथ्यादृष्टयः सङ्ख्येयगुणाः । असंयतसम्यग्दृष्टयोऽसङ्ख्येयगुणाः, देवाद्यपेक्षया इत्यर्थः । मिथ्यादृष्टयोऽनन्तगुणाः ।

[9]दर्शनानुवादेन चक्षुर्दर्शनिनां काययोगिवत्, सामान्यवदित्यर्थः । अवधिदर्शनिनामवधिज्ञानवत् । केवलदर्शनिनां केवलज्ञानिवत् ।

[10]लेश्यानुवादेन कृष्णनीलकापोतलेश्यानामसंयतवत् । तेजःपद्मलेश्यानां सर्वतः स्तोकाः अप्रमत्ताः प्रमत्ताः संख्येयगुणाः । संयताऽसंयतसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टीनां पञ्चेन्द्रियवत् । शुक्ललेश्यानां सर्वतः स्तोकाः [11]उपशमकाः [12]११९६। क्षपकाः

१ षट्खं० अ० १९७–२१५ । २ क्रोधमानकषायाणाम् आ० । क्रोधमानमायालोभ– ब० । ३ येषु उप–आ०, ज० । ४ विशेषाधिकारः आ०, द०, ब०, । ५ षट्खं० अ० २१६–२४३ । ६ अयोगकेवलिनः संख्ये–आ०, द०, ब० । –अयोगतत् कथम् ज० । ७ समुदिताः तेभ्यः आ०, द०, ब०, व०, ज० । ८ षट्खं० अ० २४४–२८५ । ९ षट्खं० अ० २८६–२८९ । १० षट्खं० अ० २९०–३२७ । ११ 'उपशमकाः' आ०, द०, ब०, ज० पुस्तकेषु नास्ति । १२ २२९६ आ०, ब०, द०, ज० ।

संख्येयगुणाः [1]२९९०। सयोगिकेवलिनः संख्येयगुणाः ८९८५०२। अप्रमत्तसंयताः संख्येयगुणाः २९६९९१०३। प्रमत्तसंयताः संख्येयगुणाः ५९३९८२०६। संयताऽसंयताः संख्येयगुणाः, तिर्यङ्मनुष्यापेक्षया। सासादनसम्यग्दृष्टयोऽसंख्येयगुणाः। सम्यग्मिथ्यादृष्टयोऽसंख्येयगुणाः। मिथ्यादृष्टयोऽसंख्येयगुणाः। असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः।

५ [2]भव्यानुवादेन भव्यानां सामान्यवत्। अभव्यानामल्पबहुत्वं नास्ति।

[3]सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु सर्वतः स्तोकाश्चत्वार उपशमकाः। इतरेषां [4]प्रमत्तान्तानां सामान्यवत्। ततः संयताऽसंयताः संख्येयगुणाः। असंयतसम्यग्दृष्टयोऽसङ्ख्येयगुणाः। [5]क्षायोपशमिकसम्यग्दृष्टिषु सर्वतः स्तोकाः अप्रमत्ताः। प्रमत्ताः सङ्ख्येयगुणाः। संयताऽसंयता असङ्ख्येयगुणाः, तिर्यगपेक्षया। असंयतसम्यग्दृष्टयोऽसङ्ख्येय-

१० गुणाः। औपशमिकसम्यग्दृष्टीनां सर्वतः स्तोकाश्चत्वार उपशमकाः। अप्रमत्ताः सङ्ख्येयगुणाः। प्रमत्ताः सङ्ख्येयगुणाः। संयताऽसंयताः असङ्ख्येयगुणाः। असंयतसम्यग्दृष्टयोऽसङ्ख्येयगुणाः। शेषाणां मिथ्यादृष्टिसासादनसम्यग्दृष्टीनां नास्त्यल्पबहुत्वम्, विपक्षे एकैकगुणस्थानग्रहणात्। कोऽर्थः ? मिथ्यादृष्टिः सासादनो न भवति, सासादनसम्यग्दृष्टिस्तु मिथ्यादृष्टिर्न भवति यतः।

१५ [6]संज्ञानुवादेन संज्ञिनां चक्षुर्दर्शनिवत्[7]। चक्षुर्दर्शनिनां काययोगिवत्। काययोगिनां सामान्यवदित्यर्थः। असंज्ञिनां नास्त्यल्पबहुत्वम्। ये न संज्ञिनो नाऽप्यसंज्ञिनस्तेषां केवलज्ञानिवत्।

[8]आहारानुवादेन आहारकाणां काययोगिवत्। अनाहारकाणां सर्वतः स्तोकाः सयोगकेवलिनः अयोगकेवलिनः[9] सङ्ख्येयगुणाः। सासादनसम्यग्दृष्टयोऽसङ्ख्येयगुणाः। असंयतसम्यग्दृष्टयोऽसङ्ख्येयगुणाः। मिथ्यादृष्टयोऽनन्तगुणाः। एवं गुणस्थानानां गत्यादिषु मार्ग-

२० णाऽन्वेषणा कृता। सामान्येन तत्र सूक्ष्मभेदः आगमविरोधेनानुसर्तव्यः[10]।

एवं सम्यग्दर्शनस्य प्रथमत उद्दिष्टस्य **"तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्"** इत्यनेन[11] सूत्रेण तस्य—सम्यग्दर्शनस्य लक्षणोत्पत्तिस्वामिविषयन्यासाधिगमोपाया निर्दिष्टाः। **"तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्"** इति लक्षणम्। **"तन्निसर्गादधिगमाद्वा"** [12]इत्यनेनोत्पत्तिः। सम्यग्दर्शनस्वामिनो जीवाऽजीवादिपदार्थाः सम्यग्दर्शनस्य विषयः। **"नामस्थापनाद्रव्य-**

२५ **भावतस्तन्न्यासः"** **"प्रमाणनयैरधिगमः"** **"निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः"** इत्यनेन [13]सूत्रेण अधिगमस्योपायः सम्यक्त्वप्राप्त्युपायः। तथा **"सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च"** इति [14]सम्यक्त्वस्याधिगमोपायः। तत्सम्बन्धेन च सम्यग्दर्शनसम्बन्धेन जीवादीनां संज्ञापरिणामादि निर्दिष्टम्। **"जीवाऽजीवास्रव-**

---

१ ३१३६ ता०। २ षट्खं० अ० ३२८–३२९। ३ षट्खं० अ० ३३०–३५४। ४ प्रमत्तानाम् आ०। ५ क्षायोपशमिकाः सम्य– आ०, द०, ब०, ज०। ६ षट्खं० अ० ३५५–३५७। ७ –दर्शनवत् आ०। ८ षट्खं० अ० ३५८–३८२। ९ –केवलिनश्च आ०, द०, ब०, ज०। १० अनुकर्तव्यः ब०। ११ त० सू० १।२। १२ त० सू० १।३। १३ त० सू० १।५–७। १४ त० सू० १।८।

बन्धसंवरनिर्जरमोक्षास्तत्त्वम्" इति [1]संज्ञा। अस्यैव सूत्रस्य वृत्तौ जीवादीनां निरुक्तिद्वारेण परिणामादि वेदितव्यम्।

अथ सम्यग्ज्ञानं विचार्यते—

मतिश्रुतावधिमनःपर्य्ययकेवलानि ज्ञानम् ॥ ९ ॥

इन्द्रियैर्मनसा च यथायथमर्थान् मन्यते मतिः। मनुतेऽनया वा मतिः। मननं वा मतिः। ५ श्रुतज्ञानावरणकर्मक्षयोपशमे सति निरूप्यमाणं श्रूयते यत्तत् श्रुतम्। शृणोत्यनेन तदिति वा श्रुतम्। श्रवणं वा श्रुतम्। [2]अवाग्धानं अवधिः। कोऽर्थः? अधस्ताद् बहुतरविषयग्रहणादवधिरुच्यते। देवाः खलु अवधिज्ञानेन सप्तमनरकपर्य्यन्तं पश्यन्ति, उपरि स्तोकं पश्यन्ति, निजविमानध्वजदण्डपर्यन्तमित्यर्थः। अवच्छिन्नविषयत्वाद्वा अवधिः। कोऽर्थः? रूपिलक्षणविवक्षितविषयत्वाद्वा अवधिः। परकीयमनसि स्थितोऽर्थः [3]साहचर्यात् मन इत्युच्यते। तस्य १० पर्ययणं [4]परिगमनं परिज्ञानं मनःपर्य्ययः। ननु तन्मतिज्ञानमेव; तन्न; अपेक्षामात्रत्वात्, क्षयोपमशक्तिमात्रविजृम्भितं तत्केवलं स्वपरमनोभिर्व्यपदिश्यते, यथा अभ्रे चन्द्रमसं पश्येति, तथा मनसि मनःपर्य्ययः, अभ्रेऽव्यापि [5]मनोऽव्यापि। यन्निमित्तं बाह्येन अभ्यन्तरेण च तपसा मुनयो मार्गं केवन्ते सेवन्ते तत् केवलम्। असहायत्वाद्वा केवलम्।

प्रान्ते लभ्यते यतस्तदर्थं केवलस्य अन्ते ग्रहणम्। मनःपर्य्ययस्य समीपे केवलज्ञानं १५ प्राप्यते तेन मनःपर्य्ययस्य समीपे केवलस्य ग्रहणम्। अनयोः प्रत्यासत्तिः कस्मात्? संयमैकाधिकरणत्वात्। यथाख्यातचारित्रत्वादित्यर्थः। केवलज्ञानस्य अवधिर्दूरतरवर्त्ती कृतः। तत्किमर्थम्? [6]दूरतरान्तरत्वात्। अवधिमनःपर्य्ययकेवलज्ञानत्रयात् परोक्षज्ञानं मतिश्रुतद्वयं पूर्वं किमर्थमुक्तम्? तस्य द्वयस्य [7]सुप्रापत्वात्। मतिश्रुतानुपरिपाटी हि[8] श्रुतपरिचिताऽनुभूता वर्त्तते, सर्वेण प्राणिगणेन तद्द्वयं प्रायेण प्राप्यते। मतिश्रुतपद्धतेः वचनेन श्रुतायाः २० सकृत्स्वरूपसंवेदनमात्रं परिचितत्वमुच्यते। अशेषविशेषतः पुनः पुनश्चेतसि तत्स्वरूपपरिभावनमनुभूतत्वं कथ्यते। मतिश्च श्रुतञ्च अवधिश्च मनःपर्य्ययश्च केवलञ्च मतिश्रुतावधिमनःपर्य्ययकेवलानि। एतानि पञ्च ज्ञानं[9] भवतीति वेदितव्यम्। एतेषां भेदा अग्रे वक्ष्यन्ते।

अथ **"प्रमाणनयैरधिगमः"** इति सूत्रं यत्पूर्वमुक्तं[10] तत्र प्रमाणं ज्ञानमिति केचन[11] मन्यन्ते। केचित्तु[12] सन्निकर्षः प्रमाणमिति मन्यन्ते। सन्निकर्ष इति कोऽर्थः? [13]इन्द्रियं २५ विषयश्च तयोः सम्बन्धः सन्निकर्षः। तदुभयमपि निराकर्त्तुम् अधिकृतानामेव मत्यादीनां प्रमाणत्वसूचनार्थं सूत्रमिदमाहुः[14]—

---

१ त० सू० १।४। २ अवधानम् आ०, द०, ब०, ज०। ३ साहचर्यान्मन्यते मनः आ०, द०, ब०, व०, ज०। ४ परिणमनम् आ०, ब०, द०, ज०। ५ मनोऽपि व्यापि ता०। ६ दूरतरत्वात् आ०, द०, ब०, ज०। ७ सुप्राप्यत्वात् आ०, ब०, द०, ज०,। ८–पाटी श्रुत–आ०, द०, ब०, व०, ज०। ९ ज्ञानानि भवन्तीति आ०, द०, ब०, ज०। १० पृ० ८। ११ बौद्धादयः। १२ नैयायिकादयः। १३ इन्द्रियविषयः तदु–ता०। १४ –दं प्राहुः आ०, ब०, द०, ज०।

तत्प्रमाणे ॥ १० ॥

तत् मतिश्रुतावधिमनःपर्य्ययकेवललक्षणं पञ्चविधं ज्ञानं द्वे प्रमाणे भवतः न सन्निकर्षः प्रमाणम्, नाऽपीन्द्रियं प्रमाणमित्यर्थः। [1]यदि सन्निकर्षः प्रमाणम्; तर्हि सूक्ष्माणां व्यवहितानां विप्रकृष्टानाञ्चार्थानां ग्रहणाप्रसङ्गः स्यात्। ते सूक्ष्मा व्यवहिता विप्रकृष्टाश्चाऽर्था ५ इन्द्रियैः सन्निकृष्टुं न शक्यन्ते। तेन तु सर्वज्ञत्वस्याभावः[2] स्यात्। तत्कथम्? [3]यदिन्द्रियैर्न सन्निकृष्यते तन्न ज्ञायते, तेन सर्वज्ञाभावो भवेत्। इन्द्रियमपि प्रमाणं न [4]भवति, उक्तदोषत्वादित्यर्थः। चक्षुरादीनां विषयो हि अल्पः, ज्ञेयं तु अनन्तत्वादपरिमाणं यतः। सर्वेषामिन्द्रियाणां सन्निकर्षाभावश्च वर्त्तते। कस्मात्? चक्षुर्मनसोरप्राप्यकारित्वात्। **"न चक्षुरनिन्द्रियाभ्याम्"** [त० सू० १।१९] इति वचनाच्च।

१० यदि ज्ञानं प्रमाणं तर्हि फलाभावः। अधिगमो हीष्टं फलं वर्तते, न भावान्तरम्[5]। स चेत् अधिगमः प्रमाणम्; न तस्याधिगमस्यान्यत्फलं भवितुमर्हति। प्रमाणेन च फलवता भवितव्यम्। सन्निकर्षे इन्द्रिये वा प्रमाणे सति अधिगमोऽर्थान्तरभूतः फलं युज्यते; तन्न युक्तम्; यदि सन्निकर्षः प्रमाणमर्थाधिगमः फलं तस्य[6] प्रमाणस्य दुष्ट (द्विष्ठ) त्वात् तत्फलभूतेन अधिगमेनाऽपि दुष्टेन (द्विष्ठेन) भवितव्यम्। कथं द्विष्ठोऽधिगमः? १५ अर्थाधीनो यतः। आत्मनश्चेतनत्वात् तत्रैव आत्मनि समवाय इति चेत्; न; ज्ञस्वभावा[7]भावे ज्ञायकस्वभावाभावे सर्वेषामर्थानामचेतनत्वात्। ज्ञस्वभावाभ्यु[8]पगमो वा आत्मनो भवतु; तर्हि प्रतिज्ञाहानिस्तव भवति, तेषामचेतनत्वात्। ननु चोक्तं ज्ञाने प्रमाणे सति फलाभाव इति यदार्हतेनोक्तं तन्नैष दोषः; अर्थाधिगमे प्रीतिदर्शनात्। ज्ञस्वभावस्यात्मनः कर्म्ममलीमसस्य [9]करणालम्बनात् अर्थनिश्चये सति प्रीतिरुपजायते। सा प्रीतिः फलमुच्यते। २० अथवा उपेक्षा अज्ञाननाशो वा फलम्। का उपेक्षा? रागद्वेषयोरप्रणिधानमुपेक्षा। अन्धकारसदृशाज्ञानाभावः, अज्ञाननाशो वा फलमित्युच्यते।

प्रमिणोतीति प्रमाणम्। **"कृत्ययुटोऽन्यत्रापि च"** [कात० ४।५।९२] इति कर्तरि युट्। प्रमीयते अनेनेति प्रमाणम्। **"करणाधिकरणयोश्च"** [कात० ४।५।९५] इति करणे युट्। प्रमितिमात्रं वा प्रमाणम्। भावे युट्। इति व्युत्पत्तौ परवाद्याह–किमनेन प्रमीयते? २५ जैनः प्राह–जीवाद्यर्थः। यदि जीवादेरधिगमे प्रमाणं वर्तते तर्हि प्रमाणाधिगमे अन्यत्प्रमाणं परिकल्प्यताम्। तथा सति अनवस्था भवति। जैनः प्राह–नात्रानवस्था वर्तते। किंवत्? प्रदीपवत्। यथा घटपटलकुटस्तम्भादीनां प्रकाशने प्रदीपो हेतुर्भवति तथा स्वस्वरूपप्रकाशनेऽपि स एव प्रदीपः हेतुर्भवति, न प्रदीपस्य प्रकाशने प्रकाशान्तरं विलोक्यते। एवं प्रमाणमपि स्वपर-

---

१ द्रष्टव्यम्–स० सि० १।१०। २–भावात् ज०, आ०, द०, ब०। ३ यतः आ०, द०, ब०, ज०। ४ भवेत् आ०, द०, ब०, ज०। ५–रम् चेत् आ०, द०, ब०, ज०। ६ "तस्य द्विष्ठत्वात् तत्फलेनाधिगमेनापि द्विष्ठेन भवितव्यमिति अर्थादीनामधिगमः प्राप्नोति।" –स० सि० १।१०। ७–भावाभावे सर्वे–आ०, द०, ब०, ज०। ८–भ्युपगमे आ०, द०, ब०, ज०। ९ कारणा–आ०, द०, ब०।

प्रकाशकमित्यवगन्तव्यम् । अवश्यमेव चेदमङ्गीकर्तव्यम् । किंवत् ? प्रमेयवत् । यथा प्रमेयं वर्तते तथा प्रमाणमस्ति । यदि प्रमाणस्य प्रमाणान्तरं परिकल्प्यते तर्हि स्वाधिगमस्याभावो भवति, प्रमाणं निजस्वरूपं न जानाति । तथा सति [1]स्मृतेरभावः स्यात्, स्मृतेरभावात् व्यवहार-विच्छेदो भवेत् ।

'आद्ये परोक्षम् । प्रत्यक्षमन्यत्' इति वक्ष्यमाणभेदापेक्षया द्विवचननिर्देशो वेदि- ५ तव्यः । स च द्विवचननिर्देशोऽपरप्रमाणसंख्याविच्छेदार्थः ।

"प्रत्यक्षश्चानुमानश्च शाब्दश्चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ॥१॥" [षड्द० समु० श्लो० ७०]

इति श्लोकोक्तोपमानार्थापत्तिप्रभृतीनां प्रत्यक्षपरोक्षप्रमाणद्वयेऽन्तर्भावात् ।

अथ प्रागुक्तपञ्चविधज्ञानस्य प्रमाणद्वयान्तःपतितस्य अनुमानादिप्रमाणकल्पनानिरासार्थं १० प्रमाणयोर्भेदमाह–

आद्ये परोक्षम् ॥ ११ ॥

आदौ भवमाद्यम् । आद्यञ्च आद्यञ्च आद्ये । मतिज्ञानश्रुतज्ञाने द्वे परोक्षं प्रमाणं भवति । 'आद्ये' इत्युक्ते प्रथमे । मतिश्रुतयोः प्रथमत्वं कथम् ? सत्यम्; प्रथमं मतिज्ञानं तन्मुख्यम्, तस्य समीपवर्त्तित्वादुपचारेण श्रुतमपि प्रथममुच्यते । द्विवचननिर्देशसामर्थ्यात् १५ गौणस्यापि श्रुतज्ञानस्य आद्यत्वेन ग्रहणं वेदितव्यम् । एतत् ज्ञानद्वयं परोक्षं प्रमाणं कस्मा-दुच्यते ? इन्द्रियानिन्द्रियाणि पराणि प्रकाशादिकं च, आदिशब्दाद् गुरूपदेशादिकञ्च परम्, मतिश्रुतज्ञानावरणक्षयोपशमश्च परमुच्यते, तत्परं बाह्यनिमित्तमपेक्ष्य अक्षस्यात्मनः उत्पद्यते यत् ज्ञानद्वयं तत्परोक्षमित्युच्यते, "तदिन्द्रियानिन्द्रियनिमित्तम्" [त० सू० १।१४] "श्रुतमनिन्द्रियस्य" [त० सू० २।२१] इति वचनात् । उपमानमागमादिकं च प्रमाणं २० परोक्ष एव प्रमाणेऽन्तर्भूतं ज्ञातव्यमिति ।

अथ किं प्रत्यक्षं प्रमाणमिति प्रश्ने सूत्रमिदमुच्यते–

प्रत्यक्षमन्यत् ॥ १२ ॥

अक्ष्णोति व्याप्नोति जानाति वेत्तीत्यक्ष आत्मा तमक्षमात्मानमवधिमनःपर्य्ययापेक्षया परिप्राप्तक्षयोपशमं केवलापेक्षया प्रक्षीणावरणं वा प्रतिनियतं प्रतिनिश्चितं प्रत्यक्षम् । अन्यत् २५ अवधिमनःपर्य्ययकेवलज्ञानत्रयं प्रत्यक्षं प्रमाणं भवति ।

अत्राह कश्चित्–अवधिदर्शनं केवलदर्शनमपि अक्षमेव आत्मानमेव प्रतिनियतं वर्तते, तेन कारणेन तदपि प्रत्यक्षं वक्तव्यम्; सत्यम्; ज्ञानमित्यनुवर्त्तते । [2]कस्मिन् प्रस्तावे ज्ञान-मित्यनुवर्तते ? "मतिश्रुतावधिमनःपर्य्ययकेवलानि ज्ञानम्" [त० सू० १।९] इत्यत्र सूत्रे ज्ञानस्य ग्रहणं वर्त्तते, तेन कारणेन दर्शनस्य व्युदासः । दर्शनं न प्रत्यक्षं प्रमाणमित्यर्थः । ३०

---

१ स्मृतेन भावः ता० । २ कस्मिंश्चित् आ०, द०, ब०, ज० ।

[1]तस्मिन्नपि प्रमाणे सति विभङ्गज्ञानमपि अक्षमेव आत्मानमेव प्रतिनियतम्, तेन कारणेन विभङ्गज्ञानस्यापि प्रमाणत्वेन ग्रहणं प्राप्नोति; तदपि न प्रमाणम्; सम्यगित्यधिकारात्। क्वासौ सम्यगधिकारो वर्त्तते? "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" [त० सू० १।१] इत्यत्र सूत्रे सम्यक्शब्दस्य ग्रहणमस्ति, तेन कारणेन विभङ्गज्ञानस्य प्रमाणत्वे(त्व)प्रतिषेधः।
५ तेन सम्यक्शब्देन विशेषणभूतेन ज्ञानं विशिष्यते, तेन कारणेन विभङ्गज्ञानस्य निषेधः कृतो भवति, न प्रमाणमित्यर्थः। विभङ्गज्ञानं हि मिथ्यादर्शनोदयाद्विपरीतार्थगोचरम्, तेन कारणेन तन्न सम्यग्विशेषेण विशिष्टम्। [2]अथैवं त्वं मन्यसे 'इन्द्रियव्यापारजनितं ज्ञानं खलु प्रत्यक्षम्, प्रतीन्द्रियव्यापारं ज्ञानं परोक्षमेतत्' एतत्प्रत्यक्षपरोक्षयोर्लक्षणमक्षुण्णं वेदितव्यमिति; तन्न संगच्छते; तथा सति सर्वज्ञस्य प्रत्यक्षज्ञानाभावो भवति। यदि इन्द्रियनिमित्तमेव ज्ञानं प्रत्यक्षं
१० त्वया मन्यते तथा [3]सति सर्वज्ञस्य प्रत्यक्षज्ञानमेव न स्यात्। न हि सर्वज्ञस्य इन्द्रियपूर्वोऽर्थाधिगमो भवति। अथ सर्वज्ञस्य करणपूर्वकमेव ज्ञानं त्वया कल्प्यते; तर्हि सर्वज्ञस्य असर्वज्ञत्वं भवेत्। अथ सर्वज्ञस्य मानसं ज्ञानं प्रत्यक्षमिति त्वं मन्यसे मनःप्रणिधानपूर्वकत्वात्; तर्हि ज्ञानस्य सर्वज्ञत्वाभावो भवति। आगमात् सर्वज्ञस्य सिद्धिरिति चेत्; तदपि न; आगमस्य प्रत्यक्षज्ञानपूर्वकत्वात्। योगिप्रत्यक्षमपरमेव दिव्यज्ञानमस्तीति चेत् त्वं मन्यसे; तदपि न
१५ घटते; योगिनः प्रत्यक्षत्वमिन्द्रियनिमित्ताभावाद्भवति 'अक्षमक्षं प्रति यद्वर्त्तते तत्प्रत्यक्षम्' इत्यभ्युपगमात्। [4]किञ्च सर्वज्ञत्वाभावः प्रतिज्ञाहानिर्वा तव भवति। अलमतिप्रसङ्गेन।

अथेदानीं परोक्षज्ञानस्य विशेषपरिज्ञानार्थं सूत्रमिदमाहुः[5]—

मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम् ॥ १३ ॥

मननं मतिः। स्मरणं स्मृतिः। संज्ञानं संज्ञा। चिन्तनं चिन्ता। अभिनिबोधनं अभि-
२० निबोधः। इति एवंप्रकारा मतिज्ञानस्य पर्य्यायशब्दा वेदितव्याः। एते शब्दाः प्रकृत्या भेदेऽपि सति रूढिबलान्नार्थान्तरम्, मतिज्ञानार्थ एवेत्यर्थः। यथा 'इन्दतीति इन्द्रः, शक्नोतीति शक्रः, पुरं दारयतीति पुरन्दरः' इत्यादीन्दनादिक्रियाभेदेऽपि शचीपतिरेवोच्यते तथा समभिरूढनयापेक्षया, अर्थान्तरे [6]सत्यपि मतिर्मतिज्ञानमेवोच्यते, मतिज्ञानावरणक्षयोपशमे अन्तरङ्गनिमित्ते सति जनितोपयोगविषयत्वात्। एतेषां मतिज्ञानभेदानां[7] श्रुतादिष्वप्रवृत्तिर्वर्तते।
२५ मतिज्ञानावरणक्षयोपशमनिमित्तोपयोगं नातिक्रामन्ति। मतिस्मृतिसंज्ञाचिन्ताऽभिनिबोधादि[8]भिर्योऽर्थोऽभिधीयते स एक एवेत्यर्थः। तथापि भेद उच्यते। बहिरङ्गमन्तरङ्गञ्चार्थं परिस्फुटं [9]य आत्मा मन्यते सा अवग्रहेहाऽवायधारणात्मिका मतिरुच्यते। स्वसंवेदनमिन्द्रियज्ञानञ्च सांव्यवहारिकं प्रत्यक्षम्। 'तत्' इति अतीतार्थग्राहिणी प्रतीतिः स्मृतिरुच्यते। तदेवेदं, तत्सदृ-

---

१ ज्ञानेऽपि। २ अर्थैकत्वम् आ०, ब०, ज०। आद्यैकत्वम् द०। ३ तथा सर्व-आ०, द०, ब०, ज०। ४ तुलना-स० सि० १।१२। ५-दं प्राहुः आ०, ब०, द०, ज०। ६ सत्यपि मतिज्ञान- आ०, द०, ब०, ज०। ७-भेदेन आ० द०, ब०, ज०। ८-बोधास्तैर्योऽर्थो-आ०, द०, ब०, ज०। ९ यथा आ०, ब०, द०, ज०।

शङ्ख इति प्रत्यभिज्ञानं संज्ञा कथ्यते। यथा अग्निं विना धूमो न स्यात् तथा आत्मानं विना शरीरव्यापारवचनादिकं न स्यादिति वितर्कणमूहनं चिन्ता अभिधीयते। धूमादिदर्शनादग्न्यादिप्रतीतिरनुमानमभिनिबोध अभिधीयते। इतिशब्दात् प्रतिभाबुद्धिमेधाप्रभृतयो मतिज्ञानप्रकारा वेदितव्याः। रात्रौ दिवा वाऽकस्माद्बाह्यकारणं विना 'व्युष्टे[1] ममेष्टः समेष्यति' इत्येवंरूपं यद्विज्ञानमुत्पद्यते सा प्रतिभा अभिधीयते। अर्थग्रहणशक्तिर्बुद्धिः [2]कथ्यते। पाठग्रहण- ५
शक्तिर्मेधा अभिधीयते। उक्तञ्च–

"मतिरागमिका ज्ञेया बुद्धिस्तत्कालदर्शिनी।
प्रज्ञा चातीतकालज्ञा मेधा कालत्रयात्मिका"[3] ॥ [ ]

अथ मतिज्ञानस्य आत्मलाभे किं निमित्तमिति प्रश्ने सूत्रं [4]सूचयन्ति–

तदिन्द्रियानिन्द्रियनिमित्तम् ॥ १४ ॥ १०

तन्मतिज्ञानम् इन्द्रियानिन्द्रियनिमित्तम्। इन्दति परमैश्वर्यं प्राप्नोतीति इन्द्रः। आत्मतत्त्वस्यात्मनः ज्ञायकैकस्वभावस्य मतिज्ञानावरणक्षयोपशमे सति स्वयमर्थान् गृहीतुमसमर्थस्य यदर्थोपलब्धिलिङ्गं तदिन्द्रस्य लिङ्गम् इन्द्रियमुच्यते। अथवा, लीनमर्थं गमयति ज्ञापयतीति लिङ्गमिन्द्रियमुच्यते। आत्मनः सूक्ष्मस्य अस्तित्वाधिगमकारकं लिङ्गमिन्द्रियमित्यर्थः। अग्नेर्धूमवत्। इत्थमिदं स्पर्शनादिकरणम् आत्मनो लिङ्गं वेदितव्यम्। आत्मानं विना लिङ्गमिन्द्रियं १५
न भवतीति ज्ञातुः कर्तुरात्मनोऽस्तित्वमिन्द्रियैर्गम्यते। अथवा नामकर्मण इन्द्र इति संज्ञा। इन्द्रेण नामकर्म्मणा [5]स्पृष्टं (सृष्टं) इन्द्रियमित्युच्यते। तदिन्द्रियं स्पर्शनादिकम्। तदिन्द्रियं पञ्चप्रकारम्– "**स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि**" [त० सू० २।१९] इति वक्ष्यमाणसूत्रेण वक्ष्यते। [6]अनिन्द्रियं मनः अन्तःकरणमिति पर्य्याय[7]शब्दाः। ननु न इन्द्रियमनिन्द्रियमिति इन्द्रियप्रतिषेधेन मनसि इन्द्रियलिङ्गे सत्यपि अनिन्द्रियशब्दस्य प्रवृत्तिः कथम्? सत्यम्; २०
नञ्शब्द ईषदर्थे वर्त्तते। न इति कोऽर्थः? ईषत्। न इन्द्रियमनिन्द्रियम्, ईषदिन्द्रियमित्यर्थः, यथा अनुदरा कन्या। यदि कन्या सर्वथा उदररहिता भवति तथा सा कथं जीवति? तेन ज्ञायते अनुदरा ईषदुदरा कन्येति। ननु मन ईषदिन्द्रियं कथम्? सत्यम्; यथा इन्द्रियाणि प्रतिनियतदेशविषयाणि कालान्तरस्थायीनि च वर्त्तन्ते मनस्तादृशं कथम्? अन्तःकरणञ्च कथमुच्यते? गुणदोषविचारस्मरणादिव्यापारेषु मन इन्द्रियाणि नापेक्ष्यते यतः, चक्षुरादिवत् बाह्यैः २५
पुरुषैः यतो[8]नानु (नो) पलभ्यते तेनान्तर्गतं करणमन्तःकरणमित्युच्यते। इन्द्रियाणि चानिन्द्रियञ्च इन्द्रियानिन्द्रियाणि। तानि निमित्तानि यस्य मतिज्ञानस्य तदिन्द्रियानिन्द्रियनिमित्तम्।

---

१ प्रभाते। २–द्धिरुच्यते आ०, ब०, द०, ज०। ३ तुलना–"स्मृतिर्व्यतीतविषया मतिरागामिगोचरा। बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता॥ प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः।"–काव्यद० पृ० ७। काव्यमी० १।४। ४ रचयति ब०। ५ "इन्द्र इति नामकर्मोच्यते तेन सृष्टमिन्द्रियमिति।" –स० सि० १।१४। ६ तदिन्द्रियम् आ०, द०, ब०, ज०। ७–शब्दः आ०, ब०, द०, ज०। ८ ना इत्युपल–आ०, ब०, द०, ज०।

ननु "अनन्तरस्य विधिः प्रतिषेधो वा" [पा० महा० १।२।४७] इति परिभाषासूत्रबलादिन्द्रियानिन्द्रियनिमित्तमिति सूत्रेणैव मतिज्ञानं लभ्यते, किमर्थं 'तत्'शब्दग्रहणम्? [1]तच्छब्द इहार्थमुत्तरसूत्रार्थञ्च गृह्यते। यन्मतिः (ति) स्मृतिः (ति) संज्ञाचिन्ताऽभिनिबोधबुद्धिप्रज्ञामेधादिपर्यायशब्दवाच्यं ज्ञानं तद् इन्द्रियानिन्द्रियनिमित्तम्। तदेव अवग्रहेहावायधारणा अपि मतिज्ञानं भवति। अन्यथा प्रथमं ज्ञानं मतिस्मृत्यादिशब्दवाच्यं इन्द्रियाऽनिन्द्रियनिमित्तं[2] श्रुतम्, अवग्रहेहावायधारणा अपि श्रुतमित्यनिष्टोऽर्थ उत्पद्यते। ततः कारणात् अवग्रहादि इन्द्रियाऽनिन्द्रियनिमित्तं स्मृत्यादि अनिन्द्रियनिमित्तमिति वेदितव्यम्।

अथ मतिज्ञानस्योत्पत्तिनिमित्तं ज्ञातम्। मतिज्ञानस्य भेदपरिज्ञानार्थं[3] सूत्रमिदं[4]माहुः–

अवग्रहेहावायधारणाः ॥ १५ ॥

अवग्रहणमवग्रहः। ईहनमीहा अवायनमवायः। धारणं धारणा। अवग्रहश्च ईहा च अवायश्च धारणा च अवग्रहेहावायधारणाः। एते चत्वारो भेदाः मतिज्ञानस्य भवन्ति। अवग्रहादीनां स्वरूपं निरूप्यते। अवग्रहस्य प्राक्सन्निपातमात्रदर्शनम्। अवग्रहस्तु मतिज्ञानस्य भेदः सन्निपातलक्षणदर्शनानन्तरमाद्यं[5]ग्रहणमवग्रह उच्यते। सन्निपातलक्षणं दर्शनं किम्? विषयविषयिसन्निपाते सति दर्शनं भवति। तत्पश्चादर्थस्य ग्रहणमवग्रह उच्यते, यथा चक्षुषा शुक्लं रूपमिति ग्रहणमवग्रहः। अवग्रहेण गृहीतो योऽर्थस्तस्य विशेषपरिज्ञानाकाङ्क्षणमीहा कथ्यते, यथा यच्छुक्लं रूपं मया दृष्टं तत्किं बलाका–बकभार्या[6] आहोस्वित् पताका–ध्वजा वर्तते? इति विशेषाकाङ्क्षणमीहा। तदनन्तरमेषा उत्पतति निपतति पक्षि (क्ष)विक्षेपादिकं करोति, तेन ज्ञायते–इयं बलाकैव भवति, पताका न भवति। एवं याथात्म्यावगमनं वस्तुस्वरूपनिर्धारणमवाय उच्यते। अवेतस्य सम्यक्परिज्ञातस्य यत्कालान्तरेऽविस्मरणकारणं ज्ञानं सा धारणेत्युच्यते। यथा या बलाका पूर्वाह्णे मया दृष्टा सैवेयं बलाका वर्तते। एवंविधं धारणालक्षणम्। अवग्रहेहावायधारणानामुपन्यासक्रमो विहितः। कोऽर्थः? उत्पत्ति[7]क्रमः कृत इत्यर्थः।

अथ अवग्रहादीनां चतुर्णां मतिज्ञानभेदानां प्रभेदपरिज्ञानार्थं सूत्रमिदमाहुः–

बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणां सेतराणाम् ॥ १६ ॥

अवग्रहेहावायधारणाः क्रियाविशेषाः क्रियाभेदाः प्रकृताः प्रस्तुताः। [8]तदपेक्षोऽयं कर्मनिर्देशो विषयनिर्देशः। अवग्रहादयः बह्वादीनां सेतराणां विषये भवन्तीत्यर्थः। बहुशब्दोऽत्र संख्यावाची वैपुल्यवाची च वेदितव्यः। संख्यावाची यथा एको द्वौ बहवः। वैपुल्यवाची यथा बहुः कूरः[9], बहुः सूपः। बहुश्च बहुविधश्च बहुप्रकारः, क्षिप्रं च अचिरम्, अनिःसृतश्च असकलपुद्गलः, अनुक्तश्च अभिप्राये स्थितम्, ध्रुवश्च निरन्तरं यथार्थग्रहणम्, बहुबहुविध-

---

१ तच्छब्दग्रहणार्थम्–आ०, ज०। तच्छब्दग्रह इहार्थमु–द०, ब०। २ –त्तम् अवग्र– आ०, ब०, द०, ज०। ३–ज्ञापना–ज०। ४–दं प्राहुः आ०, ब०, द०, ज०। ५–माद्यं ग्रहणम् आ०, ब०, द० ज०, ब०। ६ बलाभार्या ब०। ७–क्रम इत्यर्थ आ०, द०, ब०, ज०। ८ तदपेक्षया आ०, ब०, द०, ज०। ९ ओदनः।

क्षिप्राऽनिःसृतानुक्तध्रुवाणि, तेषां बहुबहुविधक्षिप्राऽनिःसृतानुक्तध्रुवाणाम्। कथम्भूतानाम्? सेतराणां प्रतिपक्षसहितानाम्। तेनायमर्थः—बहूनामवग्रहः तदितरस्याल्पस्यावग्रहः। बहुविधस्यावग्रहः तत्प्रतिपक्षभूतस्य एकविधस्यावग्रहः। क्षिप्रेणावग्रहः तदितरेण चिरेणावग्रहः। अनिःसृतस्यावग्रहः तदितरस्य निःसृतस्यावग्रहः। अनुक्तस्यावग्रहः तदितरस्योक्तस्यावग्रहः। ध्रुवस्यावग्रहः तदितरस्य अध्रुवस्यावग्रहः। एवमवग्रहो द्वादशप्रकारः। तथा ईहाऽपि द्वादशप्रकारा। ५ तथा अवायोऽपि द्वादशप्रकारः। तथा धारणाऽपि द्वादशप्रकारा। एवं द्वादशचतुष्के अष्टचत्वारिंशत् भेदा भवन्ति। साष्टचत्वारिंशत् षड्भिरीन्द्रियैर्गुणिता अष्टाशीत्यधिका द्विशती भवति। तत्र बह्ववग्रहादयः षट्प्रकाराः। षण्णां प्रभेदाश्च ज्ञानावरणक्षयोपशमप्रकर्षाद् भवन्ति। अल्पैकविधचिरनिःसृतोक्ताध्रुवाः षडितरे प्रकाराः ज्ञानावरणक्षयोपशमस्याप्रकर्षात् क्षयोपशममात्राद् भवन्ति। अत एव कारणात् बह्वादीनामर्चिततवादादौ ग्रहणम्। "यच्चार्चितं द्वयोः" १० [कात० २।५।१३] इति वचनात्।

ननु बहुषु बहुत्वं वर्त्तते, बहुविधेष्वपि बहुत्वमस्ति कस्तयोर्विशेषः[1]? सत्यम्; एकप्रकारनानाप्रकारविहितोऽस्ति भेदः। ननु सकलपुद्गलनिःसरणान्निःसृतम्, उक्तश्चाप्येवंविधमेव, अनयोरपि निःसृतोक्तयोः कः प्रतिविशेषो वर्तते? सत्यम्; अन्योपदेशपूर्वकं यद् ग्रहणं तदुक्तमुच्यते। स्वयमेव परोपदेशमन्तरेणैव कश्चित् प्रतिपद्यते तद्ग्रहणं निःसृत- १५ मुच्यते। केचित्[2] क्षिप्रनिःसृत इति पठन्ति। त एवं [3]व्याख्यान्ति–श्रोत्रेन्द्रियेण शब्दमवगृह्यमाणं मयूरस्य कुररस्य [4]वेति कश्चित् प्रतिपद्यते। अपरस्तु स्वरूपमेव प्रतिपद्यते। मयूरस्यैवायं [5]शब्दः अथवा कुररस्यैवायं शब्द इति [6]निर्द्धारयति स निःसृत उच्यते।

ननु ध्रुवावग्रहस्य धारणायाश्च को विशेषः? कर्मणः क्षयोपशमलब्धिकाले निर्मलपरिणामसन्तानेन यः क्षयोपशमः प्राप्तस्तेन [7]प्रथमसमये यादृशोऽवग्रहः सञ्जातः तादृश एव द्विती- २० यतृतीयादिष्वपि समयेष्ववग्रहो भवति, तस्मादवग्रहान्न्यूनाधिको न भवति स ध्रुवाऽवग्रहः कथ्यते। यदा काले तु विशुद्धसंक्लिष्टपरिणामानां मिश्रणं भवति तस्मिन् काले यः कर्मणः क्षयोपशमो लब्धस्तस्मात् क्षयोपशमात् संजायमानोऽवग्रहः कदाचित् बहूनां भवति, कदाचिदल्पस्य भवति, कदाचिद् बहुविधस्यावग्रहो भवति कदाचिदेकविधस्यावग्रहो वा भवति, एवं न्यूनाधिकोऽवग्रहो अध्रुव उच्यते। धारणा तु अवगृहीतार्थानामविस्मरणकारणमिति ध्रुवाऽवग्रहधा- २५ रणयोर्महान् भेदो वर्त्तते।

अथ यद्यवग्रहादयो बह्वादीनां विषयाणां स्वीकर्त्तारो भवन्ति तर्हि बह्वादीनि विशेषणानि कस्य भवन्तीति प्रश्ने उत्तरमाह—

अर्थस्य ॥ १७ ॥

१–शेषः एक– आ०, ज०। २–तुलना–स० सि० १।१६। ३ व्याख्यास्यन्ति। आ०। ४ वेति प्रति–आ०। ५ शब्द इति द०, ब०, व०, ज०, ता०। ६ निधारयति ता०। ७ प्रथमे सम–आ०, ज०, द०, ब०।

स्थिरः स्थूलरूपः चक्षुरादीन्द्रियाणां ग्राह्यो विषयो गोचरो गम्य इति यावत् वस्तुरूपोऽर्थ उच्यते। द्रव्यं वाऽर्थ उच्यते। तस्यार्थस्य बह्वादिविशेषणविशिष्टस्य अवग्रहेहावायधारणा भवन्तीति सम्बन्धः। किमर्थमिदं सूत्रमुच्यते यतः बह्वादिरर्थ एवास्ति? सत्यम्; मिथ्यावादिकल्पनानिषेधार्थं सूत्रमिदमुच्यते। [1]केचिन्मिथ्यावादिन एवं मन्यन्ते। एवं किम्? यद् रूपरस-
५ गन्धवर्णशब्दाः पञ्च गुणाः इन्द्रियैः किल [2]सन्निकृष्यन्ते, तेषां गुणानामवग्रहणमिति। तन्न सङ्गच्छते; रूपादयो गुणा अमूर्त्ताः, ते इन्द्रियसन्निकर्षं न प्राप्नुवन्ति[3]। यदि न प्राप्नुवन्ति तर्हि 'मया रूपं दृष्टम्, गन्धो मया आघ्रातः' इति न घटते; इयर्त्ति पर्यायान् अर्थः, अर्य्यते वा पर्यायैः यः सोऽर्थः द्रव्यम्, तस्मिन् द्रव्ये इन्द्रियैः सन्निकृष्यमाणे तस्मात् [4]द्रव्यात् रूपादीनामव्यतिरेके अपृथक्त्वे रूपादिष्वपि संव्यवहारो युज्यते। न च तथा
१० सति सन्निकर्षः।

अथ [5]अव्यक्तस्य वस्तुनोऽवग्रह एव स्यान्न च ईहादय इत्यर्थप्रतिपादनार्थं सूत्रमिदमाहुः—

व्यञ्जनस्यावग्रहः ॥ १८ ॥

व्यञ्जनस्य [6]अव्यक्तस्य शब्दादिसमूहस्य अवग्रह एव भवति। स बह्वादिरूपो द्वादश-
१५ विधः। चक्षुर्मनोरहितान्यचतुर्भिरिन्द्रियैः प्रादुर्भाविताऽष्टचत्वारिंशत्प्रकारो भवति। पूर्वोक्ताऽष्टाशीत्यधिकद्विशतमेलितः षट्त्रिंशदधिकत्रिंशतप्रकारो मतिज्ञानभेदसमूहो भवति। किमर्थमिदं सूत्रम्? नियमार्थमिदं सूत्रम्-व्यञ्जनस्य अवग्रह एव न ईहादयः। यथा नवशरावः [7]द्वित्रिजलकणैः सिक्तः सन् नार्द्रीभवति, स एव शरावः पुनः पुनः सिच्यमानः शनैः [8]शनैरार्द्रीभवति क्लिद्यति, तथा श्रोत्रादिभिरिन्द्रियैः शब्दादिपरिणताः पुद्गलाः [9]द्वि[त्रा]-
२० दिषु क्षणेषु गृह्यमाणाः न व्यक्तीभवन्ति, पुनः पुनरवग्रहे सति तु व्यक्तीभवन्ति। अतः कारणात् यावद् व्यक्तोऽवग्रहो न भवति तावद् व्यञ्जनावग्रह एव। उत्तरकाले तु व्यक्तस्य अवग्रहेहावायधारणा अपि भवन्ति। तर्हि [10]सूत्रे एवकारो गृहीतव्यः। कथम्? 'व्यञ्जनस्य अवग्रह एव' इति सूत्रं विधीयताम्। सत्यम्; [11]सिद्धे विधिरारभ्यमाणो नियमार्थ एव।
"सिद्धे सति आरम्भो नियमाय" [ ] इति वचनात्।

२५ अथ सर्वेन्द्रियेषु व्यञ्जनाऽवग्रहे प्रसक्ते इन्द्रियद्वयनिषेधार्थं सूत्रमिदमुच्यते—

न चक्षुरनिन्द्रियाभ्याम् ॥ १९ ॥

चक्षुश्च अनिन्द्रियं च चक्षुरनिन्द्रिये, ताभ्यां चक्षुरनिन्द्रियाभ्याम्। चक्षुषा अनिन्द्रियेण च मनसा व्यञ्जनावग्रहो न भवति। यतः कारणादप्राप्तमर्थं अविदिक्कं युक्तं सन्निकर्षविषयेऽवस्थितं बाह्यप्रकाशाभिव्यक्तं चक्षुरुपलभते। मनश्च अप्राप्तमुपलभते इति कारणात् चक्षु-

---

१ वैशेषिकाः। २ संकृष्यन्ते आ०, द०, ब०, ज०। ३-वन्ति तर्हि ता०। ४ द्रव्यात् इन्द्रियाणाम-ता०, ब०। ५-क्तवस्तु-आ०, ब०, द०, ज०। ६ अव्यक्तशब्दसमूहस्य आ०, द०, ब०, ज०। ७ द्विजल-आ०, द०, ब०, ज०। ८ सार्द्रीभवति ज०। सन्नार्द्रीभवति आ०, द०, ब०। -राद्रभ-ता०। ९ द्वित्र्यादि-ता०। १० सूत्रेण आ०। ११ विधेरा-आ०, ब०, ज०।

मनसोः व्यञ्जनावग्रहो न भवति। चक्षुषोऽप्राप्यकारित्वं कथमवसीयते ? आगमाद्युक्तितश्च। कोऽसावागमः ?

"पुट्ठं सुणोदि सद्दं अपुट्ठं पुणवि पस्सदे रूवं।
गंधं रसं च फासं बद्धं पुट्ठं वियाणाहि॥" [ ]

कासौ युक्तिः ? चक्षुरप्राप्यकारि। कुतः ? स्पृष्टानवग्रहात्। यत् चक्षुषा स्पृष्टं तन्ना- ५ वगृह्णातीत्यर्थः। यदि चक्षुः प्राप्यकारि स्यात् तर्हि स्पृष्टमञ्जनं त्वगिन्द्रियवत् तदवगृह्णीयात्। न चावगृह्णाति। चक्षुः स्पृष्टं वस्तु नेक्षत इत्यर्थः। ततः कारणात् मनोवत् चक्षुरप्राप्यकारीति वेदितव्यम्। तेन कारणेन चक्षुर्मनसी द्वे वर्जयित्वा स्पर्शनरसनघ्राणश्रोत्रेन्द्रियाणां चतुर्णामपि व्यञ्जनाऽवग्रहो भवत्येव। तत इत्यायातम्—इन्द्रियाणामनिन्द्रियस्य च अर्थाऽवग्रहः सिद्धः।

अथ लक्षणतो भेदतश्च मतिज्ञानं ज्ञातम्। श्रुतज्ञानस्य लक्षणं भेदप्रभेदाश्च वक्तव्या १० इति प्रश्ने सूत्रमित्यूचुः–

श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्॥ २०॥

श्रवणं श्रुतं ज्ञानविशेष इत्यर्थः, न तु श्रवणमात्रम्। यथा कुशं लुनातीति कुशलं रूढिवशात् पर्य्यवदानं क्षेम इत्यर्थः, न तु कुशस्य लवनम्। तथा श्रवणं श्रुतमित्युक्ते श्रवणमात्रं न भवति, किन्तु ज्ञानविशेषः। कोऽसौ ज्ञानविशेषः ? मतिपूर्वम्, मतिः पूर्वं १५ निमित्तं कारणं यस्य तन्मतिपूर्वम्। पूरयति प्रमाणत्वमिति पूर्वमिति व्युत्पत्तेः। अथवा मतिः पूर्वोक्तलक्षणा पूर्वा[2] यस्य तन्मतिपूर्वं मतिकारणमित्यर्थः। ननु कारणसदृशं कार्यं भवतीति कारणात् श्रुतमपि मतिरेव; तदैकान्तिकं न भवति; चक्रचीवरदवरदण्डादिकारणो घटः न चक्रचीवरदवरदण्डात्मको भवति, चक्रादौ सत्यपि घटाभावात्। सत्यपि मतिज्ञाने [3]चक्षुरादिके बलवच्छ्रुतावरणकर्मादययुतस्य जीवस्य श्रुतज्ञानाभावात्। श्रुतज्ञानावरणक्षयो- २० पशमप्रकर्षे सति श्रुतज्ञानमुत्पद्यते। तेन कारणेन मतिज्ञानं श्रुतज्ञानस्य निमित्तमात्रं वर्त्तते, न तु श्रुतज्ञानं मत्यात्मकं वर्तत इति वेदितव्यम्।

अत्राह कश्चित्–श्रुतज्ञानं किलानादिनिधनं भवद्भिरुच्यते, तत्तु मतिपूर्वम्। मतिपूर्वकत्वे श्रुतस्य श्रुताऽभावः प्राप्नोति, यदादिमत् तदन्तवत्, तेन कारणेन पुरुष- प्रारब्धत्वात् श्रुतज्ञानस्य न प्रामाण्यम्; सत्यम्; द्रव्यक्षेत्रकालादौ समर्प्पणे श्रुतज्ञानमनादि- २५ निधनं वर्तते, चतुर्थकालादौ पूर्वविदेहादौ कल्पादिषु च श्रुतस्य सर्वसामान्यापेक्षणात्। न हि केनचित् पुरुषेण क्वचित् क्षेत्रे कदाचित् काले केनचित् प्रकारेण श्रुतज्ञानं कृतं वर्तते। द्रव्यादीनामेव विशेषापेक्षया श्रुतज्ञानस्य आदिरन्तश्च घटते। यतो [4]वृषभसेनादयो द्रव्यभूताः, तैः श्रुतज्ञानस्य आदिः कृतः। [5]वीराङ्गजान्तविशेषापेक्षया श्रुतस्यान्तः सङ्गच्छते। तेन श्रुतं

१ आव० नि० गा० ५। पञ्चसं० २।६८। "स्पृष्टं शृणोति शब्दमस्पृष्टं पुनरपि पश्यति रूपम्। गन्धं रसञ्च स्पर्शं बद्धं स्पृष्टं विजानाति॥" २ पूर्वम् ज०। ३ चक्षुरादिजन्ये। ४ गणधराः। ५ वीरांगजानवि–आ०।

मतिपूर्वमित्युच्यते। यथा अङ्कुरः खलु बीजपूर्वको भवति। स चाङ्कुरः सन्तानापेक्षया अपरबीजापेक्षया अनादिनिधनः कथ्यते।

वेदाभिप्रायं जैनः खण्डयति। अपौरुषेयत्वं प्रामाण्यकारणं न भवति[1]। यतः अपौरुषेयः शब्दोऽपि नास्ति। येन पुरुषेण वेदाः कृताः स पुमान् भवद्भिर्न स्मर्यते। यदि वेदकृत्पुमान् भवद्भिर्न स्मर्य्यते तर्हि वेदाः [2]किमकृता भवन्ति ? तत्र दृष्टान्तः, यदि चौर्यपरदाराद्युपदे[3]-शस्य कर्त्ता न स्मर्यते तर्हि तदुपदेशोऽपि अपौरुषेयः, तस्यापि [4]प्रामाण्यप्रसङ्गो भवति। न च वेदोऽकृत्रिमः। तथा चोक्तम्—

"वेदे हेतुं तु काणादा वदन्ति चतुराननम्।
जैनाः कालासुरं बौद्धाश्चाष्टकान् सकलाः सदा ॥ १ ॥" [ ]

पौरुषेयस्य श्रुतस्यानादिनिधनस्य च प्रत्यक्षादेः प्रामाण्ये सति को विरोधो वर्त्तते, न कश्चित् विरोध इत्यर्थः।

अत्राह कश्चित्—प्रथमसम्यक्त्वोत्पत्तिकाले मतिश्रुतयोर्युगपदुत्पत्तिर्भवति कथं मतिपूर्वं श्रुतमिति ? सत्यम्; सम्यक्त्वस्य समीचीनत्वस्य ज्ञाने तदपेक्षत्वात् सम्यक्त्वापेक्षत्वात्, श्रुतस्य [5]आत्मलाभः-उत्पादः क्रमवान् [6]इति कारणान्मतिपूर्वकत्वव्याघाताभावः। तथा चोक्तम्—

"कारणकज्जविहाणं दीवपयासाण जुगवजम्मे वि।
जुगवं जम्मेवि तहा हेऊ णाणस्स सम्मत्तं[7] ॥" [आरा० सा० गा० १३]

[8]यत्सम्यक्त्वं तन्मतिज्ञानं वेदितव्यम्, मानसव्यापारादिति।

ननु मतिपूर्वं श्रुतमिति श्रुतलक्षणं न घटते। कस्मात् ? यतः श्रुतपूर्वमपि[9] श्रुतं भवति। तद्यथा शब्दपरिणतपुद्गलस्कन्धात् स्थापितवर्णपदवाक्यादिभावात् चक्षुरादिगोचराच्च आद्यं श्रुतविषयभावमापन्नात्[10] अव्यभिचारिणः श्रुतात् श्रुतप्रतिपत्तिरिति। यथा विहितसङ्केतो जनः घटात् जलधारणादिकार्य्यं सम्बन्ध्यन्तरं प्रतिपद्यते धूमादेरग्न्यादिद्रव्यवत्। अस्यायमर्थः—घट इत्युक्ते घकारटकारविसर्गात्मकं शब्दं मतिज्ञानेन प्रतिपद्यते। तदनन्तरं घटात्–घटशब्दात् घटार्थं श्रुतज्ञानेन प्रतिपद्यते। तस्मादपि घटार्थात् जलधारणादिकार्यं श्रुतज्ञानेन प्रतिपद्यते। तथा चक्षुरादिविषयाद् धूमादेस्तत्रापि धूमदर्शनं मतिज्ञानम्। तस्मादग्निविषयज्ञानं श्रुतज्ञानम्।

१–ति अ–आ०। २ किं न कृता आ०। ३–देशकर्ता ज०। ४ "चौर्याद्युपदेशस्यास्मर्यमाणकर्तृकस्य प्रामाण्यप्रसङ्गात्।"–**स० सि० पृ० ४८**। "तस्मादपौरुषेयत्वे स्यादन्योऽप्यनराश्रयः। म्लेच्छादिव्यवहाराणां नास्तिक्यवचसामपि ॥ अनादित्वाद् भवेदेवं पूर्वसंस्कारसन्ततेः। तादृशेऽपौरुषेयत्वे कः सिद्धेऽपि गुणो भवेत् ॥"–**प्रमाणवा०** ३।२४५–४६। **अष्टश०, अष्टस० पृ०** २३८। **सिद्धिवि० पृ०** ४०८। ५ आत्मनो लाभः **आ०, द०, ब०, ज०**। ६ क्रमवान् मति-**आ०, द०, ब०, ज०**। ७ कारणकार्यविधानं दीपप्रकाशयोर्युगपज्जन्मन्यपि। युगपज्जन्मन्यपि तथा हेतुर्ज्ञानस्य सम्यक्त्वम् ॥ ८ तत् सम्य–**आ०, द०, ब०, ज०**। ९ श्रुतपूर्वमित्यपि श्रुतं **आ०**। १०–भावापन्नात् **आ०**।

तस्मादपि दाहपाकादिकार्य्यं श्रुतमिति। एवं श्रुतात् श्रुतं भवति, कथं मतिपूर्वं श्रुतमिति घटते ? सत्यम् ; श्रुतपूर्वस्य श्रुतस्यापि मतिपूर्वकत्वमुपचर्य्यते । यस्माच्छ्रुतात् श्रुतमुत्पन्नं-तच्छ्रुतमपि क्वचित् प्रघट्टके मतिरित्युपचर्य्यते–व्यवह्रियते, तेन कारणेन मतिपूर्वं श्रुतमिति क्वापि न व्यभिचरति ।

पुनरपि कथम्भूतं श्रुतम् ? द्व्यनेकद्वादशभेदम्। द्वौ भेदौ यस्य तद् द्विभेदम्। अनेके ५ भेदाः यस्य तत् अनेकभेदम्। द्विभेदञ्च तत् अनेकभेदञ्च द्व्यनेकभेदम्। द्वादश भेदाः यस्य तत् द्वादशभेदम्। द्व्यनेकभेदञ्च तत् द्वादशभेदञ्च द्व्यनेकद्वादशभेदम्। अनया रीत्या एकत्र गृहीतोऽपि भेदशब्दः त्रिषु स्थानेषु प्रयुज्यते । अस्यायमर्थः–श्रुतं पूर्वोक्तमतिपूर्ववि[१]-शेषणविशिष्टं द्विभेदमनेकभेदं द्वादशभेदञ्च भवति। तत्र अङ्गबाह्याङ्गप्रविष्टभेदात् द्विभेदम्। तयोर्द्वयोर्भेदयोर्मध्ये यदङ्गबाह्यं श्रुतं तदनेकभेदम्, मुख्यवृत्त्या चतुर्दशभेदं प्रकीर्णकाभिधान- १० मित्यर्थः। यदङ्गप्रविष्टं तत् द्वादशभेदम्।

ते के [२]अङ्गबाह्यश्रुतस्य भेदा इति चेत् ? उच्यते[३]। सामायिकं सामायिकविस्तरकथकं शास्त्रम्। १। चतुर्विंशतितीर्थङ्करस्तुतिरूपः स्तवः। २। एकतीर्थङ्करस्तवनरूपा वन्दना। ३। कृतदोषनिराकरणहेतुभूतं [४]प्रतिक्रमणम् । ४। चतुर्विधविनयप्रकाशकं वैनयिकम् । ५। दीक्षाशिक्षादिसत्कर्म्मप्रकाशकं कृतिकर्म्म । ६। [६]वृक्षकुसुमादीनां दशानां भेदकथकं १५ यतीनामाचारकथकञ्च दशवैकालिकम् । ७। भिक्षूणामुपसर्गसहनफलनिरूपकमुत्तराध्ययनम्। ८। यतीनां योग्यसेवनसूचकमयोग्यसेवने प्रायश्चित्तकथकं कल्पव्यवहारम् । ९। कालमाश्रित्य यतिश्रावकाणां योग्यायोग्यनिरूपकं कल्पाकल्पम्। १०। यतिदीक्षाशिक्षा-भावनात्मसंस्कारोत्तमार्थगणपोषणादिप्रकटकं महाकल्पम् । ११। देवपदप्राप्तिपुण्यनिरूपकं पुण्डरीकम् । १२। देवाङ्गनापदप्राप्तिहेतुपुण्यप्रकाशकं महापुण्डरीकम् । १३। प्रायश्चित्त- २० निरूपिका [७]अशीतिका चेति। १४।

चतुर्दश प्रकीर्णकानि आरातीयैराचार्य्यैः कालदोषात् संक्षिप्तायुर्मतिबलशिष्योपकारार्थ-मुपनिबद्धानि। अर्थतः तीर्थकरपरमदेवप्रोक्तं सामान्यकेवलिप्रोक्तञ्च[८] श्रुतं श्रुत्वा गणधरदेवा-दिभिः श्रुतकेवलिभी रचितमङ्गप्रविष्टशास्त्रार्थं गृहीत्वा आधुनिकैर्यतिभी रचितमपि तदेवेदमिति ज्ञात्वा प्रकीर्णकलक्षणं शास्त्रं प्रमाणम्, क्षीरसागरतोयं [९]नीपगृहीतमिव । चतुर्दशप्रकीर्णक- २५

१–विशेषेण विशिष्टभेदम् **आ०, द०, ब०, ज०** । २ अङ्गबाह्यश्रुतभेदानां निरूपणाय द्रष्ट-व्यम्–**जयध० पृ०** ९७–१२१ । **३** उच्यन्ते **आ०**, द०, ज० । ४–विषयकम् **ब०** । ५ प्रतिक्रमणं चतुर्विधम्। **आ०, द०, ब०**, ज० । ६ "विकाले अपराह्णे स्थापितानि न्यस्तानि द्रुमपुष्पकादीन्य-ध्ययनानि यतः तस्मात् दशकालिकं नाम ।"–**दश० नि० हरि० गा०** १५, २०–३० । **जयध० पृ०** **१२ टि०** २। द्रुमपुष्पकादीनाम् अध्ययननाम्ना स्थाने वृक्षकुसुमादिशब्दः प्रयुक्तः इति भाति। **७** आशीतिका **आ०, ब०**, ज० । ८ प्रोक्तञ्च श्रुत्वा **आ०**, द०, **ब०**, ज० । ९ निरुपगृहीत–**आ०**, निपगृहीत **ज०** । नीपो घटः ।

शास्त्रग्रन्थप्रमाणं पञ्चविंशतिलक्षाणि त्रीणि सहस्राणि त्रीणि शतानि अशीत्यधिकानि श्लोकानां भवन्ति, [1]पञ्चदशाक्षराणि च २५०३३८० श्लोकाः अक्षराणि १५।

अङ्गप्रविष्टं शास्त्रं द्वादशप्रकारम्। यत्याचारसूचकमष्टादशसहस्रपदप्रमाणमाचाराङ्गम्।१। ज्ञानविनयच्छेदोपस्थापनाक्रियाप्रतिपादकं षट्त्रिंशत्सहस्रपदप्रमाणं सूत्रकृताङ्गम्।२। षट्द्रव्यैकाद्युत्तरस्थानव्याख्यानकारकं द्वाचत्वारिंशत्पदसहस्रप्रमाणं स्थानाङ्गम्।३। धर्माऽधर्मलोकाकाशैकजीवसप्तनरकमध्यबिलजम्बूद्वीपसर्वार्थसिद्धिविमाननन्दीश्वरद्वीपवापिकातुल्यैकलक्षयोजनप्रमाण[2]निरूपकं भवभावकथकं चतुःषष्टिपदसहस्राधिकलक्षपदप्रमाणं समवायाङ्गम्।४। जीवः किमस्ति नास्ति वा इत्यादिगणधरकृतप्रश्नषष्टिसहस्रप्रतिपादकमष्टाविंशतिसहस्राधिकद्विलक्षपदप्रमाणा व्याख्याप्रज्ञप्तिः।५। तीर्थङ्करगणधरकथाकथिका षट्पञ्चाशत्सहस्राधिकपञ्चलक्षपदप्रमाणा ज्ञातृकथा।६। श्रावकाचारप्रकाशकं सप्ततिसहस्राधिकैकादशलक्षपदप्रमाणमुपासकाध्ययनम्।७। तीर्थङ्कराणां [3]प्रतितीर्थं दश दश मुनयो भवन्ति ते तु उपसर्गान् सोढ्वा मोक्षं यान्ति, तत्कथानिरूपकमष्टाविंशतिसहस्राधिकत्रयोविंशतिलक्षपदप्रमाणमन्तकृद्दशम्।८। तीर्थङ्कराणां प्रतितीर्थं दश दश मुनयो भवन्ति ते तु उपसर्गं सोढ्वा पञ्चानुत्तरपदं प्राप्नुवन्ति, तत्कथानिरूपकं चतुश्चत्वारिंशत्सहस्राधिकद्विनवतिलक्षपदप्रमाणमनुत्तरौपपादिक[4]दशम्।९। नष्टमुष्ट्यादिकप्रश्नानामुत्तरप्रदायकं षोडशसहस्राधिकत्रिनवतिलक्षपदप्रमाणं प्रश्नव्याकरणम्।१०। कर्मणामुदयोदीरणासत्ताकथकं चतुरशीतिलक्षाधिककोटिपदप्रमाणं विपाकसूत्रम्[5]।११।

[6]दृष्टिवादनामधेयं द्वादशमङ्गं तत्पञ्चप्रकारं भवति। परिकर्म (१) सूत्र (२) प्रथमानुयोग (३) पूर्वगत (४) चूलिका (५) भेदात्। तेषु [7]पञ्चसु विधेषु प्रथमं परिकर्म। तदपि पञ्चप्रकारम्—चन्द्रप्रज्ञप्ति-सूर्य्यप्रज्ञप्ति-जम्बूद्वीपप्रज्ञप्ति-द्वीपसागरप्रज्ञप्ति-व्याख्याप्रज्ञप्ति-भेदात्। तत्र पञ्चसु प्रज्ञप्तिषु मध्ये पञ्चसहस्राधिकषट्त्रिंशल्लक्षपदप्रमाणा चन्द्रायुर्गतिविभवप्ररूपिका चन्द्रप्रज्ञप्तिः।१। तथा सूर्य्यायुर्गतिविभवनिरूपिका त्रिसहस्राधिकपञ्चलक्षपदप्रमाणा सूर्य्यप्रज्ञप्तिः।२। जम्बूद्वीपवर्णनाकथिका पञ्चविंशतिसहस्राधिकत्रिलक्षपदप्रमाणा जम्बूद्वीपप्रज्ञप्तिः।३। सर्वद्वीपसागरस्वरूपनिरूपिका षट्त्रिंशत्सहस्राधिकद्वापञ्चाशल्लक्षपदप्रमाणा द्वीपसागरप्रज्ञप्तिः।४। रूप्यरूप्यादिषट्द्रव्यस्वरूपनिरूपिका षट्त्रिंशत्सहस्राधिकचतुरशीतिलक्षपदप्रमाणा व्याख्याप्रज्ञप्तिः।५। एवं परिकर्म पञ्चप्रकारम्।

जीवस्य कर्तृत्वभोक्तृत्वादिस्थापकं भूतचतुष्टयादिभवन[8]स्योद्वापकमष्टाशीतिलक्षपद-

---

१ द्रष्टव्यम्–जयध० पृ० ९३ टि० २। २–माणभवभाव–आ०, ब०, द०, ज०। ३ प्रति-दश मुनयो भवन्ति आ०, ब०, ज०। ४–दशाङ्गम् ब०। ५ एतेषां लक्षणानां पदसंख्यायाश्च विशेषतुलनार्थं द्रष्टव्यम्–ध० टी० सं० पृ० ९९–१०७। जयध० प्र० पृ० ९३–९४–१२२–१३२। ६ दृष्टिवादस्य विशेषस्वरूपपरिज्ञानाय द्रष्टव्यम्–ध० टी० सं० पृ० १०८–१२२। जयध० प्र० पृ० ९४–९६, १३२–१४८। ७ पञ्चवि–आ०, ब०, द०, ज०। ८–स्योत्थापक–आ०, ब०, ज०, ता०। उच्छेदकमित्यर्थः।

प्रमाणं सूत्रम्। त्रिषष्टिशलाकामहापुरुषचरित्रकथकः [1]पञ्चसहस्रपदप्रमाणः प्रथमानुयोगः।

चतुर्दशपूर्वस्वरूपं पूर्वगतम्। तत्र वस्तूनामुत्पादव्ययध्रौव्यादिकथकं कोटिपदप्रमाणमुत्पादपूर्वम्। १। अङ्गानामग्रभूतार्थनिरूपकं षण्णवतिलक्षपदप्रमाणमग्रायणीयपूर्वम्। २। [2]बलदेववासुदेवचक्रवर्त्तिशक्रतीर्थङ्करादिबलवर्णकं सप्ततिलक्षपदप्रमाणं वीर्यानुप्रवादपूर्वम्। ३। जीवादिवस्त्वस्ति नास्ति चेति प्रकथकं षष्टिलक्षपदप्रमाणमस्तिनास्तिप्रवादपूर्वम्। ४। अष्टज्ञानतदुत्पत्तिकारणतदाधारपुरुषप्ररूपकमेकोनकोटिपदप्रमाणं ज्ञानप्रवादपूर्वम्। ५। वर्णस्थानतदाधारद्वीन्द्रियादिजन्तुवचनगुप्तिसंस्कारप्ररूपकं षडधिककोटिपदप्रमाणं सत्यप्रवादपूर्वम्। ६। ज्ञानाद्यात्मककर्त्तृत्वादियुतात्मस्वरूपनिरूपकं षड्विंशतिकोटिपदप्रमाणमात्मप्रवादपूर्वम्। ७। कर्म्मबन्धोदयोपशमोदीरणानिर्जराकथकमशीतिलक्षाधिककोटिपदप्रमाणं कर्म्मप्रवादपूर्वम्। ८। द्रव्यपर्य्यायरूपप्रत्याख्यानिश्चलनकथकं चतुरशीतिलक्षपदप्रमाणं प्रत्याख्यानपूर्वम्। ९। पञ्चशतमहाविद्याः सप्तशतक्षुद्रविद्या अष्टाङ्गमहानिमित्तानि[3] प्ररूपयत् दशलक्षाधिककोटिपदप्रमाणं विद्यानुप्रवादपूर्वम्। १०। तीर्थङ्करचक्रवर्त्तिबलभद्रवासुदेवेन्द्रादीनां पुण्यव्यावर्णकं षड्विंशतिकोटिपदप्रमाणं कल्याणपूर्वम्। ११। [4]अष्टाङ्गवैद्यविद्यागारुडविद्यामन्त्रतन्त्रादिनिरूपकं त्रयोदशकोटिपदप्रमाणं प्राणावायपूर्वम्। १२। छन्दोऽलङ्कारव्याकरणकलानिरूपकं नवकोटिपदप्रमाणं क्रियाविशालपूर्वम्। १३। [5]निर्वाणपदसुखहेतुभूतं सार्धद्वादशकोटिपदप्रमाणं लोकबिन्दुसारपूर्वम्। १४। इति चतुर्दश पूर्वाणि।

प्रथमपूर्वे दश वस्तूनि। द्वितीयपूर्वे चतुर्दश वस्तूनि। तृतीयपूर्वे अष्टौ वस्तूनि। चतुर्थपूर्वेऽष्टादश वस्तूनि। पञ्चमपूर्वे द्वादश वस्तूनि। षष्ठपूर्वेऽपि द्वादश वस्तूनि। सप्तमपूर्वे षोडश वस्तूनि। अष्टमपूर्वे विंशतिवस्तूनि। नवमपूर्वे त्रिंशद्वस्तूनि। दशमपूर्वे पञ्चदश वस्तूनि। एकादशे पूर्वे दश वस्तूनि। द्वादशे पूर्वेऽपि दश वस्तूनि। त्रयोदशे पूर्वेऽपि दश वस्तूनि। चतुर्दशे पूर्वेऽपि दश वस्तूनि। एवं सर्वाणि वस्तूनि पञ्चनवत्युत्तरशतं [6]भवन्ति। एकैकस्मिन् वस्तुनि विंशति विंशति प्राभृतानि भवन्ति। एवं प्राभृतानां नवशताधिकानि त्रीणि सहस्राणि वेदितव्यानि। ३९००।

द्वितीयस्मिन् पूर्वे यानि चतुर्दश वस्तूनि कथितानि तेषामिमानि नामानि [7]वेदितव्यानि–

१–सहस्रप्रमाणः ता०। २ बलदेवचक्रवर्तितीर्थ –**आ०, द०, ब०, ज०**। बलदेववासुदेवचक्रवर्तितीर्थ–**ब०**। ३ "अन्तरिक्षभौमाङ्गस्वरस्वप्नलक्षणव्यञ्जनछिन्नानि अष्टौ महानिमित्तानि।" –**त० राज०** १।२०। ४ "शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रम् वाजीकरणतन्त्रमिति।" –**सुश्रुत० पृ०** १। ५ निर्वाणसुख –**आ०, द०, ब०, ज०**। ६ भवति **आ०, ब०, ज०**। ७ "पुव्वंते अवरंते धुवे अद्धुवे चयणलद्धी अद्धुवमं पणिधिकप्पे अट्ठे भोम्मावयादीए सवट्ठे कप्पणिज्जाणे तीदे अणागय-काले सिज्झये बज्झये त्ति चोद्दस वत्थूणि।"–**ध० टी० सं० पृ०** १२३। "पूर्वान्तं ह्यपरान्तं ध्रुवमध्रुवच्यवनलब्धिनामानि। अध्रुवं सप्रणिधिं चाप्यर्थं भौमावयाद्यं च॥ सर्वार्थकल्पनीयं ज्ञानमतीतं त्वनागतं कालं। सिद्धिमुपाध्यं च तथा चतुर्दश वस्तूनि द्वितीयस्य॥" –**दशभ० पृ०** ८–९।

पूर्वान्तः परान्तः ध्रुवम् अध्रुवम् च्यवनलब्धिः अध्रुवसम्प्रणिधिः अर्थः भौमावयाद्यं सर्वार्थकल्पनीयं ज्ञानम् अतीतकालः अनागतकालः सिद्धिः उपाध्यश्चेति (?)। च्यवनलब्धिनाम्नि वस्तुनि यानि विंशतिप्राभृतकानि वर्तन्ते तेषु यच्चतुर्थं प्राभृतं तस्य ये चतुर्विंशतिरनुयोगास्तेषामिमानि नामानि[1]–कृतिः वेदना स्पर्शनं कर्म्म प्रकृतिः बन्धनं निबन्धनं प्रक्रमः अनुपक्रमः अभ्युदयः ५ मोक्षः सङ्क्रमः लेश्या लेश्याकर्म्म लेश्यापरिणामः सातमसातं दीर्घं ह्रस्वं भवधारणीयं पुद्गलात्मा निधत्तमनिधत्तम् सनिकाचितमनिकाचितं कर्म्मस्थितिकं पश्चिमस्कन्धः। अत्राल्पबहुत्वं पञ्चविंशतितमोऽधिकारः चतुर्विंशत्यनुयोगानां साधारणः। तेन सोऽपि चतुर्विंशतितम एव कथ्यते इति चतुर्दशपूर्वाधिकारः समाप्तः। एवं द्वादशे अङ्गे चत्वारोऽधिकारा गताः।

इदानीं पञ्चमोऽधिकारः[2] प्रोच्यते। सोऽपि पञ्चप्रकारः–जलगताचूलिका-स्थलगताचूलिका-मायागताचूलिका-आकाशगताचूलिका-रूपगताचूलिकाभेदात्। तत्र जलस्तम्भनजलवर्षणादिहेतुभूतमन्त्रतन्त्रादिप्रतिपादिका [3]द्विशताधिकनवाशीतिसहस्रनवलक्षाधिकद्विकोटिपदप्रमाणा जलगता चूलिका।१। तथा स्तोककालेन बहुयोजनगमनादिहेतुभूतमन्त्रतन्त्रादिनिरूपिका पूर्वोक्तपदप्रमाणा स्थलगता चूलिका।२। इन्द्रजालादिमायोत्पादकमन्त्रतन्त्रादिनिरूपिका[4] पूर्वोक्तपदप्रमाणा मायागता चूलिका।३। गगनगमनादिहेतुभूतमन्त्रतन्त्रादिप्रकाशिका १५ पूर्वोक्तपदप्रमाणा आकाशगता चूलिका।४। सिंहव्याघ्रगजतुरगनरसुरवरादिरूपविधायकमन्त्रतन्त्राद्युपदेशिका पूर्वोक्तपदप्रमाणा रूपगता चूलिका चेति।५। एवं पञ्चविधा चूलिका समाप्ता। द्वादशस्याङ्गस्य दृष्टिवादनामधेयस्य परिकर्म्म-सूत्र-प्रथमानुयोग-पूर्वगत-चूलिकाभिधानाः पञ्च महाधिकाराः समाप्ताः।

अत्र या पदैः सङ्ख्या कृता तस्य पदस्य ग्रन्थसङ्ख्या कथ्यते–एकपञ्चाशत्कोटयो अष्टलक्षाश्चतुरशीतिसहस्राणि षट्शतानि सार्धैकविंशत्यधिकानि अनुष्टुप्[5]गणितानि एकस्मिन् पदे भवन्तीति वेदितव्यम्। इत्येकपदग्रन्थसङ्ख्या ५१०८८४६२१। इति पदग्रन्थः, तथाक्षर (राणि) १६। ईदृग्विधानि पदानि अङ्गपूर्वस्य श्रुतस्य कियन्ति भवन्ति? [6]कोटीनां शतं द्वादशकोट्यश्च[7] त्र्यशीतिलक्षाणि अष्टपञ्चाशत्सहस्राणि पदानां पञ्चपदाधिकानि भवन्ति।

अथ प्रत्यक्षं प्रमाणं त्रिविधम्। तत्र देशप्रत्यक्षं प्रमाणम् अवधिर्मनःपर्य्ययश्च। सर्वप्रत्यक्षं केवलज्ञानम्। तत्रावधिर्द्विविधः–भवप्रत्यय-क्षयोपशमनिमित्तभेदात्। तत्र भवप्रत्ययोऽवधिरुच्यते–

भवप्रत्ययोऽवधिर्देवनारकाणाम्॥ २१॥

---

१ द्रष्टव्यम्–ष० टी० सं० पृ० १२५। दवाभ० पृ० ९। २ कथ्यते आ०, ब०, द०, ज०। ३–धिककोटि –आ०, द०, ब०, ज०। ४–प्रतिरूपिका आ०। ५–गुणतानि आ०, ब०। गनितानि ज०। ६ "बारुत्तरसयकोडी तेसीदी तह य होंति लक्खाणं। अट्ठावण्णसहस्सा पंचेव पदाणि अंगाणं॥" –गो० जी० गा० ३४९। ७–श्च अशीति–ता०। ८–प्रत्ययावधिः आ०।

[१]आयुःकर्म्म-नामकर्म्मोदयनिमित्तको जीवस्य पर्यायः भव उच्यते। ईदृग्विधो भवः[२] प्रत्ययः कारणं हेतुर्निमित्तं यस्यावधेः स भवप्रत्ययः। ईदृग्विधोऽवधिर्देवनारकाणां देवानां नारकाणाम्। ननु एवंविधस्यावधेः[३] यदि भवः कारणमुक्तं [४]तर्हि कर्मक्षयोपशमः कारणं न भवति; सत्यम्; भवः[५] प्रधानकारणं भवति यथा पक्षिणामाकाशगमनं भवकारणम्, न तु शिक्षागुणविशेष आकाशगमनकारणं भवति। तथैव देवानां नारकाणां च व्रतनियमादीनामभावेऽपि अवधिर्भवति, तेन कारणेन मुख्यतया भव एवाऽवधेः कारणमुच्यते। क्षयोपशमस्त्ववधेः साधारणं कारणम्, तत्तु गौणम्, तेन तन्नोच्यते। अन्यथा भवः साधारणो वर्तते, स तु एकेन्द्रियविकलेन्द्रियाणामपि विद्यत एव तेषामप्यविशेषादवधेः प्रसङ्गः स्यात्। तथा च देवनारकेषु [७]प्रकर्षाऽप्रकर्षवृत्तिरवधिर्भवति। देवनारकाणामिति अविशेषोक्तावपि सम्यग्दृष्टीनामेव अवधिर्भवति मिथ्यादृष्टीनां देवनारकाणामन्येषाञ्च विभङ्गः कथ्यते। [८]अथ कोऽसौ [९]प्रकर्षाऽप्रकर्षवृत्तिरवधिरिति चेत्? उच्यते–[१०]सौधर्म्मैशानेन्द्रौ प्रथमनरकपर्य्यन्तं पश्यतः। सनत्कुमारमाहेन्द्रौ द्वितीयनरकान्तमीक्षेते। ब्रह्मलान्तवेन्द्रौ तृतीयनरकपर्य्यन्तमीक्षेते। शुक्रसहस्रारेन्द्रौ चतुर्थनरकपर्य्यन्तं विलोकेते। आनतप्राणतेन्द्रौ पञ्चमपृथिवीपर्य्यन्तं निभालयतः। आरणाच्युतेन्द्रौ षष्ठनरकपर्य्यन्तं विलोकयतः। नवग्रैवेयकोद्भवाः सप्तमनरकपर्य्यन्तं निरीक्षन्ते। अनुदिशानुत्तराः सर्वलोकं पश्यन्ति। तथा [११]प्रथमनरकनारका योजनप्रमाणं पश्यन्ति। द्वितीयनरकनारका अर्धगव्यूतिहीनं योजनं यावत्पश्यन्ति। तृतीयनरकनारका गव्यूतित्रयं पश्यन्ति। चतुर्थनरकनारकाः सार्द्धद्विगव्यूतिपर्य्यन्तं पश्यन्ति। पञ्चमनरकनारका द्विगव्यूतिपर्य्यन्तं पश्यन्ति। षष्ठनरकनारकाः सार्द्धगव्यूतिपर्य्यन्तं पश्यन्ति। सप्तमनरकनारका गव्यूतिपर्य्यन्तं पश्यन्तीति वेदितव्यम्।

अथ क्षयोपशमनिमित्तोऽवधिः कथ्यते—

क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम् ॥ २२ ॥

कर्म्मपुद्गलशक्तीनां क्रमवृद्धिः क्रमहानिश्च स्पर्धकं तावदुच्यते। अवधिज्ञानावरणस्य देशघातिस्पर्द्धकानामुदये सति, सर्वघातिस्पर्द्धकानामुदयाभावः क्षय उच्यते, तेषामेव सर्वघातिस्पर्द्धकानामनुदयप्राप्तानां सदवस्था उपशम उच्यते, क्षयश्चोपशमश्च क्षयोपशमौ, तौ निमित्तं कारणं यस्याऽवधेः स क्षयोपशमनिमित्तः। कतिभेदः? षड्विकल्पः। एवंविधोऽवधिः शेषाणां मनुष्याणां तिरश्चाञ्च भवतीति वेदितव्यम्। स चावधिः संज्ञिनां पर्याप्तकानाञ्च भवति न त्वसञ्ज्ञिनां नाप्यपर्याप्तकानां भवति सामर्थ्याभावात्। तेषामपि सोऽवधिः सर्वेषां न

---

१ आयुष्कर्म आ०, ब०, द० । २ भवप्रत्ययः ता० । ३–त्वधेयादिभ–ता० । ४ तर्हि क्षयो– आ०, ब०, व०, द०, ज० । ५ भवः प्रधानं भ–आ०, ब०, ज० । ६–गमनस्य प्रधानकारणं न तु आ०, ब०, द०, ज० । ७ प्रकर्षप्रवृत्तिर–आ०, ब०, द०, ज० । ८ अत्र को–ब० । अथ काऽसौ द० । ९ प्रकर्षप्रवृत्तिः आ०, ब०, द०, ज० । १० महाबंध० गा० ११–१३ । ११ प्रथमनारका नरकयो–आ०, ब० । –गो० जी० गा० ४२३ । १२ स्य देशघातिस्पर्धकानामुदयाभावः आ०, ब०, ज० ।

भवति किन्तु यथोक्तसम्यग्दर्शनज्ञानचारित्रतपोलक्षणकारणसन्निधाने सति उपशान्तक्षीण-कर्म्मणामवधेरुपलब्धिर्भवति। तदुपलब्धौ सर्वस्य क्षयोपशमनिमित्तत्वे सत्यपि यत् क्षयोपशमग्रहणं सूत्रे कृतं तन्नियमार्थं ज्ञातव्यम्। कोऽसौ नियमः? क्षयोपशम[२] एव निमित्तं वर्तते न[३] तु शेषाणां भवो निमित्तमस्ति।

५ ते के षड्विकल्पा इति चेद्? [४]उच्यते–अनुगाम्यननुगामी वर्धमानो हीयमानोऽवस्थितोऽनवस्थितश्चेति। कश्चित् अवधिर्गच्छन्तं भवान्तरं [५]प्राप्नुवन्तमनुगच्छति पृष्ठतो याति, सवितुः प्रकाशवत्। १। कश्चिदवधिर्नैवानुगच्छति, तत्रैवातिपतति, विवेकपराङ्मुखस्य प्रश्ने सत्यादेष्टृपुरुषवचनं यथा तत्रैवातिपतति, न तेनाग्रे [६]प्रवर्त्यते। २। कश्चिदवधिः सम्यग्दर्शनादिगुणविशुद्धिपरिणामसन्निधाने सति यावत्परिमाण उत्पन्नः तस्माद[७]धिकाधिको वर्द्धते असङ्ख्येयलोकपर्यन्तम्, अरणिकाष्ठनिर्मथनोद्भूतशुष्कपर्णोपवर्धमानेन्धनराशिप्रज्वलितहिरण्यरेतोवत्। ३। कश्चिदवधिः सम्यग्दर्शनादिगुणहान्याऽऽर्त्तरौद्रपरिणामवृद्धिसंयोगात् यावत्परिमाण उत्पन्नस्तस्माद् हीयते अङ्गुलस्यासङ्ख्येयभागो यावत्, नियतेन्धनसन्ततिसंलग्नवह्निज्वालावत्। ४। कश्चिदवधिः सम्यग्दर्शनादिगुणावस्थितेः यावत्परिमाण उत्पन्नस्तावत्परिमाण एव तिष्ठति हानिं वृद्धिञ्च न प्राप्नोति भवक्षयपर्यन्तं केवलज्ञानोत्पादपर्यन्तं वा, लाञ्छनवत्। ५। कश्चिदवधिः सम्यग्दर्शनादिगुणवृद्धिहानिकारणात् यावत्परिमाण उत्पन्नस्तस्मात् वर्धते हीयते च, यावद्वर्द्धितव्यम् यावद् हातव्यं च, प्रभञ्जनरयचोदितकमलकल्लोलवत्। ६। एवं[९]भेदा अवधेः देशावधेरेव वेदितव्याः। परमावधिसर्वावधी विशिष्टसंयमोत्पन्नौ हानिवृद्धिरहितौ ज्ञातव्यौ। तौ तु चरमशरीरस्यैव भवतः। गृहस्थावस्थायां तीर्थङ्करस्य देवनारकाणाञ्च देशावधिरेव वेदितव्यः।

२० अथ मनःपर्य्ययज्ञानस्य प्रकारपूर्वकं लक्षणमालक्षयति—

ऋजुविपुलमती मनःपर्य्ययः॥ २३॥

वाक्कायमनःकृतार्थस्य परमनोगतस्य विज्ञानात् निर्वर्त्तिता पश्चाद्वालिता[१०] व्याघोटिता ऋज्वी मतिरुच्यते, सरला च मतिः ऋज्वी कथ्यते। वाक्कायमनःकृतार्थस्य परमनोगतस्य विज्ञानादनिर्वर्त्तिता न पश्चाद्वालिता न व्याघोटिता तत्रैव स्थिरीकृता मतिर्विपुला प्रतिपद्यते। २५ कुटिला च मतिः विपुला कथ्यते। ऋज्वी मतिर्विज्ञानं यस्य मनःपर्य्ययस्य स ऋजुमतिः। विपुला मतिर्यस्य मनःपर्य्ययस्य स विपुलमतिः। तौ ऋजुविपुलमती **"पुंवद्भाषितपुंस्कानूङ् पूरण्यादिषु स्त्रियां तुल्याधिकरणे।"** [का० सू० २।५।१८]। एकस्य मतिशब्दस्य विज्ञातार्थत्वादप्रयोगः रूपे रूपं प्रविष्टम्। **"सरूपाणामेकशेष एकविभक्तौ"** [पा० सू० १।२।६४]।

१–न्तकर्म–आ०, ब०, द०, ज०। २–मनि–आ०, ब०, द०, ज०। ३ ननु आ०, ब०, ज०। ४ उच्यन्ते आ०, ब०, द०, ज०। ५ प्राप्नुवन्ति आ०, ब०, द०, ज०। ६ प्रवर्तते आ०, द०, ब०, व०, ज०। ७–दधिको व–आ०, द०, ब०, ज०। ८ अग्नि। ९ पञ्चभे–आ०, द०, ब०, ता०। १०–द्वारिता ता०।

अथवा ऋजुश्च विपुला च ऋजुविपुले तादृशे मती ययोस्तौ ऋजुविपुलमती। अमुना प्रकारेण मनःपर्य्ययो द्विप्रकारो भवति–ऋजुमतिः विपुलमतिश्चेति। मनःपर्य्ययस्य भेदः प्रोक्तः।

इदानीं लक्षणमुच्यते–वीर्यान्तराय-मनःपर्य्ययज्ञानावरणक्षयोपशमाङ्गोपाङ्गनामलाभावष्टम्भात् आत्मनः परकीयमनोलब्धवृत्तिरुपयोगो मनःपर्यय उच्यते। श्रुतज्ञानव्याख्यानावसरे यथा श्रुतस्य मत्यात्मकत्वं निषिद्धं तथा मनःपर्ययज्ञानस्यापि मत्यात्मकत्वं नाशङ्कनीयमिति। ५

ऋजुमतिर्मनःपर्य्ययः कालापेक्षया जघन्यतया जीवानां स्वस्य च द्वे त्रीणि वा भवग्रहणानि गत्यागत्यादिभिर्निरूपयति। उत्कर्षेण सप्तभवग्रहणान्यष्ट वा गत्यागत्यादिभिः प्रकाशयति। क्षेत्रतो जघन्यतया गव्यूतिपृथक्त्वम्। उत्कर्षेण योजनपृथक्त्वस्य आभ्यन्तरं प्ररूपयति न बहिः प्ररूपयति। विपुलमतिर्मनःपर्य्ययः कालापेक्षया जघन्यतया सप्ताष्टानि (ष्ट) भवग्रहणानि प्ररूपयति। उत्कर्षेणासङ्ख्येयानि गत्यागत्यादिभिर्निरूपयति। क्षेत्रापेक्षया १० जघन्यतया योजनपृथक्त्वम्। उत्कर्षेण मानुषोत्तरपर्वताभ्यन्तरं प्ररूपयति, तद्बहिर्न जानाति।

अथ मनःपर्य्ययज्ञानभेदयोर्भूयोऽपि विशेषज्ञानपरिज्ञापनार्थं प्राहुः—

विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ २४ ॥

मनःपर्य्ययज्ञानावरणकर्मक्षयोपशमादात्मनः प्रसन्नता विशुद्धिरुच्यते। संयमात्प्रच्यवनं प्रतिपातः, न प्रतिपातः अप्रतिपातः। विशुद्धिश्च अप्रतिपातश्च विशुद्ध्यप्रतिपातौ ताभ्यां १५ विशुद्ध्यप्रतिपाताभ्याम्। विशुद्ध्या अप्रतिपातेन च विशुद्धेरप्रतिपाताद्वा तद्विशेषः–ऋजुमतिविपुलमत्योर्विशेषो भवति। तत्र उपशान्तकषायस्य चारित्रमोहाधिक्यात् संयमशिखरात् पतितस्य प्रतिपातो भवति। क्षीणकषायस्य चारित्रमोहोद्रेकाभावादप्रतिपातः स्यात्। ऋजुमतेः सकाशाद्विपुलमतिर्द्रव्यक्षेत्रकालभावैर्विशुद्धतरा भवति। कथमिति चेत्? उच्यते– यः सर्वावधिज्ञानेन कार्मणद्रव्यानन्तभागोऽन्त्यः प्रबुद्धः सोऽन्त्यभागः पुनरपि अनन्तभागीक्रियते, २० तेष्वप्यनन्तभागेषु योऽन्त्यो भागो वर्त्तते स ऋजुमतिना गम्यते, ऋजुमतेर्विषयो भवति। यः ऋजुमतेः विषयो भवति सोऽपि भागोऽनन्तभागीक्रियते, तेष्वप्यनन्तभागेषु योऽन्त्यो भागः स विपुलमतेर्विषयो भवति। एवंविधसूक्ष्मद्रव्यपरिज्ञायकत्वात् विपुलमतेर्द्रव्यक्षेत्रकालतो विशुद्धिरुत्कृष्टा भवति। भावतो विशुद्धिस्तु सूक्ष्मतरद्रव्यगोचरत्वादेव ज्ञातव्या। भावशुद्धिरपि कस्मात्? प्रकृष्टक्षयोपशमविशुद्धियोगात्। तथा अप्रतिपातादपि विपुलमतिर्विशिष्टो भवति, २५ विपुलमतिमनःपर्य्ययस्वामिनां प्रवर्द्धमानचारित्रोदयत्वात्। ऋजुमतिस्तु प्रतिपाती भवति। कस्मात्? ऋजुमतिमनःपर्य्ययज्ञानस्वामिनां कषायोद्रेकहीयमानचारित्रोदयत्वात्[1]।

अथाऽवधिमनःपर्य्यययोर्विशेषप्रतिपादनार्थं सूत्रमिदमुच्यते[2]—

विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्य्यययोः ॥२५॥

विशुद्धिश्च प्रसादः, क्षेत्रञ्च भावप्रतिपत्तिस्थानम्, स्वामी च प्रयोजकः स्वरूपकथकः, ३० विषयश्च ज्ञेयवस्तु, विशुद्धिक्षेत्रस्वामिविषयाः, तेभ्यो विशुद्धिक्षेत्रस्वामिविषयेभ्यः। अवधिश्च मनःपर्ययश्च अवधिमनःपर्ययौ, तयोरवधिमनःपर्य्यययोः। अवधिज्ञानस्य मनः-

१ –चारित्रोदयात् आ०, द०, ब०। २ –ते श्रीमदुमास्वामिना आ०, ब०, द० ज०।

पर्य्ययज्ञानस्य च विशेषो विशुद्ध्यादिभिश्चतुर्भिर्वेदितव्यः। तत्र अवधिज्ञानात् मनःपर्य्ययज्ञानं विशुद्धतरं भवति सूक्ष्मवस्तुगोचरत्वात्। क्षेत्रमवधेर्मनःपर्य्ययज्ञानाद् बहुतरम्, त्रिभुवनस्थितपुद्गलपर्य्यायतत्सम्बन्धिजीवपर्य्यायज्ञायकत्वात्। मनःपर्ययस्य क्षेत्रमल्पम्, उत्कर्षेण मानुषोत्तरशैलाभ्यन्तरवर्त्तित्वात्। अवधिज्ञानस्य [2]विषयं **"रूपिष्ववधेः"**
५ [त०सू० १।२७] इत्यनेन वक्ष्यति। मनःपर्ययज्ञानस्य विषयं **"तदनन्तभागे मनःपर्य्ययस्य"** [त० सू० १।२८] इत्यनेन सूत्रेण वक्ष्यति।

स्वामित्वमुच्यते– मनःपर्य्ययो मनुष्येषूत्पद्यते न देवनारकतिर्यक्षु। मनुष्येष्वपि गर्भजेषूत्पद्यते न सम्मूर्छनजेषु। गर्भजेष्वपि कर्म्मभूमिजेषूत्पद्यते न त्वकर्म्मभूमिजेषु। कर्मभूमिजेष्वपि पर्याप्तकेषूत्पद्यते, न त्वपर्याप्तकेषु। पर्याप्तकेष्वपि सम्यग्दृ-
१० ष्टिषूत्पद्यते, न मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिषु। सम्यग्दृष्टिष्वपि संयतेषूत्पद्यते, न त्वसंयतसम्यग्दृष्टिसंयताऽसंयतेषु। संयतेष्वपि प्रमत्ता[3]दिषु क्षीणकषायान्तेषूत्पद्यते, न सयोगकेवल्ययोगकेवलिषु। प्रमत्तादिष्वपि[4] प्रवर्द्धमानचारित्रेषूत्पद्यते, न हीयमानचारित्रेषु। प्रवर्द्धमानचारित्रेष्वपि सप्तविधान्यतमर्द्धिप्राप्तेषूत्पद्यते, [5]नानृद्धिप्राप्तेषु। ऋद्धिप्राप्तेष्वपि केषुचिदुत्पद्यते न सर्वेषु। तेन कारणेन विशिष्टसंयमवन्तो मनःपर्य्ययस्य
१५ स्वामिनो भवन्ति। अवधिस्तु चातुर्गतिकेषु भवति। इति स्वामिभेदाद् विशेषः।

मनःपर्य्ययज्ञानादनन्तरं केवलज्ञानलक्षणमभिधातुमुचितम्। तदुल्लङ्घ्य ज्ञानानां विषयनिबन्धपरीक्षणं क्रियते। केवलज्ञानस्य तु लक्षणं **"मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम्"** [त० सू० १०। १] इति वक्ष्यति। तत्र ज्ञानविषयनिबन्धपरीक्षणे मतिश्रुतज्ञानयोर्विषयनिबन्ध उच्यते—

२० **मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु ॥ २६ ॥**

मतिश्च श्रुतञ्च मतिश्रुते तयोर्मतिश्रुतयोः। निबन्धनं निबन्धः विषयनियन्त्रणा विषयनियमो विषयनिर्द्धारणम्। द्रव्येषु जीवधर्म्माऽधर्मकालाकाशपुद्गलेषु। कथम्भूतेषु? असर्वपर्यायेषु अल्पपर्यायसहितेषु मतिश्रुतविषययोग्यस्तोकपर्यायसहितेषु। **"विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्य्ययोः"** [त० सू० १।२५] इत्यतो विषयशब्दस्य ग्रहणं कर्त्तव्यम्। तत्र
२५ पञ्चमी अत्र तु षष्ठी तत्कथं सम्बन्धः? **"अर्थवशाद्विभक्तिपरिणामः"** [ ] इति वचनात् पञ्चम्याः षष्ठीत्वेन परिणमनम्।

ननु धर्म्माऽधर्म्मकालाकाशा अतीन्द्रियाः, तेषु द्रव्येषु मतिज्ञानं कथं प्रवर्त्तते मतिज्ञानस्य इन्द्रियजनितत्वात्? सत्यम्; अनिन्द्रियाख्यं करणं वर्तते, तेन नोइन्द्रियावरणक्षयोपशमबलात् तद्ग्रहणमवग्रहादिरूपं न विरुध्यते। तत्पूर्वकं श्रुतज्ञानं तद्विषयेषु
३० नोइन्द्रियविषयद्रव्येषु स्वयोग्येषु प्रवर्त्तत इति।

---

१ –यज्ञेयज्ञा– आ०, ब०, द०, ब०, ज०। २ विषयः रू–आ०, ब०, द०, ज०। ३ –दिक्षी– आ०, द०, ब०, ज०। ४–पि व–आ०, ब०, द०, ज०। ५ नानर्धिप्रा– ब०, द०।

अथाऽवधिविषयनिबन्ध उच्यते—

रूपिष्ववधेः ॥ २७ ॥

नियमसूत्रमिदम्। अस्यायमर्थः—रूपिषु पुद्गलेषु पुद्गलसम्बन्धिजीवेषु च अवधेर्विषयनिबन्धो भवति। 'असर्वपर्यायेषु' इत्यप्यत्र सम्बन्धनीयम्, तेन स्वयोग्यपर्यायेषु अल्पेषु पर्यायेषु न त्वनन्तेषु पर्यायेष्ववधिः प्रवर्त्तते। ५

अथ मनःपर्ययस्य विषयनिबन्ध उच्यते—

तदनन्तभागे मनःपर्ययस्य ॥ २८ ॥

तस्य सर्वावधिज्ञानगम्यस्य रूपिद्रव्यस्य यः पर्यायस्तस्याऽनन्तभागस्तदनन्तभागः तस्मिन् तदनन्तभागे, मनःपर्य्ययस्य विषयनिबन्धो भवति सूक्ष्मविषयत्वात्। अन्यत्र च मनःपर्ययः प्रवर्त्तते, अपरेषु भागेषु प्रवर्तत इत्यर्थः। १०

अथ केवलज्ञानस्य विषयनिबन्ध उच्यते—

सर्वद्रव्यपर्यायेषु केवलस्य ॥ २९ ॥

द्रव्याणि च पर्यायाश्च द्रव्यपर्यायाः, सर्वे च ते द्रव्यपर्यायाः सर्वद्रव्यपर्यायाः, तेषु सर्वद्रव्यपर्यायेषु। सर्वेषु द्रव्येषु सर्वेषु पर्यायेषु च केवलस्य केवलज्ञानस्य विषयनिबन्धो भवति। जीवद्रव्याणि अनन्तानन्तानि ततोऽप्यनन्तानन्तानि[1] पुद्गलद्रव्याणि अणुस्कन्धभेदयुक्तानि, धर्म्माऽधर्म्माकाशानि, कालश्चासङ्ख्येयः, चतुर्णां त्रिकालसम्बन्धिनः पर्यायाः पृथगनन्ताऽनन्ताः। तेषु सर्वेषु द्रव्यपर्यायेषु अनन्तमहिमकेवलज्ञानं प्रवर्त्तत इति। १५

अथ पञ्चज्ञानेषु कति ज्ञानानि एकस्मिन्नात्मनि युगपद्भवन्तीति प्रश्ने सूत्रमिदमाहुः—

एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ३० ॥

एकोऽद्वितीय आदिरवयवो येषां तानि एकादीनि एकप्रभृतीनि ज्ञानानि। भाज्यानि योजनीयानि। युगपत् समकालम्। एकस्मिन्नात्मनि आचतुर्भ्यः चत्वारि ज्ञानानि यावत्। एकस्मिन् जीवे पञ्च ज्ञानानि युगपन्न भवन्ति। एकं ज्ञानं यदा भवति तदा केवलज्ञानमेव, केवलज्ञानेन क्षायिकेन सह अपराणि चत्वारि ज्ञानानि क्षायोपशमिकानि युगपन्न भवन्ति। यदा द्वे ज्ञाने युगपद् भवतस्तदा मतिश्रुते। त्रीणि ज्ञानानि यदा युगपद् भवन्ति तदा मतिश्रुताऽवधिज्ञानानि भवन्ति, अथवा मतिश्रुतमनःपर्य्ययज्ञानानि भवन्ति। यदा चत्वारि युगपद् भवन्ति तदा मतिश्रुतावधिमनःपर्ययज्ञानानि भवन्ति। २० २५

अथ मत्यादीनि ज्ञानान्येव भवन्ति आहोस्विदन्यथापि भवन्ति इति प्रश्ने सूत्रमिदमुच्यते—

मतिश्रुताऽवधयो विपर्य्ययश्च ॥ ३१ ॥

मतिश्च श्रुतञ्च अवधिश्च मतिश्रुताऽवधयः। एते त्रयस्त्रीणि ज्ञानानि विपर्ययश्च मिथ्यारूपाणि भवन्ति। चकारात् सम्यग्ज्ञानरूपाणि च भवन्ति। सम्यक्शब्द आदावेवोक्तः ३०

---

१ -प्यनन्तानि आ०, द०, ब०, ज०।

"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" [त० सू० १।१] इत्यत्र। तस्माद् गृहीतः सम्यक्शब्दः मतिश्रुताऽवधिमनःपर्ययकेवलानि ज्ञानम् सम्यग्ज्ञानं भवन्ती (ती) ति सम्बन्धनीयः। तस्मात्सम्यग्ज्ञानाद् वैपरीत्यं विपर्य्ययो भवति–मिथ्यारूपाण्यज्ञानानि भवन्ति। किंवत्? सरजःकटुकतुम्बिकाफलधृतक्षीरवत्। अत्र शुष्कतुम्बिकामध्यगतनिर्गतबीजाऽवशिष्टबुक्किका

५ रज उच्यते, तस्मिन् सति यदि दुग्धं ध्रियते तदा कटुकं भवति, तुम्बिकेऽतिशोधिते[२] धृतं पयः कटुकं न भवति। तथा मिथ्यादर्शने विनष्टे सति जीवे मत्यादिज्ञाने स्थिते मिथ्याज्ञानं न भवति।

ननु मणिकनकादयो विष्ठागृहे पतिता अपि न दुष्यन्ति तथा मत्यादयोऽपि; सत्यम्; मणिकनकादयोऽपि विपारिणामकद्रव्ययोगे दुष्यन्त एव, तथा मत्यादयोऽपि मिथ्यादर्शनयोगे दुष्यन्ति।

१० 'नन्वाधारदोषात् क्षीरस्य विपर्य्यासो भवति, मत्यज्ञानादीनां स्वविषयग्रहणे विपर्यासो न भवति, यथा सम्यग्दृष्टिः पुमान् चक्षुरादिभिर्वर्णादिविषयान् प्राप्नोति तथा मिथ्यादृष्टिरपि चक्षुरादिभी रूपादीन् विषयानुपलभते। यथा सम्यग्दृष्टिः श्रुतज्ञानेन रूपादीन् विषयान् जानाति परान् प्रति प्ररूपयति च तथा मिथ्यादृष्टिरपि श्रुतज्ञानेन रूपादीन् जानाति परान् प्रति निरूपयति च। यथा सम्यग्दृष्टिः पुमान् अवधिज्ञानेन रूपिणः पदार्थानवैति

१५ तथा मिथ्यादृष्टिरपि विभङ्गज्ञानेन रूपिणोऽर्थानवगच्छति' इति केनचिदुपन्यासे कृते तन्मतनिरासार्थं भगवद्भिः सूत्रमुच्यते—

सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥ ३२ ॥

सच्च प्रशस्तं तत्त्वज्ञानम्, असच्च अप्रशस्तं मिथ्याज्ञानम् सदसती, अथवा सत् विद्यमानम् असत् अविद्यमानम् सदसती तयोः सदसतोः। न विशेषः अविशेषस्तस्माद-

२० विशेषात्। यदृच्छया स्वेच्छया उपलब्धिरुपलम्भनं ग्रहणं यदृच्छोपलब्धिस्तस्या यदृच्छोपलब्धेः। उन्मत्त इव उन्मत्तवत्। मतिश्रुतावधीनां विपर्ययः कस्माद्भवति? सदसतोः सम्बन्धित्वेनाविशेषात्, अविशेषेण यदृच्छोपलब्धेर्विपर्य्ययो भवति। अत्रायमर्थः—मिथ्यादर्शनोदयात् जीवः कदाचित् सदपि रूपादिकमसदित्यङ्गीकरोति, कर्हिचिदसदपि रूपादिकं सदित्यध्यवस्यति। अन्यदा सद् रूपादिकं सदेव मनुते, असद् रूपादिकमसदेव अवैति।

२५ किंवत्? उन्मत्तवत्, पित्तोदयाकुलितबुद्धिवत्। यथा पित्तोदयाकुलितमतिः पुमान् निजमातरं निजभार्य्यां मन्यते भार्याञ्च मातरं यदृच्छया मन्यते। कदाचिन्मातरं मातरमेव मन्यते भार्यां भार्यामेव जानाति। तथा अश्वं गां मन्यते, गामश्वं मन्यते। अश्वमश्वं गां गाञ्च मन्यते। तथाऽपि तत्सम्यग्ज्ञानं न भवति। एवमाभिनिबोधिकश्रुतावधीनामपि रूपादिषु विपर्ययो भवति। तद्यथा कश्चिन्मिथ्यादर्शनपरिणाम आत्मनि स्थितः सन्

३० मत्यादिभी रूपादिग्रहणे सत्यपि कारणविपर्ययं भेदाभेदविपर्ययं स्वरूपविपर्ययञ्चोत्पादयति।

---

१ सरुजःक- ब०। २ -तेऽतिधृतं आ०, ब०, द०। ३ -णामिक- आ०, ब०, द०, ज०। ४ -भिः रूपादीन् आ०, ब०, द०, ज०, व०। ५ -न् प्ररू- आ०, द०, ज०।

कारणविपर्ययस्तावद्भण्यते—रूपादीनां कारणं [1]केचिदेकममूर्त्तं ब्रह्मलक्षणं कल्पयन्ति। केचित्तु[2] नित्यं प्रकृतिलक्षणं कल्पयन्ति। अन्ये[3] पृथिव्यादिजातिभिन्नाः परमाणवः चतुर्गुणास्त्रिगुणा द्विगुणा एकगुणाः सदृशजातीयानां कार्याणां कारणं भवन्त्या(न्त्या-)रम्भकाः सञ्जायन्त इति। अपरे त्वेवं कथयन्ति[4] यत् पृथिव्यप्तेजोवायवश्चत्वारि भूतानि वर्णगन्धरसस्पर्शाश्चत्वारो भौतिकधर्माः, एतेषामष्टानां पृथिव्यप्तेजोवायुवर्णगन्धरसस्पर्शानां समुदयो परमाणुरष्टको ५ भवति। वैभाषिकमते हि पृथिव्यादिमहाभूतैश्चतुर्भिः रूपादिगुणैश्चतुर्भिश्च एको रूपपरमाणुरुत्पद्यते। स रूपपरमाणुरष्टक उच्यते। अपरे[5] त्वेवं वदन्ति—पृथिव्यप्तेजोवायवः कार्कश्यादिद्रवत्वादि-उष्णत्वादिगमनादिगुणाः परमाणवो जातिभिन्नाः कार्यस्यारम्भका भवन्ति—कारणं सञ्जायत[6] इत्यादिकः कारणविपर्ययः।

भेदाभेदविपर्ययस्तु नैयायिकमते—कारणात्[7] कार्यमर्थान्तरभूतमेव। अनर्थान्तरभूतमेव १० इति च परिकल्पना वर्त्तते।

स्वरूपविपर्ययस्तु मीमांसकमते साङ्ख्यमते वा। रूपादयो निर्विकल्पाः। कोऽर्थः सन्ति न सन्त्येव वा? किं तर्हि? तदाकारपरिणतं विज्ञानमात्रमेव वर्त्तते, न तु विज्ञानमात्रस्यावलम्बनं बाह्यं वस्तु वर्तते। एवमपरेऽपि परिकल्पनाभेदा दृष्टेष्टविरुद्धाः प्रत्यक्षपरोक्षविरुद्धा मिथ्यादर्शनोदयात् सञ्जायन्ते। तान् सञ्जायमानान् प्रवादिनः कल्पयन्ति। १५ तेषु च प्रवादिनः श्रद्धानं जनयन्ति। तेन कारणेन तन्मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं च स्यात्। सम्यग्दर्शनं तु तत्त्वार्थाधिगमे श्रद्धानमुत्पादयति। तेन सम्यग्दर्शनपूर्वकं यद् भवति तन्मतिज्ञानं श्रुतज्ञानमवधिज्ञानं च संबोभवीति।

अथ द्विप्रकारप्रमाणैकदेशा नया उच्यन्ते—

नैगमसङ्ग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नयाः ॥ ३३ ॥ २०

नैकं गच्छतीति निगमो विकल्पः, निगमे भवो नैगमः। अभेदतया वस्तुसमूहं गृह्णातीति सङ्ग्रहः। सङ्ग्रहेण गृहीतस्यार्थस्य[8] भेदरूपतया वस्तु व्यवह्रियतेऽनेनेति व्यवहारः। ऋजु प्राञ्जलं सरलतया सूत्रयति तन्त्रयतीति ऋजुसूत्रः। शब्दाद् व्याकरणात् प्रकृतिप्रत्ययद्वारेण सिद्धः शब्दः। परस्परेणाभिरूढः समभिरूढः। एवं क्रियाप्रधानत्वेन भूयते एवम्भूतः। नैगमश्च सङ्ग्रहश्च व्यवहारश्च ऋजुसूत्रश्च शब्दश्च समभिरूढश्च एवम्भूतश्च नैगम- २५ सङ्ग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूताः। एते सप्त नयाः। नयन्ति प्रापयन्ति प्रमाणैकदेशानिति नयाः। तेषां सामान्यलक्षणं विशेषलक्षणञ्च वक्तव्यम्।

तत्र तावत्सामान्यलक्षणमुच्यते—जीवादावनेकान्तात्मनि अनेकरूपिणि वस्तुन्यविरोधेन

---

१ वेदान्तिनः। २ सांख्याः। ३ नैयायिकाः। ४ "कामेऽष्टद्रव्यकः" अष्टौ द्रव्याणि चत्वारि महाभूतानि (पृथिवी+जल+तेजः+वात) चत्वारि भौतिकानि (गन्ध + रस + रूप + स्पर्श) च।" –अभिधर्म० टी० २।२२। ५ वैशेषिकाः। ६ संजायन्ते ता०। संजायते व०। ७ कारणत्वार्थमर्था– ता०, व०। ८ –ते रू– आ०, ब०, द०, ज०। ९ –र्थभेद– ता०।

प्रतीत्यनतिक्रमेण हेत्वर्पणात् द्रव्यपर्यायाद्यर्पणात् साध्यविशेषयाथात्म्यप्रापणप्रवणप्रयोगो नय उच्यते । अस्यायमर्थः—साध्यविशेषस्य नित्यत्वाऽनित्यत्वादेः याथात्म्यप्रापणप्रवणप्रयोगो यथावस्थितस्वरूपेण प्रदर्शनसमर्थव्यापारो नय उच्यते । ज्ञातुरभिप्राय इत्यर्थः । स नयो द्विप्रकारः–द्रव्यार्थिक-पर्यायार्थिकभेदात् । द्रव्यं सामान्यमुत्सर्ग अनुवृत्तिरिति यावत्, [1]द्रव्यमर्थो विषयो ५ यस्य स द्रव्यार्थिकः । पर्यायो विशेषः अपवादो व्यावृत्तिरिति यावत्, पर्य्यायोऽर्थो विषयो यस्य स पर्यायार्थिकः । तयोर्विकल्पा नैगमादयः । नैगमसङ्ग्रहव्यवहारास्त्रयो नया द्रव्यार्थिका वेदितव्याः । ऋजुसूत्रशब्दसमभिरूढैवम्भूताश्चत्वारो नयाः पर्यायार्थिका ज्ञानीयाः ।

इदानीं नयानां विशेषलक्षणमुच्यते । अनभिनिवृत्तार्थः–अनिष्पन्नार्थः, सङ्कल्पमात्रग्राही नैगम उच्यते । तथा चोदाहरणम्—कश्चित्पुमान् करकृतकुठारो वनं गच्छति, तं १० निरीक्ष्य कोऽपि पृच्छति–त्वं किमर्थं व्रजसि? स प्रोवाच–अहं प्रस्थमानेतुं गच्छामि । इत्युक्ते तस्मिन् काले प्रस्थपर्य्यायः सन्निहितो न वर्त्तते, प्रस्थो घटयित्वा धृतो न वर्त्तते । किं तर्हि तदभिनिवृत्तये–प्रस्थनिष्पत्तये संकल्पमात्रे दार्वानयने प्रस्थव्यवहारो भवति । एवमिन्धनजलानलाद्यानयने कश्चित् पुमान् व्याप्रियमाणो वर्त्तते, स केनचिदनुयुक्तः–किं करोषि त्वमिति । तेनोच्यते–अहमोदनं पचामि । न च तस्मिन् प्रस्तावे ओदनपर्य्यायः सन्निहितोऽस्ति । किं १५ तर्हि? ओदनपचनार्थं व्यापारोऽपि ओदनपचनमुच्यते । एवंविधो लोकव्यवहारोऽनभिनिवृत्तार्थः—अनिष्पन्नार्थः सङ्कल्पमात्रविषयो नैगमनयस्य गोचरो भवति । १ ।

स्वजात्यविरोधेनैकत्र उपनीय पर्यायान् आक्रान्तभेदान् विशेषमकृत्वा सकलग्रहणं सङ्ग्रह उच्यते । यथा सदिति प्रोक्ते वाग्विज्ञानप्रवृत्तिलिङ्गानुमितसत्ताधारभूतानां विश्वेषां विशेषमकृत्वा सत्सङ्ग्रहः । एवं द्रव्यमित्युक्ते द्रवति गच्छति तांस्तान् केवलिप्रसिद्धपर्यायानिति द्रव्यम्, २० जीवाऽजीवतद्भेदप्रभेदानां सङ्ग्रहो भवति । एवं घट इत्युक्ते घटबुद्ध्यभिधानानुगमलिङ्गानुमितसकलार्थसङ्ग्रहो भवति । एवंविधोऽपरोऽपि सङ्ग्रहनयस्य गोचरो वेदितव्यः । २ ।

सङ्ग्रहनयविषयीकृतानां सङ्ग्रहनयगृहीतानां सङ्ग्रहनयक्षिप्तानामर्थानां विधिपूर्वकमवहरणं भेदेन प्ररूपणं व्यवहारः । कोऽसौ विधिः? सङ्ग्रहनयेन यो गृहीतोऽर्थः स विधिरुच्यते, यतः सङ्ग्रहपूर्वेणैव व्यवहारः प्रवर्त्तते । तथा हि–सर्वसङ्ग्रहेण यद्वस्तु २५ सङ्गृहीतं तद्वस्तु विशेषं नाऽपेक्षते, तेन कारणेन तद्वस्तु संव्यवहाराय समर्थं न भवतीति कारणात् व्यवहारनयः समाश्रीयते । 'यत्सद्वर्त्तते तत्किं द्रव्यं गुणो वा, यद्द्रव्यं तज्जीवोऽजीवो वा' इति संव्यवहारो न कर्त्तुं शक्यः । जीवद्रव्यमित्युक्ते अजीवद्रव्यमिति चोक्ते व्यवहार आश्रिते ते अपि द्वे द्रव्ये सङ्ग्रहनयगृहीते संव्यवहाराय न समर्थे भवतः, तदर्थं देवनारकादिव्यवहार आश्रीयते, घटादिश्च व्यवहारेण आश्रीयते । [3]एवं व्यवहारनयस्ताव- ३० त्पर्यन्तं प्रवर्त्तते यावत्पुनर्विभागो न भवति । ३ ।

पूर्वान् व्यवहारनयगृहीतान् अपरांश्च विषयान् त्रिकालगोचरानतिक्रम्य वर्त्तमानकाल-

१ द्रव्यं वि– ता० । २ –यो वि– ता० । ३ –वग्रहणं व्य– आ०, द०, ब० ।

गोचरं गृह्णाति ऋजुसूत्रः । अतीतस्य विनष्टत्वे अनागतस्यासञ्जातत्वे व्यवहारस्याभावाद् वर्त्त-
मानसमयमात्रविषयपर्य्यायमात्रग्राही ऋजुसूत्र इत्यर्थः । नन्वेवं सति संव्यवहारलोपः स्यात् ;
सत्यम् ; अस्य ऋजुसूत्रनयस्य विषयमात्रं(त्र-)प्रदर्शनं विधीयते । लोकसंव्यवहारस्तु सर्वनय-
समूहसाध्यो भवति । तेन ऋजुसूत्राश्रयणे संव्यवहारलोपो न भवति । यथा कश्चिन्मृतः, तं
दृष्ट्वा 'संसारोऽयमनित्यः' इति कश्चिद् ब्रवीति, न च सर्वः संसारोऽनित्यो वर्त्तत इति । एते ५
चत्वारो नया अर्थनया वेदितव्याः । अन्ये वक्ष्यमाणास्त्रयो नयाः शब्दनया इति । ४ ।

लिङ्गसङ्ख्यासाधनादीनां व्यभिचारस्य निषेधपरः, लिङ्गादीनां व्यभिचारे दोषो
नास्तीत्यभिप्रायपरः शब्दनय उच्यते । लिङ्गव्यभिचारो यथा—पुष्यः नक्षत्रं तारका चेति ।
सङ्ख्याव्यभिचारो यथा—आपः तोयम्, वर्षाः ऋतुः, आम्रा वनम्, वरणा नगरम् ।
साधनव्यभिचारः कारकव्यभिचारो यथा—सेना पर्वतमधिवसति, पर्वते तिष्ठतीत्यर्थः १०
"अधिशीङ्स्थासां कर्म्म" [पा० सू० १।४।४६] पुरुषव्यभिचारो यथा— एहि मन्ये
रथेन यास्यसि ? न यास्यसि, यातस्ते पितेति । अस्यायमर्थः—एहि त्वमागच्छ । त्वमेवं
मन्यसे—अहं रथेन यास्यामि, एतावता त्वं रथेन न यास्यसि । ते तव पिता अग्रे रथेन
यातः ? न यात इत्यर्थः । अत्र मध्यमपुरुषस्थाने उत्तमपुरुषः, उत्तमपुरुषस्थाने मध्यमपुरुषः,
तदर्थं सूत्रमिदम्—"प्रहासे मन्योपपदे मन्यतेरुत्तमैकवचनं च उत्तमे मध्यमस्य ।" १५
[ ] कालव्यभिचारो यथा—विश्वदृश्वा अस्य पुत्रो जनिता । भविष्यत्कार्य-
मासीदिति । अत्र भविष्यत्काले अतीतकालविभक्तिः । उपग्रहव्यभिचारो यथा—ष्ठा
गतिनिवृत्तौ । अत्र परस्मैपदोपग्रहः । तत्र सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते । अत्र
सूत्रम्— "समवप्रविभ्यः" [का० सू० ३।२।४२ दौ० वृ० १४] । रमु क्रीडायामित्यत्र
आत्मनेपदोपग्रहः विरमत्यारमति परिरमति । "व्याङ् परिभ्यो रमः" [पा० सू० २०
१।३।८३] । इति व्यभिचारसूत्रम् । देवदत्तमुपरमति । "उपात्सकर्मकात्" [ ]
इति च व्यभिचारसूत्रम् । एवंविधं व्यवहारनयमनुपपन्नमन्याय्यं कश्चित्पुमान् मन्यते ।
कस्मादन्याय्यं मन्यते ? अन्यार्थस्य अन्यार्थेन वर्त्तनेन सम्बन्धाभावात् । तत्र शब्दनयापेक्षया
दोषो नास्ति । तर्हि लोकसमयविरोधो भविष्यति ; भवतु नाम विरोधः । तत्त्वं परीक्ष्यते,
किं तेन विरोधेन भविष्यति ? किमौषधं रोगीच्छानुवर्त्ति वर्त्तते ? । ५ । २५

एकमप्यर्थं शब्दभेदेन भिन्नं जानाति यः स समभिरूढो नयः । यथा एकोऽपि पुलो-
मजाप्राणवल्लभः परमैश्वर्य्ययुक्त इन्द्र उच्यते, स अन्यः, शकनात् शक्रः, सोप्यन्यः,
पुरदारणात् पुरन्दरः, सोऽप्यन्यः । इत्यादिशब्दभेदात् एकस्याप्यर्थस्यानेकत्वं मन्यते तत्
समभिरूढनयस्य लक्षणम् । ६ ।

यस्मिन्नेव काल ऐश्वर्य्यं प्राप्नोति तदैवेन्द्र उच्यते, न चाभिषेककाले न पूजनकाले ३०
इन्द्र उच्यते । यस्मिन्नेव काले गमनपरिणतो भवति तदैव गौरुच्यते न स्थितिकाले, न

१ -चारो दो आ०, ब०, ज० । २ -सीदति- ता०, व० । ३ -ष्यति का- आ०, व० ।
४ -नयल- आ०, द०, ब०, ज० । ५ -परिणता भ- आ०, द०, ब० ।

शयनकाले। अथवा इन्द्रज्ञानपरिणत आत्मा इन्द्र उच्यते, अग्निज्ञानपरिणत आत्मा अग्निश्चेति एवम्भूतनयलक्षणम्। ७।

एते नया उत्तरोत्तरसूक्ष्मविषयाः। कथमिति चेत्? नैगमात् खलु सङ्ग्रहोऽल्पविषयः सन्मात्रग्राहित्वात्, नगमस्तु भावाऽभावविषयत्वाद् बहुविषयः, यथैव हि भावे सङ्कल्पः ५ तथाऽभावे नैगमस्य सङ्कल्पः। एवमुत्तरत्राऽपि योज्यम्। तथा पूर्व-पूर्वहेतुका एते नयाः। कथमिति चेत्? नैगमः सङ्ग्रहस्य हेतुः। सङ्ग्रहो व्यवहारस्य हेतुः। व्यवहारः ऋजुसूत्रस्य हेतुः। ऋजुसूत्रः शब्दस्य हेतुः। शब्दः समभिरूढस्य हेतुः। समभिरूढ एवम्भूतस्य हेतुरिति।

एते नया गौणतया प्रधानतया च अन्योन्याधीनाः सन्तः सम्यग्दर्शनस्य कारणं भवन्ति[1] तन्त्वादिवत्। यथा तन्त्वादयः उपायेन विनिवेशिताः पटादिसंज्ञा भवन्ति तथा परस्पराधीना[2] १० नयाः पुरुषार्थक्रियासाधनसमर्था भवन्ति। परस्परानपेक्षा नयाः पुरुषार्थक्रियासाधनसमर्था न भवन्ति केवलतन्तुवत्। ननु विषमोऽयं दृष्टान्तः। कस्माद्विषमः? यतस्तन्त्वादयो निरपेक्षा अपि सन्तः प्रयोजनलेशमुत्पादयन्ति, यतः कश्चित्तन्तुः प्रत्येकं त्वग्रक्षणे समर्थो भवति, केवलः पलाशादेर्वल्कलश्च बन्धने समर्थो भवति, नयास्तु निरपेक्षाः सन्तः सम्यग्दर्शनलेशमपि नोत्पादयन्ति तेन विषयोऽयमुपन्यासः-अघटमानोऽयं दृष्टान्तः। सत्यम्। उक्तमर्थं १५ भवन्तो न जानन्ति। अस्माभिरेतदुक्तम्-निरपेक्षैः तन्त्वादिभिः वस्त्रादिकार्यं न भवति। यद् भवद्भिरुक्तं कार्य्यं तन्न पटादिकार्य्यम्, किन्तु केवलं तन्त्वादिकार्यं भवद्भिरुक्तम्। अथवा केवलस्तन्तुः यद्भवदुक्तं कार्य्यं साधयति तस्मिन्नपि तन्तौ परस्परापेक्षा[3] अवयवाः सन्ति। तेनाऽपि अस्मन्मतसिद्धिः। अथ त्वमेवं वक्षि, तन्त्वादिषु वसनादिकार्यं शक्त्यपेक्षया वर्तत एव, तर्हि अस्मन्मते निरपेक्षेषु नयेष्वपि बुद्धिकथनस्वरूपेषु हेतुवशात् सम्यग्दर्शनहेतु- २० परिणामो विद्यत एव। तेन कारणेन तूपन्यासस्य[4] तुल्यतासिद्धिरस्ति। तेन सापेक्षैरेव नयैः सम्यग्दर्शनसिद्धिरिति सिद्धम्। अस्मिन्नध्याये ज्ञानदर्शनस्वरूपमुक्तं नयलक्षणं च प्रतिपादितम् ज्ञानं च प्रमाणमिति वेदितव्यम्। ३३।

इत्यनवद्यगद्यपद्यविद्याविनोदनोदितप्रमोदपीयूषरसपानपावनमतिसभाजरत्नराजमति-
सागरयतिराजराजितार्थनसमर्थनसमर्थन[5] तर्कव्याकरणच्छन्दोलङ्कारसाहित्या-
२५ दिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्त्तिभट्टारकप्रशिष्येण शिष्येण
च सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य संच्छ-
र्दितमिथ्यामतदुर्गरेण श्रीश्रुतसागरसूरिणा विरचितायां
श्लोकवार्त्तिकराजवार्त्तिकसर्वार्थसिद्धिन्यायकुमुदच-
न्द्रोदय(न्द्र)प्रमेयकमलमार्त्तण्डप्रचण्डाष्टसहस्री-
३० प्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिवि-
राजितायां तत्त्वार्थटीकायां प्रथ-
मोऽध्यायः समाप्तः॥ १॥

---

१ भवन्ति ता०, व०। २ -धीनतया पु- आ०, ब०, द०, ज०। ३ -क्षया अ- आ०, ब०, द०, ज०। ४ -सतु- आ०, द०, ब०। ५ -भाजितर- ब०। ६ -समर्थनसमर्थतर्क- ता०।

द्वितीयोऽध्यायः

अथ सम्यग्दर्शनविषयेषु सप्तसु तत्त्वेषु मध्ये जीवतत्त्वस्य किं स्वरूपमिति प्रश्ने सूत्रमिदमाहुः [1]श्रीमदुमास्वामिनः—

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्व-मौदयिकपारिणामिकौ च ॥ १ ॥

कर्मणोऽनुदय[2]रूप उपशमः कथ्यते। यथा कतकादिद्रव्यसम्बन्धात् पङ्के [3]अधोगते सति जलस्य स्वच्छता भवति तथा कर्मणोऽनुदये सति जीवस्य स्वच्छता भवति स उपशमः प्रयोजनं यस्य भावस्य स औपशमिकः। कर्मणः क्षयणं क्षयः। यथा पङ्कात् पृथग्भूतस्य शुचिभाजनान्तरसङ्क्रान्तस्य अम्बुनोऽत्यन्तस्वच्छता भवति तथा जीवस्य कर्मणः आत्यन्तिकी निवृत्तिः क्षयः कथ्यते। क्षयः प्रयोजनं यस्य भावस्य स क्षायिकः। औपशमिकश्च क्षायिकश्च औपशमिकक्षायिकौ। एतौ द्वौ भावौ—द्वौ परिणामौ जीवस्य आत्मनः स्वतत्त्वं स्वरूपं भवतः। न केवलमौपशमिकक्षायिकौ द्वौ भावौ जीवस्य स्वतत्त्वं भवतः किन्तु मिश्रश्च। मिश्रो भावश्च जीवस्य स्वतत्त्वं भवति निजस्वरूपं स्यात्। यथा जलस्य अर्द्धस्वच्छता तथा जीवस्य क्षयोपशमरूपो मिश्रो भावो भवति। अथवा यथा कोद्रवद्रव्यस्य क्षालनविशेषात् क्षीणाऽक्षीणमदशक्तिर्भवति। तथा कर्मणः क्षयोपशमे सति जीवस्योपजायमानो भाव मिश्रः कथ्यते। नरकादौ कर्मण उदये सति जीवस्य संजायमानो भाव औदयिको भण्यते। कर्मोपशमादिनिरपेक्षश्चेतनत्वादि(दिः) जीवस्य स्वाभाविको भावः पारिणामिको निगद्यते। स तु पारिणामिको भावः संसारिमुक्तजीवानां साधारणो भवति। न केवलमेते त्रयो भावाः किन्तु औदयिकपारिणामिकौ च द्वौ भावौ जीवस्य स्वरूपं भवतः। एते पञ्च भावाः जीवस्य स्वरूपं [4]भवन्तीत्यर्थः। भव्यस्य औपशमिक-क्षायिकौ द्वौ भावौ भवतः। मिश्रस्तु अभव्यस्यापि भवति। औदयिकपारिणामिकौ च अभव्यस्यापि भवतः। १।

अथौपशमिकादीनां पञ्चानां भावानामन्तर्भेदसंख्यानिरूपणपरं सूत्रमिदमूचुः—

द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥ २ ॥

द्वौ च नव च अष्टादश च एकविंशतिश्च त्रयश्च द्विनवाष्टादशैकविंशतित्रयः। त एव भेदा येषामौपशमिकादिभावानां ते द्विनवाष्टादशैकविंशतित्रिभेदाः। अथवा द्विनवाष्टादशैकविंशतित्रयश्च ते भेदा द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रममनुक्रमेण ज्ञातव्याः। २।

१ 'श्रीमदुमास्वामिनः' इति नास्ति ब०, द०। २ -यस्वरू- आ०, ब०, द०, ज०। ३ अधोगतिगते स- आ०। ४ भवती- ता०, ज०।

अथौपशमिकस्य भावस्य भेदद्वयसूचनपरं सूत्रमाहुः—

सम्यक्त्वचारित्रे ॥ ३ ॥

सम्यक्त्वं च चारित्रं च सम्यक्त्वचारित्रे, औपशमिको भावो द्विभेदो भवति। अनन्तानुबन्धिक्रोधमानमायालोभाश्चत्वारः, सम्यक्त्वम्, मिथ्यात्वम्, सम्यग्मिथ्यात्वञ्च, ५ एतासां सप्तानां प्रकृतीनामुपशमादौपशमिकं सम्यक्त्वमुत्पद्यते।

अनादिकालमिथ्यादृष्टिभव्यजीवस्य कर्मोदयोत्पादितकलुषतायां सत्यां कस्मादुपशमो भवतीति चेत्? काललब्ध्यादिकारणादिति ब्रूमः। कासौ काललब्धिः? कर्मवेष्टितो भव्यजीवोऽर्धपुद्गलपरिवर्तनकाल उद्धरिते सत्यौपशमिकसम्यक्त्वग्रहणोचितो भवति। अर्द्धपुद्गलपरिवर्तनादधिके काले सति प्रथमसम्यक्त्वस्वीकारयोग्यो न स्यादित्यर्थः। एका काललब्धिरि-
१० यमुच्यते। द्वितीया काललब्धिः– यदा कर्मणामुत्कृष्टा स्थितिरात्मनि भवति जघन्या वा कर्मणां स्थितिरात्मनि भवति तदौपशमिकसम्यक्त्वं नोत्पद्यते। तर्हि औपशमिकसम्यक्त्वं कदोपद्यते? यदा अन्तःकोटीकोटिसागरोपमस्थितिकानि कर्माणि बन्धं प्राप्नुवन्ति भवन्ति। निर्मलपरिणामकारणात् सत्कर्माणि तेभ्यः कर्मभ्यः संख्येयसागरोपमसहस्रहीनानि अन्तःकोटीकोटिसागरोपमस्थितिकानि भवन्ति तदौपशमिकसम्यक्त्वग्रहणयोग्य आत्मा भवति। इयं द्वितीया काल-
१५ लब्धिः। तृतीया काललब्धिः कथ्यते–सा काललब्धिर्भावमपेक्षते। कथम्? भव्यजीवः पञ्चेन्द्रियः, समनस्कः, पर्याप्तिपरिपूर्णः, सर्वविशुद्धः औपशमिकसम्यक्त्वमुत्पादयति। आदिशब्दाज्जातिस्मरणजिनमहिमादिदर्शनादौपशमिकं सम्यक्त्वमुत्पादयति। षोडशकषायाणां नवनोकषायाणां चोपशमादौपशमिकं चारित्रमुत्पद्यते। ३।

अथ क्षायिकभावस्य नवभेदप्रतिपादनपरं सूत्रमुच्यते—

२० **ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ ४ ॥**

ज्ञानञ्च दर्शनञ्च दानञ्च लाभश्च भोगश्च उपभोगश्च वीर्यञ्च ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि सप्त, चकारात् सम्यक्त्वचारित्रे च द्वे, इति नवविधः क्षायिको भावः। केवलज्ञानावरणक्षयात् क्षायिकं केवलज्ञानम्। १। केवलदर्शनावरणक्षयात् क्षायिकं केवलदर्शनम्। २। दानान्तरायक्षयात् क्षायिकमनन्तप्राणिगणानुग्रहकरमभयदानम्। ३। लाभान्त-
२५ रायक्षयात् क्षायिको लाभः? कोऽसौ क्षायिको लाभः? यस्य लाभस्य बलात् कवलाहाररहितानां केवलिनां शरीर[1]बलाधानहेतवोऽनन्यसाधारणाः परमशुभाः सूक्ष्मा अनन्ताः पुद्गला समयं समयं प्रति सम्बन्धमायान्ति। ४। भोगान्तरायस्य क्षयात् क्षायिकोऽनन्तो भोगः। कोऽसौ क्षायिको भोगः? सकृद् भुज्यते भोगः, पुष्पवृष्टिगन्धोदकवृष्ट्यादिकः। ५। उपभोगान्तरायक्षयात् क्षायिकोऽनन्त उपभोगः। कोऽसौ क्षायिक उपभोगः? सिंहासनचामर-
३० छत्रत्रयादिकः। ६। वीर्यान्तरायक्षयात् क्षायिकमनन्तवीर्यम्। किं तत् क्षायिकं वीर्यम्? यद्बलात् केवलज्ञानेन केवलदर्शनेन च कृत्वा सर्वद्रव्याणि सर्वपर्यायांश्च ज्ञातुं द्रष्टुं च

१ –बलादानहे– ब०। बलादाने हे– आ०, द०, ब०, ज०।

केवली शक्नोति । ७ । अनन्तानुबन्धिक्रोधमानमायालोभसम्यक्त्वमिथ्यात्वसम्यग्मिथ्यात्वलक्षणसप्तप्रकृतिक्षयात् क्षायिकं सम्यक्त्वम् । ८ । षोडशकषायनवनोकषायक्षयात् क्षायिकं चारित्रम् । ९ ।

अत्राह कश्चित्-क्षायिकमभयदानलाभभोगोपभोगादिकं मुक्तेष्वपि प्रसज्यते ; तन्न; शरीरनामतीर्थङ्करनामकर्मोदयात् तत्प्रसङ्गः, न सिद्धानां शरीरनामतीर्थङ्करनामकर्मोदयोऽस्ति ५ येन तत्प्रसङ्गः स्यात्। तर्हि सिद्धेषु तेषां वृत्तिः कथम्? अनन्तवीर्याव्याबाधसुखरूपेणैव तेषां तत्र प्रवृत्तिः, केवलज्ञानरूपेण अनन्तवीर्यप्रवृत्तिवत्। उक्तं च—

"आनन्दो ज्ञानमैश्वर्यं वीर्यं परमसूक्ष्मता ।
एतदात्यन्तिकं यत्र स मोक्षः परिकीर्त्तितः ॥१॥" [यश० उ० पृ० २७३]

अथ मिश्रो भावोऽष्टादशभेदः कथमिति निरूपयन्ति— १०

ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ ५ ॥

ज्ञानानि चाज्ञानानि च दर्शनानि च लब्धयश्च ज्ञानाज्ञानदर्शनलब्धयः । कथम्भूता ज्ञानाज्ञानदर्शनलब्धयः ? चतुस्त्रित्रिपञ्चभेदाः चत्वारश्च त्रयश्च त्रयश्च पञ्च च चतुस्त्रित्रिपञ्च, ते भेदा यासां ताश्चतुस्त्रित्रिपञ्चभेदाः । सम्यक्त्वञ्च चारित्रञ्च संयमासंयमश्च सम्य- १५ क्त्वचारित्रसंयमासंयमाः । अस्यायमर्थः-चत्वारि ज्ञानानि त्रीणि अज्ञानानि त्रीणि दर्शनानि पञ्च लब्धयः यथाक्रमं भवन्ति । सर्वस्य ज्ञानस्य घातकवीर्यान्तरायादिकर्मोदयस्य क्षये सति तस्यैव सर्वस्य ज्ञानस्यैव घातिनः कर्मणोऽनुद्भूतस्ववीर्यवृत्तेरप्रादुर्भूतनिजशक्तिप्रवृत्तिनः सदवस्थारूपोपशमे[1] सति विद्यमानावस्थास्वरूपप्रशमे सति देशघातिकर्मोदये च सति मतिश्रुतावधिमनःपर्ययाश्चत्वारो मिश्रभावा भवन्ति, क्षायोपशमिका भवन्तीत्यर्थः । मत्यज्ञानं श्रुता- २० ज्ञानं विभङ्गावधिश्च, एतानि त्रीणि सत्यासत्यरूपत्वादज्ञानानि भवन्ति । तेष्वपि मिश्रो भावो ज्ञातव्यः । तद्वच्चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनञ्च । एष्वपि दर्शनेषु मिश्रो भावो भवति । तथा दानलाभभोगोपभोगवीर्यान्तरायसर्वघात्युदयस्य क्षये सति सदवस्थालक्षणोपशमे सति देशघात्युदये च सति दानलाभभोगोपभोगवीर्यलक्षणा लब्धयः पञ्च[2]मिश्रभावा भवन्ति, क्षायोपशमिका भवन्ति । अनन्तानुबन्धिचतुष्कमिथ्यात्वसम्यग्मिथ्यात्वानां षण्णामुदयक्ष- २५ यात् सद्रूपोपशमात् सम्यक्त्वनाममिथ्यात्वस्य देशघातिनो न तु सर्वघातिन उदयात् मिश्रं सम्यक्त्वं भवति, क्षायोपशमिकं सम्यक्त्वं स्यात्। तद्वेदकमित्युच्यते। तस्यापि मिश्रो भावो भवति । अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानलक्षणानां द्वादशानां कषायाणामुदयस्य क्षये सति विद्यमानलक्षणोपशमे सति सञ्ज्वलनचतुष्काऽन्यतमस्य देशघातिनश्चोदये[3] च सति हास्य-

१ -स्थारूप- आ०, ब०, द०, ज० । २ मिश्रलक्षणभा- आ०, द०, ब०, ज० ।
३ -ये स- आ०, ब०, ज०, व० ।

रत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदलक्षणानां नवानां नोकषायाणां यथासम्भवमुदये च सति मिश्रं चारित्रं भवति। अनन्तानुबन्ध्यप्रत्याख्यानकषायाष्टकस्य उदयस्य क्षये सति तत्सत्तोपलक्षणोपशमे सति प्रत्याख्यानसञ्ज्वलनाष्टकस्योदये सति नोकषायनवकस्य यथासम्भवोदये च सति संयमासंयमः संजायते। सोऽपि मिश्रो भावः [1]कथ्यते। चकारात् संज्ञित्वं
५ सम्यग्मिथ्यात्वं च मिश्रौ भावौ ज्ञातव्यौ।

अथैकविंशतिभेदा औदयिकभावस्योच्यन्ते—

गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयताऽसिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥ ६ ॥

गतिश्च कषायश्च लिङ्गञ्च मिथ्यादर्शनञ्च अज्ञानञ्च असंयतश्च असिद्धश्च लेश्या
१० च गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याः। चत्वारश्च चत्वारश्च त्रयश्च एकश्च एकश्च एकश्च एकश्च षट् च चतुश्चतुस्त्र्येकैकैकैकषट्, ते भेदा यासां गतिकषायलिङ्गमिथ्यादर्शनाज्ञानाऽसंयताऽसिद्धलेश्यानां ताः चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः। **"द्विनवाष्टादशैकविंशतित्रिभेदाः यथाक्रमम्"** [त० सू० २।२] इत्यतो यथाक्रममिति ग्राह्यम्। तेनायमर्थः—गतिश्चतुर्भेदा। कषायश्चतुर्भेदः। लिङ्गं त्रिभेदम्। मिथ्यादर्शनमेकभेदम्। अज्ञान-
१५ मेकभेदम्। असंयत एकभेदः। असिद्ध एकभेदः। लेश्याः षड्भेदाः। एत एकविंशतिर्भेदा औदयिकभावा भवन्ति। तत्र नरकगतिनामकर्मोदयान्नारकत्वं भवतीति नरकगतिरौदयिकी। तथा तिर्यग्गतिनामकर्मोदयात् तिर्यग्गतिरौदयिकी। तथा मनुष्यगतिनामकर्मोदयान्मनुष्यगतिरौदयिकी। देवगतिनामकर्मोदयाद् देवगतिरौदयिकी। क्रोधोत्पादकमोहकर्मोदयात् क्रोध औदयिकः। मानोत्पादकमोहकर्मोदयान्मान औदयिकः। मायोत्पादकमोहकर्मोदयान्माया
२० औदयिकी। लोभोत्पादकमोहकर्मोदयाल्लोभ औदयिकः। स्त्रीवेदजनकनोकषायमोहकर्मोदयात् स्त्रीवेद औदयिकः। पुंवेदजनकनोकषायमोहकर्मोदयात् पुंवेद औदयिकः। नपुंसकवेदजनकनोकषायमोहकर्मोदयान्नपुंसकवेद औदयिकः। तत्त्वार्थानामश्रद्धानलक्षणपरिणामनिर्वर्त्तकमिथ्यात्वमोहकर्मोदयात् मिथ्यादर्शनमौदयिकम्। ज्ञानावरणकर्मोदयात् पदार्थाऽपरिज्ञानमज्ञानमौदयिकम्। चारित्रमोहस्य सर्वघातिस्पर्द्धकस्य उदयादसंयतो भवति, स औदयिको भावः।
२५ कर्मोदयसाधारणापेक्ष[3] असिद्धः, सोऽपि औदयिकभाव एव। लेश्या षड्विधापि द्विविधा—द्रव्यलेश्या-भावलेश्याभेदात्। तत्र जीवभावाधिकारे द्रव्यलेश्या नाद्रियते। भावलेश्या तु आद्रियते। कषायोदयानुरञ्जिता योगप्रवृत्तिर्भावलेश्या। साप्यौदयिकीति कथ्यते। सा षड्विधा कृष्णलेश्या, नीललेश्या, कापोतलेश्या, तेजोलेश्या, पद्मलेश्या, शुक्ललेश्या। तदुदाहरणार्थमियं गाथा। तथा हि—

---

१ भण्यते आ०, द०, ज०, ब०। २ –तिभे– ब०, आ०, द०। ३ –क्षयाऽसि– आ०, द०, ब०, ज०।

"उम्मूलखंधसाहा गुंच्छा चुणिऊण तहय पडिदाओ ।
जह एदेसिं भावा तहविह लेस्सा मुणेयव्वा ॥" [पंचसं० १ । १९२]

अत्राह कश्चित्–उपशान्तकषायक्षीणकषाययोः सयोगकेवलिनि च शुक्ललेश्या वर्त्तत इति सिद्धान्तवचनमस्ति, तेषां कषायानुरञ्जनभावाभावसद्भावादौदयिको भावः कथं घटते ? सत्यम्; पूर्वभावप्रज्ञापनापेक्षया कषायानुरञ्जिता योगप्रवृत्तिः सैवेत्युच्यते । कस्मात् ? भूतपूर्वकस्तद्वदुपचारः इति परिभाषणात् । योगाभावादयोगकेवली अलेश्य इति निर्णीयते । ६ । ५

अथ पारिणामिकभावस्य भेदत्रयमुच्यते—

जीवभव्याभव्यत्वानि च ॥ ७ ॥

जीवत्वं च चेतनत्वम्, भव्यत्वं च सम्यग्दर्शनज्ञानचारित्ररूपेण भविष्यत्त्वम्, अभव्यत्वं च सम्यग्दर्शनज्ञानचारित्ररूपेण अभविष्यत्त्वम्, जीवभव्याभव्यत्वानीति । एते त्रयो भावा अपरद्रव्याऽसमानाः पारिणामिका जीवस्य ज्ञातव्याः । कर्मोपशमक्षयोपशमक्षयानपेक्षत्वात् पारिणामिका इत्युच्यन्ते । चकारादस्तित्वं वस्तुत्वं द्रव्यत्वं प्रमेयत्वमगुरुलघुत्वं नित्यप्रदेशत्वं मूर्तत्वममूर्तत्वं चेतनत्वमचेतनत्वञ्च । एतेऽपि दश भावाः पारिणामिका अन्यद्रव्यसाधारणा वेदितव्याः । कथं पुद्गलस्य चेतनत्वं जीवस्याचेतनत्वमिति चेत् ? उच्यते–यथा दीपकलिकया गृहीतः स्नेहो दीपशिखा भवति, तथा जीवेन शरीररूपतया गृहीतः पुद्गलोऽपि उपचारात् जीव इत्युच्यते, तेन पुद्गलस्यापि चेतनत्वं भण्यते । तथा जीवोऽपि आत्मविवेकपराङ्मुख उपचरिताऽसद्भूतव्यवहारनयापेक्षया अचेतन इत्युपचर्यते । एवं मूर्तत्वमपि उपचारेण जीवस्य ज्ञातव्यम् । पुद्गलस्य तूपचारेणापि अमूर्तत्वं नास्ति । १० १५

अत्राह कश्चित्–मूर्त्तकर्मैकत्वे आत्मनोऽपि मूर्त्तत्वे जीवस्य को विशेषः ? सत्यम्, मूर्तेन कर्मणा सहैकत्वेऽपि लक्षणभेदात् जीवस्य नानात्वं प्रतीयते । तदाह– २०

"बन्धं प्रत्येकत्वं लक्षणतो भवति तस्य नानात्वम् ।
तस्मादमूर्तभावो नैकान्तो भवति जीवस्य ॥" [ ]

यदि लक्षणेन आत्मनो भेदः, 'किं तल्लक्षणं जीवस्य' इति प्रश्ने जीवलक्षणस्वरूपनिरूपणार्थं सूत्रमिदमाहुरुमास्वामिनः—

उपयोगो लक्षणम् ॥ ८ ॥ २५

---

१ उम्मलखं– ता० । उन्मूलस्कन्धशाखागुच्छानि चित्वा तथा च पतितानि । यथा एतेषां भावाः तथाविधलेश्या मन्तव्याः ॥ २ –लिनश्च आ०, द०, ज० । –लिनाञ्च ब० । ३ भूतपूर्वस्त– आ०, द०, ब०, ज० । ४ कथं जीवस्याचेतनत्वं पुद्गलस्य चेतनत्वमिति आ०, ब०, द०, ज० । ५ दीपकविधया आ०, द०, ब०, ज० । ६ मूर्त्तेनैकत्वे आ०, ब०, द०, ज० । ७ "उक्तञ्च–बंधं पडि एयत्तं लक्खणदो हवइ तस्स णाणत्तं । तम्हा अमुत्तिभावोऽणेयंतो होई जीवस्स ।" –स० सि० २।७ ।

उपयुज्यते वस्तु प्रति प्रेर्यते यः वस्तुस्वरूपपरिज्ञानार्थम् इत्युपयोगः । "अकर्त्तरि च कारके संज्ञायाम्" [पा० सू० ३।३।१८] घञ् । अथवा आत्मन उप समीपे योजनं उपयोगः "भावे" [पा० सू० ३।३।१८] घञ् । उपयोगः सामान्येन ज्ञानं दर्शनञ्चोच्यते । स जीवस्य लक्षणं भवति । कर्म-कर्मक्षयोभयनिमित्तवशादुत्पद्यमानश्चैतन्यानुविधायी परिणाम इत्यर्थः । तेन उपयोगेन लक्षणभूतेन कर्मबन्धबद्धोऽप्यात्मा लक्ष्यते दुर्वर्णसुवर्णयोर्बन्धं प्रत्येकत्वेऽपि वर्णादिभेदवत् । एवं सति कश्चिदाह–लक्षणेन आत्मा लक्ष्यते । तच्च लक्षणमात्मनः स्वरूपं स्वतत्त्वमेव । स्वतत्त्व-लक्षणयोः को भेदो वर्त्तते ? सत्यम्; स्वतत्त्वं लक्ष्यं भवेत्, लक्षणं तु लक्ष्यं न भवेदिति स्वतत्त्वलक्षणयोर्महान् भेदः । ७ ।

स द्विविधोऽष्टचतुर्भेदः ॥ ९ ॥

द्वौ विधौ प्रकारौ यस्य स द्विविधः । अष्ट च चत्वारश्च अष्टचत्वारः, ते भेदा यस्य उपयोगस्य स अष्टचतुर्भेदः । स उपयोगः संक्षेपेण द्विविधो भवति ज्ञानदर्शनभेदात् । विस्तरेण तु ज्ञानोपयोगोऽष्टभेदः । दर्शनोपयोगश्चतुर्भेदः । के ते ज्ञानोपयोगस्य अष्ट भेदाः, के वा दर्शनोपयोगस्य चत्वारो भेदाः इति चेत् ? उच्यते–मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानं मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं चेति ज्ञानोपयोगस्य अष्ट भेदाः । चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं चेति दर्शनोपयोगस्य चत्वारो भेदाः । साकारं ज्ञानं निराकारं दर्शनम् । कोऽर्थः ? वस्तुनो विशेषपरिज्ञानं ज्ञानम् । विशेषमकृत्वा सत्तावलोकनमात्रं दर्शनम् । तच्च ज्ञानं दर्शनं च । छद्मस्थानां पूर्वं दर्शनं भवति पश्चात् ज्ञानमुत्पद्यते । निरावरणानां तु अर्हत्सिद्धसयोगकेवलिनां दर्शनं ज्ञानञ्च युगपद्भवति । यदि दर्शनं पूर्वं भवति ज्ञानं पश्चात् भवति तर्हि ज्ञानस्य ग्रहणं पूर्वं किं क्रियते ? इत्याह–सत्यम् । "अल्पस्वरतरं तत्र पूर्वम्, यच्चार्चितं द्वयोः" [कात० २।५।१२, १३] इत्युभयप्रकारेणापि ज्ञानस्य पूर्वनिपातः । सम्यग्ज्ञानस्याधिकारे पूर्वं ज्ञानं पञ्चविधमुक्तम् । इह तु उपयोगनिरूपणे मत्यादिविपर्ययोऽपि ज्ञानमुच्यते । इत्यष्टविधो ज्ञानोपयोगः कथ्यते । तथा चोक्तं ज्ञानदर्शनयोर्लक्षणम्–

"सत्तालोचनमात्रमित्यपि निराकारं मतं दर्शनं
साकारं च विशेषगोचरमिति ज्ञानं प्रवादीच्छया ।
तेनैते[2] क्रमवर्तिनी सरजसां प्रादेशिके सर्वतः
स्फूर्जन्ती युगपत्पुनर्विरजसां युष्माकमङ्गातिगाः[3] ॥ १ ॥" [प्रतिष्ठा० २।९०

एवंविध उपयोगो विद्यते येषां त उपयोगिनः ।

ते च कति प्रकारा भवन्तीति प्रश्ने सूत्रमिदमाहुराचार्याः—

संसारिणो मुक्ताश्च ॥ १० ॥

---

१ ज्ञानग्र– आ०, द०, ज० । २ ते नेत्रे क्र– ता०, ज०, आ० । तेनेति क्र– व० । ३ –मङ्गान्तिकाः आ० ।

संसरणं संसारः पञ्चप्रकारपरिवर्तनमित्यर्थः। संसारो विद्यते येषां ते संसारिणः। पञ्चप्रकारात् परिवर्तनान्मुच्यन्ते स्म मुक्ताः, संसारान्निवृत्ता इत्यर्थः। चकारः परस्परसमुच्चये वर्तते। संसारिणश्च जीवा भवन्ति, मुक्ताश्च जीवा भवन्तीति समुच्चयस्यार्थः। ननु मुक्ताः पूज्याः संसारिणस्तु तादृक्पूज्या न भवन्ति[1]। तर्हि संसारिणां ग्रहणं प्राक् किमित्युपन्यस्तम्? सत्यम्; पूर्वं संसारिणो भवन्ति पश्चान्मुक्ता भवन्तीति व्यवहारसंसूचनार्थं संसारिणां ग्रहणं पूर्वं कृतं स्वामिना उमास्वामिना। स्वामीति संज्ञा कथम्? उक्तं हि आचार्यादीनां लक्षणम्– ५

"पञ्चाचाररतो नित्यं मूलाचारविदग्रणीः।
चतुर्वर्णस्य संघस्य यः स आचार्य इष्यते॥ १॥
अनेकनयसङ्कीर्णशास्त्रार्थव्याकृतिक्षमः।
पञ्चाचाररतो ज्ञेय उपाध्यायः समाहितैः[2]॥ २॥ १०
सर्वद्वन्द्वविनिर्मुक्तो व्याख्यानादिषु कर्मसु।
विरक्तो मौनवान् ध्यानी साधुरित्यभिधीयते॥ ३॥
सर्वशास्त्रकलाभिज्ञो नानागच्छाभिवर्द्धकः।
महातपःप्रभाभावी भट्टारक इतीष्यते॥ ४॥
तत्त्वार्थसूत्रव्याख्याता स्वामीति [3]परिपठ्यते। १५
अथ क्रियाकलापस्य कर्त्ता वा मुनिसत्तमः॥ ५॥"

[नीतिसार श्लो० १५–१९]

अथ किं तत्पञ्चप्रकारं परिवर्तनमिति चेत्? उच्यते–द्रव्यक्षेत्रकालभवभावपरिवर्त्तन-भेदात् परिवर्त्तनं पञ्चविधम्। तत्र द्रव्यपरिवर्त्तनं द्विप्रकारम्–नोकर्मद्रव्यपरिवर्त्तन-द्रव्यकर्मप-रिवर्त्तनभेदात्। तत्र नोकर्मद्रव्यपरिवर्त्तनमुच्यते–औदारिकवैक्रियिकाहारकशरीरत्रयस्य पर्या- २० प्तिषट्कस्य च ये योग्यपुद्गला एकेन जीवेन एकस्मिन्समये गृहीताः स्निग्धरूक्षवर्णगन्धादि-भिस्तीव्रमन्दमध्यमभावेन च यथावस्थिताः द्वितीयादिषु समयेषु निर्जीर्णाः, अगृहीतान् अनन्त-वारान् अतीत्य मिश्रितांश्च अनन्तवारान् अतीत्य मध्यमगृहीतांश्च अनन्तवारान् अतीत्य, त एव पुद्गलाः तेनैव स्निग्धादिभावेन तेनैव तीव्रादिभावेन च तथावस्थितप्रकारेण च तस्यैव जीवस्य नोकर्मभावमापद्यन्ते यावत् तावत् समुदितं सर्वं त्रैलोक्यस्थितं पुद्गलद्रव्यं नोकर्मद्रव्य- २५ परिवर्तनं[6] कथ्यते।

अथ कर्मद्रव्यपरिवर्त्तनमुच्यते–एकस्मिन् समये एकेन[7] जीवेन अष्टप्रकारकर्मत्वेन ये

१ –न्तीति ब०। २ –हितः आ०, ब०, ज०, द०, व०। ३ परिपद्यते आ०। ४ –कका-माणश– ता०। ५ –दितो– आ०, द०, ब०, ज०। ६ –नमुच्यते– आ०, ब०, द०, ज०, व०। ७ एकेन भावेन आ०, ब०, द०, ज०।

पुद्गला गृहीताः समयाधिकामावलिकामतीत्य द्वितीयादिषु समयेषु निर्जीर्णाः प्रागुक्तेन क्रमेण त एव पुद्गलास्तेनैव प्रकारेण तस्य जीवस्य कर्मत्वमायान्ति समुदितं यावत्तावत् कर्मद्रव्यपरिवर्त्तनं कथ्यते । तथा चोक्तम्—

"सव्वे[1] वि पुग्गला खलु कमसो भुत्तुज्झिया य जीवेण ।
५ असइअणंतखुत्तो पुग्गलपरियट्टसंसारे ।।" [बारसअणु० २५]

तथा चेष्टोपदेशः—

"भुक्तोज्झिता मुहुर्मोहान्मया सर्वेऽपि पुद्गलाः ।
उच्छिष्टेष्विव तेष्वद्य मम विज्ञस्य का स्पृहा ।।" [इष्टोप० श्लो० ३०]

इति नोकर्मद्रव्यपरिवर्त्तनं द्रव्यकर्मपरिवर्त्तनं च द्विविधं द्रव्यसंसारं ज्ञात्वा तद्धेतुभूतं १० मोहकर्म न कर्त्तव्यमिति भावः ।

अथ क्षेत्रपरिवर्त्तनं निरूप्यते । तथा हि—सूक्ष्मनिगोदजीवोऽपर्याप्तकः सर्वजघन्यप्रदेशशरीरो लोकस्य अष्टमध्यप्रदेशान् स्वशरीरमध्ये कृत्वा उत्पन्नः, क्षुद्रभवग्रहणं जीवित्वा मृतः, स एव जीवः पुनस्तेनैव अवगाहेन[2] द्वौ वारावुत्पन्नस्त्रीन् वारानुत्पन्नश्चतुर्वारानुत्पन्न इत्येवं यावदङ्गुलस्य असंख्येयभागप्रमिताकाशप्रदेशास्तावतो वारान् तत्रैवोत्पद्य[3] पुनः एकैकप्रदेशाधि-१५ कत्वेन सर्वलोको निजजन्मक्षेत्रत्वमुपनीतो भवति यावत्तावत् क्षेत्रपरिवर्तनं कथ्यते । तथा चोक्तम्—

"सव्वं[4] हि लोगखेत्तं कमसो तं णत्थि जं ण उप्पणं ।
ओगाहणाए बहुसो परिभमिदो खेत्तसंसारे ।।" [बारसअणु० २६]

तथा च परमात्मप्रकाशः—

२० "सो[5] णत्थि को पएसो चउरासीलक्खजोणिमज्झम्मि ।
जिणधम्मं अलहन्तो जत्थ ण डुलुडुल्लिओ जीओ ।।" [परमात्म० १।६५]

इति क्षेत्रपरिवर्त्तनमनन्तवारान् जीवश्चकार । तथा ज्ञात्वा जिनधर्मे मतिः कार्येति भावः ।

कालपरिवर्त्तनं कथ्यते—उत्सर्पिणीकालप्रथमसमये कोऽपि जीव उत्पन्नो निजायुः-२५ समाप्तौ मृतः, स एव जीवो द्वितीयोत्सर्पिणीकालद्वितीयसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः, तृतीयोत्सर्पिणीकालतृतीयसमये[6] पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः, चतुर्थो-

---

१ सर्वेऽपि पुद्गलाः खलु क्रमशो भुक्तोज्झिताश्च जीवेन । असकृदनन्तकृत्वः पुद्गलपरिवर्तसंसारे ।। २ अवगाहनेन द० । ३ –त्पद्यते पु –आ०, द०, ब०, ज० । ४ सर्वं हि लोकक्षेत्रं क्रमशस्तन्नास्ति यत्र नोत्पन्नम् । अवगाहनया बहुशः परिभ्रमन् क्षेत्रसंसारे ।। ५ सो नास्ति कः प्रदेशः चतुरशीतिलक्षयोनिमध्ये । जिनधर्ममलभन् यत्र न परिभ्रमितो जीवो ।। ६ –येषु पु– आ०, ब०, द०, ज० ।

त्सर्पिणीकालचतुर्थसमये· पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः। एवं सर्वोत्सर्पिणीसमयेषु [1]जन्म गृह्णाति तथा सर्वोत्सर्पिणीसमयेषु मरणमपि गृह्णाति। यथा सर्वेषूत्सर्पिणीसमयेषु जन्ममरणानि गृह्णाति तथा सर्वेष्ववसर्पिणीसमयेषु जन्मानि मरणानि च गृह्णाति। एतावता कालेन एकं कालपरिवर्त्तनं भवति। [2]एवमनन्तानि [3]कालपरिवर्त्तनानि जीवेन कृतानि। तथा चोक्तम्– ५

"ओसप्पिणि-अवसप्पिणि-समयावलियासु णिरवसेसासु।
जादो मरिदो बहुसो भमणेण दु कालसंसारे[4] ॥१॥" [बारस अणु० २९]

एवंविधकालपरिवर्तनमपि जिनस्वामिसम्यक्त्वरहितेन जीवेन क्रियते। यदा तु जिनस्वामिसम्यक्त्वं जीवो गृह्णाति तदा सर्वसामग्रीं प्राप्य मुक्तो भवति। तेन कारणेन जिनस्वामिसम्यक्त्वमुपादेयमिति भावार्थः। तथा चोक्तम्— १०

"[5]कालु अणाइ अणाइ जिउ भवसायरु वि अणंतु।
जीवें विण्णि ण पत्ताइं जिणुसामिउ सम्मत्त॥१॥" [परमात्मप्र० २।१४३]

इदानीं भवपरिवर्तनोत्कीर्तनं क्रियते। भवपरिवर्त्तनं चतुर्गतिपरिभ्रमणम्। तत्र तावन्नरकगतिपरिवर्तनमुच्यते। नरकगतौ दशवर्षसहस्राणि जघन्यमायुः। केनचित् प्राणिना दशवर्षसहस्रप्रमितमायुः प्रथमनरके भुक्तम्। पुनर्भ्रमणं कृत्वा तादृशमायुस्तत्रैव नरके भुक्तम् १५ एवं पुनर्भ्रान्त्वा तृतीयवारेऽपि तादृशमायुर्भुक्तम्, एवं चतुर्थादिवारेषु तादृशमायुर्दशवर्षसहस्राणां यावन्तः समयास्तावतो वारान् स एव जीवस्तादृशमायुर्भुङ्क्ते। पश्चादेकैकसमयाधिकमायुः पुनः पुनर्भ्रान्त्वा भुङ्क्ते यावत्त्रयस्त्रिंशत् सागरोपमाणि परिपूर्णानि भवन्ति। समयाधिकतया यदि परिपूर्णान्यायूंषि भवन्ति तदा गणनीयानि भवन्ति, अधिकतया तु त्रयस्त्रिंशत्सागरोपमाण्यपि न गणनीयानि भवन्ति। इदानीं तिर्यग्भवः सम्भाव्यते। स एव २० जीवस्तिर्यक्त्वेऽन्तर्मुहूर्त्तायुषा उत्पन्नः पुनर्भ्रान्त्वा अन्तर्मुहूर्त्तायुरुत्पद्यते। एवं तृतीयचतुर्थपञ्चमादिवारान् तिर्यक्त्वेऽन्तर्मुहूर्तायुरुत्पद्यते यावदन्तर्मुहूर्तायुषः समयाः परिपूर्णा भवन्ति। तत्पश्चात् एकैकसमयाधिकायुरुत्पद्यते। यावत्त्रीणि पल्यानि परिपूर्णानि भवन्ति तावत्तिर्यग्भवपरिवर्त्तनं परिपूर्णं भवति। तत्रापि समयाधिकतया यो भवो गृहीतः स गण्यते, अन्यथागृहीतो भवो न गण्यत इत्यर्थः। यथा तिर्यग्भवपरिवर्त्तनं सूचितं तथा मनुष्यभवपरिवर्त्तनं २५ ज्ञातव्यम्। देवगतिपरिवर्त्तनं तु नरकगतिपरिवर्त्तनवत् बोद्धव्यम्। अत्रायं विशेषः–देवगतौ उपरिमग्रैवेयकसम्बन्ध्येकत्रिंशत्सागरोपमपर्यन्तसमयाधिकतया परिवर्तनं ज्ञातव्यम्। तथा चोक्तम्—

---

१ जन्ममरणं गृ– आ०, ब०, द०, ज०,। २ एवं आ०, ब०, द०, ज० ता०। ३ कालः परिवर्तति ब०। ४ उत्सर्पिण्यवसर्पिणिसमयावलिकासु निरवशेषासु। जातो मृतो बहुशो भ्रमणेन तु कालसंसारे॥ ५ कालोऽनादिः अनादिर्जीवः भवसागरोऽप्यनन्तः। जीवेन द्वे न प्राप्ते जिनः स्वामी सम्यक्त्वम्॥

"[1]णिरयादिजहण्णादिसु जावदि उवरिल्लिया दु गेवेज्जा।
मिच्छत्तसंसिदेण दु बहुसो वि भवट्ठिदी भमिदा॥" [बारस अणु० २८]

एवं भवपरिवर्त्तनं मिथ्यात्वमूलकारणं विज्ञाय परमानन्दपदं [2]यियासुना मिथ्यात्वं परिहृत्य अनन्तसौख्यकारणमोक्षपदप्रदायकसम्यक्त्वादिकमाराधनीयम्। भवमध्ये तु किमप्य-
५ पूर्वं नास्तीति भावार्थः। उक्तञ्च—

"अत्रास्ति जीव न च किञ्चिदभुक्तमुक्तं स्थानं त्वया निखिलतः परिशीलनेन।
तत्केवलं विगलिताखिलकर्मजालं स्पृष्टं कुतूहलधिया न हि जातु धाम॥"
[यश० पू० पृ० २७१]

इदं सुभाषितं क्षेत्रपरिवर्त्तनेऽपि योजनीयम्।

१० इदानीं भावपरिवर्त्तनं कथ्यते—पञ्चेन्द्रियसंज्ञिपर्याप्तकुदृष्टेर्जीवस्य सर्वजघन्यां स्वयोग्यां ज्ञानावरणप्रकृतेः स्थितिमन्तःकोटीकोटिसंज्ञां स्वीकुर्वतः कषायाध्यवसायस्थानान्य-संख्येयलोकप्रमितानि संख्यातासंख्यातानन्तभागवृद्धि-संख्यातासंख्यातानन्तगुणवृद्धिरूपषट्-स्थानपतितानि तत्स्थितियोग्यानि भवन्ति। तत्रान्तःकोटिकोटिस्थितौ सर्वजघन्यकषाया-ध्यवसायस्थाननिमित्तानि, अनुभागाध्यवसायस्थानान्यसंख्येयलोकप्रमितानि भवन्ति। प्रकृति-
१५ स्थितिबन्धानुभागप्रदेशस्वरूपनिरूपणपरेयं गाथा—

"[3]पयडिट्ठिदिअणुभागप्पदेसभेदादु चदुविधो बंधो।
जोगा पयडिपदेसा ट्ठिदिअणुभागा कसायदो होंति॥१॥" [मूलाचा०गा० १२२१]

तथा चोक्तम्—

"प्रकृतिः परिणामः स्यात् स्थितिः कालावधारणम्।
२० अनुभागो रसो ज्ञेयः प्रदेशः प्रचयात्मकः॥ २॥" [ ]

एवमन्तःकोटीकोटिसंज्ञां सर्वजघन्यां स्थितिं स्वीकुर्वतः सर्वजघन्यं च कषाया-ध्यवसायस्थानं स्वीकुर्वतः सर्वजघन्यमेव अनुभागस्थानमनुभवस्थानं कर्मरसास्वादनस्थानञ्च स्वीकुर्वतो मिथ्यादृष्टेर्जीवस्य तद्योग्यं ज्ञानावरणस्थित्यनुभागोचितं सर्वजघन्ययोगस्थानं भवति। तेषामेव स्थितिरसकषायानुभागस्थानानां द्वितीयमसंख्येयभागवृद्धिसहितं योगस्थानं
२५ भवति। एवञ्च तृतीयादिषु अनन्तभागवृद्ध्यनन्तगुणवृद्धिरहितानि चतुःस्थानपतितानि श्रेण्यसंख्येयभागप्रमितानि योगस्थानानि भवन्ति। तथा तामेव स्थितिं तदेव कषायाध्यवसाय-स्थानञ्च स्वीकुर्वतः द्वितीयमनु[4]भवाध्यवसायस्थानं भवति। तस्य च द्वितीयानुभागाध्यवसाय-स्थानस्य योगस्थानानि पूर्ववद्वेदितव्यानि। एवं तृतीयाद्यनुभवाध्यवसायस्थानेष्वपि आ असंख्ये-

---

१ नरकादिजघन्यादिषु यावत् उपरिमग्रैवेयकानि। मिथ्यात्वसंश्रितेन तु बहुशोऽपि भव-स्थितिः भ्रमिता॥ २ पिपासतां मि– आ०, ब०, द०, ज०,। ३ प्रकृतिस्थित्यनुभागप्रदेशभेदाच्चु चतुर्विधो बन्धः। योगात् प्रकृतिप्रदेशौ स्थित्यनुभागौ कषायतो भवन्ति॥ ४ –मनुभावा– ता०।

यलोकपरिसमाप्तयोगस्थानानि भवन्ति। एवं तामेव स्थितिमापद्यमानस्य द्वितीयं कषायाध्यवसायस्थानं भवति। तस्यापि द्वितीयस्यापि कषायाध्यवसायस्थानस्यापि अनुभवाध्यवसायस्थानानि योगस्थानानि च पूर्ववद्वेदितव्यानि। एवं तृतीयादिष्वपि कषायाध्यवसायस्थानेष्वपि अ(आऽ)संख्येयलोकपरिसमाप्तिवृद्धिक्रमो वेदितव्यः। उक्ताया जघन्यायाः स्थितेः समयाधिकायाः कषायादिस्थानानि पूर्ववत् एकसमयाधिकक्रमेण आ उत्कृष्टस्थितेस्त्रिंशत्सागरोपमकोटीकोटिपरिमितायाः कषायादिस्थानानि वेदितव्यानि। अनन्तभागवृद्धिः, असंख्येयभागवृद्धिः, संख्येयभागवृद्धिः, संख्येयगुणवृद्धिः, असंख्येयगुणवृद्धिः अनन्तगुणवृद्धिः, इमानि षट्स्थानानि वृद्धिः(द्धेः)। हानि(ने)रपि तथैव अनन्तभागवृद्ध्यनन्तगुणवृद्धिरहितानि चत्वारि स्थानानि ज्ञातव्यानि। एवं यथा ज्ञानावरणकर्मपरिवर्तनमुक्तं तथाऽन्येषामपि सप्तानां कर्मणां मूलप्रकृतीनां परिवर्तनं ज्ञातव्यम्। उत्तरप्रकृतीनामपि परिवर्त्तनक्रमो ज्ञातव्यः। तदेतत्सर्वं[1] समुदितं भावपरिवर्त्तनं भवति। तथा चोक्तम्—

"सव्वा पयडिट्ठिदिओ अणुभागपदेसबंधठाणाणि।
मि[2]च्छत्तसंसिदेण य भमिदो पुण भावसंसारे[3]॥" [बारस० गा० २९]

एवं भावसंसारः सर्वोऽपि मिथ्यात्वमूलः सूरिभिः सूचितो भवति। तदेवं ज्ञायते मिथ्यात्वसदृशमन्यत्पापं नास्ति। उक्तञ्च समन्तभद्रस्वामिना—

"न सम्यक्त्वसमं किञ्चित् त्रैकाल्ये त्रिजगत्यपि।
श्रेयोऽश्रेयश्च मिथ्यात्वसमं नान्यत्तनूभृताम्॥" [रत्नक० श्लो० ३४]

एवंविधात् पञ्चप्रकारात् संसारपरिवर्तनाद्ये मुक्तास्ते सिद्धाः प्रोच्यन्ते। अत्र कर्मसामर्थ्यसूचनार्थं दोहकमिदमुच्यते—

"क[4]म्मइं दिढघणचिक्कणइं गरुयइं वज्जसमाइं।
णाणवियक्खणु जीवडउ उप्पहि पाडहिं ताइं॥" [परमात्मप्र० १।७८]

तदपि नैकान्तेन वर्तते।

"क[5]त्थवि बलिओ जीवो कत्थवि बलियाइं होंति कम्माइं।
जीवस्स य कमस्स य पुव्वणिबद्धाइं वैराइं॥" [ ]

अथ ये संसारिणो जीवाः प्रोक्तास्ते कति प्रकारा भवन्तीति प्रश्ने द्विप्रकारा भवन्तीति द्विप्रकारसूचनार्थं सूत्रमिदमाहुराचार्याः—

समनस्कामनस्काः॥ ११ ॥

---

१ सर्वमुदितं भा– आ०, ब०, ज,० द०। २ "जीवो मिच्छत्तवसा भमिदो पुण भावसंसारे।" बारस०। ३ सर्वाः प्रकृतिस्थितयः अनुभागप्रदेशबन्धस्थानानि। मिथ्यात्वसंश्रितेन च भ्रमितः पुनः भावसंसारे॥ ४ कर्माणि दृढघनचिक्कणानि गुरुकाणि वज्रसमानि। ज्ञानविचक्षणं जीवमुत्पथे पातयन्ति तानि॥ ५ कुत्रापि बलवान् जीवो कुत्रापि बलवन्ति भवन्ति कर्माणि। जीवस्य च कर्मणश्च पूर्वनिबद्धानि वैराणि॥

मनश्चित्तं तद्द्विप्रकारम्-द्रव्यभावमनोभेदात्। पुद्गलविपाकिकर्मोदयापेक्षं द्रव्यमनः। वीर्यान्तरायनोइन्द्रियावरणक्षयोपशमापेक्षया आत्मनो विशुद्धिर्भावमनः। ईदृग्विधेन मनसा वर्तन्ते ये ते समनस्काः। न विद्यते पूर्वोक्तं द्विप्रकारं मनो येषां ते अमनस्काः। समनस्काश्च अमनस्काश्च समनस्काऽमनस्का द्विप्रकाराः संसारिणो जीवा भवन्ति। अत्र द्वन्द्वसमासे ५ गुणदोषविचारकत्वात् समनस्कशब्दस्य अर्चितत्वम्, गुणदोषविचारकत्वाभावात् अमनस्क-शब्दस्य अनर्चितत्वम्। "यच्चार्चितं द्वयोः" [कात० २।५।१३] इति वचनात् समनस्क-शब्दस्य पूर्वनिपातः।

भूयोऽपि संसारिजीवप्रकारपरिज्ञानार्थं सूत्रमिदमाचक्षते आचार्याः—

संसारिणस्त्रसस्थावराः ॥ १२ ॥

१० संसारो विद्यते येषां ते संसारिणः। त्रसनामकर्मोदयापादितवृत्तयस्त्रसाः[1], न पुनः त्रस्यन्तीति त्रसाः मारुतादीनां त्रसत्वप्रसक्तेः गर्भादिषु स्थावरत्वप्रसक्तेश्च। स्थावरनाम-कर्मोदयोपजनितविशेषाः स्थावराः, न पुनः तिष्ठन्तीत्येवं शीलाः स्थावराः, [2]तथा सति मारुता-दीनामपि त्रसत्वप्रसक्तिः। "कसिपिसिभासीशस्थाप्रमदाश्च" [कात० ४।४।४७] इत्यनेन वरप्रत्ययेन रूपमेवं सिद्धम्। त्रसाश्च स्थावराश्च त्रसस्थावराः संसारिणो जीवा भवन्ति।

१५ ननु 'संसारिणो मुक्ताश्च' इत्यत्र संसारिग्रहणं वर्त्तत एव पुनः संसारिग्रहणमनर्थकम्; इत्याह–सत्यम्। तेनैव पूर्वोक्तसंसारिग्रहणेनैव यदि संसारिग्रहणं सिद्धं तर्हि 'समनस्काऽमनस्काः' अस्मिन्सूत्रे यथासंख्यत्वात् संसारिणः समनस्का भवन्ति मुक्ता अमनस्का भवन्ति इत्येवमर्थः सञ्जायते। तदर्थसम्भावनमनुपपन्नम्। तस्मात् समनस्कामनस्काश्च ये संसारिणो वर्त्तन्ते तदपेक्षया पुनः संसारिग्रहणम्, अन्यथा संसारिशब्दग्रहणमन्तरेण 'त्रसस्थावराः' इति यदि २० सूत्रं क्रियते तथापि संसारिणस्त्रसाः मुक्ताः स्थावरा इत्यपि अनुपपन्नोऽर्थः समुत्पद्यते। तेन कारणेन 'संसारिणस्त्रसस्थावराः' इति सूत्रं कृतम्। ते संसारिणो द्विप्रकारा भवन्ति त्रसाः स्थावराश्च। द्वीन्द्रियादारभ्य अयोगकेवलिपर्यन्तास्त्रसाः। तस्मात्कारणात् चलनाऽचलनापेक्षं[3] त्रसस्थावरत्वं न भवति। किं तर्हि? कर्मोदयापेक्षं त्रसस्थावरत्वं भवति। तेन कारणेन त्रसनामकर्मोदयवशीकृतास्त्रसाः, स्थावरनामकर्मोदयवशवर्तिनः स्थावरा इत्युच्यन्ते। त्रसाणा-२५ मल्पस्वरत्वात् सर्वोपयोगसम्भवेन अर्चितत्वाच्च पूर्वनिपातः।

त्रसस्थावरेषु त्रसानां [4]पूर्वं ग्रहणम्, स्थावराणां पश्चाद्ग्रहणम् इत्यनुक्रममुल्लङ्घ्य एके-न्द्रियाणामतिबहुवक्तव्यस्याभावात् स्थावरभेदात् (न्) पूर्वमेवाहुः—

पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥ १३ ॥

पृथिवी च आपश्च तेजश्च वायुश्च वनस्पतिश्च पृथिव्यप्तेजोवायुवनस्पतयः। तिष्ठन्ति ३० इत्येवं शीलाः स्थावराः। एते पृथिव्यादय एकेन्द्रियजीवविशेषाः स्थावरनामकर्मोदयात् स्थावराः

---

१ कर्मोदयोत्पादित- आ०, ब०, द०, ज०। २ तथा मा- आ०, ब०, द०, ज०। ३ -पेक्षत्वं त्र- आ०, ब०, द०, ज०। ४ पूर्वंग्र- आ०, ब०, द०, ता०, व०।

कथ्यन्ते। ते तु प्रत्येकं चतुर्विधाः-पृथिवी, पृथिवीकायः, पृथिवीकायिकः, पृथिवीजीवः। आपः, अप्कायः, अप्कायिकः, अप्जीवः। तेजः, तेजःकायः, तेजःकायिकः, तेजोजीवः। वायुः, वायुकायः, वायुकायिकः, वायुजीवः। वनस्पतिः, वनस्पतिकायः, वनस्पतिकायिकः, वनस्पतिजीव इति। तत्र अध्वादिस्थिता धूलिः पृथिवी। इष्टकादिः पृथिवीकायः। पृथिवीकायिकजीवपरिहृतत्वात् इष्टकादिः पृथिवीकायः कथ्यते मृतमनुष्यादिकायवत्। तत्र स्थावरकायनामकर्मोदयो नास्ति, तेन तद्विराधनायामपि दोषो न भवति। पृथिवीकायो विद्यते यस्य स पृथिवीकायिकः। इन् विषये इंको[1] वाच्यः। तद्विराधनायां दोष उत्पद्यते। विग्रहगतौ प्रवृत्तो यो जीवोऽद्यापि पृथिवीमध्ये नोत्पन्नः समयेन समयद्वयेन समयत्रयेण वा यावदनाहारकः पृथिवीं कायत्वेन यो गृहीष्यति प्राप्तपृथिवीनामकर्मोदयः कार्मणकाययोगस्थः स पृथिवीजीवः कथ्यते। षट्त्रिंशत् पृथिवीभेदाः। तथाहि—

"मृत्तिका वालिका चैव शर्करा चोपलः शिला।
लवणायस्तथा ताम्रं त्रपु सीसकमेव च॥ १॥
रूप्यं सुवर्णं वज्रश्च हरितालं च हिङ्गुलम्।
मनःशिला तथा तुत्थमञ्जनं च प्रवालकम्॥ २॥
झीरोलकाभ्रकं चैव मणिभेदाश्च बादराः।
गोमेदो रुजकोऽङ्कश्च स्फटिको लोहितप्रभः॥ ३॥
वैडूर्यं चन्द्रकान्तश्च जलकान्तो रविप्रभः।
गैरिकश्चन्दनश्चैव वर्वरो बक एव च॥ ४॥
मोचो मसारगल्पश्च सर्व एते प्रदर्शिताः।
संरक्ष्याः पृथिवीजीवाः मुनिभिः ज्ञानपूर्वकम्[2] ॥५॥" [ ]

वालिका रूक्षाङ्गा[3] नद्युद्भवा। शर्करा परुषरूपा, त्र्यस्रचतुरस्रादिरूपा। उपलो वृत्तं[4]पाषाणः। शिला बृहत्पाषाणः। त्रपु वङ्गम्। अञ्जनं सौवीराञ्जनम्। [5]झीरोलका अभ्रवालुका चिक्यचिक्यरूपा। गोमेदः कर्केतनमणिः गोरोचनावर्णः। रुजको राजवर्तमणि[6]रतसीपुष्पवर्णः। [7]अङ्कः

१ इक आदेशः। २ "पुढवी य सक्करा वालुगा य उवले सिला य लोंणूसे। अय तंव तउय सीसग, रुप्प सुवन्ने य वेरे य॥ हरियाले हिंगुलए, मणोसिला सीसगंऽजण पवाले। अब्भपडलऽब्भवालुय, वायरकाए मणिविहाणा॥ गोमेज्जए य रुयए, अंके फलिहे य लोहियक्खे य। मरगय मसारगल्ले, भुयमायेण इंदनीले य॥ चंदप्पभवेरुलिए, जलकंते चेव सूरकंते य। एए खरपुढवीए नामं छत्तीसयं होंति॥" -आचा० नि० गा० ७३-७६। "मृत्तिका वालुका चैव......"- तत्त्वार्थसा० श्लो० ५८-६२। ३ -क्षागंगानद्यु- आ०, द०, ज०, ब०। -क्षाङ्गाद्यु- ता०। ४ छन्नपा- ज०। ५ डीरो- ज०, द०। क्रिरो- त०, सा०। ६ -वर्त्तोम- आ० द०, ज०। -वर्त्तिम- ब०। ७ अंजकः आ०, ब०, द०, ज०।

पुलकमणिः प्रवालवर्णः । स्फटिकमणिः स्वच्छरूपः । रोहितप्रभः पद्मरागः । वैडूर्यं मयूरकण्ठवर्णम् । जलकान्त उदकवर्णः । रविप्रभः सूर्यकान्तः । गैरिको रुधिराख्यमणिः गैरिकवर्णः । चन्दनः श्रीखण्डसमगन्धवर्णो मणिः । वर्वरो मरकतमणिः । बकः पुष्परागमणिः बकवर्णः । मोचो नीलमणिः कदलीपत्रवर्णः । मसारगल्पो मसृणपाषाणमणिः, विद्रुममणिवर्णः ।
५ शर्करोपलशिलावज्रप्रवालवर्जिताः शुद्धपृथिवीविकाराः । शेषाः खरपृथिवीविकाराः । एतेष्वेव च पृथिव्यष्टकमन्तर्भवति । तत्किम् ? मेर्वादिशैलाः, द्वीपाः, विमानानि, भवनानि, वेदिकाः, प्रतिमाः, तोरणस्तूपचैत्यवृक्षजम्बूशाल्मलिधातक्यः, रत्नाकरादयश्च ।

एवं विलोडितं यत्र तत्र विक्षिप्तं वस्त्रादिगालितं जलमाप उच्यते । अप्कायिकजीव-परिहृतमुष्णं च जलम् अप्कायः प्रोच्यते । अप्कायो विद्यते यस्य स अप्कायिकः । अपः
१० कायत्वेन यो गृहीष्यति विग्रहगतिप्राप्तो जीवः स अप्जीवः कथ्यते ।

इतस्ततो विक्षिप्तं जलादिसिक्तं वा प्रचुरभस्मप्राप्तं वा मनाक्तेजोमात्रं तेजः कथ्यते । भस्मादिकं तेजसा परित्यक्तं शरीरं तेजस्कायो निरूप्यते । तद्विराधने दोषो नास्ति, स्थावरकाय-नामकर्मोदयरहितत्वात् । तेजः कायत्वेन गृहीतं येन सः तेजस्कायिकः । विग्रहगतौ प्राप्तो जीवस्तेजोमध्येऽवतरिष्यन् तेजोजीवः प्रतिपाद्यते ।

१५ वायुकायिकजीवसन्मूर्च्छनोचितो वायुर्वायुमात्रं वायुरुच्यते । वायुकायिकजीवपरिहृतः सदा विलोडितो वायुर्वायुकायः कथ्यते । वायुः कायत्वेन गृहीतो येन स वायुकायिकः कथ्यते । वायुं कायत्वेन गृहीतुं प्रस्थितो जीवो वायुजीव उच्यते ।

सार्द्रः छिन्नो भिन्नो मर्दितो वा लतादिर्वनस्पतिरुच्यते । शुष्कादिर्वनस्पतिर्वनस्पति-कायः । जीवसहितो वृक्षादिर्वनस्पतिकायिकः । विग्रहगतौ [५]सत्यां वनस्पतिर्जीवः वनस्पति-
२० जीवो भण्यते ।

प्रत्येकं चतुर्षु भेदेषु मध्ये पृथिव्यादिकं कायत्वेन गृहीतवन्तो जीवा विग्रहगतिं प्राप्ताश्च प्राणिनः स्थावरा ज्ञातव्याः, तेषामेव पृथिव्यादिस्थावरकायनामकर्मोदयसद्भावात्, न तु पृथिव्यादयः पृथिवीकायादयश्च स्थावराः कथ्यन्ते, अजीवत्वात् कर्मोदयभावाभावाच्च ।

एतेषां कति प्राणाः ? स्पर्शनेन्द्रियप्राणः, कायबलप्राणः, उच्छ्वास-निश्वासप्राणः,
२५ आयुःप्राणश्च, चत्वारः प्राणाः सन्ति । तेनैते पञ्चतयेऽपि स्थावराः प्राणिन उच्यन्ते ।

यद्येते स्थावराः, तर्हि त्रसा उच्यन्ताम् । ते के इति प्रश्ने सूत्रमिदमुमास्वा-मिनः प्राहुः—

द्वीन्द्रियादयस्त्रसाः ॥ १४ ॥

---

१ रुधिराकारम- आ०, ब०, द०, ज० । २ -गल्लो म- ज० । ३ मेरुपर्वतादि आ०, ज०, द०, ब० । ४ -कर्मरहि- ता०, व० । ५ सत्यां वनस्पतिजीवो भ- ता०, व० । ६ -दयाभा-वाच्च आ०, ब०, द०, ज० । ७ -वरप्रा- आ०, ब०, द०, ता०, व० ।

द्वे इन्द्रिये स्पर्शनरसनलक्षणे यस्य स द्वीन्द्रियः । द्वीन्द्रिय आदिर्येषां ते द्वीन्द्रियादयः । त्रस्यन्तीति त्रसाः । द्वीन्द्रियादयः पञ्चेन्द्रियपर्यन्तास्त्रसाः कथ्यन्ते । स्पर्शनरसनयुक्ता द्वीन्द्रियाः–कुक्षिक्रमयः । शङ्खा वादनहेतवः । क्षुल्लकाः क्षुल्लकशङ्खाः । वराटकाः कपर्दकाः । अक्षा महाकपर्दकाः । अरिष्टबालकाः शरीरसमुद्भवतन्त्वाकारवालकाः । गण्डुवालकाः किञ्चुलकाः । महालवा अलसका इति यावत् । शम्बूकाः सामान्यजलशुक्तयः । लघुशङ्खा इति प्रभाचन्द्रः । ५ शुक्तयो मुक्ताफलहेतवः, अन्याश्च शुक्तयः । पुलविका रक्तपा जलौकस इति यावत् । आदिशब्दात् व्रणकृमयः गुंवडकृमयो नखादयो ज्ञातव्याः । त्रीन्द्रियाः स्पर्शनरसनघ्राणसहिताः—कुन्थवः उद्देहिकाः । वृश्चिका गोभिकाः । खर्जूरकाः कर्णशलाकाः, शतपद्यपरनाम्नी(म्न्यः) । इन्द्रगोपकाः रक्तकीटाः, इन्द्रवधूटिकाऽपरनाम्ना (मानः) । यूका लिक्षाः । मत्कुणाः पिपीलिकाः[1] मुंग्यपरनामिकाः । चतुरिन्द्रियाः स्पर्शनरसनघ्राणचक्षुःसहिताः–दंशा वनमक्षिका- १० ऽपरनामानः । मशका मशकेतराश्च मक्षिकाः प्रसिद्धाः । पतङ्गाश्च प्रसिद्धाः । कीटा गोवरकीटाः रुधिरकीटादयश्च । भ्रमराः षट्पदाः । मधुकर्यो मधुमक्षिकाः । गोमक्षिकाः बगायिकाः विश्वम्भराः । लूताः कोलिका इति यावत् ।

पञ्चेन्द्रियाः स्पर्शनरसनघ्राणचक्षुःश्रोत्रसहिताः—अण्डायिकाः सर्पगृहकोकिलाः ब्राह्मण्यादयः । पोतायिकाः[2]–मार्जारादिगर्भविशेषः पोतः, तत्र कर्मवशादुत्पत्त्यर्थमाय आग- १५ मनं पोतायः, पोतायो विद्यते येषां ते पोतायिकाः, अस्त्यर्थे इको वाच्यः । श्वमार्जारसिंहव्याघ्रचित्रकादयोऽनावरणजन्मानः । जरायिकाः–जालवत्प्राणिपरिवरणं विततमांसरुधिरं जरायुः कथ्यते, तत्र कर्मवशादुत्पत्त्यर्थमाय आगमनं जरायः, जरायुरेव जरः, तत्र आयः जरायः, जरायो विद्यते येषान्ते जरायिकाः, पृषोदरादित्वात् युलोपः । गोमहिषीमनुष्यादयः सावरणजन्मानः । रसायिकाः रसो घृतादिस्तत्र चर्मादियोगे आय आगमनं विद्यते २० येषां ते रसायिकाः । [3]प्रथमधातूद्भवा वा रसायिकाः ।

"रसासृग्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ।" [अष्टाङ्गहृ० १ । १३]

इति वचनात् रसः प्रथमो धातुः । ते[4] सूक्ष्मत्वात् वक्तुं न शक्यन्ते । संस्वेदः प्रस्वेदः, तत्र भवाः संस्वेदिमाः "एवमादित्वात्" [ ] भावार्थे इमप्रत्ययः । चक्रवर्त्तिकक्षाद्युत्पन्नास्तेऽपि सूक्ष्मत्वाद् वक्तुं न शक्यन्ते । सम्मूर्च्छिमाः, समन्तात् पुद्गलानां मूर्च्छनं २५ संघातीभवनं संमूर्च्छः तत्र भवाः सम्मूर्च्छिमाः । इमप्रत्ययः पूर्ववत् । सर्पोन्दुरगोखुरमनुष्यादयोऽपि सम्मूर्च्छनादुत्पद्यन्ते । उक्तञ्च—

"शुक्रसिंघाणकश्लेष्मकर्णदन्तमलेषु च ।
अत्यन्ताशुचिदेशेषु सद्यः सम्मूर्च्छना भवेत् ॥" [ ]

---

१ –काः कर्णशलाकामुं– आ०, ब०, द०, ज० । २ –काश्च मा– आ०, ब०, द०, ज० । ३ –मदालूद्भ– ता० । ४ तेन सू– आ०, ब०, द०, ज० । ५ –न्दुरदुरगो– ता० । ६ –गोखु– द० । ७ –देहेषु आ०, ब०, द०, ज० । ८ –नोभ– आ०, ब०, द०, ज० ।

उद्भेदिमाः-उद्भेदनमुद्भेदः, भूमिकाष्ठपाषाणादिकं भित्त्वा ऊर्ध्वं निस्सरण-मुद्भेदः, उद्भेदो विद्यते येषान्ते उद्भेदिमाः, अत्रास्त्यर्थे इमप्रत्ययः[1]। यथा रत्नानि[2] भङ्क्त्वा केनचिद् दुर्दुरो[3] निष्कासितः। उपपादिमाः-उपेत्य गत्वा पद्यते जायते यस्मिन्नित्युपपादः, देवनारकाणां जन्मस्थानम्, तत्र भवा उपपादिमाः। प्रमादिनां दुष्परिणामवशात् तेषामनप-
५ वर्त्यायुषामपि हिंसोत्पद्यते, न तु ते म्रियन्ते। तथा चोक्तम्—

"स्वयमेवात्मनाऽऽत्मानं हिनस्त्यात्मा कषायवान्।
पूर्वं प्राण्यन्तराणान्तु[4] पश्चात्स्याद्वा न वा वधः॥"[5] [ ]

अन्यथा सालिसिक्थो मत्स्यः कथं सप्तमं नरकं गतः? "प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा।" [त० सू० ७।१३] इति च वक्ष्यति। एते त्रसाश्चतुर्विधा भवन्ति।

१० एतेषां कति प्राणा भवन्ति? द्वीन्द्रियस्य द्वे इन्द्रिये, आयुः, उच्छ्वासनिश्वासः कायबलं वाग्बलमेते षट्प्राणाः भवन्ति। त्रीन्द्रियस्य षट् पूर्वोक्ताः घ्राणेन्द्रियाधिकाः सप्तप्राणा भवन्ति। चतुरिन्द्रियस्य सप्त पूर्वोक्ताश्चक्षुरिन्द्रियाधिकाः अष्टप्राणा भवन्ति। पञ्चेन्द्रियस्य तिरश्चोऽसंज्ञिनोऽष्टौ पूर्वोक्ताः श्रोत्रेन्द्रियाधिका नवप्राणा भवन्ति। पञ्चेन्द्रियसंज्ञितिर्यङ्मनुष्यदेवनारकाणां नव पूर्वोक्ता मनोबलाधिका दशप्राणा भवन्ति।

१५ अथ "द्वीन्द्रियादयस्त्रसाः" इति सूत्रे इन्द्रियसंख्या न कथिता, तानि कति भवन्तीति प्रश्ने सूत्रमिदमाहुराचार्याः—

पञ्चेन्द्रियाणि ॥ १५ ॥

कर्मसहितस्य जीवस्य स्वयमर्थान् गृहीतुमशक्तस्य अर्थग्रहणव्यापारे सहकारीणि इन्द्रियाणि भवन्ति। तानि तु इन्द्रियाणि पञ्चैव भवन्ति नाधिकानि, न च न्यूनानीति। परिभाषा-
२० सूत्रमिदम्। पायूपस्थवचःपाणिपादाख्यानि[6] पञ्च कर्मेन्द्रियाण्यप्यत्रोच्यन्ताम्[7]? इत्याह— सत्यम्। उपयोगप्रकरणे उपयोगसाधनानां[8] स्पर्शनादीनामेव पञ्चानां बुद्धीन्द्रियाणामेवात्र ग्रहणम्, न क्रियासाधनानां पाय्वादीनां ग्रहणमत्र वर्त्तते, कर्मेन्द्रियाणां पञ्चेति नियमाभावात्। अङ्गोपाङ्गनामकर्मनिष्पादितानां सर्वेषामपि क्रियासाधनत्वं वर्त्तत एव, तेन कर्मेन्द्रियाणि पञ्चैव न भवन्ति किन्तु बहून्यपि वर्त्तन्ते, तेनानवस्थानं पञ्चसङ्ख्यायाः।

२५ स्पर्शनादीनां पञ्चानामिन्द्रियाणामन्तर्भेदप्रकटनार्थं सूत्रमिदमाचक्षते विचक्षणाः—

द्विविधानि ॥ १६ ॥

द्वौ विधौ प्रकारौ येषामिन्द्रियाणां तानि द्विविधानि द्विप्रकाराणीत्यर्थः। कौ तौ द्वौ प्रकारौ द्रव्येन्द्रियं भावेन्द्रियञ्चेति।

---

१ -यः उपया- ता०। २ रत्नं भ- ब०। ३ दर्दुरको नि- ब०। ४ प्राणान्त- आ०, ब०, ज०, ता०, व०। ५ उद्धृतोऽयं स० सि० ७।१३। ६ सांख्यः प्राह। "वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः।" -सांख्यका० २६। ७ -त्रोच्यताम् ब०, ज०। ८ -साधकाना- आ०, द०, ब०, ज०।

तत्र द्रव्येन्द्रियस्वरूपनिरूपणार्थं सूत्रमिदं भणन्त्याचार्याः–

निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥

[1]निर्वर्त्यते निष्पाद्यते कर्मणा या सा निर्वृत्तिः। बाह्याभ्यन्तरभेदात् सापि द्विविधा। तत्र बाह्या निर्वृत्तिरुच्यते–चक्षुरादिषु मसूरिकादिसंस्थानरूप आत्मप्रदेशेषु इन्द्रियव्यपदेशभाक्षुषः प्रतिनियतसंस्थाननामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो यः सा बाह्या निर्वृत्तिरुच्यते। मसूरिकादिसंस्थानात् परतः उत्सेधाङ्गुलासंख्येयभागप्रमितानां शुद्धानामावरणक्षयोपशमविशिष्टानां सूक्ष्मपुद्गलप्रदेशसंश्लिष्टानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनाऽवस्थितानामात्मप्रदेशानां[2] वृत्तिरभ्यन्तरनिर्वृत्तिः कथ्यते। तथा उपक्रियते निर्वृत्तेरुपकारः क्रियते, येन तदुपकरणम्। तदपि द्विविधम्–बाह्याभ्यन्तरभेदात्। तत्र बाह्यमुपकरणं शुक्लकृष्णगोलकादीन्द्रियोपकारकं पक्ष्मपटलकर्णपालिकादिरूपं बाह्यमुपकरणम्। शुक्लकृष्णादिरूपपरिणतपुद्गलमण्डलमभ्यन्तरमुपकरणम्। एवं बाह्याभ्यन्तरा च निर्वृत्तिः, बाह्यमभ्यन्तरं चोपकरणं द्रव्येन्द्रियमुच्यते।

इदानीं भावेन्द्रियस्वरूपं निरूपयन्ति—

लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥

लम्भनं[3] लब्धिः, लब्धिश्च उपयोगश्च लब्ध्युपयोगौ, एतौ द्वौ भावेन्द्रियं भवतः। इन्द्रशब्देन आत्मा उच्यते तस्य लिङ्गमिन्द्रियमुच्यते। ज्ञानावरणक्षयोपशमे सत्यात्मनोऽर्थग्रहणे शक्तिः लब्धिरुच्यते। आत्मनोऽर्थग्रहण उद्यमोऽर्थग्रहणे प्रवर्त्तनमर्थग्रहणे व्यापरणमुपयोग उच्यते। ननु इन्द्रियफलमुपयोगः, तस्य इन्द्रियफलभूतस्य उपयोगस्य इन्द्रियत्वं कथम्? इत्याह–सत्यम्। कार्यस्य कारणोपचारात्। यथा घटपटाद्याकारपरिणतं विज्ञानमपि घटपटादिरुच्यते तथा इन्द्रियार्थग्राहक उपयोगोऽपि इन्द्रियमुच्यते।

अथ इन्द्रियाणां संज्ञाप्रतिपादनार्थं सूत्रमिदमाहुः—

स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ १९ ॥

आत्मना कर्त्तृभूतेन स्पृश्यतेऽर्थः कर्मतापन्नोऽनेन करणभूतेन स्पर्शनेन तत्स्पर्शनम्। अथवा स्पृशतीति स्पर्शनम्। "कृत्ययुटोऽन्यत्रापि" [का० सू० ४।५।९२] इति कर्त्तरि युट्। एवं रस्यत आस्वाद्यतेऽर्थोऽनेनेति रसनम्। रसयत्यर्थमिति वा रसनम्। घ्रायते गन्ध उपादीयते आत्मना अनेनेति घ्राणम्। जिघ्रति गन्धमिति वा घ्राणम्। चष्टे पश्यत्यर्थान् आत्मा अनेनेति चक्षुः। चष्टे इति वा चक्षुः। श्रूयते आत्मना शब्दो गृह्यते अनेनेति श्रोत्रम्। शृणोतीति वा श्रोत्रम्। स्पर्शनञ्च रसनञ्च घ्राणञ्च चक्षुश्च श्रोत्रञ्च स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि। एतानि इन्द्रियाणि पञ्च स्पर्शनादिसंज्ञानि भवन्ति।

---

१ निर्वृत्यते ता०। २ –नां प्रवृ– आ०, ज०, द०, ब०। ३ लभनं ता०, ब०, आ०, द०, ब०।

अथेदानीं पञ्चानामिन्द्रियाणामनुक्रमेण विषयप्रदर्शनार्थं सूत्रमिदं ब्रुवन्त्याचार्याः—

स्पर्शरसगन्धवर्णशब्दास्तदर्थाः ॥ २० ॥

स्पृश्यत इति स्पर्शः, स्पर्शयुक्तोऽर्थः। रस्यते रसः, रसयुक्तोऽर्थः। गन्ध्यते गन्धः, गन्धयुक्तोऽर्थः। वर्ण्यते वर्णः, वर्णयुक्तोऽर्थः। शब्द्यते इति शब्दः, शब्दपरिणतपुद्गलः। ५ अथवा स्पर्शनं स्पर्शः, रसनं रसः, गन्धनं गन्धः, वर्णनं वर्णः, शब्दनं शब्दः इति भावमात्रेऽपि। स्पर्शश्च रसश्च गन्धश्च वर्णश्च शब्दश्च स्पर्शरसगन्धवर्णशब्दाः। एते पञ्च तदर्थाः तेषां स्पर्शनादीनामिन्द्रियाणामर्थास्तदर्था इन्द्रियविषया इत्यर्थः।

अथ ईषदिन्द्रियग्राह्यं विषयमुपदिशन्ति—

श्रुतमनिन्द्रियस्य ॥ २१ ॥

१० [1]अस्पष्टावबोधनं श्रुतमुच्यते। तत् श्रुतमस्पष्टज्ञानम्। अनिन्द्रियस्य ईषदिन्द्रियस्य नोइन्द्रियाऽपरनाम्नश्चित्तस्य अर्थो विषयो भवति। यस्येन्द्रियस्य योऽर्थो ग्राह्यो भवति स विषय उच्यते। समनस्कस्य आत्मनो मनस्तत्र प्रवर्तते। अथवा श्रुतज्ञानविषयोऽर्थः श्रुतमुच्यते। तत् श्रुतमनिन्द्रियस्य चेतसो विषयो भवति। अनिन्द्रियस्य स विषयः कस्माद् भवति ? श्रुतज्ञानावरणक्षयोपशमात् मनोऽवलम्बनज्ञानप्रवर्तनाच्च। अथवा श्रुतज्ञानं १५ श्रुतमुच्यते। तत् श्रुतमनिन्द्रियस्य अर्थः प्रयोजनं भवति। तेन कारणेनेदं प्रयोजनं मनसः स्वतन्त्रतया साध्यमित्यर्थः।

अथेदानीं स्पर्शनादीनामिन्द्रियाणां स्वामिन उच्यन्ते—

वनस्पत्यन्तानामेकम् ॥ २२ ॥

वनस्पतिरन्ते येषां पृथिव्यप्तेजोवायूनां ते वनस्पत्यन्ताः, तेषां वनस्पत्यन्तानां पृथिव्यप्ते- २० जोवायुवनस्पतीनां पञ्चानां स्थावराणामेकं स्पर्शनेन्द्रियं भवति। कस्मात् ? वीर्यान्तरायस्पर्शनेन्द्रियावरणक्षयोपशमात् शेषेन्द्रियसर्वघातिस्पर्द्धकोदयात् शरीरनामकर्मलाभावष्टम्भादेकेन्द्रियजातिनामकर्मोदयवशाच्च।

अथेदानीं रसनादीनामिन्द्रियाणां स्वामिन उच्यन्ते—

कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ॥ २३ ॥

२५ आदिशब्दः प्रत्येकं प्रयुज्यते। तेनायमर्थः—कृमिरादिर्येषां शङ्खशुक्तिनखादीनां ते कृम्यादयः। पिपीलिका मुंगी[3] आदिर्येषां यूकालिक्षावृश्चिकगोभ्यादीनां ते पिपीलिकादयः। भ्रमर आदिर्येषां दंशमशककीटपतङ्गादीनां ते भ्रमरादयः। मनुष्य आदिर्येषां गोमहिषमृगसिंहव्याघ्रमत्स्यसर्पश्येनादीनां ते मनुष्यादयः। कृम्यादयश्च पिपीलिकादयश्च भ्रमरादयश्च मनुष्यादयश्च कृमिपिपीलिकाभ्रमरमनुष्यादयः। तेषामेकैकवृद्धानि, ३० एकेन एकेन वृद्धानि अधिकानि एकैकवृद्धानि। "वीप्सायां पदस्य" [शा० व्या० २।३।८]

---

१ अस्पृष्टाव- आ०, ब०, द०। २ -नामला- ता०। ३ मुनी आ- ता०। ४ -श्येनकादी- द०। -श्येनकाकादी- आ०, ज०।

इति द्विर्वचनम्। कृम्यादीनां स्पर्शनं भवत्येव रसनमधिकं भवति। पिपीलिकादीनां स्पर्शनरसने भवत एव घ्राणमधिकं भवति। भ्रमरादीनां स्पर्शनरसनघ्राणानि भवन्त्येव चक्षुरधिकं भवति। मनुष्यादीनां स्पर्शनरसनघ्राणचक्षूंषि भवन्त्येव श्रोत्रमधिकं भवति।

तत्र स्थावरभेदात् द्विविधेषु इन्द्रियभेदात् पञ्चविधेषु च संसारिजीवेषु ये पञ्चेन्द्रिया अनुक्तभेदाः तद्भेदसूचनार्थं सूत्रमिदमाहुराचार्याः— ५

संज्ञिनः समनस्काः ॥ २४ ॥

सह मनसा वर्त्तन्ते ये ते समनस्काः। सञ्ज्ञानं सञ्ज्ञा। संज्ञा विद्यते येषां ते संज्ञिनः। ये समनस्कास्ते संज्ञिन उच्यन्ते। ते तु पञ्चेन्द्रिया एव। अर्थादेकेन्द्रियादयश्चतुरिन्द्रियपर्यन्ताः संमूर्च्छनोत्पन्नाः पञ्चेन्द्रियाश्च असंज्ञिनो भवन्ति। संज्ञिनां शिक्षालापग्रहणादिलक्षणा क्रिया भवति। [1]असंज्ञिनां शिक्षालापग्रहणादिकं न भवति। असंज्ञिनामपि अनादिकालविषया- १० नुभवनाभ्यासदार्ढ्यादाहार[2]भयमैथुनपरिग्रह[3]लक्षणोपलक्षिताश्चतस्रः संज्ञाः अभिलाषप्रवृत्त्यादिकञ्च संगच्छत एव, किन्तु शिक्षालापग्रहणादिकं न घटते।

'अथ संसारिणां [4]सर्वा गतिः शरीरसम्बन्धाद्[5] भवति। शरीरे च मुक्ते सति मृतौ प्राप्तायामुत्तरशरीरार्थंगमनं जीवस्य न सङ्गच्छते शरीराभावात् सिद्धवत्' इत्यारेकायां सूत्रमिदमाहुराचार्याः— १५

विग्रहगतौ कर्मयोगः ॥ २५ ॥

विग्रहः शरीरम्, तदर्थं गतिर्विग्रहगतिः, तस्यां विग्रहगतौ। कर्मभिर्योगः कर्मयोगः। यदा आत्मा एकं शरीरं परित्यज्य उत्तरशरीरं प्रति गच्छति तदा कार्मणशरीरेण सह योगः सङ्गतिर्वर्त्तते। तेनायमर्थः—कार्मणशरीराधारेण जीवो गत्यन्तरं गच्छति। अथवा विरुद्धो ग्रहो ग्रहणं विग्रहः, कर्मशरीरग्रहणेऽपि नोकर्मलक्षणशरीरपरित्याग इत्यर्थः। विग्रहेण गतिः २० विग्रहगतिः। एकस्य परिहारेण द्वितीयस्य ग्रहणेन गतिर्विग्रहगतिः, तस्यां विग्रहगतौ। तर्हि कर्मयोगः क इति चेत्? उच्यते—निखिलशरीराङ्कुरबीजभूतं कार्मणं वपुः कर्म इति कथ्यते। तर्हि योगः कः? वाङ्मनसकायवर्गणाकारणभूतं जीवप्रदेशपरिस्पन्दनं योगः कथ्यते। कर्मणा विहितो योगः कर्मयोगः स कर्मयोगो विग्रहग[6]तावुत्तरशरीरग्रहणे भवति। तेन कर्मयोगेन कर्मकृतात्मप्रदेशस्पन्दनेन कृत्वा कर्मादानं देशान्तरसंक्रमणञ्च भवतीति स्पष्टार्थः। २५

अत्राह कश्चित्-जीवपुद्गलानां गतिं कुर्वतां देशान्तरसङ्क्रमणं किमाकाशप्रदेशक्रमवृत्त्या भवति, आहोस्विदविशेषेण [7]अक्रमेणापि भवति इत्याशङ्कायां सूत्रमिदमाहुराचार्याः—

---

१ अन्येषामपि सं- आ०, ब०, ज०, द०। २ -रनिद्राभ- आ०, ब०, ज०, द०। ३ -हणल- आ०, ब०, ज०, द०। ४ सर्वगतिः- आ०, ब०, द०, ज०। ५ -न्धाम- ता०। ६ -गतौ भ- ता०। ७ अनुक्रमे- आ०,ब०, द०, ज०।

अनुश्रेणि गतिः ॥ २६ ॥

लोकस्य मध्यप्रदेशादारभ्य ऊर्ध्वमधस्तात्तिर्यक्च व्योमप्रदेशानामनुक्रमेण संस्थितानामावलिः श्रेणिर्भण्यते। अनु श्रेणेरनतिक्रमेण अनुश्रेणि। अत्र अव्ययीभावः समासः। उक्तञ्च **"पूर्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते।"** [कात० २।५।१४] जीवानां ५ पुद्गलानाञ्च गतिर्गमनं भवति। कथं गतिर्भवति? अनुश्रेणि श्रेण्यनतिक्रमेण इत्यर्थः। ननु पुद्गलानामत्राधिकारोऽपि[1] नास्ति जीवाधिकारे पुद्गलस्य गतिः कथमत्र लभ्यते? सत्यम्। गत्यधिकारेऽपि पुनर्गतिग्रहणं पुद्गलस्यापि गतिग्रहणार्थम्। कोऽसौ गत्यधिकारः? **"विग्रहगतौ कर्मयोगः"** [त० सू० २।२५] इत्यत्र गतेर्ग्रहणं वर्तते। तथा च आगामिनि सूत्रे जीवग्रहणादत्र पुद्गलग्रहणं लभ्यते। किं तदागामिसूत्रम्? **"अविग्रहा जीवस्य"** १० [त० सू० २।२७] इति। तर्हि चन्द्रसूर्यादीनां ज्योतिष्काणां मेरुप्रदक्षिणावसरे श्रेणिरहिता गतिर्दृश्यते। तथा देवविद्याधरचारणादीनां च विश्रेणिगतिर्दृश्यते—श्रेणिं विनापि गतिर्विलोक्यते, किमर्थमुच्यते श्रीमद्भिर्गतिरनुश्रेणि भवतीति? सत्यम्; कालनियमेन देशनियमेन चात्र गतिर्वेदितव्या। कोऽसौ कालनियमः, को वा देशनियम इति चेत्? उच्यते—प्राणिनां मरणकाले भवान्तरग्रहणार्थं या गतिर्भवति सिद्धानाञ्चोर्ध्वगमनकाले या १५ गतिर्भवति सा गतिरनुश्रेण्येव भवति। देशनियमस्तु—ऊर्ध्वलोकाद्या अधोगतिर्भवति, अधोलोकाद्या ऊर्ध्वगतिर्भवति तिर्यग्लोकाद्या अधोगतिर्भवति। तिर्यग्लोकाद्या ऊर्ध्वगतिश्च भवति सा अनुश्रेण्येव भवति। पुद्गलानाञ्च या लोकान्तप्रापिका गतिर्भवति सापि निश्चयादनुश्रेण्येव भवति। इतरा तु गतिर्यथायोग्यं भजनीया।

अथ पुनरपि गतिप्रकारपरिज्ञानार्थं श्रीमदुमास्वामिनः सूत्रमिदमाचक्षते—

२०
अविग्रहा जीवस्य ॥ २७ ॥

विग्रहो व्याघातः, वक्रता इत्यर्थः। न विद्यते विग्रहः कुटिलता यस्यां गतौ साऽविग्रहा, सरलगतिरित्यर्थः। ईदृग्विधा सरला गतिः कस्य भवति? जीवस्य। जीवशब्दोऽत्र सामान्यार्थः। यद्यपि जीवशब्देन संसारिणो मुक्ताश्च जीवा लभ्यन्ते तथाप्यत्र जीवशब्देन मुक्तात्मा जीवोऽत्र ज्ञायते। कुत इति चेत्? आगामिसूत्रे २५ संसारिजीवग्रहणात्। किं तदागामिसूत्रम्? **"विग्रहवती च संसारिणः प्राक्चतुर्भ्यः"** [त० सू० २।२८] इति। ननु **'अनुश्रेणि गतिः'** इत्यनेनैव सूत्रेण श्रेण्यश्रेण्यन्तरसङ्क्रमणभावाभावसद्भावः कथितः, किमनेन **'अविग्रहा जीवस्य'** इति सूत्रेण प्रयोजनम्? इत्याह कश्चित्, सत्यम्, पूर्वसूत्रे विश्रेणिगतिरपि क्वचिद् भवतीति ज्ञापनार्थमिदं सूत्रं कृतम्।

अथ यदि मुक्तात्मनोऽविग्रहगतिर्भवतीति प्रतिज्ञा क्रियते भवद्भिस्तर्हि सशरी-३० रस्य जीवस्य किं मुक्तात्मवदप्रतिबन्धिनी गतिर्भवति, आहोस्वित् सप्रतिबन्धापि भवतीत्याशङ्कायां सूत्रं प्रतिपादयन्त्युमास्वामिनः—

---

१ -रो ना- आ०, ब०, द०, ज०।

विग्रहवती च संसारिणः प्राक्चतुर्भ्यः ॥ २८ ॥

विग्रहवती वक्रा गतिः। चकारादवक्रा च। संसारिणः संसारिणो जीवस्य द्वे गती भवतः। अविग्रहा या अवक्रा गतिः, सा एकसमयपर्यन्तं भवति, ऐकसमयिकी भवति "एकसमयाऽविग्रहा" [त० सू० २।२०] इति वचनात्।

सा अवक्रा गतिर्यदा संसारिणो भवति [1]तदाप्यैकसमयिक्येव यदा तु [2]सिद्धस्यतां भवति तदाप्यैकसमयिक्येव। सा अवक्रा गतिरिषुगतिनाम्नी भवति। यथा इषोर्बाणस्य गतिर्गमनं वेध्यपर्यन्तं ऋज्वी भवति तथा सिद्धानां संसारिणाञ्च अविग्रहा गतिरैकसमयिकी समानैव। विग्रहवती वक्रा गतिः संसारिणामेव भवति। तस्यास्त्रयः प्रकारा भवन्ति–पाणिमुक्ता-लाङ्गलिका-गोमूत्रिकाभेदात्। पाणिमुक्ता यथा—पाणिना तिर्यक्[3]प्रक्षिप्तस्य द्रव्यस्य गतिरेकवक्रा, तथा संसारिणः पाणिमुक्तागतिरेकवक्रा, द्विसमयिकी भवति। लाङ्गलिका गतिर्द्विवक्रा यथा लाङ्गलं हलं द्विवक्रं भवति तथा संसारिणां द्विवक्रा लाङ्गलिका गतिर्भवति। सा त्रैसमयिकी। गोमूत्रिका बहुवक्रा त्रिवक्रा गतिर्भवति। सा गोमूत्रिका गतिः संसारिणां चातुःसमयिकी भवति। अत एव आह–प्राक्चतुर्भ्यः। सा विग्रहवती गतिश्चतुर्भ्यः समयेभ्य प्राक् पूर्वं भवति। चतुर्थसमयस्य मध्ये अन्ते वा वक्रा गतिर्न भवति, गोमूत्रिकापेक्षया मध्ये अन्ते वा वक्रागतिर्न भवतीति ज्ञातव्यम्। सा चतुर्थसमये प्राञ्जलं सरलं गत्वोत्पत्तिक्षेत्रे प्रविशति। समयस्य ग्रहणमत्र सूत्रे नास्ति, कस्मात् समयग्रहणं क्रियते? सत्यम्; 'एकसमयाऽविग्रहा' इत्युत्तरसूत्रे समयग्रहणं वर्त्तते, तद्बलादत्रापि समयग्रहणं क्रियते इति। यथा षष्टिका व्रीहिविशेषाः षष्ट्या दिनैर्निष्पद्यन्ते तथा सर्वोत्कृष्टा वक्रा गतिः निष्कुटक्षेत्रे चातुःसमयिक्येव गतिर्भवति न अधिकसमया, स्वभावात् त्रिवक्रा गतिश्चतुःसमया एव।

अथेदानीं ऋजुगतेः कालविशेषं दर्शयन्त्याचार्याः—

एकसमयाऽविग्रहा ॥ २९ ॥

एकः समयो यस्याः सा एकसमया। न विद्यते विग्रहो वक्रता यस्याः सा अविग्रहा। अविग्रहा अवक्रगतिरेकसमया भवति। गतिं कुर्वतां जीवानां पुद्गलानाञ्च व्याघातरहितत्वेन अविग्रहा गतिर्लोकपर्यन्तमप्यैकसमयिकी भवति।

अथेदानीमनादिकाले कर्मबन्धस्य सन्तत्यां सत्यां मिथ्यादर्शनाविरतिप्रमादकषाययोगलक्षणोपलक्षितप्रत्ययवशात् कर्माणि स्वीकुर्वाणोऽयमात्मा सर्वदा आहारको भवति, तर्हि विग्रहगतावप्याहारको भवतीत्याशङ्कायां तन्निश्चयार्थं सूत्रमिदमाहुराचार्याः—

एकं द्वौ त्रीन्वाऽनाहारकः ॥ ३० ॥

एकं समयं द्वौ वा समयौ त्रीन्वा समयान् प्राप्य अयं जीवो विग्रहगतावनाहारको

---

१ तदा एक– आ०, ब०, द०, ज०। २ सिद्धानां आ०, ब०, द०, ज०। ३ प्रक्षिप्तद्रव्यस्यग– द० प्रक्षिप्तद्रव्यग– आ०। प्रक्षिप्तद्रव्यग– ज०। प्रक्षिप्तस्य द्रव्यग– ता०। ४ –गतिका– द०, ज०। ५ –हुः ता०, ब०।

भवति[1]। को नाम आहारः ? त्रयाणां शरीराणां षण्णां पर्याप्तीनां योग्या ये पुद्गलास्तेषां ग्रहणं स्वीकार आहार उच्यते। एवंविधस्य आहारस्य अभावो यस्य स भवत्यनाहारकः। कर्मस्वीकारो हि जीवस्य निरन्तरं वर्त्तते। तेन कार्मणशरीरसद्भावे विद्यमाने सति उपपादक्षेत्रं प्रति अविग्रहायां [2]गतौ ऋज्व्यां गतावाहारकः, इतरेषु त्रिषु समयेषु वक्रगतित्वादनाहारक

५ एव। तथा हि पाणिमुक्तायामेकवक्रायां गतौ प्रथमसमयेऽनाहारकः, द्वितीयसमये त्वाहारक एव। लाङ्गलिकायां द्विवक्रायां गतौ प्रथमसमये द्वितीयसमये चानाहारकः तृतीयसमये ऋज्व्यां गतावाहारक एव। गोमूत्रिकायां त्रिवक्रायां गतौ प्रथमसमये द्वितीयसमये तृतीयसमये च अनाहारकः, चतुर्थसमये ऋज्व्यां गतावाहारक एव। इषुगतौ त्वेकसमयिक्यामाहारक एव। तथा च ऋद्धिप्राप्तस्य यतेराहारकं शरीरमाहारकमिति।

१० अथेदानीं शरीरान्तरप्रादुर्भावलक्षणं जन्म उच्यते। तस्य जन्मनः प्रकारान् प्रतिपादयन्ति भगवन्तः—

सम्मूर्च्छनगर्भोपपादा जन्म ॥ ३१ ॥

त्रैलोक्यमध्ये ऊर्ध्वमधस्तात्तिर्यक् च शरीरस्य समन्तान्मूर्च्छनमवयवप्रकल्पनं सम्मूर्च्छनमुच्यते। मातुरुदरे रेतःशोणितयोर्गरणं मिश्रणं जीवसंक्रमणं गर्भ उच्यते। अथवा मात्रा

१५ गृहीतस्य आहारस्य यत्र ग्रहणं भवति स गर्भ उच्यते। [3]उपेत्य पद्यते सम्पूर्णाङ्ग उत्पद्यते यस्मिन् स उपपादः, देवनारकोत्पत्तिस्थानविशेष इत्यर्थः। सम्मूर्च्छनञ्च गर्भश्च उपपादश्च सम्मूर्च्छनगर्भोपपादाः। एते त्रयः संसारिजीवानां जन्म कथ्यते। पुण्यपापपरिणामकारणकर्मप्रकारविपाकोत्पन्ना एते त्रयः पदार्था जन्मप्रकारा भवन्ति।

अथेदानीं संसारिणां जन्माधारभूतो योनिभेदो वक्तव्य इति प्रश्ने सूत्रमिदं

२० ब्रुवन्त्याचार्याः—

सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥ ३२ ॥

जीवस्य चेतनाप्रकारः परिणामश्चित्तमुच्यते। चित्तेन सह वर्त्तते सचित्तः। शीतः स्पर्शविशेषः। तेन युक्तं यद्द्रव्यं तदपि शीतमुच्यते। सम्यक्प्रकारेण वृतः प्रदेशः संवृतो [4]दुरुपलक्ष्य इत्यर्थः। सचित्तश्च शीतश्च संवृतश्च सचित्तशीतसंवृताः। अथवा बहुवचनान्त-

२५ विग्रहे सचित्ताश्च शीताश्च संवृताश्च सचित्तशीतसंवृताः। इतरैरचित्तोष्णविवृतैः सह वर्तन्ते ये योनयस्ते सेतराः। उभयात्मका योनयो मिश्रा उच्यन्ते। के ते मिश्राः ? सचित्ताऽचित्तशीतोष्णसंवृतविवृता इति। चकार उक्तसमुच्चयार्थः। तेनायमर्थो लभ्यते–सचित्ताश्च मिश्रा भवन्ति अचित्ताश्च मिश्रा भवन्ति, शीताश्च मिश्रा भवन्ति, उष्णाश्च मिश्रा भवन्ति। संवृताश्च मिश्रा भवन्ति, विवृताश्च मिश्रा भवन्ति, मिश्रा अप्यन्यैः सह मिश्रा भवन्ति।

३० एकमेकं जन्म प्रति एकशः तद्योनयस्तेषां सम्मूर्च्छनगर्भोपपादलक्षणानां जन्मनां योनयस्त-

---

१ –ति तर्हि विग्रहगतौ को आ०, ब०, द०, ज०। २ गतावा– आ०, ता०। ३ उपेत्यते ता०। ४ दुरपेक्ष्य आ०, ब०, ज०।

योनयः। अनेन सूत्रेणोक्ता एते नव योनयो ज्ञातव्याः। ननु योनिजन्मनोः को भेदः? आधाराधेयभेदाद् भेदः। कोऽसावाधारः, को वाधेयः? योनय आधाराः, जन्मविशेषा आधेयाः। यस्मात्कारणात् सचित्तादिप्रदेशे स्थित्वा जीवः सम्मूर्च्छनादिना जन्मना निजशरीराहारेन्द्रियोच्छ्वासभाषामनोयोग्यान् पुद्गलान् गृह्णाति।

अथेदानीं सचित्तादियोनीनां स्वामिन उच्यन्ते—सचित्तयोनयः साधारणशरीरा वनस्पतिकायिकाः। कस्मात्? अन्योन्याश्रयत्वात्। अचित्तयोनयो देवा नारकाश्च। देवनारकाणामुपपादः प्रदेशपुद्गलप्रचयोऽचित्तो वर्तते यस्मात्। सचित्ताचित्तयोनयो गर्भजा भवन्ति, मातुरुदरे शुक्रशोणितमचित्तं वर्तते, आत्मा सचित्तस्तेन मिश्रत्वात्। अथवा शुक्रशोणितं यत्र मातुरुदरे पतितं वर्त्तते तदुदरं सचित्तं वर्तते, तेन गर्भजाः सचित्ताचित्तलक्षणमिश्रयोनयः। वनस्पतेरितरे सम्मूर्च्छनजाः पृथिव्यादयोऽचित्तयोनयो मिश्रयोनयश्च। देवनारकाः शीतोष्णयोनयः यत उपपादस्थानानि कानिचिदुष्णानि वर्तन्ते, कानिचिच्छीतानि वर्तन्ते। तेजस्कायिका उष्णयोनयः। अपरे पृथिव्यादयः केचिच्छीतयोनयः[1] केचिदुष्णयोनयः केचिच्छीतोष्णमिश्रयोनयः। संवृतयोनयो देवा नारकाश्च पृथिव्यादयः पञ्च च। विवृतयोनयः द्वित्रिचतुरिन्द्रियाः। संवृतविवृतमिश्रयोनयो गर्भजा भवन्ति। एता मूलभूता नव योनयो भवन्ति। तदन्तर्भेदाश्चतुरशीतिलक्षा भवन्ति। तदुक्तम्—

"णिच्चिदरधादुसत्त य तरुदह वियलिंदिएसु छच्चेव।
सुरणिरयतिरिय चदुरो चउदस मणुये सदसहस्सा॥"[2]

[बारस० अणु० गा० ३५]

अस्यायमर्थः—नित्यनिगोदा इतरनिगोदाश्च पृथिव्यप्तेजोवायवश्च प्रत्येकं सप्तलक्षयोनयः। वनस्पतिकायिका दशलक्षयोनयः। द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाश्च प्रत्येकं द्विलक्षयोनयः। सुरा नारकास्तिर्यञ्चश्च पृथक् चतुर्लक्षयोनयः। मनुष्याश्च चतुर्दशलक्षयोनयः।

अथेदानीं पूर्वोक्तयोनीनां प्राणिनां केषां कीदृशं जन्म भवति? इत्याशङ्कायां प्रथमतस्तावद् गर्भलक्षणजन्मभेदं दर्शयन्त्याचार्याः।

जरायुजाण्डजपोतानां गर्भः॥ ३३॥

यत्प्राणिनामानायवज्जालवदावरणं प्रविततं पिशितरुधिरं तद्वस्तु वस्त्राकारं जरायुरित्युच्यते। [3]कललमित्यपरपर्यायः। यच्छुक्रलोहितपरिवरणं परिमण्डलमुपात्तकाठिन्यं नखछल्लीसदृशं नखत्वचा सदृक्षं तदण्डमित्युच्यते। यद् योनिनिर्गतमात्र एव परिस्पन्दादिसामर्थ्योपेतः परिपूर्णप्रतीक आवरणरहितः स पोत इत्युच्यते। जरायौ जाता जरायुजाः। अण्डे जायन्ते स्म अण्डजाः। जरायुजाश्च अण्डजाश्च पोताश्च जरायुजाण्डजपोताः, तेषां जरायुजाण्डजपोतानाम्। एतेषां त्रयाणां गर्भो भवति। एते त्रयो गर्भयोनयो भवन्ति इत्यर्थः।

---

१ –यः केचिच्छीतोष्ण– ता०, व०। २ नित्येतरधातुषु दश त्रसदश विकलेन्द्रियेषु षट् चैव। सुरनरकतिर्यक्षु चत्वारः चतुर्दश मनुष्ये शतसहस्राणि॥ ३ कलिल– आ०, ब०, द०, ज०।

तत्र जरायुजा मनुष्यादयः। अण्डजाः सर्पशकुन्तादयः। पोताः प्रकटयोनयश्च मार्जारादयः।

यद्येतेषां गर्भलक्षणं जन्मोच्यते तह्युपपादः केषां सञ्जायत इति[1] प्रश्नतः सूत्रं प्राहुराचार्य्याः—

देवनारकाणामुपपादः ॥ ३४ ॥

५ देवानां भवनवासिनां व्यन्तराणां ज्योतिष्काणां कल्पोपपन्नकल्पनातीतानाञ्च चतुर्णिकायानां जन्म उपपादो भवति। पल्यङ्कोपरि हंसतूलद्वयमध्ये सञ्जायते इत्यर्थः। तथा नारकाणाञ्च जन्म उपपादो भवति। कण्डरकच्छत्रकच्छिद्रसदृशस्थानेषु तेषामधोमुखानामुपरि पादानामुत्पत्तिर्भवति, ततस्तेऽधः पतन्ति। तत्स्वरूपमग्रे [3]वक्ष्यते।

अथापरेषां प्राणिनां किं जन्म भवतीति प्रश्ने सूत्रमिदमाहुः सूरयः—

१०
शेषाणां सम्मूर्च्छनम् ॥ ३५ ॥

गर्भजेभ्य औपपादिकेभ्यश्च ये अन्ये त एकेन्द्रियविकलेन्द्रिया जरायुजादिवर्जितास्तिर्यङ्मनुष्याश्च शेषा इत्युच्यन्ते। तेषां सम्मूर्च्छनमेव जन्म भवति। एतानि त्रीण्यपि सूत्राणि उभयतो निर्णयकराणि ज्ञातव्यानि। कोऽसावुभयतो निर्णयः? जरायुजाण्डजपोतानामेव गर्भो भवति, गर्भ एव च जरायुजाण्डजपोतानां भवतीति प्रथमयोगनिर्णयः। देवनारकाणा-
१५ मेवोपपादो भवति, उपपाद एव च देवनारकाणामेव भवतीति द्वितीययोगनिर्णयः। शेषाणामेव सम्मूर्च्छनं भवति, सम्मूर्च्छनमेव शेषाणां भवतीति तृतीयसूत्रनिश्चयः।

अथ तेषां त्रिविधजन्मनां संसारिणां सङ्गृहीतबहुभेदनवयोनिविकल्पानां शुभनामकर्मोदयनिष्पादितानि कर्मबन्धफलमुक्त्यधिकरणानि शरीराणि कानि भवन्तीति प्रश्ने योगोऽयमुच्यते भगवद्भिः—

२०
औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि ॥ ३६ ॥

औदारिकनामकर्मोदयनिमित्तमौदारिकम्। चक्षुरादिग्रहणोचितं स्थूलं शरीरमौदारिकशरीरमित्युच्यते। उदारं स्थूलमिति पर्यायः। उदरे भवं वा औदारिकम्। उदारं स्थूलं प्रयोजनमस्येति वा औदारिकम्। विविधं करणं विक्रिया। विक्रिया प्रयोजनं यस्य तद् वैक्रियिकम्। वैक्रियिकनामकर्मोदयनिमित्तम् [6]अष्टगुणैश्वर्ययोगादेकाऽनेकस्थूलसूक्ष्मशरीर-
२५ करणसमर्थमित्यर्थः। मूलशरीरं जिनजन्मादिकालेऽपि देवानां न क्वापि गच्छति। उत्तरशरीरं त्वनेकमेकं वा जिनोत्सवादौ सर्वत्र गच्छति। आहारकनामकर्मोदयनिमित्तमाहारकम्। तस्येदं स्वरूपम्— सूक्ष्मपदार्थपरिज्ञानार्थमसंयमपरिहारार्थं वा प्रमत्तसंयतेन आह्रियते उत्पाद्यते निष्पाद्यते निर्वर्त्यते यत् तदाहारकम्। आहारकशरीरं किल प्रमत्तसंयतेनैव निष्पाद्यते। प्रमत्तसंयतस्य यदा सूक्ष्मपदार्थे सन्देह उत्पद्यते संयमविचारे वा

---

१ इत्यतः प्रा– ता०। २ –छिद्रसहितेषु स्था– आ०, ब०, द०, ज०। –छित्रस– व०। ३ वक्ष्यति आ०, ब०, द०, ज०, व०। ४ –काणां भ– आ०, ब०, द०, ज०। ५ –निर्णयः आ०, ब०, द०, ज०। ६ अणिमामहिमादयोऽष्टौ गुणाः।

सन्देह उत्पद्यते तदा स चिन्तयति—'तीर्थङ्करपरमदेवदर्शनं विनाऽयं सन्देहो न विनश्यति। स भगवान् अत्र क्षेत्रे नास्ति। किं क्रियतेऽस्माभिः' इति चिन्तां कुर्वाणे प्रमत्तसंयते मुनौ सति तस्य तालुप्रदेशे रोमाग्रस्य अष्टमो भागश्छिद्रं वर्त्तते, तस्मात् हस्तप्रमाणं घनघटित-स्फटिकबिम्बाकारं पुत्तलकं निर्गच्छति। तत्पुत्तलकं यत्र कुत्रापि क्षेत्रे तीर्थङ्करपरमदेवो गृहस्थो दीक्षितः छद्मस्थः केवली वा यत्र वर्त्तते तत्र गच्छति। तच्छरीरं स्पृष्ट्वा पश्चा- ५ दायाति। तेनैव तालुछिद्रेण तस्मिन्मुनौ प्रविशति। तदा तस्य मुनेः सन्देहो विनश्यति, सुखी च भवति। इत्याहारकशरीरस्वरूपम्। तैजसनामकर्मोदयनिमित्तं वपुस्तेजःसम्पादकं यत्तत् तैजसम्। तेजसि वा भवं तैजसम्, सर्वप्राणिषु वर्त्तते एव। कार्मणनामकर्मोदय-निमित्तं कार्मणम्, कर्मणां कार्यं वा कार्मणम्। कर्मणां समूहो वा कार्मणम्। सर्वेषां शरीराणां कर्मैव निमित्तं वर्त्तते यद्यपि तथापि प्रसिद्धिवशात् विशिष्टविषये वृत्तिर्ज्ञातव्या। १० कर्मणोऽपि निमित्तं कर्म इत्यर्थः।

अथौदारिकं शरीरं चक्षुरादिभिरिन्द्रियैरुपलभ्यते उदारत्वात्तथेतरेषां शरीराणां कस्मात्तैर्लब्धिर्न भवतीति स्फुटं पृष्टा इव स्वामिनः प्राहुः—

परं परं सूक्ष्मम् ॥ ३७ ॥

औदारिकात् स्थूलरूपात् परं वैक्रियिकं सूक्ष्मं भवति। वैक्रियिकात् परमाहारकं सूक्ष्मं १५ भवति। आहारकात् परं तैजसं सूक्ष्मं भवति। तैजसात् परं कार्मणं शरीरं सूक्ष्मं भवति।

'यदि परं परं सूक्ष्मं तर्हि परं परं प्रदेशैरपि हीनं भविष्यति' इत्याशङ्कायां सूत्रमिदमाहुरुमास्वामिनः—

प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥ ३८ ॥

प्रदेशेभ्यः प्रदेशतः परमाणुभ्यः, परं परमसङ्ख्यातगुणं[1] भवति। कथं प्राक्, कस्मात् २० प्राक्? तैजसात् तैजसशरीरात्। औदारिकाद् असङ्ख्येयगुणपरमाणुकं वैक्रियिकं भवति। वैक्रियिकादाहारकमसङ्ख्येयगुणपरमाणुकं भवति। कोऽसौ गुणकारः? पल्योपमा-सङ्ख्येयभागेन श्रेण्यसंख्येयभागेन वा गुणकारो ज्ञातव्यः। उत्तरोत्तरस्य बहुप्रदेशत्वेऽपि सूक्ष्मत्वं लोहपिण्डवत् ज्ञातव्यम्। पूर्वपूर्वस्य अल्पप्रदेशत्वेऽपि स्थूलत्वं तूलनिचयवद्[2] बोद्धव्यम्। २५

तर्हि तैजसकार्मणयोः शरीरयोः प्रदेशाः किं समा वर्त्तन्ते, आहोस्वित् कश्चिद् विशेषोऽस्ति? इति प्रश्ने योगमेतं प्रतिपादयन्ति—

अनन्तगुणे परे ॥ ३९ ॥

परे तैजसकार्मणे द्वे शरीरे अनन्तगुणे भवतः। आहारकशरीरात्तैजसं शरीरं प्रदेशै-रनन्तगुणं भवति। तैजसाच्छरीरात्कार्मणं शरीरं प्रदेशैरनन्तगुणं जागर्ति। कोऽसौ ३०

---

१ –मसंख्यातगु– आ०, ब०, व०, द०, ज०। २ तूलवत् द०, ब०, ज०।

गुणकारः ? अभव्यानामनन्तगुणं तैजसम् सिद्धानामनन्तभागं तैजसम्। तैजसाच्च अनन्त-गुणं कार्मणमेवं ज्ञातव्यम्।

'यदि तैजसकार्मणयोः शरीरयोरनन्ताः प्रदेशाः सन्ति तर्हि तैजसकार्मणशरीरसहितो जीवो यदा विग्रहगतिं करोति तदाऽपरेण रूपादिमता पदार्थान्तरेण जीवस्य गतिप्रतिबन्धो ५ भविष्यति, गच्छतः कुम्भस्य कुड्यादिनाऽवरोधवत्' इत्यारेकायां योगममुमाचक्षते—

अप्रतीघाते ॥ ४० ॥

तैजसकार्मणे द्वे शरीरे वज्रपटलादिना अप्रतिघाते प्रतिस्खलनरहिते भवतः मूर्तिमता पदार्थेन व्याघातरहिते भवतः इत्यर्थः। ननु वैक्रियिकाहारकयोरपि शरीरयोः प्रतिघातो न वर्तते किमुच्यते तैजसकार्मणयोरेव प्रतीघातरहितत्वम्? इत्याह—सत्यम्; यथा तैजसकार्मणयोः १० शरीरयोरालोकान्तादपि सर्वत्र प्रतीघातो न वर्तते, तथा वैक्रियिकाहारकयोरपि प्रतीघाता-भावः सर्वत्र नास्तीति।

अथ तैजसकार्मणयोः शरीरयोरेतावानेव विशेषो वर्तते, आहोस्वित् कश्चिदन्योऽपि विशेषो वर्तते ? इत्यतः प्राहुराचार्याः—

अनादिसम्बन्धे च ॥ ४१ ॥

१५ अनादावनादिकाले जीवेन सह सम्बन्धः संयोगो ययोस्तैजसकार्मणयोस्ते द्वे अनादि-सम्बन्धे। चकारात् पूर्वपूर्वतैजसकार्मणयोः शरीरयोर्विनाशादुत्तरोत्तरयोस्तैजसकार्मणयोः शरीरयोरुत्पादाच्च वृक्षाद् बीजवत् बीजाद् वृक्षवच्च कार्यकारणसद्भावः। सन्तत्या अनादि-सम्बन्धे विशेषापेक्षया सादिसम्बन्धे चेत्यर्थः। यथा हि—औदारिकवैक्रियिकाहारकाणि त्रीणि शरीराणि जीवस्य कादाचित्कानि भवन्ति, कदाचित् भवानि कादाचित्कानि, तथा तैजस-२० कार्मणे द्वे शरीरे जीवस्य कादाचित्के न भवतः। किं तर्हि? ते द्वे नित्यं भवत इत्यर्थः। कियत्कालपर्यन्तं नित्यं भवतः? यावत् संसारो न क्षीयते तावत्पर्यन्तं भवत इत्यर्थः। यथा जीवस्य कार्मणशरीरं नित्यं वर्तते तथा तैजसमपि शरीरं नित्यं वर्तत इति तात्पर्यम्।

तर्हि ते तैजसकार्मणे द्वे शरीरे किं कस्यचित् भवतः, किं कस्यचिन्न भवतः, आहोस्विदविशेषेण सर्वस्यापि प्राणिवर्गस्य भवत इत्यारेकायां सूत्रमिदमाहुः—

२५ **सर्वस्य ॥ ४२ ॥**

सर्वस्य निरवशेषस्य संसारिणो जीवस्य तैजसकार्मणे द्वे अपि शरीरे भवत इत्यर्थः।

अथ संसारिजीवस्य सर्वशरीरसम्प्राप्तिसद्भावे विशेषोऽयमुच्यते भगवद्भिः—

तदादीनि भाज्यानि युगपदेकस्याचतुर्भ्यः ॥ ४३ ॥

---

१ भव्यानामन- आ०, ब०, द०, ज०। २ पर्जन्यपटला- आ०, ब०, द०, ज०। ३ अनादौ जीवेन ता०। अनादौ अनादिकालेन जी- ब०। ४ बीजवृक्ष- आ०, द०, ब०, ज०। ५ तर्हि तैज-आ०, ब०, व०, ज०, द०। ६ -कस्मिन्नाच- आ०।

ते तैजसकार्मणे द्वे शरीरे आदिर्येषां तानि तदादीनि। भाज्यानि विकल्पनीयानि पृथक् कर्त्तव्यानि। युगपत् समकालम्। एकस्य जीवस्य। कियत् पर्यन्तम्? आ चतुर्भ्यः चत्वारि शरीराणि यावत्। कस्यचिज्जीवस्य विग्रहगत्यवसरे तैजसकार्मणे द्वे शरीरे भवतः। कस्यचिज्जीवस्य तैजसकार्मणौदारिकाणि त्रीणि भवन्ति। कस्यचिज्जीवस्य तैजसकार्मण-वैक्रियिकाणि त्रीणि शरीराणि भवन्ति। कस्यचिज्जीवस्य तैजसकार्मणौदारिकाहारकाणि ५ चत्वारि शरीराणि भवन्ति। एकस्य युगपत् पञ्च न भवन्तीत्यर्थः। यस्य आहारकं शरीरं भवति तस्य वैक्रियिकं न भवति, यस्य वैक्रियिकं भवति तस्याहारकं न भवतीति विशेषो ज्ञेयः।

अथ पुनरपि शरीरविशेषपरिज्ञानार्थं वचनमिदमुच्यते—

निरुपभोगमन्त्यम् ॥ ४४ ॥

इन्द्रियद्वारेण शब्दादिविषयाणामुपलब्धिरुपभोगः। उपभोगान्निष्क्रान्तं निरुपभोगम्। १० अन्ते भवमन्त्यम्, कार्मणशरीरमित्यर्थः। विग्रहगतावपि कार्मणं शरीरं सत्तारूपेण आत्मनि तिष्ठति, न तु शब्दादिविषयं गृह्णाति, द्रव्येन्द्रियनिर्वृत्त्यभावात्। ननु तैजसशरीरमपि निरुप-भोगं वर्तते, किमुच्यते कार्मणं शरीरं निरुपभोगम्? इत्याह—सत्यम्। तैजसं शरीरं योगनि-मित्तमपि न भवति कथमुपभोगनिमित्तं भविष्यतीत्यलमेतद्विचारेण।

अथोक्तलक्षणेषु जन्मसु अमूनि पञ्च शरीराणि प्रादुर्भवन्ति, तर्हि किमविशेषेण प्रादु- १५ र्भवन्ति आहोस्विदस्ति कश्चिद्विशेषः? इति प्रश्ने वचनमिदमूचुरुमास्वामिनः[1]—

गर्भसम्मूर्च्छनजमाद्यम् ॥ ४५ ॥

गर्भे जातं गर्भजम्[2]। सम्मूर्छनाज्जातं सम्मूर्छनजम्। गर्भजश्च सम्मूर्छनजश्च गर्भसम्मू-र्छनजम्, समाहारे[3] द्वन्द्वः। यद् गर्भजं शरीरं यच्च सम्मूर्छनजं शरीरं तत्सर्वमाद्यमौदारिकं ज्ञातव्यम्। अथवा, गर्भश्च सम्मूर्छनश्च गर्भसम्मूर्छने, ताभ्यां जातं गर्भसम्मूर्छनजम्। २०

तर्ह्यौपपादिकं कीदृशं भवतीत्याशङ्कायामाह—

औपपादिकं वैक्रियिकम् ॥ ४६ ॥

उपपादे भवमौपपादिकं देवनारकशरीरम्, तत्सर्वं शरीरं वैक्रियिकं ज्ञातव्यम्।

यद्यौपपादिकं वैक्रियिकं तर्ह्यनौपपादिकं शरीरं किं सर्वथा वैक्रियिकं न भवतीति प्रश्ने सूत्रमिदं प्रतिपादयन्ति सूरयः— २५

लब्धिप्रत्ययञ्च ॥ ४७ ॥

तपोविशेषात्सञ्जाता ऋद्धिप्राप्तिर्लब्धिरुच्यते। लब्धिः प्रत्ययः कारणं यस्य शरीरस्य तल्लब्धिप्रत्ययं वैक्रियिकं शरीरं भवति। न केवलमौपपादिकं शरीरं वैक्रियिकं भवति, किन्तु लब्धिप्रत्ययं लब्धिकारणोत्पन्नं शरीरं वैक्रियिकं कस्यचित् षष्ठगुणस्थानवर्त्तिनो मुने-र्भवतीति वेदितव्यम्। उत्तरवैक्रियिकशरीरस्य कालः स्थितिर्जघन्येनोत्कर्षेण चान्तर्मुहूर्तो ३०

---

१ -मूचुः- ता०, ब०। २ गर्भाज्जातं ब०, ज०। ३ समाहारद्वन्द्वसमासः ज०।

भवति। तर्हि तीर्थङ्करजन्मादौ नन्दीश्वरचैत्यालयादिगमने बह्वीं वेलां विना तत्सम्बन्धि कर्म कथं कर्तुं लभ्यत इत्याह—सत्यम्; घटिकाद्वयादुपर्युपरि अन्यदन्यच्छरीरं वैक्रियिका उत्पादयन्ति, छिन्नपद्मिनीकन्दोभयपार्श्वलग्नतन्तुन्यायेनोत्तरशरीरेष्वात्मप्रदेशानन्तर्मुहूर्तेऽन्तर्मुहूर्ते पूरयन्ति, तेनोत्तरशरीरं यथेष्टकालं तिष्ठति। तर्ह्युत्तरशरीरे क्रियमाणे देवानां ५ किमपि कष्टं भविष्यति? न भविष्यति, प्रत्युत सुखं भवति। उक्तञ्च—

"स्वर्भोगवर्गप्रसिताक्षवर्गोऽप्युदीच्यदेहाक्षसुखैः प्रसक्तः।
अर्हत्प्रभौ व्यक्तविचित्रभावो भजत्विमां प्राणतजिष्णुरिज्याम्॥" [प्रति.सा.२।१२१]

किमेतद्वैक्रियिकमेव लब्ध्यपेक्षं भवति आहोस्विदन्यदपि शरीरं लब्धिप्रत्ययं भवतीति प्रश्ने सूत्रमिदमाहुः—

१० **तैजसमपि॥ ४८॥**

तैजसमपि शरीरं लब्धिप्रत्ययं भवति, लब्धिनिमित्तं स्यात्। तत्तैजसं शरीरं द्विप्रकारं भवति—निःसरणात्मकम्, अनिःसरणात्मकञ्च। तत्र निःसरणात्मकस्य तैजसशरीरस्य स्वरूपं निरूप्यते—कश्चित् यतिरुग्रचारित्रो वर्तते। स तु केनचित् विराधितः सन् यदाऽतिक्रुद्धो भवति तदा वामस्कन्धाज्जीवप्रदेशसहितं तैजसं शरीरं बहिर्निर्गच्छति। तद् १५ द्वादशयोजनदीर्घं नवयोजनविस्तीर्णं[1] काहलाकारं जाज्वल्यमानाग्निपुञ्जसदृशं दाह्यं वस्तु परिवेष्ट्यावतिष्ठते। यदा तत्र चिरं तिष्ठति तदा दाह्यं वस्तु भस्मसात्करोति। व्याघुट्य यतिशरीरे प्रविशत् सत् तं यतिमपि विनाशयति। एतत्तैजसं शरीरं निःसरणात्मकमुच्यते। अनिःसरणात्मकं त्वौदारिकवैक्रियिकाहारकशरीराभ्यन्तरवर्त्ति तेषां त्रयाणामपि दीप्तिहेतुकं भवति।

अथेदानीमाहारकशरीरस्वरूपनिर्णयार्थं तत्स्वामिनिरूपणार्थं सूत्रमिदं प्रतिपादयन्ति—

२० **शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव॥ ४९॥**

आहरति गृह्णाति स्वीकरोति तत्त्वज्ञानमित्याहारकम्। आहारकं शरीरं शुभेन ऋद्धिविशेषेणोत्पद्यते [2]इति कारणात् मनःप्रीतिकरं शुभमित्युच्यते। शुभकर्मण आहारककाययोगस्य हेतुत्वाद्वा शुभमित्युच्यते। विशुद्धस्य पुण्यकर्मणः सन्दिग्धार्थनिर्णयस्य अमिश्रस्य निरवद्यस्य [3]कार्यस्य वा करणात् संक्लेशरहितं विशुद्धमिति कथ्यते, तन्तूनां कार्पासव्यपदेशवत्। २५ उभयतो हि प्राणिबाधालक्षणव्याघाताभावादव्याघातीति भण्यते। आहारकशरीरेण अन्यस्य व्याघातो न क्रियते, अन्येन शरीरेण च आहारकशरीरस्य च व्याघातो न विधीयत इत्यर्थः। चकार उक्तसमुच्चयार्थः। तेनायमर्थः—कदाचित् संयमपरिपालनार्थम्, कदाचित्सूक्ष्मपदार्थनिर्णयार्थम्, कदाचिल्लब्धिविशेषसद्भावज्ञापनार्थमाहारकशरीरं भवति। ईदृग्विधमाहारकशरीरं कस्य भवति? प्रमत्तसंयतस्यैव, षष्ठगुणस्थानवर्तिनो मुनेः। एवशब्दोऽवधारणार्थो

---

१ -विस्तारं ता०, ब०। २ अतः का- आ०, ब०, द०, ज०। ३ कार्यस्य कारणात् आ०, ब०, द०, ज०।

वर्तते । प्रमत्तसंयतस्यवाहारकं शरीरं भवति, नान्यस्य । प्रमत्तसंयतस्य आहारकशरीरमेव भवति इति न मन्तव्यम् ; तथा सति औदारिकादिशरीरप्रतिषेध उत्पद्यते । अथ किन्नामाहारकशरीरमिति चेत् ? भरतैरावतस्थितस्य कस्यचिन्मुनेः केवलज्ञानाभावे यदा सन्देह उत्पद्यते— तदा तत्त्वनिश्चयार्थं पञ्चमहाविदेहान्यतमविदेहकेवलिसमीपमौदारिकशरीरेण गच्छतो मुनेरसंयमो भवति इति विचिन्त्य आहारकशरीरमेकहस्तप्रमाणं रोमाग्राष्टमभागप्रमाणशिरोदशमद्वारच्छिद्रादाहारकं पुत्तलकं निर्गच्छति । तन्निर्गमनादेव स मुनिः प्रमत्तसंयतो भवति । तच्छरीरं तीर्थङ्करशरीरं स्पृष्ट्वा पश्चादायाति । तस्मिन्नागते सति मुनेस्तत्त्वसन्देहो विनश्यति ।

'ईदृग्विधानि शरीराणि धारयतां संसारिणां प्राणिनां गतिं प्रति त्रीणि लिङ्गानि भवन्ति, आहोस्विदस्ति कश्चिद् विशेषः' इति प्रश्ने सति लिङ्गनिर्णयार्थं सूत्रत्रयं भण्यते भगवद्भिः—

नारकसम्मूर्च्छिनो नपुंसकानि ॥ ५० ॥

वक्ष्यमाणलक्षणोपलक्षितेषु नरकेषु भवा नारकाः, सम्मूर्छनं सम्मूर्च्छः, सम्मूर्छो विद्यते येषां ते सम्मूर्च्छिनः, नारकाश्च सम्मूर्च्छिनश्च नारकसम्मूर्च्छिनः । एते नपुंसकानि भवन्ति । चारित्रमोहविशेषकषायविशेषस्य नपुंसकवेदस्य अशुभनामकर्मप्रकृतेरुदयाच्च न स्त्रियो न पुमांसः नपुंसकानीत्युच्यन्ते । सप्तनरकोद्भवा[2] नारकाः एकद्वित्रिचतुरिन्द्रियाः सर्वेऽपि सम्मूर्च्छिनः, पञ्चेन्द्रियाश्च नपुंसकानि[3] भवन्ति इति निश्चयः । तेषु खलु स्त्रीपुंससम्बन्धिनी मनोहारि[4]शब्दगन्धवर्णरसस्पर्शनिमित्ता ह्यल्पापि सुखमात्रा न विद्यते ।

'यद्येवं[5] निर्धार्यते तर्ह्यर्थापत्तेरन्येषां संसारिणां त्रिलिङ्गी घटत इति सन्देहे यत्र नपुंसकलिङ्गस्याऽत्यन्ताभावस्तत्स्वरूपनिरूपणार्थं वचनमिदमुच्यते—

न देवाः ॥ ५१ ॥

भवनवासिव्यन्तरज्योतिष्ककल्पोपपन्न(न्नाः)कल्पातीताश्च नपुंसकानि न भवन्ति । किन्त्वच्युतपर्यन्तं स्त्रीत्वं पुंस्त्वञ्च शुभगतिनामकर्मोदयजनितं स्त्रीपुंस्त्वनिरतिशय[6]सुखं निर्विशन्ति । मानुषसुखादप्यतिशयस्त्रीपुंस्त्वसुखं देवा भुञ्जते ।

'अथेतरेषां कियन्ति लिङ्गानि भवन्ति' इति प्रश्ने योगोऽयमुच्यते—

शेषास्त्रिवेदाः ॥ ५२ ॥

शेषा गर्भजास्त्रिवेदा भवन्ति । त्रयो वेदा लिङ्गानि येषां ते त्रिवेदाः । तल्लिङ्गं द्विप्रकारं भवति । नामकर्मोदयात् स्मरमन्दिरमेहनादिकं द्रव्यलिङ्गं[7] भवति, नोकषायमोहकर्मोदयाद् भावलिङ्गं स्यात् । कथम् ? स्त्रीवेदोदयात् स्त्री भवति, पुंवेदोदयात् पुमान् भवति, नपुंसकवेदोदयात् नपुंसको भवतीति तात्पर्यम् ।

---

१ मुनेः स– आ०, ब०, द०, ज० । २ सप्तमनर– आ०, ब०, द०, ज० । ३ –कानि इ– आ०, ब०, द०, ज० । ४–रिरवगन्ध– आ०, ब०, द०, ज०, ता० । ५ –वं धा– आ०, ब०, द०, ज० । ६ –शयं नि– आ०, ब०, द०, ज० । ७ द्रव्यलिङ्गानि भवन्ति आ०, ब०, द०, ज० ।

अथ देवमानवतिर्यग्नारका अनेकविधपुण्यपापकर्मोदयायत्ताश्चतुर्गतिषु शरीराणि धारयन्ति, ते सम्पूर्णमायुर्भुक्त्वा शरीरान्तराण्याश्रयन्ति आहोस्विदसम्पूर्णमप्यायुर्भुक्त्वा गत्यन्तरं यान्तीति प्रश्ने सूत्रं सूचयन्ति सूरयः—

औपपादिकचरमोत्तमदेहासंख्येयवर्षायुषोऽनपवर्त्यायुषः ॥ ५३ ॥

५ उपपादे भवा औपपादिका देवनारकाः। चरमोऽन्त्य उत्तम उत्कृष्टो देहः शरीरं येषां ते चरमोत्तमदेहाः तज्जन्मनिर्वाणयोग्यास्तीर्थङ्करपरमदेवा ज्ञातव्याः। गुरुदत्तपाण्डवादीनामुपसर्गेण मुक्तत्वदर्शनान्नास्त्यनपवर्त्यायुर्नियम इति न्यायकुमुदयचन्द्रोदये (चन्द्रे) प्रभाचन्द्रेणोक्तमस्ति[2]। तथा चोत्तमदेवत्वेऽपि सुभौमब्रह्मदत्तापवर्त्यायुर्दर्शनात्, कृष्णस्य च जरत्कुमारबाणेनापमृत्युदर्शनात् सकलार्धचक्रवर्तिनामप्यनपवर्त्यायुर्नियमो नास्ति इति राज-
१० वार्तिकालङ्कारे प्रोक्तमस्ति[3]। असंख्येयवर्षाणि उपमानेन कल्पोपमादिना गणितानि वर्षाणि आयुर्येषां भोगभूमिजतिर्यङ्मानवकुभोगभूमिजानां ते असंख्येयवर्षायुषः। औपपादिकाश्च चरमोत्तमदेहाश्चासंख्येयवर्षायुषश्च औपपादिकचरमोत्तदेहासंख्येयवर्षायुषः। एते अनपवर्त्यायुषः। न अपवर्त्यं विषशस्त्राग्निप्रभृतिसन्निधाने ह्रस्वमायुर्येषां ते अनपवर्त्यायुषः। यद्येतेषामपवर्त्यं ह्रस्वमायुर्न भवति तर्हि अर्थादन्येषां विषशस्त्रादिभिरायुरुदीरणाम्रफलादिवद्
१५ भवतीति तात्पर्यार्थः। अन्यथा दयाधर्मोपदेशचिकित्साशास्त्रं च व्यर्थं स्यात्। चरमोत्तमदेह इत्यस्मिन्स्थाने चरमदेह इति केचित्पठन्तीति ; तन्न युक्तम् ; तथा सति संजयन्तादिमृत्यूपसर्गमुक्तिर्न संगच्छत इति भद्रम्।

[4]इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ द्वितीयः पादः समाप्तः।

---

१ –कर्मायत्ताश्च– आ०, ब०, व०, द०, ज०। २ मुद्रिते न्यायकुमुदचन्द्रे नेदमुपलभ्यते। ३ "अन्त्यचक्रधरवासुदेवादीनामायुषोऽपवर्तदर्शनादव्याप्तिः। उत्तमदेहाश्चक्रधरादयोऽनपवर्त्यायुष इत्येतत् लक्षणमव्यापि। कुतः? अन्त्यस्य चक्रधरस्य ब्रह्मदत्तस्य वासुदेवस्य च कृष्णस्य अन्येषाञ्च तादृशानां बाह्यनिमित्तवशादायुरपवर्तदर्शनात्।" –राजवा० २।५३। ४ इत्यनवद्यगद्यपद्यविद्याविनोदितप्रमोदपीयूषरसपानपावनमतिसभाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोऽलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिश्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण च सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य संछर्दितमिथ्यामतदुर्गरेण श्रीश्रुतसागरसूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां द्वितीयोऽध्यायः समाप्तः। आ०, ब०, द०, ज०।

तृतीयोऽध्यायः

अथ "भवप्रत्ययोऽवधिर्देवनारकाणाम्" इत्यादिषु नारकशब्द आकर्णितः। 'के ते नारकाः' इति प्रश्ने नारकस्वरूपनिरूपणार्थं नारकाणामधिकरणभूताः सप्त भूमय उच्यन्ते—

रत्नशर्करावालुकापङ्कधूमतमोमहातमःप्रभा भूमयो घना-म्बुवाताकाशप्रतिष्ठाः सप्ताधोऽधः ॥ १ ॥ ५

सप्तभूमयः सप्तनरकभूमयोऽधोऽधो भवन्ति, नीचैर्नीचैर्भवन्ति। कथम्भूताः सप्तभूमयः? रत्नशर्करावालुकापङ्कधूमतमोमहातमःप्रभाः। प्रभाशब्दः प्रत्येकं[1] प्रयुज्यते। तेनायमर्थः—रत्नप्रभा च शर्कराप्रभा च वालुकाप्रभा च पङ्कप्रभा च धूमप्रभा च तमःप्रभा च महातमःप्रभा च। रत्नप्रभासहिता भूमी रत्नप्रभा, [2]मन्दान्धकारा। शर्कराप्रभासहिता भूमिः शर्कराप्रभा, [3]अतीषत्तेजस्का। वालुकाप्रभासहिता भूमिर्वालुकाप्रभा अन्धकारप्राया १० अतिमनाक्तेजस्का। पङ्कः कर्दमः, पङ्कप्रभासहिता भूमिः पङ्कप्रभा, पङ्केऽपि मलिना प्रभा वर्त्तते। धूमप्रभासहिता भूमिर्धूमप्रभा। धूमेऽपि पङ्कादपि मलिनतरा प्रभा वर्तते। तमः-प्रभासहिता भूमिस्तमःप्रभा। तमसोऽपि स्वकीया प्रभा वर्त्तते। महातमःप्रभासहिता भूमिः महातमःप्रभा, महान्धकारसहिता भूमिः। तमस्तमःप्रभाऽपरनाम्नी। अत्र वालुकास्थाने वालिका इति च पाठो दृश्यते। तथा सति वालुकाया वालिकेत्यभिधा ज्ञातव्या। पुनरपि १५ कथम्भूता भूमयः? घनाम्बुवाताकाशप्रतिष्ठाः। घनश्च अम्बु च वातश्च आकाशश्च घनाम्बु-वाताकाशाः, घनाम्बुवाताकाशाः प्रतिष्ठा आधारो यासां भूमीनां ता घनाम्बुवाताकाशप्रतिष्ठाः। घनवातः घनोदधिवाताऽपरनामको वातः। अम्बुवातः घनवाताऽपरनामको वातः। वातस्तनु-वाताऽपरनामको वातः। अस्यायमर्थः—सर्वाः स[4]प्तापि भूमयो घनवातप्रतिष्ठा वर्तन्ते। स च घनवातः अम्बुवातप्रतिष्ठोऽस्ति। स चाम्बुवातस्तनुवातप्रतिष्ठो वर्तते। स च तनुवात २० आकाशप्रतिष्ठो भवति। आकाशस्यालम्बनं किमपि नास्ति। सप्त भूमय इत्युक्ते अधिकोन-संख्यानिषेधः प्रतिपादितः। अधोऽधः इत्युक्ते तिर्यग् न वर्त्तन्ते, उपर्युपरि च न वर्तन्ते, रज्जु-रज्जुप्रमाणाकाशान्तरे वर्तन्ते इत्यर्थः। यथैते त्रयो वाताः भूमीनां पर्यन्तेषु वर्तन्ते तथा सप्तानां भूमीनामधस्तलेषु च त्रयो वाताः प्रत्येकं वर्तन्त इति च ज्ञातव्यम्। अत्र प्रस्तावागतत्रैलोक्य-वेष्टनवातस्वरूपनिरूपणार्थं श्लोकत्रयोदशकमुच्यते। तथा हि— २५

---

१ -कं यु- आ०, ब०, द०, ज०। २ महान्धकारा आ०, ब०, द०, ज०। ३ अतीव तेज- ब०। अतीव तेज- व०। अतीवत्तेज- आ०, ब०, द०। ४ सप्तभू- आ०, ब०, द०, ज०।

"घनोदधिजगत्प्राणः पूर्वो लोकस्य वेष्टनम् ।
घनः प्रभञ्जनो नाम द्वितीयस्तदनन्तरम् ॥ १ ॥
तनुवातमुपर्यस्य त्रैलोक्याधारशक्तिमत् ।
वाता एते, स्थितिस्तेषां कथ्यमाना निशम्यताम् ॥ २ ॥
५ घनोदधिमरुत्तस्य वर्णो गोमूत्रसन्निभः ।
घनाशुगस्य वर्णोऽस्ति मुद्गवर्णनिभः स च ॥ ३ ॥
तनुर्गन्धवहो नानावर्णवान् परिकीर्तितः ।
एते त्रयोऽपि वृक्षस्य त्वग्वा लोकोपरि स्थिताः ॥ ४ ॥
लोकमूले च पार्श्वेषु यावद्रज्जु मरुत्त्रये ।
१० विंशतिश्च सहस्राणि, [१]बाहल्यं योजनैः पृथक् ॥ ५ ॥
सहस्राणि तु सप्तैव पञ्च चत्वारि च क्रमात् ।
बाहल्यं गन्धवाहानां प्रणिधौ सप्तमक्षितेः ॥ ६ ॥
नभस्वतां [२]क्रमाद्धीयमानानां बाहलं मतम् ।
तिर्यग्लोके [३]व्रताऽब्ध्यग्निसहस्रैर्योजनैः पृथक् ॥ ७ ॥
१५ वर्धन्ते मातरिश्वानः क्रमाद् ब्रह्मसमाश्रयाः ।
बाहलाः सप्त पञ्चात्र तानि चत्वारि च स्मृताः ॥ ८ ॥
सदागतित्रयं तस्माद्धीयमानं क्रमागतम् ।
पञ्च चत्वारि च त्रीणि तान्यूर्ध्वे बहलाश्रितम् ॥ ९ ॥
स्पर्शनो लोकशिखरे, द्विक्रोशः स्याद् घनोदधिः ।
२० क्रोशैकबहलो विद्धिः घनश्वसन उच्यते ॥ १० ॥
चतुश्चापशतैश्चापि सपादैरून इष्यते ।
क्रोशैकस्तनुवातस्य बाहल्यं शल्यहृन्मते ॥ ११ ॥
तस्योपरितने भागे सिद्धा जन्मादिवर्जिताः ।
तिष्ठन्ति ते निजं स्थानं क्वचिद्यच्छन्तु मेऽर्चिताः ॥ १२ ॥

---

१ बाहुल्यैर्यो- आ०, ब०, द० । बाहल्यैर्यो- आ०, ज०, ब० । २ क्रमान्त्रये मानानां आ०, ब०, द०, ज० । ३ व्रतानि पञ्च, अब्ध्यश्चत्वारः, अग्नयस्त्रयः ।

स्वरूपमेतत्पवमानगोचरं विचारितं चोरुचरित्रतेजसाम् ।
विचिन्त्य सिद्धान्प्रणमन्ति येऽनिशं व्रजन्ति ते शं श्रुतसागरेडितम् ॥१३॥"

अथ सप्तानां नारकाणां भूमिबाहल्यमुच्यते । तथा हि—

"लक्षमेकमशीतिश्च सहस्राण्यादिमेदिनी ।
बाहल्यं योजनानान्तु भागास्तत्र त्रयः स्मृताः ॥　　　५
तत्षोडशसहस्राणि खरक्ष्माभाग उन्नतः ।
जम्बालबहुलो भागोऽप्यशीति[2]श्चतुरुत्तरम् ॥
अशीतितत्सहस्राणि भागोऽम्बुबहुलाभिधः ।
त्रिष्वधश्चोपरि त्याज्यं तत्सहस्रं च पञ्चसु ॥
रक्षोऽसुरा द्वितीये स्युराद्ये स्युर्भौमभावनाः ।　　　१०
इतरे तु तृतीये तु नारकाः प्रथमे मताः ॥
[3]द्वात्रिंशत्तत्सहस्राणि वंशा भूरुन्नता मता ।
शैलाष्टाविंशतिं ह्युच्चाश्चतुर्विंशतिम[4]ञ्जना ॥
अरिष्टा विंश[5]तिं तानि मघवी षोडश स्मृता ।
माघव्यष्टोन्नता वातैस्त्रिभिः प्रत्येकमावृताः ॥　　　१५
[6]कण्डरादिकजन्तूनां छत्रकच्छिद्रसन्निभाः ।
नारकोत्पादभूदेशाः पतन्तीतो ह्यधोमुखाः ॥" [　　　]

अथ सप्तनरकप्रस्तारनामानि कथ्यन्ते—तत्र तावत्प्रथमनरकप्रस्तारास्त्रयोदश—प्रथमः सीमन्तकः प्रस्तारः । द्वितीयो नरकनामा प्रस्तारः । तृतीयो रोरुकः प्रस्तारः । चतुर्थो भ्रान्तः । पञ्चम उद्भ्रान्तः । षष्ठः सम्भ्रान्तः । सप्तमोऽसम्भ्रान्तः । अष्टमो विभ्रान्तः । नवमस्त्रस्तः । २० दशमस्त्रसितः । एकादशः वक्रान्तः । द्वादशोऽवक्रान्तः । त्रयोदशो विक्रान्तः । द्वितीयनरकप्रस्तारा एकादश—प्रथम[7]ः स्तवकः । द्वितीयः [8]स्तनकः । तृतीयो [9]मनकः । चतुर्थोऽमनकः । पञ्चमो घाटः । षष्ठोऽसंघाटः । सप्तमो जिह्वः । अष्टमो जिह्वकः । नवमो लोलः । दशमो लोलुकः[10] । एकादशः स्तनलोलुकः[11] । [12]तृतीये नरके नव प्रस्ताराः—प्रथमस्तप्तः । द्वितीयस्तपितः । तृतीयस्तपनः । चतुर्थस्तापनः । पञ्चमो निदाघः । षष्ठः प्रज्वलितः । सप्तम २५

---

१ –तं वासचरि– आ०, ब०, द०, ज० । २ –तिचतुरुत्तरः ज० । –तिश्चतुरुत्तराः ब० । ३ द्वात्रिंशच्च स– आ० । ४ –मञ्जसा आ०, द०, ब०, ज० । ५ –शतिस्तानि आ० । ६ कञ्जरा– ता० । ७ –मः सूरकः ता०, ब० । ८ संस्तपनः ज० । संस्तनः आ०, द० । ९ वनकः आ०, द०, ज० । १० लोलुपः ता०, ब० । ११ –लोलुपः ता०, ब० । १२ तृतीयनर –आ०, द०, ब०, ब०, ज० ।

उज्ज्वलितः। अष्टमः संज्वलितः। नवमः सम्प्रज्वलितः। चतुर्थनरके सप्त प्रस्ताराः—प्रथम आरः। द्वितीयस्तारः। तृतीयो मारः। चतुर्थो [1]वर्चस्कः। पञ्चमस्तमकः। षष्ठः खडः। सप्तमः खडखडः। पञ्चमनरके पञ्च प्रस्ताराः—प्रथमस्तमः। द्वितीयो भ्रमः। तृतीयो झषः। चतुर्थोऽन्धः। पञ्चमस्तमिस्रः। षष्ठनरके त्रयः प्रस्ताराः—प्रथमो हिमः। द्वितीयो वर्दलः।
५ तृतीयो लल्लकः। सप्तमनरके एकः प्रस्तारः—अप्रतिष्ठानः। इत्येकोनपञ्चाशत् प्रस्ताराः सप्तनरकाणां भवन्ति। एषां सप्तानाञ्च नरकाणां [2]नामान्तराणि च भवन्ति। प्रथमा भूमिः घर्मा। द्वितीया वंशा। तृतीया शैला शिला वा। चतुर्थी अञ्जना। पञ्चमी अरिष्टा। षष्ठी मघवी। सप्तमी माघवी।

अथ रत्नप्रभादिषु नरकेषु ये स्थिताः प्रस्तारास्तेषु त्रयोदशादिसप्तसु स्थानेषु यानि
१० बिलानि वर्तन्ते तेषां प्रतिनरकं संख्या कथ्यते—

तासु त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशत-सहस्राणि पञ्च चैव यथाक्रमम् ॥ २ ॥

तासु रत्नप्रभादिषु सप्तसु भूमिषु यथाक्रमं यथासंख्यं त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशतसहस्राणि भवन्ति। [3]पञ्च चैव भवन्ति। नरकशतसहस्रशब्दः प्रत्येकं
१५ प्रयुज्यते, तेनायमर्थः—त्रिंशच्च पञ्चविंशतिश्च पञ्चदश च दश च त्रीणि च पञ्चभिरूनमेकं च त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकानि, तानि च तानि नरकाणां बिलानां शतसहस्राणि लक्षाणि तानि तथोक्तानि। तथा हि—त्रिंशन्नरकशतसहस्राणि त्रिंशल्लक्षनरकाणि रत्नप्रभायां प्रथमभूमौ भवन्ति। पञ्चविंशतिनरकशतसहस्राणि पञ्चविंशतिलक्षबिलानि शर्कराप्रभायां द्वितीयभूमौ भवन्ति। पञ्चदशशतसहस्राणि पञ्चदशलक्षबिलानि वालुकाप्रभायां
२० तृतीयभूमौ भवन्ति। दशनरकशतसहस्राणि दशलक्षबिलानि पङ्कप्रभायां चतुर्थभूमौ भवन्ति। त्रीणि नरकशतसहस्राणि त्रिलक्षबिलानि धूमप्रभायां पञ्चमभूमौ भवन्ति। पञ्चोनमेकं नरकशतसहस्रं पञ्चहीनैकबिललक्षं तमःप्रभायां भूमौ भवन्ति। [4]पञ्चैव च बिलानि महातमःप्रभायां तमस्तमःप्रभायां सप्तमभूमौ भवन्ति। एवमेकत्र चतुरशीतिलक्षाणि भवन्ति[5]। भवति चात्र श्लोकः—

२५ "त्रिंशच्चैव तु पञ्चविंशतिरतः पञ्चाधिकाः स्युर्दश
स्युस्तुर्ये दश पञ्चमे निरयके तिस्रश्च लक्षाः मताः।

---

१ चर्चस्कः आ०,द०,ब०,ज०। २ "घम्मावंसामेघाअंजणारिट्ठाणउब्भमघवीओ। माघविया इय ताणं पुढवीणं गोत्तणामाणि॥" –तिलोय० १।१५३। "घर्मा वंशा शिलाख्या च अञ्जनारिष्टका तथा। मघवी माघवी चेति यथाख्यातमुदाहृताः॥" –वराङ्गच० ११।१२। ३ पञ्चैव आ०, द०, ब०, ज०, व०। ४ पञ्चैव बि– आ०, द०,ब०, ज०। ५ –न्ति त्रिंश– आ०, ब०, द०, ज०।

षष्ठे पञ्चसमुज्झिता खलु भवेल्लक्ष्येव पञ्चान्तिमे
सप्तस्वेवमशीतिरास्पदभुवां लक्षाश्चतुर्भिर्युताः ॥" [ ]

अथ सप्तसु नरकभूमिषु नारकाणां प्रतिविशेषं दर्शयन्ति—

नारका नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥ ३ ॥

नारका नरकसत्त्वाः । कथम्भूताः ? नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः । ५ लेश्याश्च कापोतनीलकृष्णाः, परिणामाश्च स्पर्शरसगन्धवर्णशब्दाः, देहाश्च शरीराणि, वेदनाश्च शीतोष्णजनिततीव्रबाधाः, विक्रियाश्च शरीरविकृतयः, लेश्यापरिणामदेहवेदनाविक्रियाः । नित्यमनवरतम्, अशुभतरा अतिशयेन अशुभाः लेश्यापरिणामदेहवेदनाविक्रिया येषां नारकाणां ते नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः । प्रथमभूमौ द्वितीयभूमौ च [1]कापोती लेश्या वर्तते । तृतीयभूमावुपरिष्टात् कापोती, अधो नीला लेश्या भवति । चतुर्थ्यां १० भूमौ नीलैव लेश्या भवति । पञ्चम्यां क्षितावुपरिष्टान्नीला लेश्या अधस्तात् कृष्णा । षष्ठ्यां धरायां कृष्णैव । सप्तम्यां क्ष्मायां परमकृष्णा लेश्या भवति । सप्तसु भूमिषु क्षेत्रकारणवशात्ती-व्राऽसातहेतवोऽशुभतराः स्पर्शरसगन्धवर्णशब्दाः परिणामाः भवन्ति । अशुभनामकर्मोदयात् सप्तस्वपि भूमिषु विकृतिप्राप्ताः कुत्सितरूपा हुण्डकसंस्थाना अशुभतर[2]काया भवन्ति । तत्र प्रथमभूमौ प्रथमपटले हस्तत्रयोन्नता देहा भवन्ति । ततः क्रमेण वर्द्धमानास्त्रयोदशे पटले १५ सप्त चापानि त्रयो हस्ताः षडङ्गुलयोऽशुभत[3]रा देहा भवन्ति । एवं द्वितीयभूमौ क्रमवृद्ध्या एकादशे पटले पञ्चदश चापानि अर्धतृतीयौ[4] करौ भवतः । तृतीयभूमौ नवमे पटले एकत्रिं-शच्चापान्येकहस्ताधिकानि भवन्ति । चतुर्थभूमौ सप्तमे पटले द्विषष्टिचापानि द्विहस्ताधिकानि भवन्ति । पञ्चम्यां भूमौ पञ्चमे पटले पञ्चविंशत्यधिकं शतं चापानां भवति । षष्ठ्यां भूमौ तृतीये पटले सार्द्धे द्वे शते धनुषां भवतः । सप्तम्यां क्ष्मायां पञ्चशतचापोत्सेधानि शरीराणि २० नारकाणां भवन्ति ।

अभ्यन्तराऽसद्वेद्योदये सति चतसृषु भूमिषु नारकाणां बाह्ये उष्णे सति तीव्रा वेदना भवति । प[5]ञ्चम्यां भूमौ उपरि द्विलक्षबिलेषु उष्णवेदना भवति । अध एकलक्षबिलेषु तीव्रा शीतवेदना भवति । अत्र तु पञ्चम्यां भूमौ [6]मतान्तरमस्ति । उपरि प[7]ञ्चविंशत्यधिकद्विलक्ष-बिलेषूष्णवेदना, एकलक्षबिलेषु प[8]ञ्चविंशतिहीनेषु शीतवेदना भवति । षष्ठ्यां सप्तम्यां च २५ भूमौ तीव्रा शीतैव वेदना वर्तते ।

---

१ कापोतले- आ०, ब०, द०, ज० । २ -भतरा का- आ०, ब०, द०, ज० । ३ -तरदे- आ०, ब०, द०, ज० । ४-तृतीयकरो ता० । ५ पंचमभू- आ०, ज० । ६ "...पंचमपुढवीए तिचउक्कभागंतं । अदिउण्हा णिरयबिला तट्ठियजीवाण तिव्वदाघकरा ॥" -तिलोयप० २।२९ । ७ अत्र 'पञ्चविंशतिसहस्राधिकद्विलक्षबिलेषु' इति पाठेन भाव्यम् । ८ अत्र 'पञ्चविंशति-सहस्रहीनेषु' इति पाठः समुचितः ।

'वयं शुभं करिष्यामः' इति उद्यमेऽप्यशुभैव विक्रियोत्पद्यते। 'वयं सुखहेतूनुत्पादयामः' इत्युद्यमेऽपि सति दुःखहेतुमेवोत्पादयन्ति। एवमशुभतरा विक्रिया नारकेषु ज्ञातव्या। भवन्ति चात्र श्लोकाः—

"कापोती तु द्वयोर्लेश्या तृतीये सा च नीलिका।
५ नीला तुरीये नीला च कृष्णा च परतः स्मृता॥ १॥
कृष्णा षष्ठे, महाकृष्णा सप्तमे नरके मता।
धनुः कराङ्गुलीरुच्चाः सप्तत्रिषडपि क्रमात्॥ २॥
द्विर्द्विस्ततश्चतुर्ष्वस्ति तेषूष्णा तीव्रवेदना।
पञ्चमे पञ्चविंशत्याऽधिकयोर्लक्षयोर्द्वयोः॥ ३॥
१० बिलानां वेदनोष्णैव ततोऽन्यत्र च शीतला।
षष्ठे च सप्तमे श्वभ्रे शीतैव खलु वेदना॥४॥" [ ]

अथैतेषां नारकाणां शीतोष्णोत्पादितैव वेदना वर्त्तते, आहोस्विदन्यदपि दुःखं तेषां वर्त्तते न वेति प्रश्ने सूत्रमिदमाहुः—

परस्परोदीरितदुःखाः॥ ४॥

१५ परस्परस्य अन्योन्यस्य उदीरितमुत्पादितं दुःखं यैस्ते परस्परोदीरितदुःखा नारका भवन्तीति सूत्रार्थः। केन प्रकारेण नारकाणां परस्परं दुःखोत्पादनमिति[1] चेत्? उच्यते— भवप्रत्ययेन अवधिज्ञानेन सम्यग्दृष्टीनां मिथ्यादर्शनोदयात् विभङ्गनाम्ना अवधिना विप्रकर्षादेव दुःखहेतुपरिज्ञानाद् दुःखमुत्पद्यते। समीपागमने[2] चान्योन्यविलोकनात् प्रकोपाग्निर्जाज्वल्यते। पूर्वजन्मानुस्मरणाच्च अतितीव्रानुबद्धवैराश्च भवन्ति। कुक्कुरगोमायुप्रभृतिवत्
२० [3]स्वाभिघाते प्रवर्तन्ते। निजविक्रियाविहितलोहघनकुन्ततोमरशक्तिभिण्डिमालपरशुवासीखङ्गहलमुसलत्रिशूलशूलछुरिकाकट्टारिकातरवारिखड्गषकुठारभुसुण्डिशङ्कुनाराचप्रभृतिभिरायुधैः निजपाणिपाददन्तैश्च छेदनभेदनतक्षणकरटनैश्च अन्योन्यस्य अतितीव्रमसातमुत्पादयन्ति। क्रकचविदारणशूलारोपणभ्राष्ट्रक्षेपणयन्त्रपीलनवैतरणीनिमज्जनादिभिश्च दुःखयन्ति। कृत्तिमुत्पाद्य परिधानं ददति। कूटशाल्मलितरौ रोहावरोहणेन घट्टयन्ति। अङ्गारशय्यायां शाययन्ति।
२५ तत्पलमुत्पाद्य तमेव खादयन्ति। ताम्रत्रपुसीसकादि उत्काल्य मुखे पादिकां दत्वा पाययन्ति। सन्दंशैर्लुञ्चन्ति। एवं महादुःखं जनयन्ति।

अथ किमेतावदेव दुःखोत्पादनमाहोस्विदन्योऽपि कोऽपि दुःखप्रकारस्तेषामस्तीति प्रश्ने योगोऽयमुच्यते—

---

१ –मित्युच्य– आ०, ब०, द०, ज०। २ –नेऽन्यो– आ०, ब०, द०, ज०। ३ स्वामिघाते ता०, ब०।

संक्लिष्टासुरोदीरितदुःखाश्च प्राक्चतुर्थ्याः ॥ ५ ॥

प्राग्भवसंभाविताततितीव्रसंक्लेशपरिणामोपार्जितपापकर्मोदयात् सम् सम्यक् सन्ततं वा क्लिश्यन्ते स्म आर्तरौद्रध्यानसंप्राप्ता ये ते संक्लिष्टाः। असुरत्वप्रापकदेवगतिनामकर्मप्रकारकर्मोदयादस्यन्ति क्षिपन्ति प्रेरयन्ति परानित्यसुराः। संक्लिष्टाश्च ते असुराश्च संक्लिष्टाऽसुराः। संक्लिष्टासुरैरुदीरितमुत्पादितं दुःखमसातं येषां ते संक्लिष्टासुरोदीरितदुःखाः। प्राक् ५ पूर्वमेव चतुर्थ्याः। पङ्कप्रभाभूमेः पूर्वमेव रत्नशर्करावालुकाप्रभास्वेव तिसृषु नरकभूमिष्वसुरोदीरितं दुःखं भवतीति ज्ञातव्यम्। न त्वधश्चतसृषु असुरोदीरितं दुःखमस्तीति ज्ञातव्यम्। तत्रापि ये केचनासुरा अम्बाम्बरीषादयः संक्लिष्टा असुरा वर्तन्ते त एव नारकाणां दुःखमुत्पादयन्ति। न तु सर्वेऽप्यसुरा नारकाणां दुःखमुत्पादयन्ति। अम्बाम्बरीषादय एव केचित्पूर्ववैरादिकं स्मारयित्वा तिसृषु भूमिषु यात्वा नारकान् योधयन्ति। तेषां युद्धं दृष्ट्वा तेषां सुख- १० मुत्पद्यते। अन्येषु प्रीतिहेतुभूतेषु विनोदेषु सत्स्वपि युद्धं कारयतां पश्यतां च सुखमुत्पद्यते। तादृशः संक्लेशपरिणामः तैरुपार्जितः पूर्वजन्मनीति भावः। भवति चात्र श्लोकः—

"अम्बाम्बरीषप्रमुखाः पूर्ववैरस्मृतिप्रदाः।
योधयन्त्यसुरा भूषु तिसृषु क्लिष्टचेतसः॥ १ ॥" [ ]

तिलतिलप्रमाणशरीरखण्डनेऽपि तेषामपमृत्युर्न वर्तते। शरीरं पारदवत् पुनर्मिलति १५ अनपवर्त्यायुष्ट्वात्। चकारः पूर्वोक्तदुःखसमुच्चयार्थः। तेन तप्तलोहपुत्तलिकालिङ्गनतप्ततैलसेचनाऽयःकुम्भीपचनादिकं दुःखमुत्पादयन्ति ते असुरा इति तात्पर्य्यम्।

अथैतेषां किलायुरकाले न त्रुट्यति इत्युक्ते कियत्कियत्परिमाणं तदायुर्वर्तते इति प्रश्ने सूत्रमिदमाहुः—

तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा २०
सत्त्वानां परा स्थितिः॥ ६ ॥

यथाक्रममिति पूर्वोक्तमत्र ग्राह्यं "तासु त्रिंशत्" इत्यादि सूत्रे प्रोक्तम्। तेनायमर्थः- तेषु नरकेषु सप्तभूम्यनुक्रमेण सत्त्वानां नारकाणां परा उत्कृष्टा स्थितिर्वेदितव्या। सत्त्वानामित्युक्ते भूमीनां स्थितिरिति न ग्राह्यम्, भूमीनां शाश्वतत्वात्। कथम्भूता स्थितिः? एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा। सागरशब्दः प्रत्येकं प्रयुज्यते। तेनाय- २५ मर्थः—एकसागरः त्रिसागराः सप्तसागराः दशसागराः सप्तदश सागराः द्वाविंशतिसागराः त्रयस्त्रिंशत्सागराः उपमा यस्याः स्थितेः सा तथोक्ता। अस्यायमर्थः— रत्नप्रभायां परा उत्कृष्टा स्थितिरेकसागरोपमा। शर्कराप्रभायां त्रिसागरोपमा परा स्थितिः।

---

१ ततश्चतसृषु असुरोदीरितं दुखं नास्तीति म०। २ सूतवत् ता०। ३ -युष्कात् आ०, द०, ज०, ब०। ४ त्रयः सा- ता०, व०। ५ -तिः सा- ता०, व०।

वालुकाप्रभायां सप्तसागरोपमा परा स्थितिः । पङ्कप्रभायां दशसागरोपमा परा स्थितिः । धूमप्रभायां सप्तदशसागरोपमा परा स्थितिः । तमःप्रभायां द्वाविंशतिसागरोपमा परा स्थितिः । महातमःप्रभायां त्रयस्त्रिंशत्सागरोपमा परा स्थितिरिति ।

अथ विस्तरेण स्थितिस्वरूपं निरूप्यते—रत्नप्रभायां सीमन्तकनाम्नि प्रथमपटले नवति-
५ वर्षसहस्राणि परा स्थितिर्वर्त्तते । नरकनाम्नि द्वितीयपटले नवतिलक्षवर्षाणि परा स्थितिरस्ति । रोरुकनाम्नि तृतीयपटले असंख्यातपूर्वकोटयः परा स्थितिर्भवति । भ्रान्तनाम्नि चतुर्थपटले एकसागरस्य दशमो भागः परा स्थितिश्चकास्ति । एका कोटीकोटिपल्योपमा इत्यर्थः । उद्भ्रान्त-नाम्नि [1]पञ्चमे पटले एक सागरस्य पञ्चमो भागो द्वे कोटीकोट्यौ पल्योपमे इत्यर्थः । सम्भ्रान्तनाम्नि षष्ठे पटले सागरदशभागानां त्रयो भागाः परा स्थितिर्जागर्ति । असम्भ्रान्त-
१० नाम्नि सप्तमे पटले सागरदशभागानां चत्वारो भागाः परा स्थितिरुदेति । विभ्रान्तनाम्नि अष्टमे पटले सागरार्द्धं परा स्थितिः प्रवर्त्तते । त्रस्तनाम्नि नवमे पटले सागरदशभागानां षड्भागाः परा [2]स्थितिर्जायते । त्रसितनाम्नि दशमे पटले सागरदशभागानां सप्त भागाः परा स्थितिः सिध्यति । वक्रान्तनाम्नि एकादशे पटले सागरदशभागानामष्ट भागाः परा स्थितिरुत्पद्यते । अवक्रान्तनाम्नि द्वादशे पटले सागरदशभागानां नव भागाः परा स्थितिः
१५ सम्पद्यते । विक्रान्तनाम्नि त्रयोदशे पटले एकसागरः परा स्थितिः फलति ।

द्वितीयपृथिव्यां सूरकनाम्नि प्रथमपटले सागरैकः सागरैकादशभागानां द्वौ भागौ च परा स्थितिः फलति । स्तनकनाम्नि द्वितीयपटले सागरैकः सागरैकादशभागानां चत्वारो भागाश्च परा स्थितिरास्ते । मनकनाम्नि तृतीयपटले सागरैकः सागरैकादशभागानां षड् भागाश्च परा स्थितिर्विद्यते । अमनकनाम्नि चतुर्थपटले सागरैकः सागरैकादशभागानामष्टौ
२० भागाश्च परा स्थितिर्ध्रियते । घाटनाम्नि पञ्चमपटले सागरैकः सागरैकादशभागानां दश भागाश्च परा स्थितिः[3] प्रभवति । असङ्घाटनाम्नि षष्ठे पटले सागरौ द्वौ सागरैकादशभागानामेको भागश्च परा स्थितिः प्रोदेति । जिह्वनाम्नि सप्तमे पटले सागरौ द्वौ सागरैकादशभागानां त्रयो भागाश्च परा स्थितिः प्रवर्तते । जिह्विकनाम्न्यष्टमे पटले द्वौ सागरौ सागरैकादशभागानां पञ्च भागाश्च परा स्थितिः [4]प्रजायते । लोलनाम्नि नवमे पटले द्वौ सागरौ
२५ सागरैकादशभागानां सप्त भागाश्च परा स्थितिः [5]प्रसिध्यति । लोलुपनाम्नि दशमे पटले द्वौ सागरौ सागरैकादशभागानां नव भागाश्च परा स्थितिः प्रोत्पद्यते[6] । स्तनलोलुपनाम्नि एकादशे पटले त्रयः सागराः परा स्थितिः प्रफलति ।

तृतीयपृथिव्यां तप्तनाम्नि प्रथमपटले त्रयः सागराः सागरनवभागानां चत्वारश्च परा स्थितिः सम्भवति । द्वितीये तपितनाम्नि पटले त्रयः सागराः सागरनवभागाना-

---

१ पञ्चमप- आ०, ब०, द०, ज० । २ -तिर्भव- आ०, ब०, द०, ज० । ३ -तिर्भ- आ०, ब०, द०, ज० । ४ प्रसिध्यति ज० । ५ प्रजायते ज० । ६ प्रतिपद्यते आ०, द० । प्रपद्यते ज० । प्रसिध्यति ब० ।

मष्ट भागाश्च परा स्थितिः समुदेति। तपननाम्नि तृतीयपटले चत्वारः सागराः सागरनव-
भागानां त्रयो भागाश्च परा स्थितिः सम्प्रवर्तते। तपननाम्नि चतुर्थपटले सागराश्चत्वारः
सागरनवभागानां सप्त भागाश्च परा स्थितिः सम्प्रजायते। निदाघनाम्नि पञ्चमे पटले सागराः
पञ्च सागरनवभागानां द्वौ भागौ च परा स्थितिः सम्प्रसिध्यति। प्रज्वलितनाम्नि षष्ठे पटले
पञ्च सागराः सागरनवभागानां षट् भागाश्च परा स्थितिः समुत्पद्यते। उज्ज्वलितनाम्नि सप्तमे ५
पटले षट्सागराः सागरनवभागानामेकोभागश्च परा स्थितिः [1]सम्पद्यते। संज्वलितनाम्नि
अष्टमे पटले षट्सागराः सागरनवभागानां पञ्च भागाश्च परा स्थितिः सन्निष्पद्यते।
संप्रज्वलितनाम्नि नवमे पटले सागराः सप्त परा स्थितिः संप्रफलति।

चतुर्थपृथिव्याम् आरनाम्नि प्रथमपटले सप्त सागराः सागरसप्तभागानां त्रयो
भागाश्च परा स्थितिः समस्ति। तारनाम्नि द्वितीयपटले सागराः सप्त सागरसप्तभागानां १०
षड्भागाश्च परा स्थितिः समास्ते। मारनाम्नि तृतीये पटले सागरा अष्ट सागरसप्तभागानां
द्वौ भागौ च परा स्थितिः संजागर्ति। वर्चस्कनाम्नि चतुर्थपटले सागरा अष्ट सागरसप्त-
भागानां पञ्चभागाश्च परा स्थितिः संविद्यते। तमकनाम्नि पञ्चमपटले सागरा नव सागरसप्त-
भागानामेको भागश्च परा स्थितिः सन्ध्रियते। खडनाम्नि षष्ठपटले सागरा नव सागरसप्त-
भागानां चत्वारो भागाश्च परा स्थितिः समुद्भवति। खडखडनाम्नि सप्तमे पटले दशसागराः १५
परा स्थितिरुज्जायते।

पञ्चमपृथिव्यां तमोनाम्नि प्रथमपटले एकादश सागराः सागरपञ्चभागानां द्वौ भागौ च
परा स्थितिः परिसिध्यति। भ्रमनाम्नि द्वितीयपटले सागरा द्वादश सागरपञ्चभागानां
चत्वारो भागाश्च परा स्थितिः पर्युदेति। झषनाम्नि तृतीयपटले चतुर्दश सागराः सागरपञ्च-
भागानामेको भागश्च परा स्थितिः पर्युत्पद्यते। अन्धनाम्नि चतुर्थपटले पञ्चदश सागराः २०
सागरपञ्चभागानां त्रयो भागाश्च परा स्थितिः परिसम्पद्यते। तमिस्रनाम्नि पञ्चमपटले
सागराः सप्तदश परा स्थितिः परिनिष्पद्यते।

षष्ठपृथिव्यां हिमनाम्नि प्रथमपटलेऽष्टादश सागराः सागरत्रिभागानां द्वौ भागौ च
परा स्थितिः परिफलति। वर्दलनाम्नि द्वितीयपटले विंशतिसागराः सागरत्रयभागानामेको
भागश्च परा स्थितिः परिजागर्ति। लल्लकनाम्नि तृतीयपटले द्वाविंशतिसागराः परा स्थितिः २५
परिविद्यते।

सप्तमपृथिव्यामप्रतिष्ठाननाम्नि पटले सागरास्त्रयस्त्रिंशत् परा स्थितिर्बोद्धव्या।
भवन्त्यत्रार्याः—

"प्रथमभूप्रथमपटले वर्षसहस्राणि नवतिरुत्कृष्टा।
स्थितिरेतावन्त्येव[2] द्वितीयके भवति लक्षाणि॥ १॥ ३०

---

१ समुत्पद्य– आ०, ब०, द०, ज०। सम्प्रपद्यते व०। २ –तावत्येव आ०, ई०, ब०, ज०।

पूर्वाणां खलु कोट्योऽसंख्याताः स्युस्तृतीयके ।
तुर्ये सागरदशमो भागः पञ्चमके पञ्चमश्चैव ॥ २ ॥
सागरदशभागानां त्रयस्तु भागा भवन्ति खलु षष्ठे ।
सप्तमके चत्वारो भागा अब्ध्यर्धमष्टमके ॥ ३ ॥
५ नवमे दशभागानां षड्भागा दशमके तु सप्तैव ।
एकादशेऽष्ट नव तु द्वादशकेऽब्धिस्त्रयोदशके ॥ ४ ॥
अथ कथयामि मुनीनां द्वितीयभूप्रथमपटलकेऽब्धिश्च ।
एकादशभागानां द्वौ भागौ सागरस्यैव ॥ ५ ॥
पटले द्वितीयकेऽब्धिर्भागाश्चत्वार एव च तृतीये ।
१० अब्धिः षड्भागयुतश्चतुर्थकेऽब्धिः कलाश्चाष्ट ॥ ६ ॥
पञ्चमकेऽब्धिर्दशके (?) षष्ठेऽब्धिरेक एव भागश्च ।
सप्तमके द्वावब्धी त्रयश्च भागा भवन्त्येव ॥ ७ ॥
द्वावब्धी अष्टमके भागाः पञ्चैव सागरौ नवमे ।
भागाः सप्त च दशमे नव भागाः सागरावपि च ॥ ८ ॥
१५ उदधय एकादशके त्रयस्तृतीयक्ष्माप्रथमपटले ।
अब्धित्रयमपि भागा नवभागानां च चत्वारः ॥ ९ ॥
अब्धित्रयाष्टभागा द्वितीयके सिन्धवस्तृतीये तु ।
चत्वारोंऽशत्रितयं तुर्ये ते चैव सप्त कलाः ॥ १० ॥
पञ्चमके द्व्यंशयुताः शशध्वजाः पञ्च षष्ठके पञ्च ।
२० भागाः षट् सप्तमके षडब्धयोंऽशस्तथा चैकः ॥ ११ ॥
अथ वीचिमालिनः स्युः षडष्टमे भागपञ्चकेन युताः ।
नवमे महार्णवानां सप्तकमिति साधुभिः कथितम् ॥ १२ ॥
तुर्यभूप्रथमपटले शशध्वजाः सप्त सप्तभागानाम् ।
भागास्त्रयो द्वितीये सप्ताम्बुधयश्च षड्भागाः ॥ १३ ॥
२५ अष्ट तृतीयेऽम्बुधयो भागौ द्वौ तुर्यकेऽष्ट पञ्चकलाः ।

पञ्चमभूप्रथमेऽस्मिन्नेकादश पञ्चभागभागयुगम् ।
द्वादशचतुरंशयुताः द्वितीयकेऽतश्चतुर्दशांशश्च ॥ १५ ॥
तुर्ये पञ्चदशांशास्त्रयः परं पञ्चमे तु सप्तदश ।
षष्ठभूप्रथमपटलेऽष्टादशभागत्रयद्वयंशौ ॥ १६ ॥
अम्बुधिर्विंशतिरंशो द्वितीयके विंशतिस्तृतीये तु । ५
अर्णवयुगेन सप्तमभुवि त्रयस्त्रिंशदम्बुधयः ॥ १७ ॥" [ ]

प्रथमे पटले जघन्यमायुर्दशवर्षसहस्राणि भवन्ति । उत्कृष्टं तु [1]पूर्वमेवोक्तम् । यत्प्रथमपटले उत्कृष्टमायुस्तद्द्वितीयपटले जघन्यं ज्ञातव्यम् । एवं सप्तस्वपि नरकेष्वेकोनपञ्चाशत्पटलेष्वायुरनुक्रमो ज्ञातव्यो यावत् सप्तमे नरके एकोनपञ्चाशत्तमे पटले द्वाविंशतिसागरोपमा जघन्या स्थितिरवगन्तव्या । १०

तेषु नरकेषु मद्यपायिनो मांसभक्षका मखादौ प्राणिघातका असत्यवादिनः परद्रव्यापहारकाः परस्त्रीलम्पटा महालोभाभिभूताः रात्रिभोजिनः स्त्री-बाल-वृद्ध-ऋषिविश्वासघातका जिनधर्मनिन्दका रौद्रध्यानाविष्टा इत्यादिपापकर्मानुष्ठातारः समुत्पद्यन्ते । उपरिपादा [3]अधोमस्तकाः सर्वेऽपि समुत्पद्य अधः पतन्ति । दीर्घकालं दुःखान्यनुभवन्ति । मेरुमात्रं भोजनं भोक्तुमिच्छन्ति, आसुरीमात्रमपि न प्राप्नुवन्ति । समुद्रजलं पिपासन्ति, जलबिन्दुमात्रमपि १५ न प्राप्नुवन्ति । सदा सुखं वाञ्छन्ति, चक्षुरुन्मेषमात्रमपि कालं सुखं न लभन्ते । तथा चोक्तम्—

"[4]अच्छिणिमीलणमित्तं णत्थि सुहं दुक्खमेव अणुबद्धं ।
णिरये णेरइयाणं अहोणिसं पच्चमाणाणं ॥१॥" [तिलोयसा० गा० २०७]

अन्यच्च— २०

"[5]असण्णि-सरिसव-पक्खी-भुजगा-सिंहि-त्थि-मच्छ-मणुया य ।
पढमादिसु उप्पत्ती अडवारा दोण्णि वारुत्ति ॥" [ ]

अस्यायमर्थः—असञ्ज्ञिनः प्रथमनरकमेव गच्छन्ति । सरीसृपा द्वितीयमेव नरकं गच्छन्ति । पक्षिणस्तृतीयमेव[6] नरकं व्रजन्ति । भुजगाश्चतुर्थमेव नरकं यान्ति । सिंहाः पञ्चममेव नरकं [7]जिहते । स्त्रियः षष्ठमेव । मत्स्याः मनुष्याश्च सप्तममेव नरकमियून्ति । २५

---

१ पूर्वोक्तम् आ०, द०, ब०, ज० । २ –नुष्ठातारकाः स– ज० । ३ अधोमुखाः आ०, द०, ज०, ब० । ४ अक्षिनिमीलनमात्रं नास्ति सुखं दुक्खमेव अनुबद्धम् । नरके नारकाणामहर्निशं पच्यमानानाम् ॥ ५ असंज्ञिसरीसृपपक्षिभुजगसिंहस्त्रीमत्स्यमनुजाश्च । प्रथमादिषु उत्पत्तिरष्टवारान् द्विवारं यावत् ॥ ६ –यमेव व्र– ता०, ब० । ७ विरहन्ति आ०, ब०, द०, ज० । ८ –मियन्ति आ०, ब०, द०, ज० ।

यदि प्रथमनरकं कश्चिदवच्छिन्नतया निरन्तरं गच्छति तर्हि अष्टवारान्। यदि द्वितीयं नरकं निरन्तरं गच्छति तर्हि सप्तवारान् व्रजति । तृतीयं षड्वारान् व्रजति । चतुर्थं पञ्चवारान्। पञ्चमं चतुर्वारान्। षष्ठं त्रीन् वारान्। सप्तमं द्वौ वाराविति। सप्तमान्नरकान्निर्गतस्तिर्यगेव भवति, पुनश्च नरकं गच्छति। षष्ठान्निर्गतो नरत्वं यदि प्राप्नोति तर्हि ५ देशव्रतित्वं न प्राप्नोति, सम्यक्त्वं तु न निषिध्यते। पञ्चमान्निर्गतः देशव्रतित्वं लभते, न महाव्रतित्वम्। चतुर्थान्निर्गतः कोऽपि निर्वाणमपि गच्छति। तृतीयाद् द्वितीयात्प्रथमाच्च विनिर्गतः कश्चित्तीर्थङ्करोऽपि भवति।

अथेदानीं तिर्यग्लोकस्वरूपनिरूपणार्थं सूत्रमिदमाहुराचार्य्याः—

जम्बूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ॥ ७ ॥

१० जम्बूद्वीपश्च जम्बूनामद्वीपः, लवणवत् क्षारमुदकं[1] जलं यस्य स लवणोदः, जम्बूद्वीपश्च लवणोदश्च जम्बूद्वीपलवणोदौ, तावादी येषां द्वीपसमुद्राणां ते जम्बूद्वीपलवणोदादयः। जम्बूद्वीपादयो द्वीपा लवणोदादयः समुद्राः द्वीपसमुद्राः। कथम्भूताः ? शुभनामानः शुभानि मनोज्ञानि यानि नामानि लोके[2] वर्तन्ते तानि शुभानि नामानि येषां द्वीपसमुद्राणां ते शुभनामानः। तथा हि—जम्बूद्वीपनामा प्रथमो द्वीपः। लवणोदनामा प्रथमः समुद्रः। १५ आदिशब्दात् धातकीखण्डनामा द्वितीयो द्वीपः। कालोदनामा द्वितीयः समुद्रः। पुष्करवरनामा तृतीयो द्वीपः। पुष्करवरनामा तृतीयः समुद्रः। वारुणीवरनामा चतुर्थो द्वीपः। वारुणीवरनामा चतुर्थः समुद्रः। क्षीरवरनामा पञ्चमो द्वीपः। क्षीरवरनामा पञ्चमः समुद्रः। घृतवरनामा षष्ठो द्वीपः। घृतवरनामा षष्ठः समुद्रः। इक्षुवरनामा सप्तमो द्वीपः। इक्षुवरनामा सप्तमः समुद्रः। नन्दीश्वरनामा[3] अष्टमः समुद्रः, नन्दीश्वरनामा[4] अष्टमो द्वीपः। २० अरुणवरनामा नवमो द्वीपः। अरुणवरनामा नवमः समुद्रः । एवं स्वयम्भूरमणद्वीपपर्यन्ता[5] असंख्येया[6] द्वीपाः स्वयम्भूरमणपर्यन्ता असंख्येयाः समुद्रा ज्ञातव्याः। असंख्येया इत्युक्ते कियन्तो द्वीपसमुद्राः ? पञ्चविंशत्युद्धारपल्यकोटीनां यावन्ति रोमखण्डानि भवन्ति तावन्तो द्वीपसमुद्रा ज्ञातव्याः।

मेरोरुत्तरस्यां दिशि उत्तरकुरुनामोत्तमभोगभूमिमध्ये जम्बूवृक्षो वर्तते। स सदा २५ शाश्वतो नानारत्नमयो मरकतमणिमयस्कन्धशाखः स्फटिकमणिमयपुष्पमञ्जरीक इन्द्रनीलमणिमयफलः कृष्णफल इत्यर्थः, हरितमणिमयपत्रः। जम्बूदेवोषितप्राक्शाखः तद्वृक्षस्य चतुर्दिक्षु चत्वारः परिवारवृक्षाः। तथा लक्षैक(कम्)चत्वारिंशत्सहस्राणि एकं शतं पञ्चदश[7] च परिवारवृक्षा वर्त्तन्ते। एवं सर्वेऽपि जम्बूवृक्षा मिलित्वा वृक्षाणामेकं लक्षं चत्वारिंशत्सहस्राणि एकं शतं एकोनविंशतिश्च, मूलवृक्षेण सह विंशतिश्च वृक्षा भवन्ति। १४०१२०।

---

१ –रमुदं ज– द०, ज०, ता०। २ –के प्रव– आ०, ब०, द०, ज०। ३–श्वरवरना– ता०। ४ –श्वरवरना– ता०, ब०। ५ –णप– आ०, ब०, ज०, ब०। ६ –यद्वी– ता०, ब०, ज०। ७ –श प– ता०, आ०, ज०।

तथा चोक्तम्—

"चत्वारिंशत्सहस्राणि लक्षं चैकोनविंशतिः।
शतं तदर्धोत्सेधाः स्युः जम्बोर्जम्बुतरोरिमाः॥" [ ]

पञ्चशतयोजनोत्सेधो मूलवृक्षः। एतेन जम्बूवृक्षेणोपलक्षितत्वाज्जम्बूद्वीप इत्युच्यते। यादृशो जम्बूवृक्षः तादृशो देवकुरुमध्ये शाल्मलिवृक्षोऽपि वर्तते। यावन्तो वृक्षास्तावन्तो ५ रत्नमया जिनप्रासादा ज्ञातव्याः। एवं धातकीवृक्षोपलक्षितो धातकीद्वीपः। पुष्करवृक्षोपलक्षितः पुष्करद्वीपः।

अथैतेषामसंख्येयद्वीपसमुद्राणां विस्तारसूचनार्थं सन्निवेशकथनार्थं संस्थानविशेषनिरूपणार्थञ्च सूत्रमिदं प्रतिपादयन्ति—

द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाऽऽकृतयः॥ ८॥ १०

द्विर्द्विर्विष्कम्भो द्विगुणद्विगुणविस्तारो येषां द्वीपसमुद्राणां ते द्विर्द्विर्विष्कम्भा जातिक्रियाद्रव्यगुणैर्युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा वीप्सार्थे "पदस्य" [शाकटा० १।२।९२]। इति सूत्रेण द्विःसह द्विर्वचनम्। अत्र विष्कम्भस्य द्विगुणत्वव्याप्त्यर्थे वीप्सा वर्त्तते। तेन विष्कम्भस्य गुणवचनत्वात् एषा गुणवीप्सा वर्तते। उक्तञ्च जात्यादिशब्दानां लक्षणम्—

"द्रव्यक्रियाजातिगुणप्रभेदैर्डवित्थकर्तृद्विजपाटलादौ। १५
शब्दप्रवृत्तिं मुनयो वदन्ति चतुष्टयीं शब्दविदः पुराणाः॥१॥" [ ]

कया रीत्या द्विगुणद्विगुणविष्कम्भो द्वीपसमुद्राणां भवति ? इत्याह—एकलक्षयोजनविस्तारो जम्बूद्वीपः। तद्द्विगुणविस्तारः द्विलक्षयोजनविस्तारो लवणोदसमुद्रः। तस्माद् द्विगुणविस्तारश्चतुर्लक्षयोजनविस्तारो धातकीद्वीपः। तस्माद् द्विगुणोऽष्टलक्षयोजनविस्तारः कालोदसमुद्रः। तस्माद् द्विगुणः षोडशलक्षयोजनविस्तारः पुष्करवरद्वीपः। तस्माद् द्विगुणो २० द्वात्रिंशल्लक्षयोजनविस्तारः पुष्करवरसमुद्रः। तस्माद् द्विगुणः चतुःषष्टिलक्षयोजनविस्तारो वारुणीवरद्वीपः। तस्माद् द्विगुण एककोट्यष्टाविंशतिलक्षयोजनविस्तारो वारुणीवरसमुद्रः। तस्माद् द्विगुणो द्विकोटिषट्पञ्चाशल्लक्षयोजनविस्तारः क्षीरवरद्वीपः। तस्मात् द्विगुणः पञ्चकोटिद्वादशलक्षयोजनविस्तारः क्षीरवरसमुद्रः। तस्माद् द्विगुणो दशकोटिचतुर्विंशतिलक्षयोजनविस्तारो घृतवरद्वीपः। तस्माद् द्विगुणो विंशतिकोट्यष्टचत्वारिंशल्लक्षयोजन- २५ विस्तारो घृतवरसमुद्रः। तस्माद् द्विगुणश्चत्वारिंशत्कोटिषण्णवतिलक्षयोजनविस्तार इक्षुवरद्वीपः। तस्माद् द्विगुण एकाशीतिकोटिद्विनवतिलक्षयोजनविस्तार इक्षुवरसमुद्रः। तस्माद् द्विगुण एकशतत्रिषष्टिकोटिचतुरशीतिलक्षयोजनविस्तारो नन्दीश्वरवरद्वीपः। तस्माद्

---

१ लक्षा चै- आ०, ब०, द०, ज०, ता०। २ पचविंशतियां- आ०, ब०, द०, ज०। ३ -ताऽय पु- आ०, ब०, द०, ज०। ४ -योक्तव्यामिच्छा आ०, ब०, द०, ज०। ५ -णीस- आ०, ब०, द०, ज०।

द्विगुणः सप्तविंशतिकोट्यधिकत्रिशतकोटि-अष्टषष्टिलक्षयोजनविस्तारो नन्दीश्वरवरसमुद्रः। तस्माद् द्विगुणः षट्त्रिंशल्लक्षाधिकाः पञ्चपञ्चाशत्कोटयः षट्शतकोटयः एतावद्योजनविस्तारः अरुणवरद्वीपः। तस्माद् द्विगुणो द्वासप्ततिलक्षाधिकाः दशकोटयस्त्रयोदशशतकोटयः एताव-द्योजनविस्तारोऽरुणवरसमुद्रः **'पर्यन्तं गहनं गणितशास्त्रम्'** [ ] इति वचनात्

५ कियत्पर्यन्तं गण्यते? अनया रीत्या स्वयम्भूरमणपर्यन्तं द्विगुणविष्कम्भाः द्वीपसमुद्राः असंख्येया ज्ञातव्याः। अत्रायं विशेषः—यथा जम्बूद्वीपलवणसमुद्रविस्तारो द्वयसमुदायात् त्रिलक्षयोजनप्रमिताद् धातकीखण्डद्वीपः एकलक्षेणाधिकस्तथा असंख्येयद्वीपसमुद्रविस्तारेभ्यः स्वयम्भूरमणसमुद्रविस्तार एकलक्षेणाधिको ज्ञातव्यः।

पुनरपि कथम्भूता द्वीपसमुद्राः? पूर्वपूर्वपरिक्षेपिणः। पूर्वं पूर्वं प्रथमं प्रथमं

१० परिक्षिपन्ति समन्तात् वेष्टयन्तीत्येवंशीलाः पूर्वपूर्वपरिक्षेपिणः। जम्बूद्वीपो लवणसमुद्रेण वेष्टितः। लवणसमुद्रः धातकीखण्डद्वीपेन वेष्टितः। धातकीखण्डद्वीपः कालोदसमुद्रेण वेष्टितः। कालोदसमुद्रः पुष्करवरद्वीपेन वेष्टितः। पुष्करवरद्वीपः पुष्करवरसमुद्रेण वेष्टितः। अनया रीत्या पूर्वपूर्वपरिक्षेपिणः, न तु नगरग्रामपत्तनादिवत् यत्र तत्र स्थिताः। पुनरपि कथम्भूता द्वीपसमुद्राः? वलयाकृतयः। गजदन्तकाचादिकृतानि कङ्कणानि स्त्रीकरभूषणानि

१५ वलयान्युच्यन्ते[2]। तद्वत्सर्वेऽपि द्वीपसमुद्रा वर्तुलाकारा वर्तन्ते, न त्र्यस्राः [3]न च चतुरस्राः न पञ्चकोणाः, न षट्कोणाः इत्याद्याकाररहिताः, किन्तु वृत्ताकारा एव।

अथ जम्बूद्वीपाद् द्विगुणद्विगुणविस्ताराः [4]किल लवणसमुद्रादयो वर्तन्ते स जम्बूद्वीप एव [5]कियद्विस्तारो भवति, यद्विस्तारादन्यविस्तारो विज्ञायते? इत्युक्ते तत्स्वरूपमाहुः—

तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः ॥ ९ ॥

२० तेषां द्वीपसमुद्राणां मध्यस्तन्मध्यः तस्मिन् तन्मध्ये सर्वद्वीपसमुद्राणां मध्यप्रदेशे जम्बूद्वीपो वर्तत इत्यर्थः। कथम्भूतो जम्बूद्वीपः? मेरुनाभिः, मेरुः सुदर्शननामा कनक-पर्वतः एकसहस्रयोजनभूमिमध्ये स्थितः नवनवतिसहस्रयोजनबहिरुन्नतः। श्रीभद्रशालवना-दुपरि पञ्चशतयोजनलभ्यनन्दनवनः, नन्दनवनात्त्रिषष्टियोजनसहस्रं सम्प्राप्य सौमनसवनः। सौमनसवनात् सार्द्धपञ्चत्रिंशत्सहस्रयोजनगम्यपाण्डुकवनः। चत्वारिंशद्योजनोन्नतचूलिकः,

२५ सा चूलिका सार्द्धपञ्चत्रिंशत्सहस्रयोजनमध्य एव गणनीया। स एवंविधो मेरुनाभिर्मध्य-प्रदेशो यस्य जम्बूद्वीपस्य मेरुनाभिः। पुनरपि कथम्भूतो जम्बूद्वीपः? वृत्तः वर्तुलः। आदित्यबिम्बवद्वर्तुलाकार इत्यर्थः। [6]पुनरपि कथम्भूतो जम्बूद्वीपः? योजनशतसहस्र-विष्कम्भः। शतानां सहस्रं शतसहस्रम्, योजनानां शतसहस्रं योजनशतसहस्रम्, योजन-

---

१ पर्यन्तग- द०, ज० व०। २ -यानि कथ्यन्ते आ०, द०, ब०, ज०। ३ न चतु- आ० ब०, द०, ज०। ४ किं ल- आ०, ब०, द०, ज०। ५ कियान् वि- आ०, ब०, द०, ज०। ६ पुनः किं विशिष्टो ज- आ०, ब०, द०, ज०।

शतसहस्रं विष्कम्भो विस्तारो यस्य जम्बूद्वीपस्य स भवति योजनशतसहस्रविष्कम्भः, एकलक्षयोजनविस्तार इत्यर्थः। उपरिस्थितवेदिकेन सालेन सह लक्षयोजनविष्कम्भः इति भावः। स जम्बूद्वीपसालः अष्टयोजनोच्चः, मूले द्वादशयोजनविस्तारः, मध्येऽष्टयोजनविस्तारः, उपरि चाष्टयोजनविस्तारः। तत्सालोपरि रत्नसुवर्णमयी वेदिका चोभयपार्श्वे वर्तते। सा वेदिका क्रोशद्वयोन्नता वर्त्तते। तस्या वेदिकाया विस्तारो योजनमेकं क्रोशश्चैकः ५ धनुषां सहस्रं सप्तशतानि पञ्चाशद्युतानि च। तद्वेदिकाद्वयमध्ये सालस्योपरि महोरगदेवप्रासादाः सन्ति। ते प्रासादाः रत्नमया वनवृक्षवापीतडागजिनभवनमण्डिता अनादिनिधनास्तिष्ठन्ति। तस्य दुर्गस्य पूर्वदक्षिणपश्चिमोत्तरेषु चत्वारि द्वाराणि वर्त्तन्ते। तन्नामानि—विजयवैजयन्तजयन्तापराजितानि क्रमाद्विज्ञेयानि। तद्द्वारोच्चत्वमष्टयोजनानि, विस्तारश्चतुर्योजनानि, चतुर्द्वाराग्रे जिनप्रतिमा अष्टप्रातिहार्यसंयुक्ता वर्तन्ते। तस्य जम्बूद्वीपस्य १० परिक्षेपस्त्रीणि योजनलक्षाणि सप्तविंशत्यग्रे द्वे शते च योजनानां त्रयः क्रोशा अष्टाविंशत्यग्रं धनुःशतं च अङ्गुलयस्त्रयोदश च किञ्चिदधिकमर्द्धाङ्गुलं च।

तस्मिन् जम्बूद्वीपे षट्कुलपर्वतैः कृतानि यानि सप्त क्षेत्राणि वर्तन्ते, तन्नामानि भगवान् प्राह[1]—

भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥१०॥ १५

भरतश्च हैमवतश्च हरिश्च विदेहश्च रम्यकश्च हैरण्यवतश्च ऐरावतश्च भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावताः। ते च ते वर्षा भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः। क्षेत्राणि क्षियन्ति अधिवसन्ति प्राणिन एष्विति क्षेत्राणि। तथा हि—

भरतवर्षो भरतक्षेत्रं प्रथमं क्षेत्रम्। हिमवतो मध्ये भवो हैमवतवर्षो द्वितीयं क्षेत्रम्। हरति जघन्यभोगभूमितयाऽऽर्याणां दुःखमिति हरिवर्षस्तृतीयं क्षेत्रम्। विगतदेहा मोक्षगामिनः २० प्रायेण मुनयो यत्र स विदेहवर्षश्चतुर्थं क्षेत्रम्। रम्यं मनोहरं मध्यमभोगभूमितयाऽऽर्याणां कं सुखं यस्मिन्निति रम्यकवर्षः पञ्चमं क्षेत्रम्। हिरण्यवान् सुवर्णमयत्वाच्छिखरी पर्वतस्तस्य दक्षिणतो भवो हैरण्यवतवर्षो जघन्यभोगभूमिरूपं षष्ठं क्षेत्रम्। इरावान् समुद्रस्तस्य दक्षिणतो भव ऐरावतवर्षः सप्तमं क्षेत्रम्। एतान्यनादिसिद्धनामानि सप्त क्षेत्राणि भवन्ति। तथा हि—

हिमवत्पर्वतपूर्वसमुद्रदक्षिणसमुद्रपश्चिमसमुद्राणां चतुर्णां मध्ये गङ्गासिन्धुनदीद्वयेन २५ विजयार्द्धपर्वतेन च षट्खण्डीकृतः चटापितचापाकारो भरतवर्षः कथ्यते। तस्य भरतवर्षस्य मध्ये पञ्चाशद्योजनविस्तार पञ्चविंशतियोजनोत्सेधः क्रोशैकाधिकषट्योजनभूमिमध्यगतो रजतमयो विजयार्धपर्वतोऽस्ति। तत्र विजयार्धपर्वते भरतक्षेत्रसम्बन्धिम्लेच्छखण्डेषु च चतुर्थकालस्याद्यन्तसदृशकालो वर्तते। तेन तत्र उत्कर्षेण पञ्चशतधनुरुत्सेधमङ्गं भवति।

---

१ –ह सूत्रमिदम् ब०।

जघन्येन तु सप्तहस्तप्रमाणं शरीरं भवति। उत्कर्षेण कोटिपूर्वमायुर्भवति। जघन्येन[1] विंशत्यग्रं शतं वर्षाणामायुर्भवति। उक्तञ्च—

"भरते म्लेच्छखण्डेषु विजयार्द्धनगेषु च।
चतुर्थसमयाद्यन्ततुल्यकालोऽस्ति[2] नापरः॥" [ ]

५ विजयार्द्धपर्वताद्दक्षिणस्यां दिशि गङ्गासिन्धुमहानदीद्वयमध्येऽयोध्या नगरी वर्तते। विजयार्द्धपर्वतादुत्तरस्यां दिशि क्षुद्रहिमवत्पर्वताद्दक्षिणस्यां दिशि गङ्गासिन्धुमहानदीद्वय-मध्ये म्लेच्छखण्डमध्यवर्ती वृषभनामा गिरिः पर्वतोऽस्ति। स एकयोजनशतोन्नतः पञ्चाशद्यो-जनविष्कम्भायामः सुवर्णरत्नमयो वनवेदिकातोरणसंयुक्तो जैनचैत्यसहितश्च। तत्र पर्वते चक्रवर्त्ती निजप्रसिद्धिं लिखति। क्षुद्रहिमवत्पर्वतमहाहिमवत्पर्वतयोर्मध्ये पूर्वपश्चिमसमुद्रयोश्च
१० मध्ये हैमवतं नाम क्षेत्रं वर्तते। तत्क्षेत्रं जघन्या भोगभूमिर्वर्तते। हैमवतक्षेत्रमध्यप्रदेशे शब्दवान् नाम पर्वतो वर्तते। स पर्वतः पटहाकारो वर्तुलाकारः एकसहस्रयोजनोन्नतः सार्द्धद्विशत-योजनभूमिमध्यगतः, उपरि मूले चैकयोजनसहस्रविष्कम्भायामः किञ्चिदधिकयोजनत्रिसह-स्रपरिक्षेपः[3]। तत्र गव्यूत्युत्सेधमेङ्गम्[4]। पल्यमेकमायुः। प्रियङ्गुश्यामं शरीरम्। एकान्तरेणा-मलकप्रमाणं[5] भोजनम्। अन्त्यनवमासेषु गर्भ उत्पद्यते। स्त्रीपुरुषयुगलं जायते।
१५ पूर्वयुगलं[6] क्षुतेन जृम्भया च म्रियते। विद्युदिव तच्छरीरं विघटते। नवीनं युगलं सप्तदि-वसान्निजाङ्गुष्ठपानेनोत्तानशयं तिष्ठति। तदनन्तरं सप्तदिवसान् भूमौ[7] रिङ्गति। तृतीय-सप्ताहेन मधुरभाषी स्खलद्भिः पादैर्गच्छति। चतुर्थसप्ताहेन स्थिरपादैर्व्रजति। पञ्चमसप्ताहेन कलागुणान् धरति। षष्ठसप्ताहेन निर्विकल्पं[8] तारुण्यं प्राप्य भोगान् भुङ्क्ते। सप्तमसप्ताहेन सम्यक्त्वग्रहणयोग्यं भवति। तथा चोक्तम्—

२० "सप्तोत्तानशया लिहन्ति दिवसान् स्वाङ्गुष्ठमार्यास्ततः
कौ रिङ्गन्ति ततः पदैः कलगिरो यान्ति स्खलद्भिस्ततः।
स्थेयोभिश्च ततः कलागुणभृतस्तारुण्यभोगोद्गताः
सप्ताहेन ततो भवन्ति सुदृगादानेऽपि योग्यास्ततः॥ १॥" [सागारध० २।६८]

एवं सर्वाणि युगलानि दशगव्यूत्युन्नतदशविधकल्पवृक्षोत्पन्नभोगान् भुञ्जते। पुरुषः
२५ स्त्रियमार्येति वक्ति। स्त्री पुरुषमार्य्य इत्युक्त्वा आह्वयति। तेन कारणेन ते भोगभूम्युद्भवाः मनुष्या आर्याः कथ्यन्ते।

अथ के ते दशप्रकाराः कल्पवृक्षाः? प्रथमे मद्याङ्गाः कल्पवृक्षाः ते मद्यं स्रवन्ति। मद्यं

---

१ –न पञ्चविंशत्यग्रशतव– आ०, द०, ब०, ज०। २ –कालो न चापरः आ०, द०, ब०, ज०। ३ परिधिक्षेत्रः ज०। ४ –मङ्गं कल्पमे– आ०, द०, ज०। ५ –णभो– ता०, व०। ६ –युगलेषु तेन आ०, द०, ज०, ब०। ७ रङ्गति ता०, ब०। ८ –ल्पता– ब०।

नाम मद्यं न भवति। किं तर्हि ? क्षीरदधिसर्पिरादिसुगन्धसलिलपानकं भवति। कामशक्तिजनकत्वान्मद्यमित्युपचर्यते । द्वितीयाः कल्पवृक्षा वादित्राङ्गा भवन्ति । ते मृदङ्गपटहझल्लरीभेरीभम्भातालकंसतालघण्टावेणुवीणास्वरमण्डलादीनि वादित्राणि फलन्ति। तृतीयाः कल्पवृक्षाः भूषणाङ्गनामानः कटककटिसूत्रहारनूपुरमुकुटकुण्डलाङ्गुलीयकादीनि भूषणानि फलन्ति। चतुर्थाः कल्पवृक्षा माल्याङ्गनामानः अशोकचम्पकपारिजातशतपत्रकुमुदनीलोत्पल- ५ सौगन्धिकजातीकेतकीकुब्जकनवमालिकावकुलादिमालाः फलन्ति । ज्योतिरङ्गकल्पद्रुमा निजोद्योतेन सूर्यादीनामपि तेजो निस्तेजयन्ति। ज्योतिरङ्गद्योतेन भोगभूमिजाश्चन्द्रसूर्यादीन् तु पश्यन्ति। दीपाङ्गकल्पवृक्षाः प्रवालकुसुमसदृशान् प्रदीपान् फलन्ति। तेभ्यो दीपान् गृहीत्वा भोगभूमिजा निजगृहमध्येषु सान्धकारप्रदेशेषु प्रविशन्ति । गृहाङ्गकल्पवृक्षाः प्राकारगोपुरसंयुक्तसप्तभूमरत्नमयप्रासादरूपेण परिणमन्ति । भोजनाङ्गकल्पवृक्षाः षड्रससंयुक्तम- १० मृतमयं दिव्यमाहारं फलन्ति । भाजनाङ्गकल्पवृक्षा मणिसुवर्णमयभृङ्गारस्थालवर्तुलककरककुम्भादिकानि भाजनानि फलन्ति। वस्त्राङ्गकल्पवृक्षा चीनाम्बरपट्टकूलनेत्रसूत्रमयकाञ्चीदेशाद्युद्भवसदृशानि वस्त्राणि फलन्ति।

तत्र अमृतर[2]सायनस्वादूनि चतुरङ्गुलप्रमाणानि बाष्पच्छेद्यान्यतिकोमलानि तृणानि भवन्ति। तानि पञ्चवर्णगावश्चरन्ति। तत्र भूमिः पञ्चरत्नमयी उद्वर्तितदर्पणसदृशी वर्त्तते। १५ विद्रुममणिसुवर्णमयाः क्वचित्क्वचित् क्रीडापर्वता अपि सन्ति । वापीतडागनद्यो रत्नमयसोपानाः सन्ति। नदीतटेषु रत्नमयचूर्णवालुका वर्त्तते। तत्र पञ्चेन्द्रियास्तिर्यञ्चोऽविरोधिनोऽमांसाशिनोऽसर्पादिकाः सन्ति। विकलत्रयं न वर्त्तते। तत्र मृदुहृदया अकुटिलपरिणामा मन्दकषायाः सुविनीताः शीलादिसंयुक्ताः मनुष्या ऋष्याहारदानेन तिर्यञ्चोऽपि तदनुमोदनेन चोत्पद्यन्ते। तत्रत्याः सद्दृष्टयो मृताः सन्तः सौधर्मैशानयोः कल्पयोरुत्पद्यन्ते। २० वापीपुष्करणीसरोवरप्रभृतिषु जलचराः न सन्ति।

महाहिमवत्पर्वतनिषधपर्वतयोर्मध्ये पूर्वापरसमुद्रयोश्चान्तराले हरिर्नाम वर्षः क्षेत्रं वर्तते। तन्मध्ये [3]शब्दवद्वेदाढ्यसदृशो विकृतवान् नाम वेदाढ्यो वर्तते। सोऽपि पर्वतः पटहाकारवृत्तो ज्ञातव्यः। हरिक्षेत्रं मध्यमा भोगभूमिः। तत्र भोगभूमिजा मनुष्या गव्यूतिद्वयोन्नताः पल्यद्वयजीवितव्याः पूर्णिमाचन्द्रवर्णतेजस्का दिनद्वयान्तरितविभीतकफलप्रमाणभोजनाः । २५ तत्र विंशतिगव्यूत्युन्नताः कल्पवृक्षाः। अन्या वर्णनाः पूर्ववद् वेदितव्याः।

निषधपर्वतनीलपर्वतयोर्मध्ये पूर्वापरसमुद्रयोश्च मध्ये विदेहो नाम वर्षः क्षेत्रं वर्तते। तत्क्षेत्रं चतुःप्रकारम्—मेरोः सकाशात्पूर्वं क्षेत्रं पूर्वविदेहः । मेरोः सकाशात् पश्चिमायां दिश्यपरविदेहः। मेरोर्दक्षिणस्यां दिशि देवकुरवः। मेरोरुत्तरस्यां दिश्युत्तरकुरव इति। तत्र जिनधर्मविनाशाभावात् सदाधर्मप्रवर्तनात् विगतदेहा मनुष्याः प्रायेण सिद्धा भवन्ति। ३०

---

१ श्रारी। २ -तरसमयानि स्वा- आ०, द०, ब०। -तमयानि स्वा- ज०। ३ शब्दवद्वेलाढ्य- द०, ज०।

तेनायं वर्षो विदेह इत्युच्यते। विदेहक्षेत्रेषु तीर्थङ्कराणां चतुर्विंशतिरिति नियमो न वर्तते। विदेहमुनियोगाद् वर्षोऽपि विदेहः, आधाराधेययोरैक्योपचारात् कृष्णकज्जलयोगात्कृष्ण-चक्षुर्वत्, श्वेतद्रव्ययोगात् श्वेतप्रासादवत्। देवकुरूत्तरकुरुपूर्वविदेहाऽपरविदेहानां चतुर्षु कोणेषु चत्वारः पर्वता गजदन्तनामानः। तेषां दैर्घ्यं त्रिंशत्सहस्रयोजनानि द्वे योजनशते
५ नवोत्तरे च। तेषामुन्नतिश्चत्वारि योजनशतानि। तेषां विस्तारः पञ्चयोजनशतानि। तेषां शिखराणि प्रत्येकं चत्वारि ते गजदन्ता दिग्दन्तापरनामानो मेरोः समीपान्निर्गता द्वौ निषधं प्रति गतौ द्वौ नीलं प्रति गतौ। दक्षिणदिग्वर्तिनोर्गजदन्तयोरन्तराले [1]देवकुरवो नामोत्तमा भोग-भूमिर्वर्तते। तन्मध्ये शाल्मलीवृक्षो वर्तते। तद्वर्णना स्वकीयस्वरूपसहिता परिवारवृक्षादिका जम्बूवृक्षवद्वेदितव्या। उत्तरदिग्वर्तिनोर्गजदन्तयोरन्तराले उत्तरकुरवो नामोत्तमा भोगभूमि-
१० र्वर्तते। तत्रत्या आर्याः पल्यत्रयजीविनो गव्यूतित्रयोन्नता दिनत्रयान्तरितबदरीफलप्रमाणकल्प-वृक्षोत्पन्नदिव्यभोजनाः, बालभास्करसमानवर्णाः, तत्र त्रिंशत्गव्यूत्युन्नताः कल्पवृक्षाः सन्ति। अन्या वर्णना पूर्ववद्वेदितव्या।

मेरोश्चतुर्दिक्षु श्रीभद्रशालनामधेयं वनमस्ति। तस्य वनस्य पूर्वदिश्यपरदिशि च पर्यन्तयोर्द्वे वेदिके वेदितव्ये। ते द्वे[2] निषधनीलपर्वतयोर्लग्ने। पूर्वविदेहमध्ये सीतानदी
१५ समागता। तया पूर्वविदेहो द्विभागः कृतः। तत्र एक उत्तरो भागो द्वितीयो दक्षिणो भागश्च। उत्तरभागमध्ये अष्टक्षेत्राणि सञ्जातानि। कथम्? पूर्वं वेदी पश्चात् वक्षारनामा पर्वतः। वेदीपर्वतयोर्मध्ये एकं क्षेत्रं वर्तते। वक्षारपर्वतविभङ्गनदीद्वयमध्ये द्वितीयं क्षेत्रम्। विभङ्गनदीवक्षारपर्वतयोर्मध्ये तृतीयं क्षेत्रम्। वक्षारपर्वतविभङ्गनदीद्वयमध्ये चतुर्थं क्षेत्रम्। विभङ्गनदीवक्षारपर्वतयोर्मध्ये पञ्चमं क्षेत्रम्। वक्षारपर्वतविभङ्गनदीद्वयान्तराले षष्ठं क्षेत्रम्।
२० विभङ्गनदीवक्षारपर्वतयोर्मध्ये सप्तमं क्षेत्रम्। वक्षारपर्वतवनवेदिकामध्ये अष्टमं क्षेत्रम्। तदनन्तरं देवारण्यं वनं समुद्रवेदिकापर्यन्तम्। एवं चतुर्भिर्वक्षारपर्वतैस्तिसृभिर्विभङ्गनदीभि-र्द्वाभ्यां वेदिकाभ्याञ्च नवभिः[3] खण्डैरष्टक्षेत्राणि सञ्जातानि। तेषामष्टानां क्षेत्राणां पश्चिमतः प्रारभ्य पूर्वपर्यन्तं [4]नामान्युच्यन्ते।

"कच्छा सुकच्छा महाकच्छा चतुर्थी कच्छकावती।
२५ आवर्त्ता लाङ्गलावर्त्ता पुष्कला पुष्कलावती॥ १॥" [हरि० ५।२४५]

तेषां क्षेत्राणां मध्येऽनुक्रमेणाष्टौ मूलपत्तनानि। तेषां नामानि–क्षेमा, क्षेमपुरी, अरिष्टा, अरिष्टपुरी, खड्गा, मञ्जूषा, ओषधी, पुण्डरीकिणी। एकैकस्य क्षेत्रस्य मध्ये नीलपर्वतान्निर्गते सीतानदीमध्ये प्रविष्टे उत्तरदक्षिणायामे गङ्गासिन्धुनामानौ (म्न्यौ) द्वे द्वे नद्यौ वर्त्तेते। एकैकस्य क्षेत्रस्य मध्ये एकैको विजयार्धपर्वतः पूर्वापरायामः। तथा एकैकस्य क्षेत्रस्य मध्ये
३० विजयार्द्धपर्वतादुत्तरस्यां दिशि नीलपर्वताद् दक्षिणस्यां दिशि वृषभगिरिर्नाम पर्वतो वर्त्तते।

---

१ देवकुरुनाम्नोत्तमभो– आ०, द०, ब०, ज०। २ द्वे वेदिकानि– आ०, द०, ब०, ज०। ३ नवभिः रध्ये अष्ट– ता०। ४– नि कथ्यन्ते आ०, ब०, द०, ज०।

स पर्वतो वृत्तवेदाढ्यसदृशः म्लेच्छखण्डमध्ये स्थितः। तत्र पर्वते चक्रवर्ती स्वप्रसिद्धिं लिखति। एवमष्टसु क्षेत्रेषु मध्ये अष्टवृषभगिरयो भवन्ति। एवमष्टावपि क्षेत्राणि षड्भिः षड्भिः खण्डैर्युक्तानि भवन्ति। तत्र तत्र यो यश्चक्रवर्त्ती समुत्पद्यते तस्य तस्य एकैकमार्यखण्डं पञ्च पञ्च म्लेच्छखण्डानि भोग्यानि भवन्ति। अष्टस्वपि आर्यखण्डमध्येष्वेकैक उपसमुद्रो भवति। स उपसमुद्रः सीतानदीसमीपेऽर्द्धचन्द्राकारो भवति। तस्य तस्य क्षेत्रस्य सम्बन्धिनश्चक्रवर्त्ति- ५ साध्याः सीतानद्यन्तर्वासिनो[1] मागधवरतनुप्रभासनामानो व्यन्तरदेवा भवन्ति।

अथेदानीं सीताया दक्षिणस्यां दिशि यान्यष्टौ क्षेत्राणि वर्त्तन्ते तन्नामपूर्वकं तत्स्वरूपं निरूप्यते। तथा हि—पूर्वदिशं प्रारभ्य पूर्वं वनवेदी पश्चाद् वक्षारपर्वतः। तृतीयस्थाने विभङ्गा नदी। चतुर्थस्थाने वक्षारपर्वतः। पञ्चमस्थाने विभङ्गा नदी। षष्ठस्थाने वक्षारपर्वतः। सप्तमस्थाने विभङ्गा नदी। अष्टमस्थाने वक्षारपर्वतः। नवमस्थाने [2]वनवेदिका चेति नवभि- १० र्भित्तिभिर्दक्षिणोत्तराया (य) ताभिरष्ट क्षेत्राणि कृतानि। तेषां नामानि—

"वत्सा सुवत्सा महावत्सा चतुर्थी वत्सकावती।
रम्या च रम्यका चैव रमणीया मङ्गलावती॥ १॥" [हरि० ५।२४७]

[3]तेषामष्टानां क्षेत्राणां मध्येषु अष्टौ मूलपत्तनानि। तेषां नामानि पूर्वतः प्रारभ्य [4]पश्चिमदिग्(शं) यावत्सुसीमा, कुण्डला, अपराजिता, प्रभङ्करी, अङ्कवती, पद्मावती, शुभा, १५ रत्नसञ्चया चेति। तेषामष्टानां क्षेत्राणां मध्येषु पूर्वापरायता अष्टौ विजयार्द्धपर्वता वर्तन्ते। तेषामष्टानां क्षेत्राणां मध्येषु द्वे द्वे गङ्गासिन्धुनामिके नद्यौ वर्तेते। ते च नद्यौ निषधपर्वतान्निर्गत्य विजयार्द्धान् विभिद्य सीतां नदीं प्रविष्टे। या अष्टौ नगर्यः कथितास्ता विजयार्द्धेभ्य उत्तरासु दिक्षु सीताया दक्षिणासु दिक्षु गङ्गासिन्ध्वोश्च मध्येषु वर्त्तन्ते। तथा नगरीभ्य उत्तरतः सीताया दक्षिणपार्श्वेषु अष्टौ उपसमुद्राः वर्त्तन्ते। निषधपर्वतादुत्तरासु दिक्षु विजयार्द्धेभ्यो दक्षिणासु २० दिक्ष्वष्टौ वृषभगिरयः सन्ति। तत्र तत्र चक्रवर्तिनो [5]निजप्रसिद्धीर्लिखन्ति। गङ्गासिन्धुनामानः षोडशनद्यस्तिस्रो विभङ्गनद्यश्च, एकोनविंशतिनद्यो निषधादुत्तीर्य विजयार्द्धान् विभिद्य सीतायां प्रविष्टाः। एवं षड्भिः षड्भिः खण्डैर्मण्डितान्यष्टौ क्षेत्राणि ज्ञातव्यानि। अष्टानां क्षेत्राणां सम्बन्धिनः सीतानिवासिनो मागधवरतनुप्रभासाश्च ज्ञातव्याः।

एवं सीतोदा नदी अपरविदेहं विभिद्य पश्चिमसमुद्रं प्राप्ता। तया द्वौ विदेहौ कृतौ— २५ दक्षिण उत्तरश्च। तयोर्वर्णना पूर्वविदेहवद्वेदितव्या। अयन्तु विशेषः—सीतोदादक्षिणतटेषु यानि क्षेत्राणि वर्त्तन्ते तेषां नामानि पूर्वतः पश्चिमं यावत्—

"पद्मा सुपद्मा महापद्मा चतुर्थी पद्मकावती।
शङ्खा च नलिना चैव कुमुदा सरितेति च॥ १॥" [हरि० ५।२४९]

---

१ -न्तर्वर्त्तिनः ज०। २ -विववे- ता०। ३ तेष्वष्टा- ता०। ४ पश्चिमदिक् या- ब०। ५ निजनिजप्र- आ०, ब०, द०, ज०।

तेषां क्षेत्राणां मध्येषु[1] मूलनगरीणां नामानि अश्वपुरी, सिंहपुरी, महापुरी, विजयापुरी, अरजा, विरजा, अशोका, वीतशोका चेति। सीतोदोत्तरतटे यान्यष्टौ क्षेत्राणि वर्त्तन्ते तेषां नामानि पश्चिमतः पूर्वं यावत्—

"वप्रा सुवप्रा महावप्रा चतुर्थी वप्रकावती[2]।

५ गन्धा चैव सुगन्धा च गन्धिला गन्धमादिनी ॥१॥" [हरि० ५।२५१]

मूलपुरीणां नामानि—

"विजया वैजयन्ती च जयन्ती चापराजिता।

चक्रा खड्गा अयोध्या च अवध्या चेति ताः क्रमात्॥" [हरि० ५।२६३]

अत्र भूतारण्यं वनं क्षेत्रपश्चिमसमुद्रवेदिकयोर्मध्ये ज्ञातव्यम्।

१० एवं महाविदेहवर्णनां कृत्वा पञ्चमो रम्यकवर्ष उच्यते। तद् रम्यकक्षेत्रं नीलपर्वतरुक्मिपर्वतयोर्मध्ये पूर्वाऽपरसमुद्रयोश्च मध्ये ज्ञातव्यम्। तत्क्षेत्रं [3]मध्यमा भोगभूमिः हरिक्षेत्रकथितस्वरूपा ज्ञातव्या। तस्य क्षेत्रस्य मध्ये गन्धवान् नाम वृत्तवेदाढ्यः पर्वतो भवति। स विकृतवेदाढ्यवद् बोद्धव्यः। अथ रुक्मिपर्वतशिखरिपर्वतयोरन्तराले पूर्वापरसमुद्रयोश्च मध्ये हैरण्यवतो नाम षष्ठो वर्षो वर्त्तते। तद्धैरण्यवतं[4] षष्ठं क्षेत्रं जघन्या भोगभूमिर्हैमवतक्षेत्रवर्णितस्वरूपा

१५ ज्ञातव्या। हैरण्यवतक्षेत्रमध्ये माल्यवान् नाम वृत्तवेदाढ्यः पर्वतो वर्तते। स हैमवतक्षेत्रमध्यस्थितशब्दवद्वेदाढ्यसदृशः। अथ शिखरिपर्वतपूर्वापरोत्तराणां त्रयाणां समुद्राणां च मध्ये ऐरावतो नाम वर्षश्चकास्ति। तस्मिन्नैरावतक्षेत्रे भरतक्षेत्रविजयार्द्धतुल्यो विजयार्द्धपर्वतोऽस्ति। तद्दक्षिणदिशि वृषभगिरिरस्ति। तस्य विजयार्द्धस्योत्तरदिशि अयोध्या नाम मूलनगर्यस्ति। एवं पञ्चमेरूणां सम्बन्धीनि पञ्चभरतानि पञ्चैरावतानि पञ्चमहाविदेहक्षेत्राणि[5] च पञ्चो-

२० त्तरकुरवः पञ्चदेवकुरवश्च त्रिंशद्भोगभूमयः जघन्यमध्यमोत्तमोत्तममध्यमजघन्यविभागैर्ज्ञातव्याः। विकलत्रयजीवाः कर्मभूमिष्वेव भवन्ति, तत्रापि समवसरणेषु न भवन्ति। पाताले [6]स्वर्गे चान्यत्र मर्त्यलोके च द्वित्रिचतुरिन्द्रियाः प्राणिनो न वर्त्तन्ते।

अथेदानीं षट्कुलपर्वतानां नामान्यवस्थितिश्चोच्यते—

तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनील-

२५ **रुक्मिशिखरिणो वर्षधरपर्वताः॥ ११ ॥**

तानि भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतसञ्ज्ञानि क्षेत्राणि विभजन्ति विभागं प्रापयन्ति विभागहेतुत्वं गच्छन्तीत्येवंशीलास्तद्विभाजिनः "**नाम्न्यजातौ णिनिस्ता-**

---

१ -ध्ये मू- आ०, ब०, द०, ज०। २ -काशनी द०, ज०। ३ मध्यमभो- आ०, ब०, द०, ज०। ४ -तं क्षे- आ०, द०, ब०, ज०। -तं षष्ठः क्षे- ता०। ५ -णि प- आ०। ६ स्वर्गेणान्यत्र मर्त्यलो- आ०, द०, ब०, ज०। स्वर्गो वान्यत्र मृत्युलो- ब०।

च्छील्ये" [कात० ३।७६] ताच्छील्यं फलनिरपेक्षम्। अनादिकाले निजनिजस्थाने स्थिताः हेतुनिरपेक्षनामानः पूर्वकोट्यपरकोटीभ्यां [1]लवणोदसमुद्रस्पर्शित्वात् पूर्वापरायता इत्युच्यन्ते। के ईदृग्विधाः ? वर्षधरपर्वताः। वर्षाणां भरतादीनां सप्तानां क्षेत्राणां विभागप्रत्ययत्वाद् वर्षधराः। वर्षधराश्च ते पर्वताश्च वर्षधरपर्वताः। किन्नामानस्ते वर्षधरपर्वताः? हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणः। हिमवांश्च महाहिमवांश्च ५ निषधश्च नीलश्च रुक्मी च शिखरी च ते हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणः। इतरेतरद्वन्द्वः। तत्र भरतस्य हैमवतस्य च क्षेत्रस्य सीम्नि क्षुद्रहिमवान् स्थितो वर्तते। स क्षुद्रहिमवान् एकशतयोजनोन्नतः पञ्चविंशतियोजनभूमिमध्यस्थितः। हैमवतक्षेत्रस्य हरिक्षेत्रस्य च सीम्नि महाहिमवानवस्थितो वर्तते। स द्विशतयोजनोन्नतः पञ्चाशद्योजनभूमिमध्यगतः। हरिक्षेत्रस्य विदेहक्षेत्रस्य च सीम्नि निषधनामा गिरिरवस्थितो वर्त्तते। स चतुः- १० शतयोजनोन्नतः एकशतयोजनभूमिमध्यगतः। विदेहक्षेत्रस्य रम्यकक्षेत्रस्य च सीम्नि नीलपर्वतोऽवस्थितो वर्त्तते। स चतुःशतयोजनोन्नत[2] एकशतयोजनभूमिमध्यगतः। रम्यकक्षेत्रहैरण्यवतक्षेत्रयोर्मध्ये रुक्मी नाम भूधरोऽवस्थितो वर्तते। स द्विशतयोजनोन्नतः पञ्चाशद्योजनभूमिमध्यगतः। हैरण्यवतक्षेत्रैरावतक्षेत्रयोः सीम्नि शिखरी नाम शिलोच्चयो जागर्ति।

अथेदानीं षण्णां कुलशिखरिणां वर्णविशेषपरिज्ञानार्थं सूत्रमिदं[3]माहुः— १५

हेमार्जुनतपनीयवैडूर्य्यरजतहेममयाः ॥ १२ ॥

हेम च अर्जुनं च तपनीयं च वैडूर्यं च रजतं च हेम च हेमार्जुनतपनीयवैडूर्यरजतहेमानि, तैर्निर्वृत्ता हेमार्जुनतपनीयवैडूर्यरजतहेममयाः। "[4]प्रकृतेर्विकारेऽवयवे वाऽभक्ष्याच्छादनयोः" [का० सू० दौ० वृ० २।६।४०] च मयडिति साधु। क्षुद्रहिमवान् हेममयः, चीनपट्टवर्णः, पीतवर्ण इत्यर्थः। महाहिमवान् अर्जुनमयः रूप्यमयः, शुक्लवर्ण इत्यर्थः। २० निषधस्तपनीयमयस्तरुणादित्यवर्णः, तप्तकनकवर्ण इत्यर्थः। नीलो वैडूर्य्यमयः, मयूरग्रीवाभः। रुक्मी रजतमयः, शुक्लवर्ण इत्यर्थः। शिखरी हेममयः, भर्मनिर्माणः, चीनपट्टवर्ण इत्यर्थः।

अथेदानीं भूयोऽपि तद्विशेषपरिज्ञानार्थं सूत्रमिदमूचुः—

मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥ १३ ॥

मणिभिः पञ्चविधरत्नैर्महातेजस्कैर्विचित्राणि कर्बुराणि देवविद्याधरचारणर्षीणामपि २५ चित्तचमत्कारकारीणि पार्श्वानि तटानि येषां कुलपर्वतानां ते मणिविचित्रपार्श्वाः। पुनरपि कथम्भूतास्ते कुलपर्वताः? उपरि मस्तके मूले [5]बुध्नभागे चकारात् मध्ये च, तुल्यविस्ताराः तुल्यो विस्तारो येषां ते तुल्यविस्ताराः, अनिष्टसंस्थानरहिताः समानविस्तारा इत्यर्थः।

---

१ लवणोदस्प- आ०, ब०, द०, ज०। २ -तः शत- ता०। ३ -मिदमूचुः ब०। ४ प्रकृतेर्विकारोऽवयवो वा आ०, ब०, द०, ज०। "वाऽभक्ष्याच्छादने मयट्।" -शाकटा० २।४।१६२। ५ बुध्ने भागे आ०, ब०, द०, ज०।

तेषां कुलपर्वतानामुपरितनमध्यभागे ये ह्रदा वर्तन्ते तान्प्रतिपादयन्ति भगवन्तः—

पद्ममहापद्मतिगिञ्छकेसरिमहापुण्डरीकपुण्डरीका ह्रदास्तेषामुपरि॥१४॥

पद्मश्च महापद्मश्च तिगिञ्छश्च केसरी च महापुण्डरीकश्च पुण्डरीकश्च पद्ममहापद्मतिगिञ्छकेसरिमहापुण्डरीकपुण्डरीकाः। तेषां हिमवदादिकुलपर्वतानामुपरि मस्तके ह्रदा
५ बहुजलपरिपूर्णसरोवराणि वरीवृत्यन्ते।

अथेदानीं प्रथमस्य [1]ह्रदस्य संस्थानं निरूपयन्त्याचार्याः—

प्रथमो योजनसहस्रायामस्तदर्धविष्कम्भो ह्रदः ॥ १५ ॥

प्रथमो हिमवत्पर्वतोपरिस्थितः पद्मो नाम यो ह्रदः सरोवरं वर्त्तते। स कथम्भूतः? योजनसहस्रायामः, एकसहस्रयोजनदीर्घः। पुनरपि कथम्भूतः? तदर्धविष्कम्भः, तस्य
१० एकयोजनसहस्रस्य अर्धं पञ्चशतयोजनानि विष्कम्भो विस्तारो यस्य स तदर्धविष्कम्भः। वज्रमयतलो नानारत्नकनकविचित्रतटः पूर्वापरेण दीर्घः दक्षिणोत्तरविस्तार इत्यर्थः।

अथ तस्यैव हिमवत्पर्वतोपरि स्थितस्यैव पद्मस्य ह्रदस्य अवगाहसूचनार्थं सूत्रमाहुः—

दशयोजनावगाहः ॥ १६ ॥

दशयोजनान्यवगाहोऽधःप्रवेशो निम्नता गाम्भीर्यं यस्य स दशयोजनावगाहः।

१५ अथ पद्मह्रदस्य मध्ये यद्वज्रमयं कमलं वर्त्तते तत्प्रमाणपरिज्ञानार्थं सूत्रमिदमुचुः—

तन्मध्ये योजनं पुष्करम् ॥ १७ ॥

तस्य पद्मह्रदस्य मध्ये योजनमेकयोजनप्रमाणं पद्मं पुष्करं वर्त्तते। तस्य एकक्रोशायतानि दलानि पत्राणि वर्त्तन्ते। क्रोशद्वयविस्तारा कर्णिका मध्ये अस्ति। कर्णिकामध्ये क्रोशैकप्रमाणः श्रीदेव्याः प्रासादो वर्त्तते वर्तुलाकारः। तत्कमलं क्रोशद्वयं जलं परित्यज्य
२० उपरि वर्त्तते। एवं पत्रकर्णिकासमुदायेन योजनप्रमाणं वेदितव्यम्।

अथेदानीमन्येषां ह्रदानां पुष्कराणाञ्च आयामविस्तारावगाहादिनिरूपणार्थं सूत्रमिदं ब्रुवन्ति—

तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च ॥ १८ ॥

ताभ्यां पद्मह्रदपुष्कराभ्यां द्विगुणद्विगुणास्तद्द्विगुणद्विगुणा विस्तारायामावगाहा ह्रदाः
२५ सरोवराणि भवन्ति। पुष्कराणि च पद्मानि च द्विगुणद्विगुणविस्तारायामानि ज्ञातव्यानि। [2]अत्र चशब्दः उक्तसमुच्चयार्थः। तेनायमर्थः—यथा पद्मान्महापद्मो द्विगुणो विंशतियोजनावगाहः द्विसहस्रयोजनायामः सहस्रयोजनविस्तारः, द्वियोजनं तत्र पुष्करं वर्त्तते, तथा महापुण्डरीको ह्रदस्तत्पुष्करञ्च तादृशञ्च ज्ञातव्यम्। यथा च महापद्माद् द्विगुणस्तिगिञ्छो ह्रदश्चत्वारिंशद्योजनावगाहः चतुःसहस्रयोजनायामो द्विसहस्रयोजनविस्तारश्चतुर्योजनं तत्पु-

---

१ –स्य ह्रस्वस्य ह्र– आ०। २ तत्र च– आ०, ब०, द०, ज०।

ष्करं वर्तते, तथा केसरीनामा ह्रदः तत्पुष्करञ्च तत्सदृशं[1] ज्ञातव्यम् "उत्तरा दक्षिण-तुल्याः" [त० सू० ३।२६] इति वचनात्। तेन पद्मतत्पुष्करसदृशे पुण्डरीकतत्पुष्करे। महापद्मतत्पुष्करसमाने महापुण्डरीकतत्पुष्करे। तिगिञ्छतत्पुष्करसमे केसरितत्पुष्करे इत्यर्थः। तथा महापद्मपुष्करं जलाच्चतुःक्रोशोन्नतं वर्त्तते। तिगिञ्छपुष्करं जलादष्टक्रोशोन्नतं वर्त्तते। केसरिपुष्करं जलादष्टक्रोशोन्नतम्। महापुण्डरीकपुष्करं जलाच्चतुःक्रोशोन्नतम्। ५ पुण्डरीकपुष्करं जलाद् द्विक्रोशोन्नतमिति।

अथेदानीं तेषु पुष्करेषु या देव्यो वर्तन्ते तासां सञ्ज्ञास्तज्जीवितप्रमाणञ्च तत्परिवार-सूचनार्थञ्च[2] सूत्रमिदं सूचयन्ति—

तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्त्तिबुद्धिलक्ष्म्यः पल्योपम-स्थितयः ससामानिकपरिषत्काः ॥ १९ ॥ १०

तेषु पुष्करेषु निवसन्तीत्येवंशीलास्तन्निवासिन्यो देव्यो भवन्ति। किन्नामानो देव्यः? श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः। श्रीश्च ह्रीश्च धृतिश्च कीर्तिश्च बुद्धिश्च लक्ष्मीश्च श्रीह्री-धृतिकीर्तिबुद्धिलक्ष्म्यः। कथम्भूता देव्यः? पल्योपमस्थितयः। [3]पल्येनोपमा यस्याः स्थितेः सा पल्योपमा। पल्योपमा एकपल्योपमा स्थितिर्जीवितकालो यासां ताः पल्योपमस्थितयः। पुनरपि कथम्भूता देव्यः? ससामानिकपरिषत्काः। समाने स्थाने भवाः सामानिकाः पितृमह-त्तरोपाध्यायसदृशाः। परिषदश्च वयस्यादितुल्याः। सामानिकाश्च परिषदश्च सामानिक-परिषदः। सामानिकपरिषद्भिः सह वर्तन्ते या देव्यस्ताः ससामानिकपरिषत्काः। षण्णां पुष्कराणां कर्णिकाणां मध्यप्रदेशेषु किल प्रासादा वर्तन्ते। ते तु प्रासादाः पूर्णनिर्मलशारदेन्दु-प्रभातिरस्कारिण एकक्रोशायामाः क्रोशार्द्धविस्ताराः किञ्चिदूनैकक्रोशसमुच्छ्रिताः। ईदृशेषु प्रासादेषु श्रीप्रभृतयो देव्यो वसन्ति। पद्मह्रदपुष्करप्रासादे श्रीर्वसति। महापद्मह्रदपुष्करप्रासादे २० ह्रीर्वसति। तिगिञ्छह्रदपुष्करप्रासादे धृतिर्वसति। केसरिह्रदपुष्करप्रासादे कीर्तिर्वसति। महापुण्डरीकह्रदप्रासादे बुद्धिर्वसति। पुण्डरीकह्रदप्रासादे लक्ष्मीर्वसति। तेषां पुष्कराणां परिवारपुष्करप्रासादेषु सामानिकाः परिषदश्च वसन्ति। तत्र श्रीह्रीधृतयस्तिस्रो देव्यो निज-निजपरिवारसहिताः सौधर्मेन्द्रस्य सम्बद्धाः सौधर्मेन्द्रसेवापरा वर्त्तन्ते। कीर्तिबुद्धिलक्ष्म्यस्तिस्रः सपरिवारा ईशानेन्द्रस्य सम्बद्धा वर्त्तन्ते। एवं पञ्चस्वपि मेरुषु ये षट्षट्कुलपर्वता वर्त्तन्ते २५ तेषु तेषु षट्षड्देव्यो ज्ञातव्याः।

अथेदानीं याभिर्नदीभिः क्षेत्राणि विभक्तानि ता उच्यन्ते—

गङ्गासिन्धुरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदानारीनरका-न्तासुवर्णरूप्यकूलारक्तारक्तोदाः सरितस्तन्मध्यगाः ॥२०॥

तेषां सप्तानां क्षेत्राणां मध्ये गच्छन्ति वहन्तीति तन्मध्यगाः, न तु सर्वा अपि सामीप्य- ३० सीमानः। एकैकस्मिन् क्षेत्रे द्वे द्वे नद्यौ वहत इत्यर्थः। तन्मध्यगाः काः? सरितश्चतुर्दश-

१ -शञ्च ज्ञा- आ०, द०, ब०, ज०। २ -र्थं सू- आ०, ब०। ३ पल्योपमा स्थि- ता०।

महानद्यः, न तु वापिका इत्यर्थः। किन्नामानः सरितः? गङ्गेत्यादि। गङ्गा च सिन्धुश्च रोहिच्च रोहितास्या च हरिच्च हरिकान्ता च सीता च सीतोदा च नारी च नरकान्ता च सुवर्णकूला च रूप्यकूला च रक्ता च रक्तोदा च तास्तथोक्ताः। इतरेतरद्वन्द्वः।

अथ पृथक् पृथक् क्षेत्रे द्वे द्वे नद्यौ भवत इति सूचनार्थमेकस्मिन् क्षेत्रे सर्वा नद्यो न
५ भवन्तीति च प्रकटनार्थं कां दिशं का नदी गच्छतीति च निरूपणार्थं सूत्रमिदमाहुः—

द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥ २१ ॥

द्वयोर्द्वयोर्गङ्गासिन्ध्वोर्मध्ये गङ्गा पूर्वगा पूर्वसमुद्रगामिनी। रोहिद्रोहितास्ययोर्मध्ये रोहित् पूर्वगा। हरिद्धरिकान्तयोर्मध्ये हरित् पूर्वगा। सीतासीतोदयोर्मध्ये सीता पूर्वगा। नारीनरकान्तयोर्मध्ये नारी पूर्वगा। सुवर्णकूलारूप्यकूलयोर्मध्ये सुवर्णकूला पूर्वगा। रक्ता-
१० रक्तोदयोर्मध्ये रक्ता पूर्वगा पूर्वसमुद्रगामिनी। एताः सप्त नद्यः पूर्वसमुद्रं गच्छन्ति। "शेषास्त्वपरगाः" इति वचनात् सिन्धुः पश्चिमसमुद्रगामिनी। रोहितास्या पश्चिमाब्धिं गच्छति। हरिकान्ता परोदधिं याति। सीतोदा प्रत्यक्समुद्रं व्रजति। नरकान्ताऽपरार्णवं जिहीते। रूप्यकूला पश्चिमसरस्वन्तं ध्वजति। रक्तोदा पश्चिमशशध्वजं समेति।

अथ एता यस्मान्निर्गता यत्र क्षेत्रे वहन्ति तदुच्यते—

१५ हिमवत्पर्वते पद्महृदो यो वर्तते तस्मात् पूर्वतोरणद्वारेण निर्गत्य गङ्गा म्लेच्छखण्डं पतित्वा विजयार्द्धं भित्वा पूर्वसमुद्रं प्रविष्टा। हिमवत्पर्वते यः प्रोक्तः पद्महृदस्तस्य पश्चिमतोरणद्वारेण निर्गत्य म्लेच्छखण्डे पतित्वा विजयार्द्धं भित्वा [1]सिन्धुः पश्चिमसमुद्रं प्रविष्टा। एते द्वे नद्यौ भरतक्षेत्रे वहतः। हिमवत्पर्वते यः पद्महृदस्तस्योत्तरतोरणद्वारेण निर्गत्य जघन्यभोगभूमौ पतित्वा रोहितास्या पश्चिमसमुद्रं प्रविष्टा। महाहिमवत्पर्वतोपरिस्थितो योऽसौ
२० महापद्महृदस्तस्य दक्षिणतोरणद्वारेण निर्गत्य जघन्यभोगभूमौ पतित्वा रोहित् पूर्वसमुद्रं प्रविष्टा। एते द्वे रोहिद्रोहितास्ये नद्यौ हैमवतक्षेत्रे वर्त्तेते। अथ महाहिमवत्पर्वतोपरि स्थितो योऽसौ महापद्महृदस्तस्योत्तरतोरणद्वारेण निर्गत्य मध्यमभोगभूमौ पतित्वा हरिकान्ता पश्चिमसमुद्रं गच्छतिस्म। निषधकुलपर्वतोपरि स्थितो योऽसौ तिगिञ्छहृदस्तस्य दक्षिणतोरणद्वारेण निर्गत्य मध्यमभोगभूमौ पतित्वा हरित् पूर्वसमुद्रं गता। एते द्वे हरिद्धरिकान्ते नद्यौ हरिक्षेत्र-
२५ मध्ये वर्त्तेते। निषधपर्वतोपरि स्थितो योऽसौ तिगिञ्छहृदस्तस्योत्तरतोरणद्वारेण निर्गत्य उत्तमभोगभूमौ पतित्वा सीतोदा नदी अपरविदेहमध्ये गत्वा पश्चिमसमुद्रं गता। अथ नीलकुलपर्वतोपरि स्थितो योऽसौ केसरिहृदस्तस्य दक्षिणतोरणद्वारेण निर्गत्य उत्तमभोगभूमौ पतित्वा पूर्वविदेहमध्ये गत्वा सीतानदी पूर्वसमुद्रं प्रविष्टा। एते द्वे सीतासीतोदे नद्यौ विदेहक्षेत्रमध्ये वर्त्तेते। नीलकुलपर्वतोपरि स्थितो योऽसौ केसरिहृदस्तस्योत्तरतोरणद्वारेण
३० निर्गत्य मध्यमभागभूमौ पतित्वा नरकान्ता पश्चिमसमुद्रं[2] ययौ। रुक्मिकुलपर्वतोपरि स्थितो योऽसौ महापुण्डरीकहृदस्तस्य दक्षिणतोरणद्वारेण निर्गत्य मध्यमभोगभूमौ पतित्वा नारीनामा

---

१ सिन्धुनदी आ०, ब०, ज०। २ –द्रं प्रविष्टा आ०, ब०, ज०।

नदी पूर्वसमुद्रं गता। एते द्वे नारीनरकान्ते नद्यौ रम्यकक्षेत्रे वर्त्तेते। रुक्मिपर्वतोपरि स्थितो योऽसौ महापुण्डरीकह्रदस्तस्योत्तरतोरणद्वारेण निर्गत्य जघन्यभोगभूमौ पतित्वा रूप्यकूलानाम निम्नगा पश्चिमसमुद्रं ढौकते स्म। शिखरिकुलपर्वतोपरि स्थितो योऽसौ पुण्डरीकनामा ह्रदस्तस्य दक्षिणतोरणद्वारेण निर्गत्य जघन्यभोगभूमौ पतित्वा सुवर्णकूलानाम्नी कूलङ्कषा पूर्वसमुद्रं प्राप्ता। एते द्वे सुवर्णकूलारूप्यकूले नद्यौ हैरण्यवतक्षेत्रमध्ये वर्त्तेते। शिखरिकुलपर्वतोपरि स्थितो योऽसौ पुण्डरीकह्रदस्तस्य पश्चिमद्वारेण निर्गत्य म्लेच्छखण्डमध्ये पतित्वा विजयार्द्धं भित्वा रक्तोदानाम[1]द्वीपवती पश्चिमसमुद्रं प्राप्नोति स्म। शिखरिकुलपर्वतोपरि स्थितो योऽसौ [2]पुण्डरीकह्रदः तस्य पूर्वद्वारेण निर्गत्य म्लेच्छखण्डमध्ये पतित्वा विजयार्द्धं भित्वा रक्तानाम्नी निम्नगा पूर्वसमुद्रं जिहीते स्म। एते द्वे [3]रक्तारक्तोदानाम नद्यौ ऐरावतक्षेत्रमध्ये वर्त्तेते।

अथ सीतोदा नदी यत्र देवकुरुमध्ये वहति तत्र पूर्वापरायता पञ्च ह्रदा वर्त्तन्ते। एकैकस्य ह्रदस्य समीपे पूर्वापरतटेषु पञ्च पञ्च क्षुद्रपर्वताः सन्ति। एवं पञ्चह्रदसम्बन्धिनः पञ्चाशत्क्षुद्रपर्वता सन्ति ते सिद्धकूटनामानः प्रत्येकं पञ्चाशद्योजनायताः पञ्चविंशतियोजन-विस्ताराः सप्तत्रिंशद्योजनोन्नताः मणितोरणद्वारवेदिकासहिताः घण्टाभृङ्गारक[4]लशलवङ्गकुसुममा-लादिसंयुक्तचतुर्दिक्चतुस्तोरणद्वारसहिताः। तेषां पर्वतानामुपरितनप्रदेशे अष्टप्रातिहार्य-संयुक्ताः रत्नसुवर्णरूप्यनिर्माणाः पल्यङ्कासनस्थिताः पूर्वाभिमुखाः एकैका जिनप्रतिमा [5]वर्तन्ते। ततोऽग्रे गत्वा गव्यूतिद्वयं मेरुपर्वतमस्पृष्ट्वा सीतोदानदी अपरविदेहं[6] चलिता यावदपरविदेहं न प्राप्नोति तावदपरविदेहवेदिकायाः पूर्वदिशि सीतोदानदीसम्बन्धिनः दक्षि-णोत्तरायता अपरे पञ्च ह्रदाः वर्तन्ते। तेषां दक्षिणोत्तरतटेषु पञ्च पञ्च पूर्ववत् सिद्ध-कूटानि सन्ति। एवं तत्रापि पञ्चाशत्सिद्धकूटानि ज्ञातव्यानि। एवं नीलपर्वताद्दक्षिणस्यां दिशि पतिता[7] या सीता नदी तस्या अपि सम्बन्धिन उत्तरकुरुमध्ये पञ्च ह्रदाः पूर्वापरायताः सन्ति। तेषामपि पूर्वापरतटेषु पञ्चाशत्सिद्धकूटानि पूर्ववत् ज्ञातव्यानि। ततः गव्यूतिद्वयं मेरुपर्वतं परिहृत्य सीतानदी पूर्वविदेहं प्रति पूर्वविदेहवेदिकायाः पश्चिमदिशि सीतानदीसम्ब-न्धिनः दक्षिणोत्तरायताः पञ्च ह्रदाः सन्ति। तेषामपि दक्षिणोत्तरतटेषु पञ्चाशत्सिद्धकूटानि ज्ञातव्यानि। एवमेकत्र सिद्धकूटानां द्विशती जम्बूद्वीपमेरुसम्बन्धिनी भवति। तथा पञ्चा-नामपि मेरूणां सम्बन्धिनां सिद्धकूटानामेकसहस्रं भवति।

शेषास्त्वपरगाः ॥ २२ ॥

अस्य सूत्रस्य व्याख्या पूर्वमेव निरूपिता।

---

१ –नामनदी आ०, ब०, द०, ज०। २ पद्मह्न– ता०। ३ –क्तादे नाम– ता०, व०। ४ –कलशध्वजकुसुममालिकासंयुक्तचतुर्दिक्चतुस्तोरणद्वारेण स– आ०, ब०, द०, ज०। ५ वर्तंते आ०, द०, ज०, ता० ब०। ६ –विदेहे च– आ०, द०, ज०, ब०। ७ पतित्वा या आ०, द०, ब०, ज०।

अथेदानीं गङ्गादिनदीनां परिवारनदीपरिज्ञानार्थं सूत्रमिदमाहुः—

चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः ॥ २३ ॥

नदीनां सहस्राणि नदीसहस्राणि चतुर्दश च तानि नदीसहस्राणि तैः परिवृता वेष्टिताः चतुर्दशनदीसहस्रपरिवृताः। गङ्गा च सिन्धुश्च गङ्गासिन्धू गङ्गासिन्धू आदिर्यासां रोहिद्रोहि-
५ तास्यादीनां ताः गङ्गासिन्ध्वादयः। नदन्ति शब्दं कुर्वन्ति इति नद्यः। ननु [1]एतस्मात्सूत्रात् पूर्वं चतुर्थं सूत्रं यदुक्तमस्ति तस्मिन्सूत्रे 'सरितस्तन्मध्यगाः' इत्यनेनैव वाक्येन सरिच्छब्देन नद्यः प्रकृता वर्तन्ते अधिकृताः सन्ति, तेनैव सरिच्छब्देन नद्यो लब्धाः पुनः 'नद्यः' इति [2]ग्रहणं किमर्थम्? 'चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयः' इतीदृशं सूत्रं क्रियतां किं पुनर्नदी-शब्दग्रहणेन? सत्यम्; नदीग्रहणं 'द्विर्गुणद्विगुणाः'[3] इति सम्बन्धार्थम्। तर्हि गङ्गासिन्ध्वादि-
१० ग्रहणं किमर्थम्? पूर्वोक्ता एव गङ्गासिन्ध्वादयो ज्ञास्यन्ते, तेन गङ्गासिन्ध्वादयः इति पदं व्यर्थम्, 'चतुर्दशनदीसहस्रपरिवृताः नद्यः' इत्येव[4] सूत्रं क्रियताम्; सत्यम्; **"अनन्तरस्य विधिः प्रतिषेधो वा"** [पात० १।२।४७] इति व्याकरणपरिभाषासूत्र बलेन अपरगा-नामेव नदीनां ग्रहणं भवेत्, न तु पूर्वगानाम्। तर्हि 'चतुर्दशनदीसहस्रपरिवृता गङ्गादयो नद्यः' इत्येवं सूत्रं क्रियतां किं सिन्धुशब्दग्रहणेन? सत्यम्; एवं सति पूर्वगानामेव
१५ नदीनां ग्रहणं भवेत्। अतः कारणादुभयीनां नदीनां ग्रहणार्थं गङ्गासिन्ध्वादिग्रहणं साधु।

अस्य सूत्रस्यायमर्थः—भरतक्षेत्रमध्ये ये गङ्गासिन्धू द्वे नद्यौ वर्तेते ते[5] प्रत्येकं द्वे अपि चतुर्दशनदीसहस्रपरिवृते स्तः। हैमवतनामजघन्यभोगभूमि[6]क्षेत्रमध्ये द्वे रोहिद्रोहितास्याभिधे नद्यौ वर्तेते ते प्रत्येकं अष्टाविंशतिनदीसहस्रपरिवृते भवतः। ये हरिक्षेत्रमध्यमभोगभूमिमध्ये हरिद्धरिकान्ताख्ये वर्तेते ते द्वे अपि प्रत्येकं षट्पञ्चाशन्नदीसहस्रपरिवृते स्याताम्। ये
२० विदेहमध्ये सीतासीतोदाह्वये द्वे नद्यौ वर्तेते ते प्रत्येकं द्वे अपि द्वादशसहस्राधिकेन नदीलक्षेण परिवृते चकास्तः। ये रम्यकनाममध्यमभोगभूमिक्षेत्रमध्ये नारीनरकान्ताभिधाने नद्यौ वर्तेते ते प्रत्येकं द्वे अपि षट्पञ्चाशन्नदीसहस्रसंयुक्ते जाग्रतः। ये हैरण्यवतनामजघन्य-भोगभूमिक्षेत्रमध्ये सुवर्णकूलारूप्यकूलासञ्ज्ञके वर्तेते, ते प्रत्येकं द्वे अपि अष्टाविंशतिनदी-सहस्रपरिवृते स्याताम्। ये ऐरावतक्षेत्रमध्ये रक्तारक्तोदानामिके द्वे नद्यौ वर्त्तेते ते प्रत्येकं द्वे
२५ अपि चतुर्दशनदीसहस्रपरिवृते भवतः इति तात्पर्यम्। भोगभूमिवर्त्तिन्यो नद्यस्त्रसजीवरहिताः सन्ति। जम्बूद्वीपसम्बन्धिन्यो मूलनद्योऽष्टसप्ततिर्भवन्ति। तासां परिवारनदीनां द्वादशसह-स्राँधिकानि[7] पञ्चदशलक्षाणि ज्ञातव्यानि। जम्बूद्वीपविभङ्गनद्यो द्वादश वर्त्तन्ते। तासां परिवारनद्यः परमागमाद् बोद्धव्याः। एवं पञ्चमेरुसम्बन्धिनीनां मूलनदीनां नवत्यधिक-त्रिशतप्रमाणानां परिवारनदीनां षष्टिसहस्राधिकानि पञ्चसप्ततिलक्षाणि ज्ञातव्यानि। षष्टि-
३० विभङ्गनद्यश्च ज्ञातव्याः।

---

१ -तस्मात्पू- आ०, द०, ब०, ज०। २ नदीग्रहणं आ०, द०, ब०, ज०। ३ द्विगुणा इति आ०, द०, ब०, ज०। ४ -वं सू- आ० द० ब० ज०। ५ ते द्वे अपि प्रत्येकं च- द०। ६ -मिम- ब०, द०। ७ -स्राण्यधि- आ०, ज०।

अथेदानीं भरतक्षेत्रस्य प्रमाणनिरूपणार्थं सूत्रमिदमाहुः—

भरतः [1]षड्विंशपञ्चयोजनशतविस्तारः षट् चैकोनविंशति-भागा योजनस्य ॥ २४ ॥

षड्भिरधिका विंशतिः षड्विंशतिः। षड्विंशतिरधिका येषु पञ्चयोजनशतेषु तानि षड्विंशानि, योजनानां शतानि योजनशतानि, पञ्च च तानि योजनशतानि ५ पञ्चयोजनशतानि, षड्विंशानि च तानि पञ्चयोजनशतानि षड्विंशपञ्चयोजनशतानि। **"संख्यया अजहोरन्त्यस्वरादिलोपश्च।"** [ ] इत्यनेन अत्प्रत्ययः **"तेविंशतेरपि"** [का० सू० २।६।४३] इति अपिशब्दस्य बहुलार्थत्वात् तिं लुप्त्वा पश्चादन्त्यस्वरादिलोपे कृते सति षड्विंश इति निष्पद्यते। षड्विंशपञ्चयोजनशतानि विस्तारो यस्य भरतस्य स षड्विंशपञ्चयोजनशतविस्तारः। न केवलं षड्विंशत्यधिकपञ्चयो- १० जनशतविस्तारो भरतवर्षो वर्तते, किन्तु एकोनविंशतिभागाः। एकोनविंशतिभागाः योजनस्य क्रियन्ते, तन्मध्ये षट् च भागाः गृह्यन्ते। तावत्प्रमाणविस्तारं[2] भरतक्षेत्रं वर्तते इत्यर्थः।

यदि षड्विंशत्यधिकपञ्चयोजनशतविस्तारः षट्कलाविस्तारस्य(श्च) भरतो वर्तते, तर्हि 'हिमवदादयः पर्वताः हैमवतादयो वर्षाश्च कियद्विस्तारा वर्तन्ते' इति प्रश्नसद्भावे सूत्रमिदमाहुः— १५

तद्द्विगुणद्विगुणविस्तारा: वर्षधरवर्षा विदेहान्ता ॥ २५ ॥

तस्माद् [3]भरतविस्ताराद् द्विगुणद्विगुणविस्ताराः तद्द्विगुणद्विगुणविस्ताराः। के ते ? वर्षधरवर्षाः। वर्षधराः हिमवदादयः कुलपर्वताः वर्षाः हैमवतादीनि क्षेत्राणि, वर्षधराश्च वर्षाश्च वर्षधरवर्षाः। कथम्भूताः वर्षधरवर्षाः ? विदेहान्ताः विदेहोऽन्ते येषां ते विदेहान्ताः विदेहपर्यन्तं द्विगुणा द्विगुणा गण्यन्ते, न तु परतः। विदेहात् परतः अर्द्धार्द्धविस्तारा इत्यर्थः। २० तेनायमर्थः—भरतविस्ताराद् द्विगुणविस्तारो हिमवान् हिमवद्विस्ताराद् द्विगुणविस्तारो हैमवतवर्षः। हैमवतवर्षविस्ताराद् द्विगुणविस्तारो महाहिमवान् वर्षधरः। महाहिमवत्पर्वत-विस्ताराद् द्विगुणविस्तारो हरिवर्षः। हरिवर्षविस्ताराद् द्विगुणविस्तारो निषधपर्वतः। निषधप-र्वताद् द्विगुणविस्तारो विदेहः। विदेहविस्तारादर्द्धविस्तारो नीलपर्वतः। नीलपर्वतादर्द्ध-विस्तारो रम्यकवर्षः। रम्यकवर्षविस्तारादर्द्धविस्तारो रुक्मिपर्वतः। रुक्मिपर्वतविस्तारादर्द्ध- २५ विस्तारो हैरण्यवतवर्षः। हैरण्यवतवर्षविस्तारादर्द्धविस्तारः शिखरिपर्वतः। शिखरिपर्वत-विस्तारादर्द्धविस्तार ऐरावतवर्षः। भरतक्षेत्रादारभ्य ऐरावतक्षेत्रपर्यन्तम् एकयोजनलक्षं जम्बूद्वीपप्रमाणं ज्ञातव्यमित्यर्थः।

उत्तरा दक्षिणतुल्याः ॥ २६ ॥

उत्तरा ऐरावतादयो वर्षवर्षधरा नीलपर्वतान्ता दक्षिणतुल्या दक्षिणैर्भरतादिभिर्वर्ष- ३०

---

१ षड्विंशतिप- **आ०, द०, ज०, ब०, व०।** २ –विस्तारो भरतक्षेत्रस्य व- **आ०, द०, ज०।** ३ भरतात् **आ०, ब०, ज०।**

धरैः तुल्याः सदृशा भवन्ति। अस्यायमर्थः—भरतक्षेत्रस्य यावान् विस्तारः तावान् ऐरावतक्षेत्र-विस्तारः। हिमवत्पर्वतस्य यावान् विस्तारस्तावान् शिखरिपर्वतविस्तारः। हैमवतक्षेत्रस्य यावान् विस्तारः तावान् हैरण्यवतक्षेत्रविस्तारः। महाहिमवत्पर्वतस्य यावान् विस्तारः तावान् रुक्मिपर्वतविस्तारः। हरिक्षेत्रस्य यावान्विस्तारस्तावान् रम्यकक्षेत्रविस्तारः। निषधपर्वतस्य ५ यावान्विस्तारस्तावान् नीलपर्वतविस्तारः। एवम् ऐरावतादिस्थितं ह्रदपुष्करादिकं भरतादिसदृशं ज्ञातव्यम्। भरतयोजन ५२६ कला ६। हिमवत्पर्वतयोजन १०५२ कला १२। हैमवतक्षेत्र-योजन २१०४ कला २४। महाहिमवत्पर्वतयोजन ४२०८ कला ४८। हरिक्षेत्रयोजन ८४१६ कला ९६। निषधपर्वतयोजन १६८३२ कला १९२। विदेहयोजन ३३६६४ कला ३८४। नीलयोजन १६८३२ कला १९२। रम्यकक्षेत्रयोजन ८४१६ कला ९६। रुक्मिपर्वतयोजन ४२०८ १० कला ४८। हैरण्यवतक्षेत्रयोजन २१०४ कला २४। शिखरिपर्वतयोजन १०५२ कला १२। ऐरावतक्षेत्रयोजन ५२६ कला ६। एवमेकत्र योजनैकलक्षम्।

अथेदानीं भरतादिक्षेत्रमनुष्यविशेषप्रतिपत्त्यर्थं सूत्रमिदमाहुः—

भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्प्पिण्यवसर्प्पिणीभ्याम् ॥२७॥

भरतश्च ऐरावतश्च भरतैरावतौ तयोः भरतैरावतयोः। सम्बन्धे षष्ठी। तत्रायमर्थः— १५ भरतस्य ऐरावतस्य च सम्बन्धिनां मनुष्याणां भोगोपभोगसम्पदायुःपरिमाणाङ्गोन्नतिप्रभृतिभिः वृद्धिह्रासौ भवतः। वृद्धिश्च ह्रासश्च वृद्धिह्रासौ, [1]उत्सर्पणावसर्पणे भोगादीनां भवतः न तु भरत-क्षेत्रस्य वृद्धिह्रासौ भवतः, क्षेत्रयोर्वृद्धिह्रासयोरसंगच्छमानत्वात्, तेन तत्रस्थितमनुष्याणां भोगोपभोगादिषु वृद्धिहानी स्याताम्। 'भरतैरावतयोः' इत्यत्र यत्प्रोक्तं षष्ठीद्विवचनं तत्केचिदा-चार्याः [2]नोररीकुर्वते। किं तर्हि उररीकुर्वन्ति? [3]सप्तमीद्विवचनमुररीकुर्वन्ति। तेनायमर्थः-भरते २० ऐरावते च क्षेत्रे मानवानामित्यध्याहारात् वृद्धिह्रासौ भवतः, अनुभवायुःप्रमाणानां वृद्धिहानी स्यातामित्यर्थः। कोऽसौ अनुभवः किं वा आयुः किं वा प्रमाणमिति चेत्? उच्यते—अनुभवः सुखदुःखयोरुपयोगः, आयुः जीवित[4]कालप्रमाणम्, प्रमाणं तु कायोत्सेधः, इत्येतेषां त्रयाणा-मपि वृद्धिह्रासौ पञ्चजनानां भवतः। काभ्यां हेतुभ्यां नृणां भोगोपभोगादीनां वृद्धिह्रासौ भवतः इत्युक्ते उत्सर्पिण्यवसर्पिणीभ्यां द्वाभ्यां कालाभ्यां वृद्धिह्रासौ भवतः। उत्सर्पयति वृद्धिं २५ नयति भोगादीन् इत्येवंशीला उत्सर्पिणी, अवसर्पयति हानिं नयति भोगादीन् इत्येवंशीला अवसर्पिणी, उत्सर्पिणी च अवसर्पिणी च उत्सर्पिण्यवसर्पिण्यौ ताभ्याम् उत्सर्पिण्यवसर्पिणी-भ्याम्। कथम्भूताभ्यामुत्सर्पिण्यवसर्पिणीभ्याम्? षट्समयाभ्यां षट् षट् समयाः काल-विशेषाः विद्यन्ते ययोस्ते षट्समये ताभ्यां षट्समयाभ्याम्। तत्र तावत् अवसर्पिणीका-

---

१ उत्सर्पिण्या अवसर्पिण्या भो- आ०, द०, ज०। उत्सर्पणावसर्पणभो- ब०। २ नोररी-कुर्वन्ति स- आ०, ब०, द०, ज०। ३ "अथवा अधिकरणनिर्देशः, भरते ऐरावते च मनुष्याणां वृद्धिह्रासाविति।" -स० सि०, राजवा० ३।२७। ४ -कालपरिमा- आ०, ब०, द०, ज०।

लस्य सम्बन्धिनः षट्समया उच्यन्ते सुषमसुषमा प्रथमकालः। सुषमा द्वितीयकालः। सुषमदुःषमा तृतीयकालः। दुःषमसुषमा चतुर्थकालः। दुःषमा पञ्चमकालः। अतिदुःषमा षष्ठकालः। अथ उत्सर्पिण्याः सम्बन्धिनः षट्समया निर्दिश्यन्ते—अतिदुःषमा प्रथमकालः। दुःषमा द्वितीयकालः। दुःषमसुषमा तृतीयकालः। सुषमदुःषमा चतुर्थकालः। सुषमा पञ्चमकालः। सुषमसुषमा षष्ठकालः। अथ किमर्थं सूत्रे उत्सर्पिण्याः पूर्वं ग्रहणम्, इदानीमवसर्पिण्यां वर्तमानत्वात्; सत्यम्; **"अल्पस्वरतरं तत्र पूर्वम्"** [कात० २।५।११२] इति वचनात् यदल्पस्वरं पदं भवति तत्पूर्वं निपततीति कारणात्। तत्रावसर्पिणीकालस्य यः प्रथमः कालः सुषमसुषमानामकः स चतुःसागरकोटीकोटिप्रमाणः। यस्तु सुषमानामको द्वितीयः कालः स त्रिसागरकोटीकोटिप्रमितः। यः सुषमदुःषमा नामकस्तृतीयः कालः स द्विसागरकोटीकोटिसम्मितः। यो दुःषमसुषमानामकश्चतुर्थः कालः स एकसागरोपमकोटीकोटिप्रमाणः परं द्वाचत्वारिंशत्सहस्रवर्षोनः। यस्तु दुःषमानामकः पञ्चमः कालः स एकविंशतिवर्षसहस्रप्रमाणः। यस्तु अतिदुःषमानामकः षष्ठः कालः सोऽप्येकविंशतिवर्षसहस्रप्रमाणः। अथ योऽसौ उत्सर्पिणीकालसम्बन्धी अतिदुःषमानामकः प्रथमः कालः स एकविंशतिवर्षसहस्रप्रमाणः। यस्तु दुःषमानामको द्वितीयः कालः सोऽप्येकविंशतिवर्षसहस्रप्रमाणः। यस्तु दुःषमसुषमानामकस्तृतीयः कालः स एकसागरोपमकोटीकोटिप्रमाणः परं द्वाचत्वारिंशद्वर्षसहस्रहीनः। यस्तु सुषमदुःषमानामकश्चतुर्थः कालः स द्विसागरोपमकोटीकोटिप्रमितः। यस्तु सुषमानामकः पञ्चमः कालः स त्रिसागरोपमकोटीकोटिसम्मितः। यस्तु सुषमसुषमानामकः षष्ठः कालः स चतुःसागरोपमकोटीकोटिप्रमाणः। अवसर्पिण्या सम्बन्धिनि प्रथमकाले आदौ पूर्वोक्तोत्तमभोगभूमिचिह्नानि ज्ञातव्यानि। द्वितीयकाले आदौ पूर्वोक्तमध्यमभोगभूमिचिह्नानि वेदितव्यानि। तृतीयकाले आदौ पूर्वोक्तजघन्यभोगभूमिलक्षणानि लक्षितव्यानि। हानिरपि क्रमेण ज्ञातव्या।

तृतीयकाले पल्यस्याऽष्टमे भागे स्थिते सति षोडश कुलकरा उत्पद्यन्ते। तत्र षोडशकुलकरेषु मध्ये पञ्चदशकुलकराणामष्टम एव भागे विपत्तिर्भवति। षोडशस्तु कुलकरः उत्पद्यते अष्टम एव भागे विनाशस्तु तस्य चतुर्थकाले भवति। तत्र प्रथमकुलकर एकपल्यस्य दशमभागायुः ज्योतिरङ्गकल्पवृक्षमन्दज्योतिस्त्वेन चन्द्रसूर्यदर्शनोत्पन्नं भयं युगलानां निवारयति। द्वितीयः कुलकरः पल्यशतभागैक [भाग] जीवितो ज्योतिरङ्गकल्पवृक्षातिमन्दज्योतिस्त्वेन तारकादिदर्शनोत्पन्नयुगलभयनिवारकः। तृतीयः कुलकरः पल्यसहस्रभागैकभागजीवितो विकृतिगतसिंहव्याघ्रादिक्रूरमृगपरिहारकारकः। चतुर्थः कुलकरः पल्यदशसहस्रभागैकभागजीवितः अतिविकृतिगतसिंहव्याघ्रादिक्रूरमृगरक्षानिमित्तलकुटादिस्वीकारकारकः। पञ्चमकुलकरः पल्यलक्षभागैकभागजीवितो विरलकल्पवृक्षत्वे अल्पफलत्वे च वाचा कल्पवृक्ष-

१ –ण्या तत्र व– ज०। २ यः सुषमानाम– ता०। ३ –मकोटाको– ज०। ४ –मका– आ०, द०, ज०, ब०। ५ –निज्ञात– आ०, ब०, द०, ज०। ६ –त्पन्नभ– आ०, ब०, द०, ज०। ७ –कजी– आ०, द०, ब०, ज०। ८ –स्वीकारकः आ०, ब०, द०, ब०।

सीमाकारकः। षष्ठकुलकरः पल्यदशलक्षभागैकभागजीवितः अतिविरलकल्पवृक्षत्वे अत्यल्प-
फलत्वे च गुल्मादिचिह्नैः कल्पवृक्षसीमाकारकः। सप्तमकुलकरः पल्यकोटिभागैकभाग-
जीवितः शौर्याद्युपकरणोपदेशगजाद्यारोहणकारकः। अष्टमकुलकरः पल्यदशकोटिभागैक-
भागजीवितः अपत्यमुखदर्शनमात्रोत्पन्नभयविनाशकः। नवमकुलकरः पल्यशतकोटिभागैक-
५ भागजीवितः अपत्याशीर्वाददायकः। दशमकुलकरः पल्यसहस्रकोटिभागैकभागजीवितः
अपत्यानां रोदने सति चन्द्रादिदर्शनक्रीडनोपायदर्शकः। एकादशकुलकरः पल्यसहस्रकोटि-
भागैकभागजीवितः, तस्य काले युगलानि अपत्यैः सह कतिचिद्दिनानि जीवन्ति। द्वादश-
कुलकरः पल्यलक्षकोटिभागैकभागजीवितः, तस्य काले युगलानि अपत्यैः सह बहुकालं
जीवन्ति, स युगलानां जलतरणोपायप्रवहणादिरचनाकारकः, तथा पर्वताद्यारोहणाऽवरोहणो-
१० पायसोपानादिकारकः। तस्य काले अत्यल्पमेघा अत्यल्पवृष्टिं कुर्वन्ति। तेनैव कारणेन
कुनद्यः कुपर्वताश्चोत्पद्यन्ते। त्रयोदशकुलकरः पल्यदशलक्षकोटिभागैकभागजीवितः, स
कुलकरः अदृष्टपूर्वजरायुःप्रभृतिमलं निराकारयति। चतुर्दशकुलकरः पूर्वकोटिवर्षजीवितः,
सोऽपत्यानामदृष्टपूर्वं नाभिनालं भीतिजनकं कर्त्तयति। तस्य काले प्रचुरमेघाः प्रचुरवृष्टिं
कुर्वन्ति, अकृष्टपच्यानि सस्यादीनि चोत्पद्यन्ते। तद्भक्षणोपायमजानानां युगलानां तद्भक्षणो-
१५ पायं दर्शयति। अभक्ष्याणामौषधीनामभक्ष्यवृक्षाणाञ्च परिहारञ्च कारयति। कल्पवृक्षविनाशे
क्षुधितानां युगलानां सस्यादिभक्षणोपायं दर्शयति। पञ्चदशकुलकरस्तीर्थङ्करः। तत्पुत्रः
षोडशकुलकरश्चक्रवर्ती भवति। तौ द्वावपि चतुरशीतिलक्षपूर्वजीवितौ। तच्चरित्रं महापुराण-
प्रसिद्धं ज्ञातव्यम्।

दुःषमसुषमानामकः चतुर्थः कालः स एकसागरोपमकोटीकोटिप्रमाणः द्विचत्वारिंशद्-
२० वर्षसहस्रोनः, तस्यादौ मानवा विदेहमानवसदृशाः पञ्चशतधनुरुन्नताः। तत्र त्रयोविंशतिस्ती-
र्थङ्करा उत्पद्यन्ते [५]निर्वान्ति च। एकादश चक्रवर्तिनः नव बलभद्राः नव वासुदेवाः नव प्रति-
वासुदेवा उत्पद्यन्ते, एकादश रुद्राश्च। तदुक्तम्—

"दोरिसहअजियकाले सत्तंता पुप्फयंतआईहिं।
उप्पण्णा अट्ठहरा एक्को चिय वीरकालम्मि॥" [ ]

२५ नव नारदाश्चोत्पद्यन्ते। तदुक्तम्—

"कलहपिया कयाचिय धम्मरया वासुएवसमकालाः।

---

१ –कारः आ०, ज०। २ –दशमकु– आ०। ३ –भागजी– आ०, ज०। –भागैकजी– द०। ४ –इशः कु– ता०, व०। ५ निर्वाणं यान्ति आ०, ब०, द०, ज०, व०। ६ –द्राः त– ता०। ७ –हरणा ए– आ०। ८ तुलना—"उसहदुकाले पढमदु सत्तण्णेसत्तसुविहिपहुदीसु। पीढो संतिजिणिंदे वीरे सच्चइसुद्दो जादो॥" –तिलोयसा० गा० ८३७। द्वौ ऋषभाजितकाले सप्तान्ताः पुष्पदन्तादिभिः। उत्पन्नाः अष्टधरा एकश्च वीरकाले। ९ कलहप्रियाः कदाचिद्धर्मरता वासुदेवसमकालाः। भव्या अपि च नरकगतिं हिंसादोषेण गच्छन्ति॥

भव्वा वि य णिरयगइं हिंसादोसेण गच्छंति ॥"

[तिलोयसा० गा० ८३५]

तस्य चतुर्थकालस्यान्ते विंशत्यधिकशतवर्षायुषो मनुष्याः सप्तहस्तोन्नताश्च ।

दुःषमानामकः पञ्चमः[1] काल एकविंशतिवर्षसहस्रप्रमाणः, तदादौ विंशत्यधिकशतवर्षायुषो मनुष्याः सप्तहस्तोन्नताः तदन्ते विंशतिवर्षायुषो मनुष्याः सार्द्धत्रयहस्तोन्नताश्च । ५ ततोऽतिदुःषमानामकः षष्ठः कालः स एकविंशतिवर्षसहस्राणि प्रवर्त्तते । तदादौ विंशतिवर्षायुषो मनुष्याः, तदन्ते षोडशवर्षायुषो मनुष्या एकहस्तोन्नताश्च । तस्यान्ते प्रलयकालो भवति । तदुक्तम्—

"सरसं विरसं तीक्ष्णं रूक्षमुष्णविषं विषम् ।
क्षारमेघाः क्षरिष्यन्ति सप्तसप्तदिनान्यलम् ॥" [ ] १०

सर्वस्मिन्नार्यखण्डे प्रलयं गते सति द्वासप्ततिकुलमनुष्ययुगलानि उद्ध्रियन्ते । चित्राभूमिः समा प्रादुर्भवति । अत्रावसर्पिणी समाप्ता दशकोटीकोटिसागरोपमप्रमाणा । तदनन्तरं दशकोटीकोटिसागरोपमप्रमाण उत्सर्पिणीकालः प्रवर्त्तते । तस्यादौ अतिदुःषमासंज्ञकः प्रथमः कालः प्रवर्तते । तस्यादौ एकोनपञ्चाशद्दिनपर्यन्तं क्षीरमेघा अहर्निशं वर्षन्ति । तदनन्तरं तावद्दिनपर्यन्तममृतमेघा वर्षन्ति । पृथिवी रूक्षतां मुञ्चति । तन्मेघमाहात्म्येन [3]वर्णादिगुणो १५ भवति, औषधितरुगुल्मतृणादीनि सरसानि भवन्ति, पूर्वोक्तानि युगलानि बिलादिभ्यो निर्गत्य औषध्यादिसस्यादीनि सरसान्युपजीव्य सहर्षाणि जीवन्ति । स कालः एकविंशतिवर्षसहस्राणि प्रवर्तते । तदादौ षोडशवर्षायुषो मनुष्या एकहस्तोत्सेधाश्च । तस्य कालस्यान्ते विंशतिवर्षायुषो मनुष्याः सार्द्धहस्तत्रयोन्नताश्च । तदनन्तरं दुःषमानामको द्वितीयः कालः । स एकविंशतिवर्षसहस्रप्रमाणः । तदादौ विंशतिवर्षायुषो मनुष्याः सार्द्धहस्तत्रयोत्सेधाः । २० तस्य द्वितीयकालस्यान्ते वर्षसहस्रावशेषे स्थिते सति चतुर्दशकुलकरा उत्पद्यन्ते । ते अवसर्पिणीपञ्चमकालनृपसदृशाः । तद्वर्षसहस्रमध्ये त्रयोदशानां नृपाणां विनाशो भवति । [5]चतुर्दशस्तु कुलकर[6] उत्पद्यते तद्वर्षसहस्रमध्ये, विपद्यते तु तृतीयकालमध्ये । तस्य चतुर्दशस्य कुलकरस्य पुत्रस्तीर्थङ्करो भवति । तस्य तीर्थङ्करस्य पुत्रश्चक्रवर्त्ती भवति । तद्द्वयस्याप्युत्पत्तिर्दुःषमसुषमानाम्नि तृतीयकाले भवति, विनाशस्तु त्रयाणामपि भवति । तस्यादौ विंशत्य- २५ धिकशतवर्षायुषो मनुष्या भवन्ति, सप्तहस्तोत्सेधाः भवन्ति । स काल एककोटीकोटिसागरोपमप्रमाणः प्रवर्त्तते, [7]परं द्वाचत्वारिंशद्वर्षसहस्रोनः । तन्मध्ये शलाकापुरुषा उत्पद्यन्ते । तस्य कालस्यान्ते कोटिपूर्ववर्षायुषो मनुष्याः सपादपञ्चशतधनुरुत्सेधाः । तदनन्तरं सुषम-

---

१ -मका- आ०, ब०, द०, ज० । २ -नामा प- आ०, ब०, द०, ज० । ३ वर्णादि- आ०, द०, ज० । ४ -धास्त- ता० । ५ चतुर्दशकु- आ०, ब०, द०, ज० । ६ -करा उत्पद्यन्ते आ०, द० । -कर उत्पद्यन्ते ज०, ब० । ७ वाक्यमेतन्नास्ति आ०, ब०, ज०, व० ता० ।

दुःषमानामकश्चतुर्थः कालः। स द्विकोटीकोटिसागरोपमप्रमाणः जघन्यभोगभूमिस्वभावः। तथा सुषमानामकः पञ्चमः कालः त्रिसागरोपमकोटीकोटिप्रमाणः। तत्र मध्यमभोगभूमिस्वभावः। तथा सुषमसुषमानामकः षष्ठः कालः चतुःसागरोपमकोटीकोटिप्रमाणः। तत्रोत्तमभोगभूमिस्वभावः। एवं चतुर्थपञ्चमषष्ठकालेषु ईतिरेकापि [1]न भवति। अहोरात्रि-
५ विभागोऽपि नास्ति। ज्योतिरङ्गकल्पवृक्षोद्योतेन सदैव दिवसः। मेघवृष्टिर्नास्ति। शीतबाधापि न वर्तते। आतपकष्टं कदाचिदपि [3]न वर्तते। क्रूरमृगबाधा नास्त्येव। अत्र दशसागरोपमकोटीकोटिप्रमाण उत्सर्पिणीकालः समाप्तः। तदनन्तरमवसर्पिणीकालः प्रवर्त्तते। स पूर्वोक्तलक्षणो ज्ञातव्यः। एवमष्टादशसागरोपमकोटीकोटिप्रमाणः कालः भोगभूमियो ज्ञातव्यः। उत्सर्पिण्यवसर्पिणीनामकाभ्यां द्वाभ्यां कालाभ्यां कल्पः कथ्यते। भोगभूमिजा
१० मनुष्याः स्वभावेन मधुरभाषिणो भवन्ति। [5]सर्वकलाकुशलाः सर्वेऽपि समभोगा अरजोऽम्बरा निःस्वेदा ईर्ष्यामात्सर्यादिरहिता बलित्वाबलित्वमुक्ता अनाचारकार्पण्यकोपाद्यरुचिग्लानिभयविषादकामज्वरोन्मादविरहलालाशरीरमलनिद्रात्यु (क्ष्यु) न्मेषनिमेषदैन्यचिन्ताऽनिष्टयोगेष्टवियोगातङ्कजरारहिताः। [6]क्षुन्मात्रेण स्त्रियो म्रियन्ते। जृम्भितमात्रेण पुरुषाः पञ्चत्वं[7]मा-
१५ प्नुवन्ति। तत्र नपुंसकः कोऽपि नास्ति। मृगाः सर्वेऽपि विशिष्टतृणचारिणः समानायुषश्च भवन्तीति विशेषः।

अथ भरतैरावतमनुष्यस्वरूपनिरूपणानन्तरं हैमवतहरिवर्षदेवकुरुक्षेत्रत्रयस्वभावोद्भावनार्थं सूत्रमिदमुच्यते—

ताभ्यामपरा भूमयोऽवस्थिताः ॥ २८ ॥

२० ताभ्यां भरतैरावताभ्यां क्षेत्राभ्याम् अपरा अन्या भूमयः हैमवतक्षेत्रहरिक्षेत्रदेवकुरुनामिकास्तिस्रो भूमयोऽवस्थिताः सर्वदैव एकः कश्चित्कालस्तासु वर्तते। हैमवतक्षेत्रे सदैव तृतीयः कालोऽस्ति, हरिक्षेत्रे द्वितीयः, देवकुरुषु प्रथम[8]ः कालः। अवसर्पिण्याः कालेन सदृश इत्यर्थः। परं त्व[9]त्र उत्सर्पिण्यसर्पिण्यौ कालौ न वर्तेते।

'तर्हि त्रिष्वपि क्षेत्रेषु मनुष्या आयुषा सदृशाः सन्ति, अथवा अस्ति कश्चिद्विशेषः'
२५ इत्युक्ते त्रयाणामपि क्षेत्राणां मनुष्याणामायुर्विशेषप्रतिपत्त्यर्थं सूत्रमिदमाचष्टे—

एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः ॥ २९ ॥

एकश्च द्वौ च त्रयश्च एकद्वित्रयः ते च ते पल्योपमा एकद्वित्रिपल्योपमाः कालविशेषाः, ते स्थितयः आयूंषि येषां ते एकद्वित्रिपल्योपमस्थितयः। ईदृशाः के? हैमवतकहारिवर्षकदैवकुरवकाः। हैमवतक्षेत्रे भवा हैमवतकाः। हरिवर्षक्षेत्रे भवा हारिवर्षकाः। देवकुरुक्षेत्रे

---

१ नास्ति आ०, द०, ज०। २ –वृक्षघातेन ता०। ३ नास्ति आ०, द०, ज०, व०। ४ –भूमयो ज्ञा– आ०। –भूमिजो ज्ञा– ज०। ५ –कलासु कु– ता०, व०। ६ छिक्कामात्रेण। ७ –त्वं प्राप्नु– आ०, ज०। ८ प्रथमका– आ०, ज०, व०। ९ तत्र ता०, आ०, द०, ज०।

भवा दैवकुरवकाः। हैमवतकाश्च [1]हारिवर्षकाश्च दैवकुरवकाश्च हैमवतकहारिवर्षकदैव-कुरवकाः। अस्यामर्थः—पञ्चमेरुसम्बन्धिनां पञ्चानां हैमवतक्षेत्राणां सम्बन्धिनां मनुष्याणां सदा सुषमदुःषमाकालानुभवनम्, आयुःस्थितिरेकपल्योपमा द्विधनुःसहस्रोन्नतिः, एकान्तरेण भुक्तिश्च इन्दीवरवर्णवर्णश्च। पञ्चानां हरिवर्षक्षेत्राणां सम्बन्धिनां मनुष्याणां सदा सुषमाकालानुभवनम्, आयुःस्थितिः द्विपल्योपमा, चतुश्चापसहस्रोन्नतिश्च द्विदिनान्तरेण भुक्तिश्च, ५ कुन्दावदातानि शरीराणि। पञ्चानां देवकुरूणां सम्बन्धिनां मनुष्याणां सदा सुषमसुषमाकालानु-[2]भवनम्, आयुःस्थितिः त्रिपल्योपमा, षट्धनुःसहस्रोन्नतिश्च, त्रिदिनान्तरेण भुक्तिः, काञ्चनवर्णानि शरीराणि।

तर्हि हैरण्यवतरम्यकोत्तरकुरूणां मनुष्याः कीदृशाः सन्तीति प्रश्ने सूत्रमिदमाचष्टे—

तथोत्तराः ॥ ३० ॥ १०

तथा तेनैव हैमवतादिक्षेत्रत्रयमनुष्यप्रकारेण उत्तराः हैरण्यवतरम्यकोत्तरकुरूणां मनुष्या ज्ञातव्याः। अस्यायमर्थः—हैमवतक्षेत्रमनुष्यसदृशा हैरण्यवतक्षेत्रमनुष्याः। हरिवर्ष-क्षेत्रमनुष्यसदृशा रम्यकक्षेत्रमनुष्याः। देवकुरुक्षेत्रमनुष्यसदृशा उत्तरकुरुक्षेत्रमनुष्याः।

तर्हि पूर्वविदेहाऽपरविदेहमनुष्याणां स्थितिः कीदृशी वर्तते इति प्रश्ने सूत्रमिदमाचष्टे—

विदेहेषु संख्येयकालाः ॥ ३१ ॥ १५

विगतो विनष्टो देहः शरीरं मुनीनां येषु ते विदेहाः प्रायेण मुक्तिपदप्राप्तिहेतुत्वात्, तेषु विदेहेषु पञ्चानां मेरूणां सम्बन्धिनः पञ्चपूर्वविदेहाः पञ्चापरविदेहाः उभये मिलित्वा पञ्चमहाविदेहाः कथ्यन्ते। तेषु मनुष्याः संख्येयकालाः, संख्यायते गणयितुं शक्यते, संख्येयः, उत्कर्षेण पूर्वकोटिलक्षणः जघन्येनान्तमुहूर्तलक्षणः संख्येयः कालो जीवितं येषां ते संख्येयकालाः। अस्यायमर्थः—सर्वेषु पञ्चसु महाविदेहेषु सदा सुषमदुःषमाकालान्तकाल- २० सदृशो दुःषमसुषमानामकः सदा निश्चलः कालो वर्तते। तत्र पञ्चजनाः पञ्चचापशतोन्नता भवन्ति, नित्यभोजनाश्च वर्तन्ते। किं तत् पूर्वं येन गणितं तेषामायुः[3] ? तथा चोक्तम्—

"पुव्वस्स[4] दु परिमाणं सदरिं खलु कोडिसदसहस्साइं।
छप्पण्णं च सहस्सा बोधव्वा वासकोडीणं॥"

[जम्बू० प० १३।१२] २५

अस्यायमर्थः—सप्ततिलक्षकोटिवर्षाणि षट्पञ्चाशत्सहस्रकोटिवर्षाणि यदा भवन्ति तदा एकं पूर्वमुच्यते। तस्य पूर्वस्य अङ्कक्रमो यथा—दशशून्यानि तदुपरि षट्पञ्चाशत् तदुपरि सप्ततिः—७०५६०००००००००००। ईदृग्विधानि पूर्वाणि शतलक्षाणि तेषां मनुष्याणामायुर्भवति।

अथेदानीं पुनरपि भरतक्षेत्रस्य प्रमाणं प्रकारान्तरेण निरूपयन्त्याचार्याः—

---

१ हारिवर्षाश्च आ०, ज०। २ –भावनामा– ता०, व०। ३ –युः पु– ता०। ४ पूर्वस्य तु परिमाणं सप्ततिः खलुकोटिशतसहस्राणि। षट्पञ्चाशत् च सहस्राणि बोद्धव्यानि वर्षकोटीनाम्॥

भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः ॥ ३२ ॥

भरतस्य भरतक्षेत्रस्य विष्कम्भो विस्तारः जम्बूद्वीपस्य जम्बूद्वीपविस्तारस्य एकलक्ष-योजनप्रमाणस्य नवतिशतभागः—एकलक्षयोजनस्य नवत्यधिकाः शतभागाः क्रियन्ते, तेषां मध्ये एको भागो भरतक्षेत्रस्य विस्तारो वेदितव्य[1] इत्यर्थः। स एको भागः षड्विंशत्यधिक-पञ्चयोजनशतप्रमाणः षट्कलाधिको भवतीति तात्पर्यम्। जम्बूद्वीपस्यान्ते या वेदिका वर्त्तते सा लक्षयोजनमध्ये गणनीया, समुद्रविस्तारमध्ये न गण्यते। एवं सर्वेषां द्वीपानां या वेदिकाः सन्ति ताः सर्वा अपि द्वीपविस्तारमध्ये गण्यन्ते न तु समुद्रविस्तारमध्ये गण्यन्ते। लवणोदसमुद्रमध्यप्रदेशेषु पूर्वपश्चिमोत्तरदक्षिणेषु दिग्भागेषु चतुर्षु चत्वारः पातालसञ्ज्ञका वडवानलाः सन्ति ते अलञ्जलाकाराः[2] प्रत्येकं[3] लक्षयोजनगम्भीराः, ते मध्यप्रदेशे[4] लक्षयोजन-विस्ताराश्च भवन्ति। ते मुखेषु मूलेषु च दशयोजनसहस्रविस्तारा भवन्ति। तथा लवणसमुद्र-मध्येषु चतसृषु विदिक्षु क्षुद्रवडवानलाश्चत्वारः। ते चत्वारोऽपि प्रत्येकं दशसहस्रयोजन-गम्भीरा भवन्ति[5]। मध्यप्रदेशेषु दशसहस्रयोजनविस्ताराश्च सन्ति। मुखेषु मूलेषु च एक-योजनसहस्रविस्तारा भवन्ति। अष्टानामप्यौर्वाणामष्टस्वप्यन्तरालेषु[6][7] एकैकस्मिन्नन्तराले श्रेणिरूपस्थिताः सपादशतसंख्या वाडवा भवन्ति। ते तु योजनसहस्रगम्भीराः, तथा मध्ये योजनसहस्रविस्ताराः, मुखेषु मूलेषु च[8] पञ्चयोजनशतविस्ताराः। एवमेकत्वे अष्टाधिकसहस्रसंख्याः प्रसिद्धा वडवानला वेदितव्याः। तेषामप्यन्तरालेषु क्षुद्रक्षुद्रतरा और्वा अप्रसिद्धा बहवः सन्ति। सर्वेषां वडवानलानां त्रयो भागाः। तत्राधस्तनभागेषु वायुरेव वर्तते मध्यभागेषु वायुजले वर्तेते। उपरितनभागेषु केवलं जलमेव। यदा वायुर्मन्दं मन्दम-धस्तनभागेभ्यो मध्यमभागेषु चरति। तदा मध्यभागजलं मरुत्प्रेरितमुपरितनभागेषु चरति। ततः सर्वौर्वजलमिलितमब्धिजलं वेलादिरूपतया वर्द्धते। यदा पुनः मन्दं मन्दं नभस्वानधो-भागेषु गच्छति तदा वेलादिरूपा स्फीतिर्निवर्तते[9]। लवणोद एव वेला वर्तते नान्येषु समुद्रेषु। अन्येषु समुद्रेषु वडवानला न सन्ति। यस्मात्सर्वेऽपि अब्धय एकयोजनसहस्रगम्भीराः। लवणोदस्यैव जलमुन्नतं वर्तते, अन्येषां जलं समं प्रसृतमस्ति। लवणोदो लवणस्वादः। वारुणी-समुद्रो मद्यस्वादः। क्षीरोदो दुग्धस्वादः। घृतोदो घृतस्वादः। कालोदः पुष्करोदश्च स्वयम्भूर-मणोदश्च[10] त्रय एते अम्बुस्वादाः। शेषाः सर्वेऽपि इक्षुस्वादाः। लवणोद[11]कालोदस्वयम्भूरम-णोदास्त्रयः कच्छपमत्स्या[12]दिजलचरसहिताः। अन्ये सर्वेऽपि निर्जलचराः। लवणोदे सरिन्मुखेषु मत्स्या नवयोजनाङ्गाः, अब्धिमध्ये तद्द्विगुणशरीराः। कालोदे सरिन्मुखेषु

---

१ –व्यः स आ०, ब०, द०, ज०। २ अञ्जलाका– आ०, द०, ज०, ब०। ३ –कं यो– आ०, द०, ज०, ब०। ४ –शेषु ल– आ०, द०, ज० ब०, ब०। ५ –न्ति तथा म– आ०, द०, ज०, ब०। ६ और्वः वाडवाग्निः। ७ –न्नप्यन्त– ज०। ८ च यो– आ०, ब०, द०, ज०। च एकयो– व०। ९ –तिर्निर्वर्त– ज०, व०। १० –श्च एते त्रयः अ– आ०, द०, ज०। ११ –दः कालोदः स्वयम्भूमरणोदश्च एते त्रयः ज०। १२ –दिस– आ०, द०, ज०।

अष्टादशयोजनवपुषः, अब्धिमध्ये तद्द्विगुणकायाः। स्वयम्भूरमणोदधेस्तटवर्तिनो मत्स्याः पञ्चशतयोजनदेहाः, अब्धिमध्ये तद्द्विगुण[१]वर्ष्माणः। लवणोदकालोदपुष्करोदेषु[२] सरित्प्रवेशद्वाराणि वर्त्तन्ते नान्येषु समुद्रेषु द्वाराणि सन्ति। तेषां वेदिका टङ्कोत्कीर्णभित्तिरिव वर्त्तते।

अथेदानीं धातकीखण्डद्वीपस्य भरतादिक्षेत्रसंख्या निगद्यते—

द्विर्धातकीखण्डे ॥ ३३ ॥ ५

धातकीखण्डे द्वीपे भरतादीनि क्षेत्राणि द्विर्भवन्ति द्विगुणानि भवन्ति। कथम्? धातकीखण्डद्वीपस्य दक्षिणस्यां दिशि इष्वाकारनामपर्वतो वर्तते। स[३] पर्वतः लवणोदकालोदसमुद्रवेदिकास्पर्शी दक्षिणोत्तरायतः। तथा धातकीखण्डद्वीपस्योत्तरस्यां दिशि इष्वाकारनामा द्वितीयः पर्वतोऽस्ति। सोऽपि लवणोदकालोदसमुद्रवेदिकास्पर्शी दक्षिणोत्तरायतः। उभावपि इष्वाकारौ पर्वतौ प्रत्येकं चतुर्लक्षयोजनायतौ। ताभ्यां द्वाभ्यामिष्वाकाराभ्यां पर्वताभ्यां १० विभक्तो धातकीखण्डद्वीपः पूर्वधातकीखण्डः अपरधातकीखण्डश्चेति द्विभागीकृतः। द्वयोर्द्वयोर्भागयोर्मध्ययोः पूर्वस्यां दिशि पूर्वमेरुः, अपरस्यां दिशि अपरमेरुः। तयोर्मेर्वोः सम्बन्धीनि भरतादीनि[४] क्षेत्राणि द्विगुणानि भवन्ति। तेन पूर्वधातकीभरतः अपरधातकीभरतश्च धातकीखण्डद्वीपे द्वौ भरतौ वर्तेते। एवं पूर्वधातकीखण्डक्षुद्रहिमवान् अपरधातकीखण्डक्षुद्रहिमवांश्च धातकीखण्डद्वीपे द्वौ क्षुद्रहिमवन्तौ पर्वतौ, पूर्वधातकीखण्डहैमवतमपरधातकीखण्डहैमवतञ्च १५ द्वे हैमवते[५] क्षेत्रे, द्वौ महाहिमवन्तौ पर्वतौ, द्वे हरिवर्षक्षेत्रे, द्वौ निषधौ पर्वतौ, द्वौ विदेहौ, द्वौ नीलपर्वतौ, द्वे रम्यकक्षेत्रे, द्वौ रुक्मिणौ पर्वतौ, द्वे हैरण्यवतक्षेत्रे, द्वौ शिखरिणौ पर्वतौ, द्वे ऐरावतक्षेत्रे। जम्बूद्वीपभरतैरावतक्षेत्रमध्यस्थितविजयार्धपर्वतवत् चत्वारो विजयार्द्धपर्वताः। एवं दक्षिणत आरभ्य उत्तरपर्यन्तं जम्बूद्वीपक्षेत्रपर्वतवत् धातकीद्वीपक्षेत्रपर्वता उभयतो वेदितव्याः। जम्बूद्वीपे हिमवदादीनां पर्वतानां यो विस्तार उक्तः स धातकीद्वीप- २० हिमवदादीनां पर्वतानां विस्तारोऽपि द्विगुणो वेदितव्यः, उन्नत्यवगाहौ समानौ। तथा विजयार्द्धवृत्तवेदाढ्यादयश्च[६] समाना वर्त्तन्ते। ये हिमवदादयो वर्षधरनामानः पर्वताः ते चक्रस्य अरवदवस्थिता वर्तन्ते। वर्षधराणां मध्ये मध्ये ये वर्षाः क्षेत्राणि वर्त्तन्ते तानि अराणां [७]विवराकाराणि सन्ति।

अथ पुष्करार्धक्षेत्रादिस्वरूपमाह— २५

पुष्करार्द्धे च ॥ ३४ ॥

पुष्करार्द्धद्वीपे च जम्बूद्वीपक्षेत्रादिकात् धातकीद्वीपक्षेत्रादिवत्[८] द्विर्द्विगुणानि क्षेत्रादिद्रव्याणि भवन्ति। तेनायमर्थः—यथा धातकीद्वीपे द्वौ इष्वाकारौ वर्णितौ तथा पुष्करार्द्धे च द्वौ इष्वाकारौ पर्वतौ अष्टलक्षयोजनायतौ दक्षिणोत्तरयोः वर्त्तेते। ताभ्यां पुष्करार्धो द्विधा

१ –णकायावर्ष्माणः आ०। २ –ष्करार्धेषु आ०, द०, ज०। ३ सर्वतः आ०, द०, ज०। ४ –नि द्रव्याणि द्वि– ता०। ५ –वतक्षेत्रे ता०। ६ –यश्चत्वारो स–आ०। ७ व्यवरा– ता०, व०, आ०, द०। ८ –वत् द्वि– ज०।

विभक्तः। तत्रापि पूर्वमेरुरपरमेरुश्च द्वौ मेरू वर्त्तेते। तेन धातकीखण्डद्वीपवदत्रापि द्वौ पूर्वापरौ भरतौ, क्षुद्रहिमवन्तौ द्वौ, द्वे च हैमवतक्षेत्रे, द्वौ महाहिमवन्तौ वर्षधरौ, द्वे हरिक्षेत्रे, द्वौ निषधौ पर्वतौ, द्वौ महाविदेहौ, द्वौ नीलौ, द्वे रम्यकक्षेत्रे, द्वौ रुक्मिणौ पर्वतौ, द्वे हैरण्यवतक्षेत्रे, द्वौ शिखरिणौ पर्वतौ, द्वे ऐरावतक्षेत्रे, भरतैरावतापेक्षया चत्वारो विजयार्धाश्च, विदेहापेक्षया
५ अष्टषष्टिर्विजयार्द्धाः। एवं धातकीद्वीपविजयार्द्धाश्च वेदितव्याः। अयं तु विशेषः—यथा धातकीखण्डद्वीपे हिमवदादीनां वर्षधराणां विस्तारो जम्बूद्वीपहिमवदादिभ्यो द्विगुणः प्रोक्तः तथा पुष्करार्धहिमवदादीनां पर्वतानां धातकीखण्डहिमवदादिभ्यो वर्षधरेभ्यो द्विगुणो विस्तारो वेदितव्यः।

अथ पुष्करार्धसंज्ञा इति कथम्? [२]अत्रोच्यते—मानुषोत्तरपर्वतेन वलयाकारेण
१० विभक्तार्द्धत्वात् पुष्करार्ध इति संज्ञा।

'अथ पुष्करार्धद्वीपे अर्धः[३] पुष्करार्धः [४]किमिति वर्णितः कस्माच्चार्द्धः पुष्करार्द्धस्त्यक्तः' इति प्रश्ने सूत्रमिदमुच्यते—

प्राङ् मानुषोत्तरान्मनुष्याः ॥३५॥

मानुषोत्तरात्पर्वतात् पुष्करद्वीपबहुमध्यदेशभागवर्तिनः सकाशात् वलयाकारात् प्राक्
१५ अर्वाक्[६] मनुष्याः मानवा वर्त्तन्ते, तेन कारणेन अर्ध एव वर्णितः। मानुषोत्तराद्बहिरर्धे मानवा न सन्ति। बहिर्भागे भरतक्षेत्रादिहिमवत्पर्वतादिविभागोऽपि नास्ति। मानुषोत्तराद्बहिर्विद्याधरा न गच्छन्ति, ऋद्धिप्राप्ता मुनयोऽपि न यान्ति, नद्योऽपि बहिर्न गच्छन्ति किन्तु मानुषोत्तरं[७] पर्वतमाश्रित्य तिष्ठन्ति। मानवक्षेत्रत्रसाश्च बहिर्न व्रजन्ति। यदा मानुषोत्तरपर्वताद्बहिर्भागे मृतो जीवः [८]तिर्यङ् देवो वा मानुषक्षेत्रमागच्छति तदा मानवविग्रहगत्यानु-
२० पूर्व्येण समागच्छन् मानुषोत्तराद्बहिर्भागेऽपि मनुष्य इत्युपचर्यते। तथा दण्डकपाटप्रतरलोकपूरणलक्षणसमुद्घातकाले मानुषोत्तरबहिर्भागे च [९]मनुष्यो भवतीति लभ्यते।

अथ प्राङ् मानुषोत्तरान्मनुष्याः प्रोक्ताः, ते[१०] तु मनुष्याः कतिप्रकारा भवन्ति इति प्रश्ने सूत्रमिदमाहुः—

आर्या म्लेच्छाश्च ॥ ३६ ॥

२५ आर्यन्ते सेव्यन्ते गुणैर्गुणवद्भिर्वा इत्यार्याः। म्लेच्छन्ति निर्लज्जतया व्यक्तं ब्रुवन्ति इति म्लेच्छाः। चकारः [११]परस्परसमुच्चये वर्तते। तेनायमर्थः—आर्या म्लेच्छाश्चोभयेऽपि मनुष्याः कथ्यन्ते। तत्रार्याः द्विप्रकारा भवन्ति। कौ तौ द्वौ प्रकारौ? एके ऋद्धिप्राप्ता आर्याः, [१२]अन्ये ऋद्धिरहिताश्च। [१३]ऋद्धिप्राप्ता आर्या अष्टविधाः। के ते अष्टौ

---

१ –रुः प– ता०, आ०। २ अथोच्यते आ०, द०, ज०। ३ अर्धपु– आ०, द०, ज०, व०। ४ किमतः व०। किमितः ता०। ५ –र्धपु– आ०, द०, ज०, व०। ६ अवाक् ता०। ७ –त्तरप– आ०, द०, ज०, व०। ८ तिर्यङ्देवोपि वा आ०। ९ मनुष्या भवन्तीति आ०, द०, ज०। १० ते म– आ०, द०, ज०। ११ परस्परे आ०। १२ अन्ये च ऋ– द०। १३ ऋद्धिप्राप्तार्याः ता०, व०।

विधाः ? बुद्धिः क्रिया विक्रिया तपो बलमौषधं रसः क्षेत्रं चेति ।

तत्र बुद्धि-ऋद्धिप्राप्ता अष्टादशभेदाः[१]—अवधिज्ञानिनः, मनःपर्ययज्ञानिनः, केवलज्ञानिनः, [२]बीजबुद्धयः, कोष्ठबुद्धयः, सम्भिन्नश्रोत्रिणः, पदानुसारिणः, दूरस्पर्शनसमर्थाः, दूररसनसमर्थाः, दूरघ्राणसमर्थाः, दूरश्रवणसमर्थाः, दूरावलोकनसमर्थाः, अभिन्नदशपूर्विणः, चतुर्दशपूर्विणः, अष्टाङ्गमहानिमित्तज्ञाः[३], प्रत्येकबुद्धाः, वादिनः, प्रज्ञाश्रमणाश्चेति ।

बीजबुद्धिरिति कोऽर्थः ? एकबीजाक्षरात् शेषशास्त्रज्ञानं बीजबुद्धिः । कोष्ठबुद्धिरितिकोऽर्थः ? [४]कोष्ठागारे संगृहीतविविधाकारधान्यवत् यस्यां बुद्धौ वर्णादीनि श्रुतानि बहुकालेऽपि न विनश्यन्ति सा कोष्ठबुद्धिः ।

क्रिया-ऋद्धिर्द्विप्रकारा[५]—जङ्घादिचारणत्वम्, आकाशगामित्वञ्चेति । तत्र जङ्घाचारणत्वं भूम्युपरि चतुरङ्गुलान्तरिक्षगमनं [६]जङ्घाचारणत्वम् । श्रेणिचारणत्वं विद्याधरश्रेणिपर्यन्ताकाशगमनम्[७] । [८]अग्निज्वालोपरि गमनम् अग्निशिखाचारणत्वम् । [९]जलमस्पृश्य जलोपरि गमनं जलचारणत्वम् । पत्रमस्पृश्य पत्रोपरि गमनं पत्रचारणत्वम् । फलमस्पृश्य फलोपरि गमनं फलचारणत्वम् । पुष्पमस्पृश्य पुष्पोपरि गमनं पुष्पचारणत्वम् । बीजमस्पृश्य बीजोपरि गमनं बीजचारणत्वम् । तन्तुमस्पृश्य तन्तूपरि गमनं तन्तुचारणत्वञ्चेति जङ्घादिचारणत्वं नवविधम् ।

[१०]आकाशगामित्वं किम् ? पर्यङ्कासनेनोपविष्टः सन् आकाशे गच्छति । ऊर्ध्वस्थितो वा आकाशे गच्छति । सामान्यतयोपविष्टो वा आकाशे गच्छति । पादनिक्षेपोत्क्षेपणं विना आकाशे गच्छति आकाशगामित्वम् । इति क्रियाऋद्धिर्द्विप्रकारा ।

विक्रियर्द्धिः अणिमादिभेदैरनेकप्रकारा । सूक्ष्मशरीरविधानम् अणिमा । अथवा [११]विशछिद्रेऽपि प्रविश्य चक्रवर्तिपरिवारविभूतिसर्जनमणिमोच्यते । महाशरीरविधानं महिमा । लघुशरीरविधानं लघिमा । गुरुशरीरविधानं गरिमा । भूमिस्थितोऽप्य[१२] (तस्याप्य) ङ्गुल्यग्रेण मेरुशिखरचन्द्रसूर्यादिस्पर्शनसामर्थ्यं प्राप्तिरुच्यते । जले भूमाविव गमनं भूमौ जल इव मज्जनोन्मज्जनविधानं प्राकाम्यम् । अथवा जातिक्रियागुणद्रव्य[१३]सैन्यादिकरणञ्च प्राकाम्यम् । त्रिभुवनप्रभुत्वमीशित्वम् । सर्वप्राणिगणवशीकरणशक्तिर्वशित्वम् । पर्वतमध्येऽपि आकाश इव

---

१ –भेदाः केवलिनः अवधिज्ञानिनः मनःपर्ययज्ञानिनः बीज– ता०, ब० । २ जीवबुद्धयः ब० । ३ निमित्ताः आ०, द०, ज०, ब० । ४ गोष्ठागा– आ०, द०, ब०, ज० । ५ क्रियर्द्धिर्द्वि– आ०, द०, ज० । ६ एतत्पदं पुनरुक्तमस्ति । ७ –पर्यन्तमाका– ज० । पर्यन्तगताकाश– आ० । ८ अग्निचारणम् अग्निज्वालोपरिगमनम् आ०, द०, ज०, ब० । ९ जलचारणत्वं जलोपरिगमनम् आ०, द०, ज०, ब० । १० आकाशगामित्वमिति सामान्यतयोपविष्टो आकाशे गच्छति पादनिक्षेपोत्क्षेपणं विना आकाशगामित्वमिति आ०, द०, ज० । ११ वंशछिद्रेण प्रवि– ब० । विशरतन्तुनालः । १२ –स्थितोऽङ्गु– आ०, द०, ज०, ब० । १३ –द्रव्यं सै– ता० ब० ।

गमनम् अप्रतीघातः। अनेककरूपकरणं मूर्तामूर्ताकारकरणं वा कामरूपित्वम्। अदृष्टरूपताऽन्तर्द्धानम्। इत्यादि विक्रियर्द्धिः।

घोरतपो महातप उग्रतपो दीप्ततपस्तप्ततपो घोरगुणब्रह्मचरिता घोरपराक्रमता चेति तपऋद्धिः सप्तधा। तत्र—घोरतपः-सिंहव्याघ्रर्क्षचित्रकतरक्षुप्रभृतिक्रूरश्वापदाकुलेषु गिरिकन्दरादिषु स्थानेषु भयानकश्मशानेषु च प्रचुरतरशीतवातातपादियुक्तेषु स्थानेषु स्थित्वा दुर्द्धरोपसर्गसहनपरा ये मुनयस्ते घोरतपसः। पक्षमासषण्मासवर्षोपवासविधातारो ये मुनयस्ते महातपसः। [५]वर्षोपवासे सति पारणा भवति, केवलज्ञानं [६]वोत्पद्यते, अतः परम् उपवासो न भवतीति निश्चयः। उग्रतपः-पञ्चम्यामष्टम्यां चतुर्दश्याञ्च गृहीतोपवासव्रता अलाभद्वये अलाभत्रये वा त्रिभिरुपवासैश्चतुर्भिरुपवासैः पञ्चभिर्वोपवासैः कालं निर्गमयन्ति इत्येवं प्रकारा उग्रतपसः। शरीरदीप्त्या द्वादशार्कतेजस्का दीप्ततपसः। तप्तायसपिण्डपतितजलबिन्दुवत् गृहीताहारशोषणपरा नीहाररहिता ये ते तप्ततपसः। सिंहव्याघ्रादिसेवितपादपद्मा घोरगुणब्रह्मचारिणः। भूतप्रेतवेतालराक्षसशाकिनीप्रभृतयो[८] यान् दृष्ट्वा बिभ्यति ते घोरपराक्रमाः।

बलर्द्धिस्त्रिप्रकारा। अन्तर्मुहूर्त्तेन निखिलश्रुतचिन्तनसमर्था ये ते मनोबलिनः। अन्तर्मुहूर्त्तेनाखिलश्रुतपाठशक्तयो ये ते वचोबलिनः। मासचतुर्मासषण्मासवर्षपर्यन्तकायोत्सर्गकरणसमर्था अङ्गुल्यग्रेणापि त्रिभुवनमप्युद्धृत्य अन्यत्र स्थापनसमर्था ये ते कायबलिनः।

औषधर्द्धिरष्टप्रकारा—[९]विड्विलेपनेन, एकदेशमलस्पर्शनेन, अपक्वाहारस्पर्शनेन, सर्वाङ्गमलस्पर्शनेन, निष्ठीवनस्पर्शनेन, दन्तकेशनखमूत्रपुरीषादिसर्वेण (दिस्पर्शनेन), कृपादृष्ट्यवलोकनेन, कृपादन्तपीडनेन येषां मुनीनां प्राणिरोगाः नश्यन्ति ते अष्टप्रकारा औषधर्द्धयः।

रसऋद्धिः षट्प्रकारा। तपोबला मुनयो यमक्षिगतं प्राणिनं म्रियस्वेति वदन्ति सोऽक्षिगतः प्राणी तत्क्षणादेव महाविषपरीतो म्रियते एवंविधं सामर्थ्यं येषां ते आस्यविषाः वाग्विषा अपरनामानः कथ्यन्ते। तपोबला मुनयः क्रुद्धाः सन्तो यमक्षिगतमीक्षन्ते स पुमान् तत्क्षणादेव [१०]तीव्ररसपरीतः पञ्चत्वं प्राप्नोति एवंविधं सामर्थ्यं येषां ते दृष्टिविषा इत्युच्यन्ते। येषां पाणिपात्रगतं भोजनं नीरसमपि क्षीरपरिणामि भवति, वचनानि वा क्षीरवत् क्षीणसन्तर्पकाणि भवन्ति ते क्षीरस्राविण उद्यन्ते[११]। येषां पाणिपात्रगतमशनं नीरसमपि [१२]मधुरसपरिणामि भवति, वचनानि वा श्रोतॄणां [१३]मधुस्वादं जनयन्ति ते [१४]मध्वास्राविणः प्रोच्यन्ते। [१५]येषां पाणिपात्रगतमन्नं रूक्षमपि घृतरसपरिणामि भवति, वचनानि वा श्रोतॄणां घृतपानस्वादं जनयन्ति ते [१६]सर्पिरास्राविणः। येषां पाणिपात्रगतमन्नं वचनञ्चामृतवद्भवति ते [१७]अमृतास्राविणः।

---

१ अनेकोप आ०। २ मूर्ताकारक- आ०, द०। ३ -व्याघ्रयक्षचि- ब०। ४ -तरक्षुभल्लकप्र- ज०। -तरक्षुभल्लकप्र- आ०, द०। ५ सर्वोपवासे आ०, द०, ज०। ६ नोत्प- आ०, द०, ज० ब०। ७ -सवृत्ता ज०। -वासा अ- द०। ८ -यस्तान् दृष्ट्वा येन बिभ्यन्ति आ०, द०, ज०। ९ विड्लेप- आ०, द०, ज०। १० तीव्रविषव्याप्तः। ११ उच्यन्ते आ०, द०, ब०। १२ मधुररस- आ०, द०, ज०। १३ मधुरस्वा- आ०, द०, ज०। १४ मद्यस्रा- ता०। १५ आ०, द०, ज० प्रतिषु अमृतास्राविलक्षणं प्रथममस्ति। १६ घृतस्रावि- आ०, द०, ज०। १७ अमृतस्रा- आ०, द०, ज०।

क्षेत्रर्द्धिर्द्विप्रकारा–अक्षीणमहानसर्द्धिः अक्षीणालयर्द्धिश्च । तत्राक्षीणमहानसर्द्धिः यस्मिन्नमत्रे[1] अक्षीणमहानसैर्मुनिभिर्भुक्तं तस्मिन्नमत्रे[2] चक्रवर्त्तिपरिजनभोजनेऽपि तद्दिने अन्नं न क्षीयते ते मुनयः अक्षीणमहानसाः कथ्यन्ते । अक्षीणमहालयास्तु मुनयो यस्मिन् [3]चतुःशयेऽपि मन्दिरे निवसन्ति तस्मिन् मन्दिरे सर्वे देवाः सर्वे मनुष्याः सर्वे तिर्यञ्चोऽपि यदि निवसन्ति तदा तेऽखिला अपि अन्योन्यं बाधारहितं सुखेन तिष्ठन्ति इति अक्षीणालयाः। ईदृशा ५ मनुष्या ऋद्धिप्राप्ता भवन्ति ।

ऋद्धिरहिता[4] आर्यास्तु पञ्चप्रकारा भवन्ति । के ते पञ्चप्रकाराः ? सम्यक्त्वार्याः, चारित्रार्याः, कर्मार्याः, जात्यार्याः, क्षेत्रार्याश्चेति । तत्र सम्यक्त्वार्याः सम्यग्दृष्टयो व्रतरहिता इत्यर्थः । चारित्रार्याश्चारित्रप्रतिपालका यतयः । कर्मार्यास्त्रिप्रकारा–सावद्यकर्मार्याः, अल्पसावद्यकर्मार्याः, असावद्यकर्मार्याश्चेति । तत्र सावद्यकर्मार्या व्रतरहिताः षट्प्रकाराः असिमसि- १० कृषिविद्याशिल्पवाणिज्यकर्मार्यभेदात् । तत्र असितरवारिवसुनन्दकधनुर्बाणछुरिकाकट्टारककुन्तपट्टिशहलमुशलगदाभिन्डिमालालोहघनशक्तिचक्राद्यायुधचञ्चवः असिकर्मार्या उच्यन्ते । आयव्ययादिलेखनवित्ता मषिकर्मार्याः कथ्यन्ते । हलेन भूमिकर्षणनिपुणाः कृषिकर्मार्या भण्यन्ते । गणितादिद्वासप्ततिकलाप्रवीणा विद्याकर्मार्या [6]उच्यन्ते । [7]निर्णेजकदिवाकीर्त्यादयः शिल्पकर्मार्या ध्वन्यन्ते । धान्यक(का)र्पासचन्दनसुवर्णरजतमणिमाणिक्यघृतादिरसांशुकादि- १५ संग्रहकारिणो वाणिज्यकर्मावदाता वणिक्कर्मार्या शब्द्यन्ते । एते षट्प्रकारा अपि सावद्यकर्मार्या भवन्ति । अल्पसावद्यकर्मार्यास्तु श्रावकप्रभृतयः । असावद्यकर्मार्यास्तु यतयः ।

जात्यार्यास्तु इक्ष्वाकुवंशा[8]द्युद्भवाः । अस्यामवसर्पिण्यामिक्ष्वाकुवंशः स्वयं श्रीवृषभेश्वरः, तस्य कुले भवा इक्ष्वाकुवंशाः । भरतसुतार्ककीर्त्तिकुले सञ्जाताः सूर्यवंशाः । बाहुबलिसुतसोमयशोवंशे भवाः सोमवंशाः । सोमप्रभश्रेयांसकुले समुत्पन्नाः कुरुवंशाः । अकम्पन- २० महाराजकुले समुद्भवा नाथवंशाः । हरिकान्तनृपान्वये सम्भूता हरिवंशाः । हरिवंशेऽपि यदुनृपकुलजाता यादवाः । काश्य[9]पनृपकुले सम्भवा उग्रवंशा इति । एवंविधा जात्यार्याः कथ्यन्ते ।

कौशल-काश्यवन्ति-अङ्ग-वङ्ग-तिलङ्ग-कलिङ्ग-लाट-कर्णाट-भोट-गौड-गुर्जर-सौराष्ट्र-मरु-वाग्ज[10]ड-मलय-मालव-कुङ्कणाभीर-सौर[11]मस-काश्मीर-जालंधरादिदेशोद्भवाः क्षेत्रार्या[12] इत्युच्यन्ते। २५

म्लेच्छास्तु द्विप्रकाराः—अन्तरद्वीपोद्भवाः कर्मभूम्युद्भवाश्चेति । तत्र अन्तरद्वीपोद्भवा म्लेच्छाः कथ्यन्ते—लवणोदसमुद्रे अष्टसु दिशासु अष्टौ द्वीपाः, तदन्तरालेषु चाष्टौ द्वीपाः, हिमवत उभयपार्श्वयोर्द्वौ द्वीपौ, शिखरिण उभयपार्श्वयोश्च द्वौ द्वीपौ, विजयार्द्धयोरुभययोः

---

१ पात्रे । –स्मिन्नन्ने आ०, द०, ज०, व० । २ –न्नन्ने च– आ०, द०, ज०, व० । ३ चतुष्टये– आ०, द०, ज० । ४ –तार्या– व० । ५ –यावव्य– ता० । ६ उच्यन्ते व० । उत्पद्यन्ते आ०, द०, ज० । ७ रजकनापितादयः । ८ –शादुद्भ– आ०, ज० । ९ –श्यपकु– आ०, द०, ज० । १० –जडवल– आ०, द०, ज० । ११ –रभस– आ० । १२ –त्रार्या उ– आ०, द०, ज० ।

पार्श्वेषु चत्वारो द्वीपाः। एवं लवणोदसमुद्रमध्ये अर्वाक् पार्श्वे चतुर्विंशतिद्वीपा भवन्ति। ते द्वीपाः कुत्सितभोगभूमयः कथ्यन्ते। तत्र चतुर्विंशतिद्वीपेषु चतुर्दिक्षु ये चत्वारो द्वीपा वर्तन्ते ते समुद्रवेदिकायाः सकाशात् पञ्चशतयोजनानि गत्वा लभ्यन्ते। ये तु [1]चतसृषु प्रदिक्षु चत्वारो[2] द्वीपाः सन्ति अन्तरालेषु चाष्टौ द्वीपा वर्तन्ते ते द्वादशापि द्वीपाः पञ्चशत-
५ योजनानि पञ्चाशद्योजनाधिकानि तद्वद्गत्वा लभ्यन्ते। ये तु पर्वतान्तेषु अष्टौ द्वीपा वर्तन्ते ते षट्शतयोजनानि गत्वा प्राप्यन्ते। चतुर्दिग्द्वीपाः शतयोजनविस्ताराः। चतुर्विदिक्द्वीपा अष्टान्तरालद्वीपाश्च, एते द्वादशद्वीपाः पञ्चाशद्योजनविस्तारा वर्त्तन्ते। पर्वतान्तेषु येऽष्टद्वीपाः सन्ति ते पञ्चविंशतियोजनविष्कम्भा भवन्ति। तत्र पूर्वस्यां दिशि यो द्वीपो वर्तते तस्मिन् द्वीपे एकोरुका म्लेच्छा भवन्ति। दक्षिणा[3]यां दिशि शृङ्गिणो मनुष्या भवन्ति। पश्चिमायां
१० दिशि पुच्छसहिता म्लेच्छाः [4]सन्ति। उत्तरायां दिशि मूका वर्त्तन्ते। चतुर्विदिक्षु अग्निकोणे शशकर्णाः, नैऋत्यकोणे शष्कुलीकर्णाः, वायुकोणे कर्णप्रावरणाः, ईशानकोणे लम्बकर्णाः। पूर्वाग्न्यन्तराले अश्वमुखाः। अग्निदक्षिणान्तराले सिंहमुखाः। दक्षिणनैऋत्यान्तराले[5] भषणमुखाः, नैऋत्यपश्चिमान्तराले[6] गर्वरमुखाः। पश्चिमवातान्तराले शूकरमुखाः। वातोत्तरान्तराले व्याघ्रमुखाः। उत्तरेशानान्तराले [7]काकवदनाः। ईशानपूर्वान्त-
१५ राले [8]कपिलपनाः। हिमवत्पूर्वपार्श्वे मत्स्यमुखाः। हिमवत्पश्चिमपार्श्वे कृष्णवदनाः। शिखरिणः पूर्वपार्श्वे मेघमुखाः। शिखरिणः पश्चिमपार्श्वे तडिद्वदनाः। दक्षिणविजयार्द्धपूर्वपार्श्वे गोमुखाः। दक्षिणविजयार्द्धपश्चिमपार्श्वे उरभ्रवदनाः। उत्तरविजयार्द्धपूर्वपार्श्वे गजाननाः। उत्तरविजयार्द्धपश्चिमपार्श्वे दर्पणास्याश्चेति। तत्र एकोरुकाः मृत्तिकाहारा गुहानिवासिनः। अन्ये सर्वेऽपि वृक्षतलनिवासाः फलपुष्पभक्षिणः। विश्वेऽपि पल्योपमजीविताः द्विसहस्रधनु-
२० रुन्नतशरीराः। एवं लवणोदसमुद्रपरतीरेऽपि चतुर्विंशतिद्वीपा ज्ञातव्याः। तथा कालोदसमुद्रेऽपि अष्टचत्वारिंशद्द्वीपा भवन्ति। एवं षण्णवतिम्लेच्छद्वीपाः। ते सर्वेऽपि द्वीपा जलाद् योजनोन्नता बोद्धव्याः। एते सर्वेऽपि अन्तरद्वीपोद्भवा म्लेच्छा भवन्ति। कर्मभूम्युद्भवाश्च म्लेच्छा पुलिन्दशबरयवनशकखस[9]बर्बरादयो ज्ञातव्याः।

अथ कास्ताः कर्मभूमयः?

२५　**भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः॥ ३७॥**

भरताश्च पञ्च ऐरावताश्च पञ्च विदेहाश्च पञ्च भरतैरावतविदेहाः, एते पञ्चदशप्रदेशाः कर्मभूमयः कथ्यन्ते। तर्हि पञ्चसु विदेहेषु मध्ये पञ्चदेवकुरवः पञ्चोत्तरकुरवः सन्ति, तेऽपि किं कर्मभूमयः? नैवम्; देवकुरूत्तरकुरुभ्यः अन्यत्र, देवकुरून् उत्तरकुरून् वर्जयित्वा इत्यर्थः। विदेहेषु स्थिता अपि देवकुरव उत्तरकुरवश्च कर्मभूमयो न भवन्ति किन्तु उत्तमभोगभूमयो भव-

१ चतसृषु दिक्षु द०। २ –रोऽपि द्वी– ज०। ३ –णस्यां आ०, द०, ज०। ४ भवन्ति आ०, ज०। ५ –ले षण्मु– आ०। ६ –ले गोमु– ज०। –ले गर्गमु– द०। ७ काकमुखाः आ०, द०, ज०। ८ कपिलवदना व०। ९ –स्वसवरा– आ०, द०, ज०।

न्तीत्यर्थः। [1]अत्र अन्यत्रशब्दो वर्जनार्थे ज्ञातव्यः। तेन **"दिगितरर्तेऽन्यैश्च"** [का०सू० २।४। २१] इत्यनेन सूत्रेण लिङ्गात् पञ्चमी सञ्जाता। यद्येते पञ्चदशप्रदेशाः कर्मभूमय इति व्यपदिश्यन्ते कर्मभूमयः कथ्यन्ते तर्हि देवकुरूत्तरकुरुहैमवतहरिवर्षरम्यकहैरण्यवतषण्णवत्यन्तरद्वीपाश्च भोगभूमय इत्युच्यन्ते। तत्रायं तु विशेषः—ये अन्तरद्वीपजास्ते कल्पवृक्षकल्पितभोगा न भवन्ति। तथा सर्वे भोगभूमिजा मृताः सन्तः देवत्वमेव प्राप्नुवन्ति। 'पूर्वपश्चिमदक्षिणोत्तरेषु ये अन्तरद्वीपास्तत्रत्याः शुभकर्मभूमिसमीपवर्तित्वात् चातुर्गतिका भवन्ति' इति केचिदाहुः। मानुषोत्तरात्परतः स्वयम्भूरमणद्वीपमध्यस्थितस्वयम्प्रभपर्वतं यावत् एकेन्द्रियपञ्चेन्द्रियास्पदा एव द्वीपा कुत्सितभोगभूमय[2] उच्यन्ते। तत्र पञ्चेन्द्रियाः तिर्यञ्च एव न तु मनुष्याः, असंख्येयवर्षायुषो गव्यूत्युन्नतशरीराः। तेषां चत्वारि गुणस्थानानि सम्भवन्ति।

अथ मानुषोत्तर इति यः पर्वतः श्रुतः स कीदृशः ? एकविंशत्यधिकयोजनसप्तदशशतोन्नतः, त्रिंशदधिकयोजनचतुःशतभूमिमध्यगतः, द्वाविंशत्यधिकयोजनसहस्रबुध्नविस्तारः, त्रयस्त्रिंशदधिकयोजनसप्तशतमध्यविस्तारः, चतुर्विंशत्यधिकयोजनचतुःशतोपरिविस्तारः। तदुपरि चतुर्दिक्षु चत्वारश्चैत्यालया नन्दीश्वरद्वीपचैत्यालयसदृशा ज्ञातव्याः।

अथ कैः कर्मभिः कर्मभूमिरुच्यते इति चेत् ? उच्यते—शुभं कर्म सर्वार्थसिद्ध्यादिनिमित्तम्, अशुभञ्च कर्म [3]सप्तमनरकादिहेतुभूतम्, असिमषिकृषि[4]विद्याशिल्पवाणिज्यलक्षणं षड्विधं कर्म जनजीवनोपायभूतम्, पात्रदानदेवपू[5]जनादिकञ्च कर्म, तैः कर्मभिरुपलक्षिताः कर्मभूमय इत्युच्यन्ते। [6]ननु सर्वं जगत् कर्माधिष्ठानमेव, कथमेता एव कर्मभूमयः ? इत्याह—सत्यम्; उत्कर्षेण शुभाशुभकर्माधिष्ठानात् कर्मभूमय इति।

स्वयम्प्रभपर्वतान्मानुषोत्तराकारात्परत आलोकान्तं ये तिर्यञ्चः सन्ति तेषु पञ्च गुणस्थानानि सम्भवन्ति। ते च पूर्वकोट्यायुषः। तत्रत्या मत्स्याः सप्तमनरकहेतुकं पापमुपार्जयन्ति। स्थलचराश्च केचित् स्वर्गादिहेतुपुण्यमप्[7]युपार्जयन्ति। तेन अर्द्धो द्वीपः सर्वः समुद्रश्च समुद्राद्बहिश्चत्वारः कोणाश्च कर्मभूमिरित्युच्यते इति विशेषः।

अथ उक्तासु भूमिषु नराणामायुःपरिज्ञानार्थं सूत्रमिदमुच्यते भगवद्भिरुमास्वामिभिः—

नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्ते ॥ ३८ ॥

स्थितिश्च स्थितिश्च स्थिती, नृणां नृणां वा स्थिती नृस्थिती द्वौ आयुःकालौ इत्यर्थः। कथम्भूते द्वे नृस्थिती ? परावरे परा उत्कृष्टा अवरा च निकृष्टा जघन्येति यावत् परावरे। पुनरपि कथम्भूते नृस्थिती ? त्रिपल्योपमान्तर्मुहूर्ते। त्रीणि पल्योपमानि यस्याः परायाः उत्कृष्टायाः स्थितेः सा त्रिपल्योपमा, अन्तर्गतोऽपरिपूर्णो मुहूर्तो घटिका[8]द्वयं यस्या अवराया जघन्यायाः साऽन्तर्मुहूर्ता, त्रिपल्योपमा चान्तर्मुहूर्ता च त्रिपल्योपमान्तर्मुहूर्ते। अस्यायमर्थः—

---

१ अथात्र आ०। २ -यः कथ्यन्ते आ०, ब०, द०, ज०। ३ सप्तनरका- आ०, द०, ब०, व०, ज०। ४ -षिवाणिज्यविद्याशिल्पल- आ०, द०, ज०। ५ -पूजादिकं क- आ०, द०, ज०। ६ न तु सर्वे ता०, आ०। ७ -ण्यमुपा- द०, ज०। ८ -द्वयमस्या आ०, द०, ज०।

यथासंख्यत्वेन मानवानाम् उत्कृष्टा स्थितिः त्रिपल्योपमा, जघन्येन मानवानां स्थितिः अन्तर्मुहूर्त्ता, मध्यस्थितिरनेकप्रकारा ।

किं तत्पल्योपममिति चेत् ? उच्यते—

"[1]ववहारुद्धारद्धा-पल्ला तिण्णेव होंति बोधव्वा ।
५ संखा दीवसमुद्दा कम्मट्ठिदि वण्णिदा जेहिं ॥" [त्रिलोक० गा० ९३]

अस्यायमर्थः—व्यवहारश्च उद्धारश्च अद्धा च व्यवहारोद्धाराद्धाः पल्यानि कुशूलाः त्रीण्येव भवन्तीति बोद्धव्यानि । जेहिं यैस्त्रिभिः पल्यैः वण्णिदा वर्णिता कथिता । का वर्णिता ? संखा संख्यामात्रम् । व्यवहारपल्येन उद्धारपल्याद्धापल्ययोः संख्या ज्ञायते । तेन व्यवहारपल्येन संख्या वर्णिता । उद्धारपल्येन तु द्वीपसमुद्रा वर्णिताः । [2]अद्धापल्येन कर्मस्थितिर्वर्णिता । १० यथाक्रमं पल्यत्रयकार्यं ज्ञातव्यमिति संग्रहगाथार्थः । तेन व्यवहारपल्यम् उद्धारपल्यम् अद्धापल्यञ्चेति पल्यं त्रिप्रकारम् । तत्र व्यवहारपल्यस्वरूपं निरूप्यते—प्रमाणाङ्गुलपरिमितं योजनमेकम् । किं तत् प्रमाणाङ्गुलम् ? अवसर्पिण्याः सम्बन्धी प्रथमचक्रवर्ती, तस्याङ्गुलं प्रमाणाङ्गुलम् । अथवा उत्सर्पिण्याः सम्बन्धी चरमचक्रवर्ती तस्याङ्गुलं प्रमाणाङ्गुलम् । तेन प्रमाणाङ्गुलेन मितः चतुर्विंशत्यङ्गुलो हस्तः । तैश्चतुर्भिः हस्तैर्मपित एको दण्डः । तैर्द्विसहस्रदण्डैर्मपिता १५ एका प्रमाणगव्यूतिः ताभिश्चतुर्गव्यूतिभिर्मपितम् एकं प्रमाणयोजनम् । मानवानां पञ्चशतयोजनैरेकं प्रमाणयोजनमित्यर्थः । किं तन्मानवयोजनं येन प्रमाणयोजन दिव्ययोजनं ज्ञायते ? अष्टभिः परमाणुभिः एकस्त्रसरेणुः । अष्टभिः त्रसरेणुभिः पिण्डितैरेक[3]त्रीकृतैरेका रथरेणुरुच्यते । अष्टभी रथरेणुभिः पिण्डिताभिरेकं चिकुराग्रमुच्यते । अष्टभिश्चिकुराग्रैः पिण्डितैरेका लिक्षा भण्यते । अष्टभिः लिक्षाभिः पिण्डिताभिरेकः श्वेतसिद्धार्थ उच्यते । अष्टभिः सिद्धार्थैः २० पिण्डितैः एको यव उच्यते । अष्टभिर्यवैः अङ्गुलमुच्यते । षड्भिरङ्गुलैः पाद उच्यते । द्वाभ्यां पादाभ्यां वितस्तिः कथ्यते । द्वाभ्यां वितस्तिभ्यां रत्निरुच्यते । चतुर्भी रत्निभिः दण्डः कथ्यते । द्विसहस्रदण्डैः गव्यूतिरुच्यते । चतुर्गव्यूतिभिर्मानवयोजनं भवति । पञ्चशतमानवयोजनैरेकं महायोजनं प्रमाणयोजनं दिव्ययोजनं भवति । तद्योजनप्रमाणा खनिः क्रियते । मूले मध्ये उपरि च समाना वर्तुलाकारा सातिरेकत्रिगुणपरिधिः । सा खनिः एकादिसप्तान्ताहोरात्रजाताऽवि- २५ रोमाग्राणि गृहीत्वा खण्डितानि क्रियन्ते । तादृशानि खण्डानि क्रियन्ते यादृशानि खण्डानि पुनः कर्त्तर्या खण्डयितुं न शक्यन्ते । तैः सूक्ष्मै रोमखण्डैः महायोजनप्रमाणा खनिः पूर्यते । कुट्टयित्वा निबिडीक्रियते । सा खनिः व्यवहारपल्यमिति कथ्यते । तदनन्तरमब्दशतैरब्दशतैरेकैकं रोमखण्डमपकृष्यते । एवं सर्वेषु रोमेष्वपकृष्टेषु यावत्कालेन सा खनिः रिक्ता भवति तावत्कालो व्यवहारपल्योपम इत्युच्यते । तेन व्यवहारपल्योपमेन न किमपि गण्यते । तान्येव

---

१ व्यवहारोद्धाराद्धाः पल्यानि त्रीण्येव भवन्ति बोद्धव्यानि । संख्या द्वीपसमुद्राः कर्मस्थितिः वर्णिता यैः ॥ २ अद्धारप- आ०, द०, ज० । ३ -कत्रक्- आ०, द०, ज० । ४ -णा परि- आ०, द०, ज० । ५ -जन्यावि- ता० ।

रोमखण्डानि प्रत्येकम् असंख्येयकोटिवर्षसमयमात्रगुणितानि गृहीत्वा द्वितीया महाखनिस्तैः पूर्यते। सा खनिः उद्धारपल्यमित्युच्यते। तदनन्तरं समये समये एकैकं रोमखण्डं निष्कास्यते, यावत्कालेन सा महाखनिः रिक्ता जायते [1]तावान् काल उद्धारपल्योपमाह्वयः संसूच्यते। उद्धारपल्यानां दशकोटिकोट्य एकम् उद्धारसागरोपममभिधीयते। अर्द्धतृतीयोद्धारसागरोपमाणां पञ्चविंशतिकोटिकोट्युद्धारपल्योपमानां यावन्ति रोमखण्डानि भवन्ति तावन्तो ५ द्वीपसमुद्रा ज्ञातव्याः। तदनन्तरम् उद्धारपल्यरोमखण्डानि वर्षशतसमयमात्रगुणितानि गृहीत्वा ततोऽपि महती खनिः पूर्यते। सा खनिः अद्धापल्यमित्युच्यते। तदनन्तरं समये समये एकैकं रोमखण्डं निष्कास्यते। यावत्कालेन सा महती खनिः रिक्ता सञ्जायते तावत्कालः अद्धापल्योपम[2]सञ्ज्ञः समुच्यते। अद्धापल्योपमदशकोटिकोट्यः अद्धासागरोपम उच्यते। दशकोटिकोट्योऽद्धासागरोपमाणामेकाऽवसर्पिणी कालो भवति, तावती उत्सर्पिणी च। १० द्वाभ्यां कल्प उच्यते। अद्धापल्योपमेन नारकाणां तिरश्चां देवानां मनुष्याणाञ्च कर्मस्थितिरायुस्थितिः कायस्थितिः भवस्थितिश्च गण्यते।

अथ यदि ईदृग्विधेन अद्धापल्योपमेन मानवानामुत्कृष्टस्थितिर्वर्णिता त्रिपल्योपमेति जघन्याऽन्तर्मुहूर्तेति च, तर्हि तिरश्चां स्थितिः कीदृशी भवतीति प्रश्ने भगवान् उमास्वाम्याह—

तिर्यग्योनिजानाञ्च ॥ ३९ ॥ १५

तिरश्चां योनिः तिर्यग्योनिः तस्यां जातास्तिर्यग्योनिजाः तेषां तिर्यग्योनिजानाम्, उत्कृष्टा भवस्थितिः त्रिपल्योपमा भवति, जघन्या च अन्तर्मुहूर्ता वेदितव्या। चकारः परस्परसमुच्चये[3] वर्तते। अस्मिन्नध्याये सप्तनरका द्वीपसमुद्राः कुलपर्वताः पद्मादयो ह्रदा गङ्गादयो नद्यः मनुष्याणां भेदः नृपशूनामायुः स्थितिश्च वर्णिता इति प्रसिद्धं ज्ञातव्यम्।

[4]इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ तृतीयः पादः समाप्तः। २०

---

१ तावत्कालः आ०, द०, ब०, व०, ज०। २ –मसंज्ञकः समु– आ०, द०, ज०। ३ –च्चयार्थे व– आ०, द०, ज०। ४ इत्यनवद्यपद्यगद्यविद्याविनोदोदितप्रमोदपीयूषरसपानपावनमतिसभाजनरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य संछर्दितमिथ्यामतदुर्गरेण श्रीश्रुतसागरसूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां तृतीयोऽध्यायः समाप्तः। आ०, द०, ब०, व०। इति श्रीमद्देवेन्द्रकीर्तिभट्टारकशिष्यस्य श्रीविद्यानन्दिदेवस्य शिष्येण श्रीश्रुतसागरसूरिणा विरचितायां तत्त्वार्थटीकायां तृतीयोऽध्यायः समाप्तः। ज०।

चतुर्थोऽध्यायः

अथ "भवप्रत्ययोवधिर्देवनारकाणाम्" [त० सू० १।२१] इति प्रभृतिषु देवशब्दः श्रुतः। तत्र के देवाः कतिप्रकारा वा ? तत्स्वरूपनिरूपणार्थं सूत्रमिदं श्रीमदुमास्वामिनः प्राहुः—

देवाश्चतुर्णिकायाः ॥ १ ॥

५ देवगतिनामकर्मप्रकृत्युदयेऽभ्यन्तरे प्रत्यये कारणे हेतौ सति बाह्येष्टवनितादिसामग्रीसहिता द्वीपाब्धिपर्वतनद्यादिषु प्रदेशेषु यदृच्छया दीव्यन्ति क्रीडन्ति ये ते देवाः। चतुर्णिकायाः चत्वारो निकायाः समूहाः भवनवासिव्यन्तरज्योतिष्कवैमानिकलक्षणाः सङ्घाता येषां ते चतुर्णिकायाः। जात्यपेक्षया 'देवश्चतुर्णिकायः' इति सूत्रे सिद्धे सति बहुवचननिर्देशः तदभ्यन्तरप्राप्तानेकभेदसूचनार्थमित्यर्थः। अतिशयेन चीयन्ते पुष्टिं नीयन्ते इति निकायाः।
१० "सङ्घे चानौत्तराधर्ये" [का० सू० ४।५।३६] इत्यनेन सूत्रेण घञ्प्रत्ययः। चकारस्य ककारादेशः "चेस्तु हस्तादाने" [का० सू० ४।५।३४] इत्यतः [२]चिर्वर्तते। "शरीरनिवासयोः कश्चादेः" [का० सू० ४।५।३५] इत्यतः कादेशश्च। शूकरनिचय इत्यत्र घञ् कादेशश्च न भवति शूकरेषु उच्चावचत्वं वर्तते तेन औत्तराधर्यं तत्रास्ति, चतुर्षु निजनिजनिकायेषु अणिमादीनां समानत्वादौत्तराधर्य्यं नास्ति।

१५ अथेदानीं देवनिकायानां लेश्याविशेषपरिज्ञानार्थं सूत्रमिदमुच्यते सूरिभिः—

आदितस्त्रिषु पीतान्तलेश्याः ॥ २ ॥

आदितस्त्रिषु भवनवासिव्यन्तरज्योतिष्केषु त्रिषु देवनिकायेषु पीता तेजोलेश्या अन्ते यासां लेश्यानां ताः पीतान्ताः कृष्णनीलकापोततेजोलेश्या इत्यर्थः, पीतान्ताश्च ता लेश्याः पीतान्तलेश्याः। कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते। अथवा त्रिषु आदितस्त्रिषु देव-
२० निकायेषु देवाः कथम्भूताः ? पीतान्तलेश्याः। पीतान्ता लेश्या येषान्ते पीतान्तलेश्याः। एवं सति "पुंवद्भाषितपुंस्कानूङ्पूरणादिषु स्त्रियां तुल्याधिकरणे" [का० सू० २।५।१८] इत्यनेन पुंवद्भावः। षण्णां लेश्यानां मध्ये चतस्रो लेश्या आदितः आद्यास्त्रिषु देवनिकायेषु भवन्ति। आदित इति विशेषणं त्रिषु इत्यस्य पदस्य विशेषणं लेश्यानां वा विशेषणम्।

अथ चतुर्णां देवनिकायानामन्तर्भेदसूचनार्थं सूत्रमिदं ब्रुवन्ति—

२५ **दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥ ३ ॥**

दश च अष्ट च पञ्च च द्वादश च दशाष्टपञ्चद्वादश ते विकल्पाः प्रकाराः येषां देवानां

---

१ –नामप्र– आ०, द०, ज०। २ विवर्तते आ०, द०, ज०। विर्वर्तते व०।

ते दशाष्टपञ्चद्वादशविकल्पाः। पुनरपि कथम्भूताः ? कल्पोपपन्नपर्यन्ताः कल्पेषु षोडशस्वर्गेषु उपपन्नाः उत्पन्नाः कल्पोपपन्नाः। कल्पोपपन्ना वैमानिकाः पर्यन्ताः येषान्ते कल्पोपपन्नपर्यन्ताः। अस्यायमर्थः—दशविकल्पा भवनवासिनः, अष्टविकल्पा व्यन्तरदेवाः, पञ्चविकल्पा ज्योतिष्काः, द्वादशविकल्पाः कल्पोपपन्नाः। ग्रैवेयकादिषु अहमिन्द्रत्वं विना कोऽपि विकल्पो नास्तीत्यर्थः।

अथ भूयोऽपि तेषां विशेषपरिज्ञानार्थं सूत्रमिदमुच्यते स्वामिभिः— ५

इन्द्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः ॥ ४ ॥

इन्दन्ति परमैश्वर्यं प्राप्नुवन्ति अपरामरासमानाऽणिमादिगुणयोगादिति इन्द्राः। १। आज्ञाम् ऐश्वर्यञ्च विहाय भोगोपभोगपरिवारवीर्यायुरास्पदप्रभृतिकं यद् वर्तते तत् समानमित्युच्यते। समाने भवाः सामानिकाः महत्तरपितृगुरूपाध्यायसदृशाः। २। त्रयस्त्रिंशदेव संख्या १० येषां ते त्रायस्त्रिंशाः मन्त्रिपुरोहितसमानाः। ३। परिषदि सभायां भवाः पारिषदाः पीठमर्दमित्रतुल्याः। ४। आत्मन इन्द्रस्य रक्षा येभ्यस्ते आत्मरक्षा अङ्गरक्षशिरोरक्षसदृशाः। ५। लोकं पालयन्तीति लोकपाला आरक्षिकार्थचरकोट्टपालसमानाः। आरक्षिका ग्रामादौ नियुक्ततलवराः। अर्थेषु चरन्ति पर्यटन्ति अर्थचराः कार्यनियुक्ताः कनकाध्यक्षादिसदृशाः। कोट्टपाला पत्तनरक्षका महातलवराः दुर्गपालापरनामानः तत्समाना लोकपाला इत्यर्थः। ६। १५ अनीकाः हस्त्यश्वरथपादातवृषभगन्धर्वनर्तकीलक्षणोपलक्षितसप्तसैन्यानि। ७। प्रकीर्णकाः पौरजनपदसमानाः। ८। अभियोगे कर्मणि भवा आभियोग्या दासकर्म्मकरकल्पाः। ९। किल्विषं पापं विद्यते येषान्ते किल्विषिकाः "इन्विषये इको वाच्यः" [का० सू० २।६।१५, दौ० वृ० १६ श्लो०] इति व्युत्पत्तेः। किल्विषिका इति कोऽर्थः वाहनादिकर्मसु नियुक्तः दिवाकीर्तिसदृशा इत्यर्थः। इन्द्राश्च सामानिकाश्च त्रायस्त्रिंशाश्च पारिषदाश्च लोक- २० पालाश्च अनीकानि च प्रकीर्णकाश्च आभियोग्याश्च किल्विषिकाश्च ते तथोक्ताः। एकशः एकैकस्य देवनिकायस्य एकशः एते इन्द्रादयो दश भेदाः चतुर्षु निकायेषु प्रत्येकं भवन्तीति उत्सर्गव्याख्यानं ज्ञातव्यम्। अथापवादव्याख्यानसूत्रं सूत्रयन्ति सूत्रकाराः—

त्रायस्त्रिंशलोकपालवर्जा व्यन्तरज्योतिष्काः ॥ ५ ॥

त्रयस्त्रिंशद्देवाः त्रायस्त्रिंशाः वयस्यपीठमर्दनतुल्याः, लोकं पालयन्तीति लोकपालाः २५ अर्थचरारक्षिकतुल्याः, त्रायस्त्रिंशाश्च लोकपालाश्च त्रायस्त्रिंशलोकपालाः तान् वर्जयन्तीति त्रायस्त्रिंशलोकपालवर्जाः। विविधमन्तरमेषां व्यन्तराः, ज्योतिःस्वभावत्वाज्ज्योतिष्काः, व्यन्तराश्च ज्योतिष्काश्च व्यन्तरज्योतिष्काः। अस्यायमर्थः—व्यन्तरेषु ज्योतिष्केषु च त्रायस्त्रिंशा लोकपालाश्च न वर्तन्ते इतरे अष्टाविन्द्रादयो भेदाः सन्त्येव। इन्द्रादयो दशाऽपि भेदा

१ -ज्ञापना- आ०, द०, ज०। २ -मर्दनमि- आ०, द०, ज०, व०। ३ -लसदृशाः आ०। ४ -पदातिवृ- आ०, द०, ज०। ५ नापित-चाण्डालसमाना इत्यर्थः। ६ -कारकाः आ०, व०, द०। ७ वर्ज्याः आ०।

भवनवासिषु कल्पवासिषु च वर्तन्ते ।

अथेदानीं चतुर्षु निकायेषु शक्राः किमेकैक एव वर्तते अथान्योऽपि कश्चित् प्रतिनियमोऽस्ति इति प्रश्ने सूत्रमिदमाचक्षते भगवन्तः—

पूर्वयोर्द्वीन्द्राः ॥ ६ ॥

५ पूर्वयोर्भवनवासिव्यन्तराणां निकाययोर्देवा द्वीन्द्राः द्वौ द्वौ इन्द्रौ येषान्ते द्वीन्द्राः, अन्तर्गर्भितवीप्सार्थमिदं पदम् अष्टापदसप्तपर्णादिवत् । यथा पङ्क्तौ पङ्क्तावष्टावष्टौ पदानि स्थानानि यस्यासावष्टापदः सारिफलकः चतुरङ्गद्यूतफलकः, तथा पर्वणि पर्वणि सप्त सप्त पर्णानि यस्यासौ सप्तपर्णो वृक्षविशेषः । कौ कौ भवनवासिनां तावत् द्वौ द्वाविन्द्रौ इति चेत् ? उच्यते—असुरकुमाराणां द्वावाखण्डलौ चमरो वैरोचनश्च । नागकुमाराणां द्वौ ऋभुक्षाणौ १० धरणो भूतानन्दश्च । विद्युत्कुमाराणां द्वौ दुश्च्यवनौ हरिसिंहो हरिकान्तश्च । सुपर्णकुमाराणां द्वौ सुरपती [1]वेणुदेवो वेणुताली च । अग्निकुमाराणां द्वौ वृषाणौ अग्निशिखोऽग्निमाणवश्च । वातकुमाराणां द्वौ गोत्रभिदौ वेलम्बः प्रभञ्जनश्च । स्तनितकुमाराणां द्वौ सूत्रामाणौ सुघोषो महाघोषश्च । उदधिकुमाराणां द्वौ दिवस्पती जलकान्तो जलप्रभश्च । द्वीपकुमाराणां द्वौ शतमन्यू पूर्णोऽवशिष्टश्च । दिक्कुमाराणां द्वौ लेखर्षभौ अमितगतिरमितवाहनश्च ।

१५ अथ व्यन्तराणां द्वौ द्वाविन्द्रावुच्येते—किन्नराणां द्वौ जिष्णू किन्नरः किम्पुरुषश्च । किम्पुरुषाणां द्वौ पुरन्दरौ सत्पुरुषो महापुरुषश्च । महोरगाणां द्वौ पुरुहूतौ अतिकायो महाकायश्च । गन्धर्वाणां द्वौ शुनासीरौ गीतरतिर्गीतयशाश्च । यक्षाणां द्वौ पाकशासनौ पूर्णभद्रो माणिभद्रश्च । राक्षसानां द्वौ विडौजसौ भीमो महाभीमश्च । भूतानां द्वौ मघवानौ प्रतिरूपोऽप्रतिरूपश्च । पिशाचानां द्वौ मरुद्वन्तौ कालो महाकालश्च ।

२० अथेदानीं देवानां सौख्यं कीदृशं वर्तते इति प्रश्ने सुखपरिज्ञानसूचनार्थं सूत्रमिदं कथ्यते सूरिभिः—

कायप्रवीचारा आ ऐशानात् ॥ ७ ॥

कायेन प्रवीचारो मैथुनव्यवहारः सुरतोप[2]सेवनं येषां ते कायप्रवीचाराः । ऐशानात् स्वर्गात् आ अभिविधेः अभिव्याप्तेः देवा वर्तन्ते इति शेषः । अस्यायमर्थः—भवनवासिनो २५ व्यन्तरा ज्योतिष्काः सौधर्म्मैशानस्वर्गयोश्च देवाः सङ्क्लिष्टकर्म्मत्वात् मनुष्यादिवत् संवेशसुखमनुभवन्तीत्यर्थः[3] ।

अत्र 'आ ऐशानात्' इत्यत्र आङुपसर्गस्य ऐशब्देन सह सन्धिः किमिति न कृतः ? यतः कारणादाकारो द्विविधो वर्तते—एकस्तावदाङ् ङकारानुबन्धः द्वितीयस्तु आकारमात्रो निरनुबन्धः । तत्र द्वयोर्मध्ये यः सानुबन्धो ङकारानुबन्ध स मर्यादायाम् अभिविधौ क्रियायोगे ३० ईषदर्थे च वर्तते । यस्तु वाक्ये स्मरणार्थे च वर्तते स निरनुबन्धः स्वरे परे सन्धिं न

१ वेणुदण्डो वे- आ०, द०, ज० । २ -पवेशनं आ०, द०, ज० । ३ "किञ्च दाद्रुविधीपातादो वेरेदस्सय णं ण होदि देवाणं । संकप्पसुहं जायदि वेदस्सुदीरणाविगमे ॥" -ता० टि० ।

प्राप्नोति । यस्तु मर्यादादिषु चतुर्ष्वर्थेषु वर्तते स स्वरे परे साऽनुबन्धत्वात सन्धिं प्राप्नोत्येव । अस्मिन्नर्थे इदं सूत्रं वर्तते—इदं किम् ? "नाजोदन्तोऽनाङ् निःप्लुश्च ।" अस्यायमर्थः—'न' इति सन्धिं न प्राप्नोति । कोऽसौ ? अच् स्वरमात्रः [2]यथा अ अर्हन् प्रसीद, इ इन्द्रं पश्य, उ उत्तिष्ठ । ओदन्त ओकारान्तो निपातः सन्धिं न प्राप्नोति यथा अहो अर्हन्तं पश्य । तथा अनाङ् आङ्वर्जितः निः निपातः सन्धिं न प्राप्नोति यथा आ एवं किल स्वरूपमस्य इति वाक्ये आकारमात्रः स्मरणे [3]तथा आ एवं तन्मया कृतम् । आङ् पुनः सन्धिं प्राप्नोत्येव यथा आ आत्मज्ञानं मर्यादीकृत्य आत्मज्ञानात्; आ एकदेशम् अभिव्याप्य ऐकदेशात्, क्रियायोगे यथा आ समन्तात् आलोकि आलोकि समन्तात् दृष्टो जिन इत्यर्थः । ईषदर्थे यथा आ ईषत् उपरतैः औपरतैः । प्लुतश्च सन्धिं न प्राप्नोति यथा आगच्छ भो जिनदत्त [4]अत्र । उक्तञ्च— १०

"मर्यादायामभिविधौ क्रियायोगेषदर्थयोः ।
य आकारः स ङित् प्रोक्तो वाक्यस्मरणयोरङित् ॥" [ ]

तदुदाहरणेषु श्लोकोऽयम्—

"आत्मज्ञानादैकदेशादालोक्यो(क्यौ)परतैर्जिनः ।
आ एवं तत्त्वमस्यार्थः आ एवं तत्कृतं मया ॥" [ ] १५

इति युक्त्या आङ् सन्धिं प्राप्नोत्येव कथमुमास्वामिभिर्भगवद्भिः 'आ ऐशानात्' इत्यत्र सन्धिकार्यं न कृतम् ? सत्यमुक्तं [5]भवता; असंहिततया सूत्रे निर्देशः असन्देहार्थ इति ।

अथ यद्यैशानपर्यन्ता देवाः कायप्रवीचारसुखसहिता वर्तन्ते तर्हि सनत्कुमारादारभ्य अच्युतपर्यन्ताः [6]कीदृशसुखा वर्तन्ते इति प्रश्ने सूत्रमिदमुच्यते—

शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥ ८ ॥ २०

शिष्यन्तेऽवशिष्यन्त इति शेषाः । स्पर्शश्च रूपञ्च शब्दश्च मनश्च स्पर्शरूपशब्दमनांसि तेषु वा प्रवीचारः सुरतसौख्यानुभवनं येषां ते स्पर्शरूपशब्दमनःप्रवीचाराः । ईशा (ऐशा) नान्तान् देवान् परिहृत्य सानत्कुमाराद्योऽच्युतस्वर्गपर्यन्ता अमराः शेषा इत्युच्यन्ते । अस्यायमर्थः—सानत्कुमारमाहेन्द्रत्रिविष्टपोत्पन्ना दिवौकसः शरीरसंस्पर्शमात्रेणैव स्त्रियः पुरुषाश्च मैथुनसुखमनुभवन्ति परां प्रीतिमाप्नुवन्ति, आलिङ्गनस्तनजघनमुखचुम्बनादिक्रियया प्रकृष्टां २५ मुदं भजन्ते । तथा ब्रह्मब्रह्मोत्तरलान्तवकापिष्ठचतुःसुरलोकसम्भवा वृन्दारका रूपेण[7] दिव्याङ्गनामनोहरवेषविलासचातुर्यशृङ्गाराकारावलोकनमात्रेणैव परमानन्दमाप्नुवन्ति । तथा शुक्रमहाशुक्रशतारसहस्रारसञ्जातत्रिदशालया दिव्याङ्गनानां भूषणक्वणनमुखकमलललितभाषणमृदुहसनमधुरसंगानाकर्णनमात्रेणैव परां प्रीतिं संजिहते । तथा आनतप्राणतारणाच्युतत्रिदिव-

१ -न्नर्थे सूत्रमिदं व- आ०, द०, ज० । २ यथार्हन् व० । यथा आ अर्हन् आ०, द०, ज० । ३ यथा आ०, द०, ज०, व० । ४ अत्रात्र उ- आ० । ५ भगवता आ० । ६ कीदृशं सुखमनुवर्तन्ते आ०, द०, ज० । ७ -ण दिव्यं दि- आ०, द०, ज० । ८ -रूपाव- आ०, द०, ज० ।

लब्धजनयः सुपर्व्वाणो निजाङ्गनाचित्तसङ्कल्पमात्रेणैव परमप्रीतिलक्षणं संसुखमास्कन्दन्ति। इत्यार्षशास्त्राविरोधेन ज्ञातव्यं व्याख्यानम्।

अथ यद्येवं तर्हि ग्रैवेयकादिसम्भवानामृभुक्षाणां कीदृग्विधं सुखं वर्तते ? इति प्रश्ने अहमिन्द्रसुखनिर्णयनिमित्तं सूत्रमिदमाहुः उमास्वामिनः—

५ **परेऽप्रवीचाराः ॥ ९ ॥**

परे नवग्रैवेयकनवानुदिशपञ्चानुत्तरसञ्जाताः सुमनसस्ते अप्रवीचाराः मनसापि मैथुनसुखानुभवनरहिता भवन्तीति भावः। तेषां कल्पवासिभ्योऽपि परमप्रकर्षहर्षलक्षणं सुखमुत्कृष्टं वर्तते, यतः प्रवीचारो हि कामसम्भववेदनाप्रतीकारः, स तु कामसम्भवस्तेषां कदाचिदपि न वर्तते तेनाहमिन्द्राणामनवच्छिन्नं सुखमेव सम्भवतीत्यायातम्।

१० अथ ये दशप्रकाराः प्रथमनिकायविबुधाः तेषामुत्सर्गोऽपवादसंज्ञाप्रज्ञापननिमित्तं सूत्र[3]मिदं ब्रुवते—

भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ १० ॥

भवनेषु वसन्तीत्येवं स्वभावा भवनवासिनः असुरादयो दशप्रकारा अपि सुरा भवनवा-
१५ सिन इत्युच्यन्ते इत्युत्सर्गेण सामान्येन संज्ञा वर्तते। अथापवादेन विशेषतया तेषां निर्जराणां संज्ञा संज्ञाप्यते। तथा हि–असून् प्राणान् रान्ति गृह्णन्ति परस्परयोधनेन नारकाणां दुःखमुत्पादयन्तीत्यसुराः न सुरा वा असुराः प्रायेण सङ्क्लिष्टपरिणामत्वात्। नगेषु पर्वतेषु चन्दनादिषु वृक्षेषु वा भवा नागाः। विद्योतन्ते इति विद्युतः। सुष्ठु शोभनानि पर्णानि पक्षा येषान्ते सुपर्णाः। अङ्गन्ति पातालं विहाय क्रीडार्थमूर्द्ध्वमागच्छन्तीति अग्नयः। वान्ति
२० तीर्थकरविहारमार्गं शोधयन्ति ते वाताः। स्तनन्ति शब्दं कुर्वन्ति, स्तनः शब्दः सञ्जातो वा येषां ते स्तनिताः। उदानि उदकानि धीयन्ते येषु ते उदधयः, उदधिक्रीडायोगात्त्रिदशा अपि उदधयः। द्वीपक्रीडायोगात् [4]दिविषदोऽपि द्वीपाः। [5]दिशन्ति अतिसर्जयन्ति अवकाशमिति दिशः, दिक्क्रीडायोगादमृतान्धसोऽपि दिशः। असुराश्च नागाश्च विद्युतश्च सुपर्णाश्च अग्नयश्च वाताश्च स्तनिताश्च उदधयश्च द्वीपाश्च दिशश्च असुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वी-
२५ पदिशः, ते च ते कुमारास्ते तथोक्ताः। अस्यायमर्थः—विशिष्टनामकर्मोदयजनितदेवत्वस्वभावेऽपि वाहनायुधभूषावेषादिक्रीडारता नृपकुमारवत्प्रतिभासन्ते ये ते असुरकुमारादयो रूढिं गताः। असुरकुमाराणां पङ्कबहुलभागे भवनानि वर्तन्ते। शेषाणां नवानां खरबहुलभागे भवनानि सन्ति। खरबहुल-पङ्कबहुल-अब्बहुलभागत्रयव्यवस्थितिस्तु पूर्वमेव वर्णितेति ज्ञातव्यम्।

---

१ –कादीनां सम्भवानां देवानां कीदृ– आ०, द०, ज०। २ –णां सञ्ज्ञाप्रज्ञातनिमित्तमव– आ०। ३ –मिदमाहुः ब०। ४ दिविषादोऽपि आ०, द०, ज०। ५ दिश्यन्ति ता०, ब०।

अथेदानीं द्वितीयस्य निकायस्य उत्सर्गापवादसंज्ञाविज्ञापनार्थं सूत्रमिदमाहुः—

व्यन्तराः किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः ॥ ११ ॥

व्यन्तराः विविधदेशान्तराणि निवासा येषां ते व्यन्तराः, इयं सामान्यसंज्ञा अन्वर्था वर्तते सत्यार्था वर्तते। कानि देशान्तराणि तेषां निवास इति चेत्? निरूपयामि[1]—एतस्माज्जम्बूद्वीपात् असङ्ख्येयद्वीपसमुद्रात् व्यतिक्रम्य स्थिते खरपृथ्वीभागे किन्नरकिम्पुरुष- ५ महोरगगन्धर्वयक्षराक्षसभूतपिशाचानां सप्तप्रकाराणां व्यन्तराणां निवासाः सन्ति राक्षसानान्तु निवासाः तद्भागसमे खरभागसमपङ्कबहुलभागे वर्तन्ते। किन्नराश्च किम्पुरुषाश्च महोरगाश्च गन्धर्वाश्च यक्षाश्च राक्षसाश्च भूताश्च पिशाचाश्चेति द्वन्द्वः ते तथोक्ताः। एते अष्टप्रकारा व्यन्तरा विशेषसंज्ञा ज्ञातव्याः, देवगतिविशिष्टनामकर्मोदयसमुत्पन्ना इत्यर्थः।

अथ तृतीयनिकायस्य सामान्यविशेषसंज्ञासंज्ञापनार्थं सूत्रमिदमुच्यते— १०

ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥ १२ ॥

ज्योतिःस्वभावत्वात् ज्योतिष्काः। सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ[2] "देवताद्वन्द्वे" इति सूत्रेण [3]पूर्वपदस्याकारः। ग्रहाश्च नक्षत्राणि च प्रकीर्णकतारकाश्च ग्रहनक्षत्रप्रकीर्णकतारकाः। चकारः परस्परसमुच्चये[4] वर्तते। तेनायमर्थः—न केवलं सूर्याचन्द्रमसौ ज्योतिष्कौ[5] किन्तु ग्रहनक्षत्रप्रकीर्णकतारकाश्च ज्योतिष्का वर्तन्ते। सूर्याचन्द्रमसोः पृथगुपादानं प्रभादि- १५ कृतप्राधान्यनिमित्तम्। एषां स्थितिसूचनार्थमियं गाथा वर्तते—

"नवदुत्तरसत्तसया दससीदीचउदुगं तु तिचउक्कम्।
तारारविससिरिक्खा बुहभग्गवअङ्गिरारसणी[6] ॥१॥" [जम्बू० प० १२।९३]

अस्यायमर्थः—नवत्युत्तरसप्तशतानि योजनानि समभूमिभागादूर्ध्वं गत्वा पुष्पवत् प्रकीर्णाः तारका लभ्यन्ते। तास्तु तारकाः सर्वेषां ज्योतिष्काणामधोभागविन्यस्ताश्चरन्ति। तारकाभ्य २० उपरि दश योजनानि गत्वा सूर्याश्चरन्ति। सूर्येभ्य उपरि अशीतियोजनानि गत्वा चन्द्रमसश्चरन्ति। चन्द्रमोभ्यः उपरि चत्वारि योजनानि गत्वा अश्विनीप्रभृतीनि नक्षत्राणि भ्रमन्ति। नक्षत्रेभ्य उपरि चत्वारि योजनानि गत्वा बुधा लभ्यन्ते। बुधेभ्य उपरि त्रीणि योजनानि गत्वा भार्गवाः शुक्राः सन्ति। शुक्रेभ्य उपरि त्रीणि योजनानि गत्वा अङ्गिरसो बृहस्पतयः सन्ति। अङ्गिरेभ्य उपरि त्रीणि योजनानि गत्वा आरा मङ्गला वर्तन्ते। आरेभ्य उपरि २५ त्रीणि योजनानि गत्वा शनयो जाग्रति। सूर्यादधः मनागूनयोजने केतुर्वर्तते। चन्द्रादधो भागे ईषदूनयोजने च राहुरस्ति। एषां विमानाकारप्रतिपत्त्यर्थमियं गाथा—

---

१ निरूपयति आ०, द०, ज०। २ –सौ ग्रहा– ता०। ३ –पूर्वपदस्य दीर्घः ब०। ४ –स्परं स– आ०, द०, ज०, ता०। ५ –तिष्काः कि– आ०, द०, ज०। ६ नवत्युत्तरसप्तशतानि दश अशीतिश्चतुर्द्विकं तु त्रिचतुष्कम्। तारारविशशिऋक्षा बुधभार्गवाङ्गिरश्शनयः ॥

"उत्ताणट्ठियगोलगदलसण्णिहसव्वजोइसविमाणा ।
चंदत्तिय वज्जिता सेसा हु चरंति एक्कवहे[1] ॥" [तिलोय० ७।३७]

उत्तानस्थितार्द्धगोलकाकाराः सर्व्वेषां ज्योतिष्काणां विमाना वर्तन्ते । चन्द्रसूर्यग्रहान् वर्जयित्वा शेषाः नक्षत्रप्रकीर्णकतारकाश्च एकस्मिन् निजनिजमार्गे व्रजन्ति ।

५　अथेदानीं ज्योतिष्कगतिविशेषप्रतिपत्त्यर्थं सूत्रमिदमुच्यते–

मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥ १३ ॥

मेरोः प्रदक्षिणा मेरुप्रदक्षिणाः । नित्या अनवरता गतिर्गमनं येषां ज्योतिष्काणां ते नित्यगतयः । नृणां लोकः नृलोकस्तस्मिन् नृलोके । अस्यायमर्थः–सर्वे ज्योतिष्का मेरुप्रदक्षिणेन [2]कृत्वा भ्रमन्ति न तु वामगत्या भ्रमन्ति । नित्यगतयः क्षणमपि ज्योतिष्काणां गतिः
१०　केनापि भङ्क्तुं न शक्यते । ते तु मनुष्यलोकोपरि स्थिता ज्योतिष्का सदागतयो भवन्ति । आधाराधेययोरैक्योपचारात् ज्योतिष्कैरारूढा विमाना भ्रमन्ति । अर्द्धतृतीयेषु द्वीपेषु द्वयोश्च समुद्रयोरुपरि नित्यगतयो वर्तन्ते मानुषोत्तरपर्वताद्बहिः ज्योतिष्का न भ्रमन्तीत्यर्थः । अचेतना विमानाः कथं भ्रमन्ति ? सत्यम् ; प्रदक्षिणागत्यविरतैराभियोग्यदेवैः प्रेरिता विमाना गतिं कुर्वन्ति कर्मोदयस्य [3]वैचित्र्यवशात् । आभियोग्यानां देवानां विमानप्रेरणकर्म्मणैव कर्म
१५　विपच्यते । ते तु ज्योतिष्का एकविंशत्यधिकैकादशयोजनशतैर्मेरुं परिहृत्य प्रदक्षिणाः सन्तश्चरन्ति । उक्तञ्च–

"इगवीसेकारसयं विहाय मेरुं चरंति जोदिगणा ।
चंदत्तिय वज्जिता सेसा हु चरंति एक्कवहे[4] ॥"

[त्रिलोकसा० ३४४। जम्बू० प० १२।१०१]

२०　अथ विशेषः–जम्बूद्वीपोपरि द्वौ सूर्यौ वर्तेते । षट्पञ्चाशन्नक्षत्राणि सन्ति । षट्सप्तत्यधिकमेकं शतं ग्रहाणाञ्च वर्तते । लवणोदसमुद्रोपरि दिनमणयश्चत्वारः सन्ति । द्वादशाधिकं शतमुडूनाञ्च वर्तते । द्वापञ्चाशदधिकं[5] शतत्रयं ग्रहाणाञ्च वर्तते । धातकीखण्डोपरि प्रद्योतना द्वादश वर्तन्ते । षट्त्रिंशदधिकं शतत्रयमृक्षाणां च वर्तते । षट्पञ्चाशदधिकं सहस्रं ग्रहाणामस्ति । कालोदसमुद्रोपरि त्रयीतनवो द्वाचत्वारिंशत् सन्ति । षट्सप्तत्यधिकानि एका-
२५　दशशतानि[6] नक्षत्राणां[7] वर्तन्ते । षण्णवत्यधिकानि षट्त्रिंशच्छतानि ग्रहाणां सन्ति । पुष्करार्धद्वीपोपरि द्वासप्ततिरंशुमालिनो वर्तन्ते । षोडशाधिकं सहस्रद्वयं नक्षत्राणाञ्च वर्तते । षट्त्रिंशदधिकानि त्रिषष्टिशतानि ग्रहाणां वर्तन्ते । मानुषोत्तराद्बहिः पुष्करार्धे पुष्करसमुद्रे

---

१ उत्तानस्थितगोलकदलसन्निभसर्वज्योतिष्कविमानाः । चन्द्रत्रयं वर्जयित्वा शेषा हि चरन्ति एकपथे ॥ २ गत्वा आ०, द०, ज० । ३ वैचित्रिव- आ०, ज०, व०, ता० । ४ एकविंशत्येकादशशतं विहाय मेरुं चरन्ति ज्योतिर्गणाः । चन्द्रत्रयं वर्जयित्वा शेषा हि चरन्ति एकपथे ॥ ५ –कशा– आ०, द०, ज० । ६ –नि च नक्षत्राणि वर्तते द० । ७ –णाञ्च वर्तते ज०, आ० ।

च सूर्यादीनां संख्या परमागमाद् वेदितव्या[1]। यत्र यावन्तः सूर्यास्तत्र तावन्तश्चन्द्रमसोऽपि वेदितव्याः। बहुविधगणनानि[2] नक्षत्राणि च ज्ञातव्यानि। अथवा सर्वत्र एकैकस्य कुमुदबान्धवस्य सम्बन्धिनो ग्रहा अष्टाशीतिरष्टाशीतिर्भवन्ति। एकैकस्य जैवातृकस्य अष्टाविंशतिरष्टाविंशतिर्नक्षत्राणि भवन्ति। मानुषोत्तराऽभ्यन्तरेऽयं निर्णयः।

अथेदानीं गतिमतां ज्योतिष्काणां सम्बन्धेन व्यवहारकालः प्रवर्तते इति सूचयत्सूत्रमिदमाहुः— ५

तत्कृतः कालविभागः ॥ १४ ॥

तज्ज्योतिष्कैर्ज्योतिष्कगत्या च कृतः तत्कृतः तत्क्रियाविशेषपरिच्छिन्नः[3] अन्यजातादेरपरिच्छिन्नस्य कालनैयत्येनानवधारितस्य परिज्ञानहेतुरित्यर्थः। कालस्य समयावलिकादिव्यवहारकालस्य विभागः कालविभागः। कालो द्विप्रकारः-मुख्यो व्यावहारिकश्च। मुख्यः कालः १० परमाणुरूपो निश्चलो व्यवहारकालहेतुभूतः सम्भृतत्रिभुवनो वर्तते। मुख्यात्सञ्जातो व्यावहारिक[4]श्च समयावलिनाडिकादिलक्षणः। मुख्यस्य कालस्य च लक्षणं पञ्चमाध्याये विस्तरेण सूचयिष्यन्त्याचार्याः।

अथेदानीं मानुषोत्तराद् बहिर्ये वर्तन्ते ज्योतिष्काः तेषां निश्चलत्वप्रतिपादकं सूत्रमुच्यते—

बहिरवस्थिताः ॥ १५ ॥ १५

मनुष्यलोकाद्बहिः [5]सर्वे ज्योतिष्का अवस्थिता निश्चला[6] एव वर्तन्ते। तदुक्तम्—

"दो दोवग्गं बारस बादालबहत्तरिं विउण (रिंदुइण) संखा।
पुक्खरदलोत्ति परदो अवट्ठिदा सव्वजोदिगणा[7] ॥" [ ]

चन्द्रसूर्यविमानविस्तारसूचनार्थमियं[8] गाथा—

"जोयणमेगट्ठिकए छप्पणअडदालचंदसूराणं। २०
सुक्कगुरिदरतियाणं कोसं किंचूणकोस कोसद्धं[9]" ॥ [त्रिलोकसा० गा० ३३७]

अस्यायमर्थः—एकस्य प्रमाणयोजनस्य एकषष्टिर्भागाः क्रियन्ते तन्मध्ये षट्पञ्चाशद् भागाः चन्द्रविमानस्य उपरितनविस्तारो वर्तते। सूर्यविमानस्य तूपरितनभागोऽष्टचत्वारिंशद्भागमात्रो वर्तते। शुक्रविमानविस्तारस्तु क्रोशमात्रः। बृहस्पतेस्तु किञ्चिदूनक्रोशः। मङ्गलबुधशनीनान्तु अर्द्धक्रोशमात्र इत्यर्थः। २५

---

१ त्रिलोकसा० गा० ३५०। मानुषोत्तरशैलाद्बहिः पुष्करार्धे चत्वारिंशदधिकशतं सूर्याणां भवति। अग्रे द्विगुणा द्विगुणा वेदितव्या। २ -गणानि आ०, द०, ज०। ३ -न्नः अन्यजातादेरपरिच्छिन्नः अन्यजा- आ०, द०, ज०। ४ -कः स- आ०, द०, ज०, ता०। ५ सर्वज्यो- आ०, द०, ज०। ६ -ला व- आ०, द०, ज०। ७ द्वौ द्विवर्गं द्वादश द्वाचत्वारिंशत् द्वासप्ततिरिन्द्विनसंख्याः। पुष्करदलान्तं परतः अवस्थिताः सर्वज्योतिर्गणाः॥ ८ -नार्था इयं ता०, ब०। ९ योजनमेकषष्टिकृते षट्पञ्चाशत् अष्टचत्वारिंशत् चन्द्रसूर्याणाम्। शुक्रगुर्वितरत्रयाणां क्रोशः किञ्चिदूनक्रोशः क्रोशार्धम्॥

अथेदानीं चतुर्थस्य निकायस्य सामान्येन संज्ञां निरूपयन्ति[1]—

वैमानिकाः ॥ १६ ॥

विशेषेण आत्मस्थान् पुण्यवतो जीवान् मानयन्ति यानि तानि विमानानि। विमानेषु भवा ये ते वैमानिकाः। अत ऊर्ध्वं ये वर्णयिष्यन्ते ते देवा वैमानिकसंज्ञा भवन्ति इत्यधि-
५ कारसूत्रमिदं ज्ञातव्यम्। तानि विमानानि त्रिप्रकाराणि भवन्ति-इन्द्रकविमानानि श्रेणिविमानानि प्रकीर्णकविमानानि[2] चेति। यानि इन्द्रवत् मध्यस्थितानि तानि इन्द्रकविमानानि। आकाशप्रदेशश्रेणिवत् यानि विमानानि चतुर्दिक्षु स्थितानि तानि श्रेणिविमानानि। प्रकीर्णकुसुमवत् यत्र तत्र विक्षिप्तपुष्पाणीव यानि विमानानि प्रदिक्षु स्थितानि तानि पुष्पप्रकीर्णकानि। अत्र विशेषः-जैनचैत्यालया ये शाश्वता वर्तन्ते विमानेषु च ये देवप्रासादाः[3] सन्ति ते सर्वेऽपि
१० यद्यप्यकृत्रिमा वर्तन्ते तथापि तेषां मानं मानवयोजनक्रोशादिकृतं ज्ञातव्यम्। अन्यानि शाश्वतस्थानानि प्रमाणयोजनादिभिर्मीतव्यानि[4] इति परिभाषेयम्। परिभाषेति कोऽर्थः? अनियमे नियमकारिणी परिभाषा।

अथेदानीं वैमानिकानां द्वैविध्यसूचनार्थं सूत्रमिदमाहुराचार्य्याः—

कल्पोपपन्नाः कल्पातीताश्च ॥ १७ ॥

१५ कल्पेषु [5]षोडशषु स्वर्गेषु उपपन्नाः सम्बद्धाः कल्पोपपन्नाः कल्पेभ्योऽतीता अतिक्रान्ता उपरितनक्षेत्रवर्तिनो नवग्रैवेयकदेवा नवानुदिशामृताशनाश्च पञ्चानुत्तरनिवासिनो निर्जराश्च त्रिप्रकारा अपि अहमिन्द्राः कल्पातीताः कथ्यन्ते। ननु भवनवासिषु व्यन्तरेषु ज्योतिष्केषु च इन्द्रादीनां कल्पनं वर्तते तेऽपि कल्पोपपन्नाः कथन्नोच्यन्ते? इत्याह—सत्यम्; यद्यपि तेषु इन्द्रादिकल्पो वर्तते तथापि वैमानिका एव कल्पोपपन्ना इति रूढिं गताः, यथा गच्छतीति
२० गौः धेनुर्वृषभ एव गौरुच्यते गमनक्रियापरिणतोऽपि अश्वादिर्न गौरुच्यत इति।

अथेदानीं वैमानिकानाम् अवस्थितिविशेषविज्ञापनार्थं सूत्रमिदमुच्यते—

उपर्युपरि ॥ १८ ॥

कल्पोपपन्नाः कल्पातीताश्च वैमानिकाः उपर्युपरि ऊर्ध्वमूर्ध्वं वर्तन्ते। तेषां विमानानि च पटलापेक्षया उपर्युपरि ऊर्ध्वे ऊर्ध्वे सन्ति, ज्योतिष्कवत्तिर्य्यगवस्थिता न वर्तन्ते,
२५ व्यन्तरवदसमव्यवस्थितयश्च न सन्ति, इतस्ततो यत्र तत्र च न वर्तन्ते किन्तु उपर्युपरि वर्तन्ते। अथवा 'उपर्युपरि' इत्ययं शब्दः समीपवाची वर्तते। तत्रैवमर्थघटना कर्तव्या-यस्मिन् पटले सौधर्म्मस्वर्गो दक्षिणदिशि वर्तते तस्मिन्नेव पटले उत्तरदिशि समीपवर्ती ईशानस्वर्गोऽस्ति। एवं प्रतिपटलं यथासम्भवं द्विद्विस्वर्गविचारः अच्युतान्ते कर्तव्यः।

अथ कियत्सु कल्पविमानेषु देवा भवन्तीति प्रश्ने [6]सूत्रमिदमाहुः-

---

१ -पयति आ०, ज०। २ -र्णवि- ता०, आ०, द०, ज०। ३ -दा वर्तन्ते ते आ०, द०, ज०। ४ -भिर्ज्ञात-आ०, द०, ज०, व०। ५ षोडशस्व- व०। ६ -माहुः भगवन्तः आ०, द०, ज०।

सौधर्म्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च ॥ १९ ॥

सुधर्मा नाम्नी देवसभा वर्तते सा विद्यते यस्मिन्नसौ[1] सौधर्म्मः स्वर्गः। तत्स्वर्गसाहचर्यात् इन्द्रोऽपि सौधर्म्मः। ईशानो नाम इन्द्रः स्वभावात्, ईशानस्य निवासः स्वर्ग ऐशानः। ५ ऐशानस्वर्गसाहचर्यात् शक्रोऽप्यैशानः। सनत्कुमारो नाम जिष्णुः स्वभावात्, तस्य निवासः स्वर्गः सानत्कुमारः। सानत्कुमारस्वर्गसाहचर्यात् मरुत्वानपि सानत्कुमारः। महेन्द्रो नाम मघवान् स्वभावात्, तस्य निवासः स्वर्गो माहेन्द्रः। माहेन्द्रस्वर्गसाहचर्यात् बिडौजा अपि माहेन्द्रः। ब्रह्म नाम आखण्डलः स्वभावात्, तस्य निवासः स्वर्गोऽपि [2]ब्रह्मा। ब्रह्म[3]स्वर्गसाहचर्यात् पाकशासनोऽपि ब्रह्मा। ब्रह्मोत्तरनामा ऋभुक्षा[4] स्वभावात्, तस्य निवासः स्वर्गो ब्रह्मोत्तरः। ब्रह्मोत्तर- १० स्वर्गसाहचर्यात् सहस्राक्षोऽपि ब्रह्मोत्तरः। लान्तवो नाम मेघवाहनः स्वभावात्, तस्य निवासः स्वर्गः लान्तवः। लान्तवस्वर्गसाहचर्यात् तुराषाडपि लान्तवः। कापिष्ठो नाम दुश्च्यवनः स्वभावात्, तस्य निवासः स्वर्गः कापिष्ठः। कापिष्ठस्वर्गसाहचर्यात् सङ्क्रन्दनोऽपि कापिष्ठः। शुक्रो नाम नमुचिसूदनः स्वभावात्, तस्य निवासः स्वर्गः शुक्रः। शुक्रस्वर्गसाहचर्यात् स्वाराडपि शुक्रः। महाशुक्रनामा हरिहयः स्वभावात्, तस्य निवासः स्वर्गः महा- १५ शुक्रः। महाशुक्रस्वर्गसाहचर्यात् जम्भभेद्यपि महाशुक्रः। शतारनामा शचीपतिः स्वभावात्, तस्य निवासः स्वर्गः शतारः। शतारस्वर्गसाहचर्यात् बलारातिरपि शतारः। सहस्रारनामा सुरपतिः स्वभावात्, तस्य निवासः [5]स्वर्गोऽपि सहस्रारः। सहस्रारस्वर्गसाहचर्यात् वास्तोःपतिरपि सहस्रारः। आ समन्तात् सर्वज्ञच[6]रणकमलेषु नतः आनतो वृषा स्वभावात्, तस्य निवासः स्वर्गः आनतः। आनतस्वर्गसाहचर्यात् वासवोऽपि आनतः। प्रकर्षेण आ २० समन्तात् सर्वज्ञचरणकमलेषु नतः प्राणतः वज्री स्वभावात्, तस्य निवासः स्वर्गः प्राणतः। प्राणतस्वर्गसाहचर्यात् गोत्रभिदपि प्राणतः। गोत्राणि जिनसहस्रनामानि भिनत्ति अर्थपूर्वं जानातीति गोत्रभित्, न तु पर्वतपक्षच्छेदकत्वात् पर्वतानां पक्षसद्भावाभावप्रतीतेः। आ समन्तात् रणः शब्दो यस्य स आरणः प्रसिद्धनामकः, आरणस्य निवासः स्वर्गोऽपि आरणः। आरणस्वर्गसाहचर्यात् सूत्रामाऽपि आरणः। न धर्म्माच्च्युतः अच्युतः शतमन्युः स्वभावात्, २५ तस्य निवासः स्वर्गः अच्युतः। अच्युतस्वर्गसाहचर्यात् दुश्च्यवनोऽपि अच्युतः।

उपर्युपरि इति वचनात् सिद्धान्ताऽपेक्षया व्यवस्था भवति। कासौ व्यवस्था? पूर्वौ सौधर्म्मैशानकल्पौ, तयोरुपरि सानत्कुमारमाहेन्द्रौ, तयोरुपरि ब्रह्मलोकब्रह्मोत्तरौ, तयोरुपरि लान्तवकापिष्ठौ, तयोरुपरि शुक्रमहाशुक्रौ, तयोरुपरि शतारसहस्रारौ, तयोरुपरि आनतप्राणतौ,

---

१ -न् सः सौ- आ०, द०, ज०। २ ब्रह्म आ०, द०, ज०, व०। ३ ब्रह्मनाम आखण्डलः आ०, द०, ज०। ४ -क्षा च स्व- आ०। -क्षा तस्य ता०। ५ स्वर्गः स- ता०, व०। ६ -चरणेषु आ०, द०, ज०, व०।

तयोरुपरि आरणाच्युतौ। तथा नवसु ग्रैवेयकेषु वैमानिका देवा भवन्ति। 'नवसु' इति पृथग्विभक्तिकरणात् नवग्रैवेयकानन्तरं नवानुदिशवैमानिका भवन्तीति ज्ञातव्यम्। तदनन्तरं विजयवैजयन्तजयन्तापराजितसर्वार्थसिद्धिपञ्चानुत्तरवैमानिका भवन्ति। सर्वार्थसिद्धिशब्दस्य पृथक् विभक्तिदानं [1]सर्वनामोत्तमत्वसूचनार्थं नामप्रकृतिषु तीर्थकरत्वञ्चेति यथा।

५ अथ विस्तारः—योजनलक्षोन्नतः किल मेरुपर्वतः। तन्मध्ये एकं योजनानां सहस्रं भूमिमध्ये वर्तते। नवनवतियोजनसहस्राणि बहिःस्थितोऽस्ति। तन्मध्ये चत्वारिंशद्योजनान्युन्नता तच्चूलिका वर्तते। सा चूलिका [2]ऋतुविमानं वालान्तरमात्रमप्राप्य स्थिता। मेरोरधस्तात् अधोलोकः। मेरुप्रमाणबाहुल्यः तिर्यक्लोकः। मेरोरुपरि सर्वोऽपि ऊर्ध्वलोकः।

सौधर्मै[3]शानयोः सम्बन्धीनि एकत्रिंशत् पटलानि। तन्मध्ये प्रथमम् [4]ऋतुपटलम्। १० ऋतुपटलस्योपरि मध्यप्रदेशे ऋतुविमानं नाम इन्द्रकं वर्तते। इन्द्रकमिति कोऽर्थः? मध्यविमानम्। तत्प्रथममिन्द्रकं पञ्चचत्वारिंशल्लक्ष[5]योजनविस्तृतं तस्मादिन्द्रकाच्चतुर्दिक्षु चतस्रो विमानश्रेणयो निर्गताः प्रत्येकं द्विषष्टिविमानसङ्ख्याः। चतुर्विदिक्षु पुष्पप्रकीर्णविमानानि वर्तन्ते। एतस्मात् ऋतुपटलादुपरि एकैकस्य पटलस्य एकैकस्यां श्रेणौ एकैकं विमानं हीनं भवति यावत् प्रभानामकमन्त्यमेकत्रिंशं पटलं वर्तते। प्रभापटलस्योपरि मध्यभागे प्रभासंज्ञं यदिन्द्रकविमानं १५ वर्तते तस्य इन्द्रकस्य चतुर्दिक्षु चतस्रो विमानश्रेणयः सन्ति, ताः प्रत्येकं द्वात्रिंशद्विमानसङ्ख्या वर्तन्ते। तासां चतसृणां विमानश्रेणीनां मध्ये या विमानश्रेणिः दक्षिणां दिशं गता तस्यां श्रेणौ यदष्टादशं विमानं वर्तते तद्विमानं सौधर्मेन्द्राधिष्ठानम्। उत्तरश्रेणौ तु यदष्टादशं विमानमस्ति तस्मिन् विमाने ऐशानेन्द्रो वसति। द्वयोरपि विमानयोः प्रत्येकं त्रयः प्राकाराः। तेषु प्राकारेषु मध्ये बाह्यप्राकाराभ्यन्तरे अनीकानि पारिषदाश्च देवा वसन्ति[6]। मध्यप्राकारा-२० भ्यन्तरे सचिवदेवा वसन्ति। आभ्यन्तरप्राकाराभ्यन्तरे इन्द्रो वसति। एवं सर्वत्र इन्द्रादीनां स्थितियुक्तिर्ज्ञातव्या। पूर्वदक्षिणपश्चिमतिस्रः (मास्तिस्रः) श्रेणयः अग्निकोणनैर्ऋत्यकोणयोः पुष्पप्रकीर्णकानि सौधर्मस्वर्ग उच्यते। उत्तरश्रेणिरेका वायुकोणेशानकोणयोः पुष्पप्रकीर्णविमानानि ऐशानस्वर्ग उच्यते। एवम् एकत्रिंशत्पटलेष्वपि विभजनीयम्।

ततः परं [7]सानत्कुमारमाहेन्द्रनामानौ स्वर्गौ वर्तेते। तयोः पटलानि सप्त भवन्ति। २५ तत्र प्रथमं पटलमञ्जनं नाम। तस्य पटलस्य मध्यप्रदेशे अञ्जनं नाम इन्द्रकविमानं वर्तते। तच्चतुर्दिक्षु चतस्रो विमानश्रेणयो निर्गताः प्रत्येकम् एकत्रिंशद्विमानाः। प्रदिक्षु च चतसृष्वपि पुष्पप्रकीर्णकविमानानि वर्तन्ते। ततः परम् एकैकस्य पटलस्यैकैकस्यां श्रेणावेकैकं विमानं हीनं भवति। तेन सप्तमपटले इन्द्रकविमानात् चतुर्दिक्षु चतस्रो विमानश्रेणयः पञ्चविंशतिविमानाः प्रत्येकं भवन्ति। तन्मध्ये दक्षिणश्रेणौ पञ्चदशं स्वर्गविमानं सानत्कुमारेन्द्रो ३० भुनक्ति। उत्तरदिशि तु पञ्चदशं कल्पविमानं माहेन्द्रः प्रतिपालयति।

---

१ सर्वमानोत्तम- ता०। २ ऋजुवि- आ०, ब०, द०, ज०। ३ -शानस- आ०, द०, ज०। ४ ऋत्वप- ता०। ऋजुप- आ०, द०, ज०। ५ -क्षवि- ता०, व०। ६ -न्ति स्म म- आ०, द०, ब०। ७ सनत्कु- आ०, द०, ब०, व०, ज०।

तत उपरि ब्रह्मलोकब्रह्मोत्तरस्वर्गौ वर्तेते। तयोश्चत्वारि पटलानि। तत्र प्रथमं पटलमरिष्टं नाम। तन्मध्यप्रदेशे अरिष्टनामकमिन्द्रकविमानं वर्तते। तस्माद्विमानाच्चतुर्दिक्षु चतस्रः श्रेणयः प्रत्येकं चतुर्विंशतिविमानाः। विदिक्षु पुष्पप्रकीर्णकानि। प्रतिपटलं श्रेणौ श्रेणौ एकैकं विमानं हीनं भवति। तेन चतुर्थे पटले ब्रह्मोत्तरनाम्नि श्रेणिविमानानि [2]प्रत्येकमेकविंशतिर्भवन्ति[3]। तत्र [4]चतुर्थे पटले दक्षिणश्रेणौ द्वादशस्य ५ विमानस्य स्वामी ब्रह्मो नाम देवेन्द्रो वर्तते। उत्तरश्रेणौ तु द्वादशस्यं कल्पविमानस्य स्वामी ब्रह्मोत्तर इति। इत उत्तरं लान्तवकापिष्टसंज्ञकौ द्वौ[6] स्वर्गौ वर्तेते। तयोर्द्वे पटले ब्रह्महृदयलान्तवनामके। तत्र लान्तवपटले मध्यप्रदेशे लान्तवं नामेन्द्रकविमानमस्ति। तस्य विमानस्य चतुर्दिक्षु चतस्रः श्रेणयः प्रत्येकमेकोनविंशतिविमानाः। तत्र दक्षिणश्रेणौ नवमं विमानं लान्तवेन्द्रो भुनक्ति। उत्तरश्रेणौ तु नवमं विमानं कापिष्टः प्रतिपालयति। १०

तत उपरि शुक्रमहाशुक्रनामानौ द्वौ स्वर्गौ वर्तेते। तयोर्द्वयोरपि स्वर्गयोरेकमेव पटलं वर्तते तस्य नाम महाशुक्रं भवति। तस्य पटलस्य मध्यप्रदेशे [7]महाशुक्रं नाम इन्द्रकविमानं वर्तते। तस्य विमानस्य चतुर्दिक्षु चतस्रः श्रेणयः सन्ति प्रत्येकमष्टादशविमानाः। तत्र दक्षिणश्रेणौ द्वादशं विमानं शुक्रेन्द्रो भुनक्ति। उत्तरश्रेणिगं[8] द्वादशं कल्पविमानं महाशुक्रः शास्ति। तदुपरि शतारसहस्रारनामानौ स्वर्गौ वर्तेते। तयोर्द्वयोरपि एकमेव पटलं वर्तते १५ सहस्रारनामकम्। तस्य मध्यप्रदेशे सहस्रारं [9]नामेन्द्रकविमानम्। तस्माच्चतुर्दिक्षु चतस्रः श्रेणयो निर्गताः प्रत्येकं सप्तदशविमानाः। तत्र दक्षिणश्रेणौ नवमं विमानं शतारेन्द्रस्य, तथोत्तरश्रेणौ नवमं विमानं सहस्रारेन्द्रस्य। ते द्वे अपि विमाने क्रमात् शतारसहस्रारनामके। एवं सर्वत्र इन्द्रनाम्ना विमाननाम ज्ञातव्यम्, विभजनन्तु पूर्ववद् वेदितव्यम्।

ततः परम् आनतप्राणतारणाच्युतनामानश्चत्वारः स्वर्गा वर्तन्ते। तेषां चतुर्णामपि स्वर्गा- २० णां पटलानि षट् भवन्तीति सिद्धान्तवचनम्[10]। तेषु षट्सु पटलेषु चतुर्दिक्षु श्रेणिविमानानि प्रदिक्षु च प्रकीर्णकविमानानि। तत्र अन्त्यपटलमच्युतनामकम्। तस्य मध्यप्रदेशे अच्युतं[11] नामेन्द्रकविमानं भवति। तस्माच्चतुर्दिक्षु चतस्रः श्रेणयो निर्गताः प्रत्येकमेकादशविमानाः। तत्र दक्षिणश्रेणौ षष्ठं विमानं यद् वर्तते तस्य स्वामी आरणेन्द्रः। तथोत्तरश्रेणौ षष्ठं विमानम- २५ च्युतेन्द्रः पाति। किं क्रियते लोकानुयोगनाम्नि[12] सिद्धान्त आनतप्राणतेन्द्रौ नोक्तौ तन्मतानुसारेण इन्द्राश्चतुर्दश भवन्ति। मया तु द्वादशोच्यन्ते, यस्मात् ब्रह्मेन्द्रानुवर्ती ब्रह्मोत्तरेन्द्रः, लान्तवेन्द्रानुवर्ती कापिष्टेन्द्रः, शुक्रेन्द्रानुवर्ती महाशुक्रेन्द्रः, शतारेन्द्रानुवर्ती सहस्रारेन्द्रः।

---

१ -न्द्रवि- आ०, द०, ज०। २ प्रत्येकं वि- व०। ३ -भवति आ०, द०, ज०। ४ चतुर्थप- आ०, द०, ज०। ५ -स्य वि- आ०, द०, ज०। ६ -कौ स्व- आ०, द०, ज०। ७ महाशुक्रशुक्रं ता०। ८ -कं द्वा- व०। ९ नवमकमिन्द्र- आ०, ज०, द०। १० द्रष्टव्यम्- **त्रिलोकसा० गा० ४६८**। ११ -तनामे- व०। १२ "सोहम्मीसाणसणक्कुमारमाहिदबम्हुलंतवया। तह सुक्कसहस्सारा आणदपाणद य आरणच्चुदया ॥ एवं बारसकप्पा" " सोहम्मो ईसाणो ' ' ' इय सोलसकप्पाणि भणंते केइ आयरिया" पाठान्तरम् **-त्रिलोक प्रज्ञ० वैमानिक०**।

सौधर्म्मैशानसानत्कुमारमाहेन्द्रेषु चत्वार इन्द्राः आनतप्राणतारणाच्युतेषु चत्वार इन्द्राः। तेन कल्पवासीन्द्रा द्वादश भवन्ति।

सौधर्मस्वर्गस्य सम्बन्धीनि विमानानि द्वात्रिंशल्लक्षाणि भवन्ति। ऐशानस्वर्गस्याष्टाविंशतिलक्षाणि। सानत्कुमारस्य द्वादश लक्षाणि। माहेन्द्रस्य अष्टौ लक्षाणि। ब्रह्मलोकब्रह्मो-
५ त्तरयोः समुच्चयेन चत्वारिंशल्लक्षाणि कथ्यन्ते। लान्तवकापिष्टयोः समुदायेन पञ्चाशत्सहस्राणि भवन्ति। शुक्रमहाशुक्रयोः समुदितानि चत्वारिंशत् सहस्राणि स्युः। शतारसहस्रारयोरेकत्र षट् सहस्राणि वर्तन्ते। आनतप्राणतारणाच्युतानां चतुर्णामपि सप्तशतानि तिष्ठन्ति। प्रथमग्रैवेयकत्रिके श्रेणिबद्धपुष्पप्रकीर्णकाश्च विमानाः समुदिताः तेषामेकादशोत्तरं शतं भवति। मध्यग्रैवेयकत्रयस्य सप्तोत्तरं शतं स्यात्। [1]उपरिग्रैवेयकत्रयस्य विमानानि एकाधिका नवति-
१० र्भवन्ति। नवानुदिशपटलमध्ये इन्द्रकमष्टासु दिक्षु अष्टौ विमानानि [2]समुदायेन नव भवन्ति। सर्वार्थसिद्धिपटले पञ्च विमानानि सन्ति। तत्र मध्यविमानः सर्वार्थसिद्धिनामकः, पूर्वस्यां दिशि विजयः, दक्षिणस्यां दिशि वैजयन्तः, पश्चिमायां दिशि जयन्तः, उत्तरस्यां दिशि अपराजितः।

सौधर्म्मैशानयोः विमानानि श्वेतपीतहरितारुणकृष्णवर्णानि। सानत्कुमारमाहे-
१५ न्द्रयोः श्वेतपीतहरितारुणानि। ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्टेषु श्वेतपीतरक्तानि। शुक्रमहाशुक्रशतारसहस्रारानतप्राणतारणाच्युतेषु विमानानि श्वेतपीतानि। नवग्रैवेयकनवानुदिशानुत्तरेषु श्वेतान्येव। तत्र सर्वार्थसिद्धिविमानं परमशुक्लं जम्बूद्वीपप्रमाणञ्च वर्तते, अन्यानि तु चत्वारि विमानानि असङ्ख्येयकोटियोजनप्रमाणानि वर्तन्ते। एव त्रिषष्टेः पटलानां परस्परमन्तरमसङ्ख्येययोजनं ज्ञातव्यम्।

२० सौधर्म्मैशानयोरुच्चत्वं सार्द्धैका रज्जुः मेरुबुध्नाद् बोद्धव्या। सानत्कुमारमाहेन्द्रयोरपि सार्द्धैका रज्जुरस्ति। ब्रह्मब्रह्मोत्तरलान्तवकापिष्टशुक्रमहाशुक्रशतारसहस्रारानतप्राणतारणाच्युतेषु द्वयोर्द्वयोः स्वर्गयोरुच्चता अर्द्धार्द्धा रज्जुः। तेन द्वादशानां स्वर्गाणां समुदितास्तिस्रो रज्जवः। ग्रैवेयकादिमुक्तिपर्यन्तमेका रज्जुरुच्चतेति। अत्र यावन्ति विमानानि ऊर्ध्वलोकेऽपि तावन्ति जिनमन्दिराणि भवन्ति, तेषां नमस्कारवन्दनाऽस्तु।

२५ अथेदानीं सर्वेषां वैमानिकानामन्योन्यविशेषपरिज्ञानार्थं सूत्रमिदमुच्यते भगवद्भिः–

स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधि-
विषयतोऽधिकाः ॥ २० ॥

निजायुरुदयात् तद्भवे कायेन सार्द्धमवस्थानं स्थितिरुच्यते। निग्रहानुग्रहसामर्थ्यं प्रभावः। इन्द्रियविषयानुभवनं सुखम्। शरीरवस्त्राभरणादीनां द्युतिर्दीप्तिः। कषायानुरञ्जिता
३० योगप्रवृत्तिर्लेश्या। लेश्यायाः विशुद्धिर्निर्मलता लेश्याविशुद्धिः। इन्द्रियाणि च स्पर्शनादीनि, अवधिश्च तृतीयो बोधः, इन्द्रियावधयः। इन्द्रियावधीनां विषयः गोचरः गम्यः पदार्थः इन्द्रिया-

---

१ उपरिमग्रै– द०, व०, ज०, ता०। २ समुच्चयेन भ– आ०, द०, ज०। समुदाये नव व०।

वधिविषयः । स्थितिश्च प्रभावश्च सुखं च द्युतिश्च लेश्याविशुद्धिश्च इन्द्रियावधिविषयश्च स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयाः, तेभ्यस्तैर्वा ततः वैमानिका अधिका भवन्ति । कुत्र ? उपर्युपरि, प्रतिस्वर्गं प्रतिपटलञ्च ।

अथ यदि स्थित्यादिभिरुपर्युपरि अधिका वैमानिका भवन्ति तर्हि गतिशरीरपरिग्रहाऽभिमानैरप्यधिका भविष्यन्तीत्यारेकायां योगोऽयमुच्यते— ५

गतिशरीरपरिग्रहाभिमानतो हीनाः ॥ २१ ॥

देशाद् देशान्तरप्राप्तिहेतुर्गतिः । विक्रियाहेतुभूतं वैक्रियिकं शरीरम् । लोभकषायस्योदयेन विषयेष्वासङ्गः परिग्रहः । मानकषायस्योदयात् प्रादुर्भूतोऽहङ्कारोऽभिमानः । गतिश्च शरीरञ्च परिग्रहश्च अभिमानश्च गतिशरीरपरिग्रहाऽभिमानाः तेभ्यः तैर्वा ततः, वैमानिका उपर्युपरि प्रतिस्वर्गं प्रतिपटलं च हीनाः तुच्छाः भवन्ति । तथा हि—देशान्तरेषु विषयक्रीडा- १० रतिप्रकृष्टताऽभावात् उपर्युपरि गतिहीना भवन्ति । तथा उपर्युपरि वैमानिकाः शरीरेणापि हीना भवन्ति । तत्कथम् ? सौधर्म्मैशानयोः वैमानिकानामरत्निसप्तकप्रमाणं शरीरम् । सानत्कुमारमाहेन्द्रयोररत्निषट्कप्रमाणमङ्गं भवति । ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्टेषु अरत्निपञ्चकप्रमाणं वर्ष्म स्यात् । शुक्रमहाशुक्रशतारसहस्रारेष्वरत्निचतुष्कप्रमाणः[२] कायो भवति । आनतप्राणतयोररत्निसार्द्धत्रितयप्रमाणो [३]देहो भवति । आरणाच्युतयोररत्नित्रयप्रमाणो विग्रहो १५ भवति । प्रथमग्रैवेयकत्रिके अरत्निसार्द्धद्वयप्रमाणं गात्रं भवति । द्वितीयग्रैवेयकत्रिके अरत्निद्वयप्रमाणा तनूर्भवति । तृतीयग्रैवेयकत्रिके नवानुदिशविमानेषु सार्द्धैकारत्निप्रमाणा मूर्तिर्भवति । पञ्चाऽनुत्तरविमानेषु एकारत्निप्रमाणं वपुर्भवति । विमानपरिवारादिपरिग्रहैरुपर्युपरि हीना भवन्ति अल्पकषायत्वात् । उपर्युपरि अभिमानेन च वैमानिका हीना भवन्ति ।

तर्हि वैमानिकेषु लेश्या कीदृशी भवतीति प्रश्ने तत्परिज्ञानार्थं सूत्रमिदमुच्यते— २०

पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु ॥ २२ ॥

पीता च पद्मा च शुक्ला च पीतपद्मशुक्लाः । पीतपद्मशुक्ला लेश्या येषां वैमानिकानां ते पीतपद्मशुक्ललेश्याः । अत्र ह्रस्वत्वं कथम् ? यद् उत्तरपादिकं तत् ह्रस्वं भवति यथा द्रुता मध्यविलम्बिता मात्राः द्रुतमध्यविलम्बितमात्रा इति सङ्गीते ह्रस्वत्वमस्ति, तथात्रापि ह्रस्वत्वम् । अथवा पीतश्च पद्मश्च शुक्लश्च पीतपद्मशुक्लाः, पीतपद्मशुक्लवर्णसंयुक्ताः केचित् २५ पदार्थाः कानिचिद्वस्तूनि तेषामिव लेश्या येषां वैमानिकानां ते पीतपद्मशुक्ललेश्याः । तत्र कस्य का लेश्येति चेत् ? उच्यते—द्वित्रिशेषेषु द्वे च युगले त्रीणि[५] च युगलानि शेषाणि च सर्वाणि स्थानानि द्वित्रिशेषाणि तेषु द्वित्रिशेषेषु । अस्यायमर्थः—सौधर्म्मैशानयोः सानत्कुमारमाहेन्द्रयोश्च द्वयोर्युगलयोर्वैमानिकाः पीतलेश्यास्तावद् वर्तन्ते एव, परमयं तु विशेषः—सानत्कु-

१ –कृष्टानी– व० । –कृष्टतार्द्रभा– आ०, द०, ज० । २ –णका– ब० । ३ विग्रहो आ०, द०, ज० । ५ –रपादकं आ०, द०, ज० । ५ त्रीणि यु– आ०, ज० ।

मारमाहेन्द्रयोः पीतपद्मलेश्यामिश्राः सन्ति । ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्टशुक्रमहाशुक्र-संज्ञकेषु त्रिषु युगलेषु वैमानिकाः पद्मलेश्यास्तावद् वर्तन्त एव, परमयं तु विशेषः—शुक्रमहा-शुक्रशतारसहस्रारेषु वैमानिकाः पद्मशुक्लमिश्रलेश्या वर्तन्ते । आनतप्राणतारणाच्युतनवग्रैवे-यकनवानुदिशपञ्चानुत्तरेषु शेषशब्दलब्धेषु वैमानिकाः शुक्ललेश्यास्तावद् वर्तन्त एव, परमयं
५ तु विशेषः-नवानुदिशपञ्चानुत्तरविमानेषु चतुर्दशसु वैमानिकाः परमशुक्ललेश्या[1] वर्तन्ते ।

अत्राह सूत्रे-मिश्रस्य ग्रहणं न कृतं वर्तते कथं भवद्भिः [2]मिश्रस्य ग्रहणं कृतम् ? सत्यम् ; साहचर्यात् लोकवत् । कोऽसौ लोकदृष्टान्तः ? यथा पताकिनो गच्छन्ति छत्रिणो गच्छन्ति इत्युक्ते पताकिभिः सह ये पताकारहिता गच्छन्ति तेऽपि पताकिन इत्युच्यन्ते ये छत्रिभिः सह छत्ररहिता गच्छन्ति तेऽपि छत्रिण उच्यन्ते । कस्मात् ? साहचर्यात् । एवं यथा अछत्रिषु छत्रि-
१० व्यवहारो लोके वर्तते तथा अत्रापि सूत्रानुक्तमपि मिश्रग्रहणं भवति । सूत्रतः कथं ज्ञायते इति चेत् ? उच्यते-तत्रैवमभिसम्बन्धः क्रियते । द्वयोः स्वर्गयुगलयोः पीतलेश्या तावद् वर्तते, सानत्कुमारमाहेन्द्रयोः पद्मलेश्यायाः अविवक्षातः पीतैव । ब्रह्मलोकब्रह्मोत्तरलान्तवका-पिष्टशुक्रमहाशुक्रसंज्ञकेषु त्रिषु युगलेषु पद्मलेश्या तावदुक्तैव, शुक्रमहाशुक्रयोः शुक्ललेश्यायाः अविवक्षातः पद्मलेश्यैवोक्ता । शेषेषु शतारादिषु शुक्ललेश्या तावदुक्तैव शतारसहस्रारयोः
१५ पद्मलेश्याया अविवक्षातः शुक्लैवोक्ता । इत्यभिसम्बन्धे[3] नास्ति दोषः ।

अथ कल्पोपपन्नाः कल्पातीताश्चेति यत्सूत्रमुक्तं तत्र न ज्ञायते के कल्पा येषु कल्पेषु ज्ञातेषु कल्पातीताः स्वयमेव ज्ञायन्ते इति सन्देहे सूत्रमिदमुच्यते—

प्राग्ग्रैवेयकेभ्यः कल्पाः ॥ २३ ॥

ग्रैवेयकेभ्यो नवग्रैवेयकेभ्यः सकाशात् प्राक् पूर्वं ये वर्तन्ते ते कल्पा भवन्ति, अच्यु-
२० तान्ताः सौधर्मादय इत्यर्थः । तर्हि कल्पातीताः के वर्तन्ते ? इत्याह-परिशेषभावात् इतरे नवग्रैवेयकाः नवाऽनुदिशाः पञ्चानुत्तराश्च[4] कल्पातीता इति ज्ञातव्यम् ।

तर्हि लौकान्तिका अमरा वैमानिकाः सन्तः केषु गृह्यन्ते कल्पोपपन्नेषु कल्पातीतेषु वा ? इति प्रश्ने सूत्रमिदमुच्यते—

ब्रह्मलोकालया लौकान्तिकाः ॥ २४ ॥

२५ एत्य लीयन्ते तस्मिन्नित्यालयो निवासः, ब्रह्मलोकः पञ्चमः स्वर्गः तस्मिन्नालया निकाया विमानानि येषां ते ब्रह्मलोकालयाः । तर्हि ये ब्रह्मलोके वसन्ति ते सर्वेऽपि लौकान्तिका इत्युच्यन्ते ? नैवम् ; लौकान्तिक इति संज्ञा अन्वर्था वर्तते सत्यार्था वर्तते । तेनायमर्थः—लोकशब्देन ब्रह्मलोक उच्यते । "**समुदायेषु निर्वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते**" [ ] इति वचनात् लोकस्य ब्रह्मलोकस्य अन्तोऽवसानं लोकान्तः, लोकान्ते

१ -या तावद् व- आ०, द०, ज० । २ मिश्रग्र- ता०, व० । ३ -म्बन्धेन ना- आ०, द०, ज०, ता० । ४ -रविमानाश्च आ०, द०, ज० ।

भवा लौकान्तिकाः। न तु सर्वेऽपि लौकान्तिकाः कथ्यन्ते। तेषां विमानानि ब्रह्मलोकस्वर्गस्य अन्तेषु अवसानेषु वर्तन्ते। अथवा जन्मजरामरणव्याप्तो लोकः संसारस्तस्य अन्तः लोकान्तः, लोकान्ते परीतसंसारे[1] भवा लौकान्तिकाः। ते हि ब्रह्मलोकान्ताच्च्युत्वा[2] एकं गर्भवासं परिप्राप्य निर्वाणं गच्छन्ति तेन कारणेन लौकान्तिका उच्यन्ते।

अथ सामान्यतया लौकान्तिकाः [3]प्रोक्ताः, तेषां भेदप्रतिपत्त्यर्थं सूत्रमिदमाहुः– ५

सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च ॥ २५ ॥

सरस्वतीं चतुर्दशपूर्वलक्षणां विदन्ति जानन्ति सारस्वताः। अदितेर्देवमातुरपत्यानि आदित्याः। वह्निवद्देदीप्यमाना वह्नयः। अरुणः उद्यद्भास्करः तद्वत् तेजोविराजमाना अरुणाः। गर्दाः शब्दाः तोयवत् प्रवहन्ति [4]लहरितरङ्गवत् प्रवर्तन्ते येषु ते गर्दतोयाः। तुष्यन्ति विषयसुखपराङ्मुखा भवन्ति तुषिताः। न विद्यते विविधा कामादिजनिता आ सम- १० न्तात् बाधा दुःखं येषान्ते अव्याबाधाः। न विद्यते रिष्टमकल्याणं येषां ते अरिष्टाः। सारस्वताश्च आदित्याश्च वह्नयश्च अरुणाश्च गर्दतोयाश्च तुषिताश्च अव्याबाधाश्च अरिष्टाश्च ते तथोक्ताः। तत्र सारस्वतानां विमानमीशानकोणे वर्तते। आदित्यानां विमानं पूर्वदिशि अस्ति। वह्नीनां देवगणानां विमानम् अग्निकोणे तिष्ठति। अरुणानां विमानं दक्षिणदिश्यस्ति। गर्दतोयानां विमानं नैर्ऋत्यकोणे आस्ते। तुषितानां विमानं पश्चिमदिश्यस्ति। अव्याबाधानां १५ विमानं वायुकोणे विद्यते। अरिष्टानां विमानम् उत्तरदिश्यस्ति। चशब्दात् सारस्वतादित्यानामन्तराले अग्न्याभसूर्याभाणां विमाने वर्तेते। आदित्यवह्नीनामन्तराले चन्द्राभसत्याभानां विमाने स्तः। वह्न्यरुणानामन्तराले श्रेयस्करक्षेमङ्कराणां विमाने तिष्ठतः। अरुणगर्दतोयानामन्तराले वृषभेष्टकामचराणां विमाने आसाते। गर्दतोयतुषितानामन्तराले निर्वाणरजोदिगन्तर[5]क्षितानां विमाने विद्येते। तुषिताव्याबाधानामन्तराले आत्मरक्षितसर्वरक्षितानां विमाने २० भवतः। अव्याबाधारिष्टानामन्तराले मरुद्वसूनां विमाने स्याताम्। अरिष्टसारस्वतानामन्तराले अश्वविश्वानां विमाने स्तः। सर्वेऽपि लौकान्तिकाः स्वाधीनवृत्तयो हीनाधिकत्वभावाभावात्, विषयसुखपराङ्मुखत्वाद् देवर्षयश्च कथ्यन्ते। अत एव देवानामर्चनीयाः चतुर्दशपूर्वधारिणः तीर्थङ्करपरमदेवानां निष्क्रमणकल्याणे स्वामिसम्बोधनसेवानियोगाः।

"चतुर्लक्षास्तथा सप्तसहस्राणि शताष्टकम्। २५
विंशतिर्मिलिता एते सर्वे लौकान्तिकाः स्मृताः॥" [ ]

अथ यद्येते एकं भवं प्राप्य निर्वाणं गच्छन्ति तर्हि अन्येषामपि देवानामस्ति कश्चिन्निर्वाणप्राप्तिकालविभाग इति प्रश्ने सूत्रमिदमुच्यते—

विजयादिषु द्विचरमाः ॥ २६ ॥

विजयो विजयनामा विमानः स आदिः प्रकारो येषां ते विजयादयः विजयवैजयन्त- ३०

---

१ –सारेण भ– आ०, द०, ज०। २ –लोकाच्च्यु– आ०, द०, ज०। ३ प्राप्ताः आ०। ४ लहरीत– आ०, द०, ज०, व०। ५ –गम्यरक्षि– आ०, द०, ज०।

जयन्तापराजितानुदिशनामानो विमानाः, तेषु विजयादिषु विमानेषु ये अहमिन्द्रदेवा वर्तन्ते ते द्विचरमाः द्वौ चरमौ अन्त्यौ मनुष्यभवौ येषां ते द्विचरमाः, उत्कर्षेण द्वौ मनुष्यभवौ सम्प्राप्य मोक्षं गच्छन्तीत्यर्थः। कथं द्विचरमाः ? विजयादिषु विमानेषु उत्पद्य अपरित्यक्तसम्यक्त्वाः ततः प्रच्युत्य मनुष्यभवे समुत्पद्य संयमं समाराध्य भूयो विजयादिषु समुत्पद्यन्ते ततः प्रच्युत्य ५ पुनरपि मनुष्यभवं प्राप्य सिद्धिं गच्छन्ति, एवं मनुष्यभवापेक्षया द्विचरमदेहत्वं तेषां भवति। सर्वार्थसिद्धयहमिन्द्रास्तु अन्वर्थसंज्ञत्वात् परमोत्कृष्टसुरत्वाच्च अर्थापत्तिबलादेव एकचरमा भवन्तीति ज्ञातव्यम्।

"औपशमिकक्षायिकौ भावौ मिश्रस्य जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च" [त० सू० २।१] इति सूत्रविवरणे तिर्यग्गतिरौदयिकी प्रोक्ता, पुनरपि **"तिर्यग्योनि-** १० **जानाञ्च"** [त० सू० ३।३९] इति सूत्रे उत्कृष्टमायुः पल्यत्रयमुक्तम्, जघन्यमन्तर्मुहूर्तमुक्तम्। तत्र च न ज्ञायते के जीवास्तिर्यग्योनयः इति सन्देहे तन्निरासार्थं तिर्यग्गतिः प्रतिपाद्यते—

औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ॥ २७ ॥

उपपादे भवा औपपादिकाः, [१]मनुभ्यः कुलकरेभ्यो भवा मनुष्याः। औपपादिकाश्च मनुष्याश्च औपपादिकमनुष्याः तेभ्यः औपपादिकमनुष्येभ्यः शेषाः अपरे संसारिजीवाः १५ तिर्यग्योनयः तिर्यञ्च इति वेदितव्यम्। तत्र देवा नारकाश्च औपपादिकाः—**"देवनारकाणामुपपादः"** [त० सू० २।३४] इति वचनात्। मनुष्याणामपि स्वरूपं ज्ञातमेव **"प्राङ्मानुषोत्तरान्मनुष्याः"** [त० सू० ३।३५] इति वचनात्। एभ्यो ये अन्ये ते सर्वेऽपि प्राणिनः तिर्यञ्चो ज्ञातव्याः। तर्हि तिरश्चां क्षेत्रविभागो न प्रोक्तः ? सत्यम्; सर्वस्मिन् त्रैलोक्ये तिर्यञ्चो वर्तन्त एव क्व क्षेत्रविभागः कथ्यते।

२० तर्हि नारकतिर्यग्मनुष्याणामायुष्यं प्रोक्तं देवानां नोक्तं देवानामायुः कीदृशमित्युक्ते प्रथमतस्तावत् भवनवासिनामायुरुच्यते—

स्थितिरसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्द्धहीनमिताः ॥ २८ ॥

स्थितिः आयुःप्रमाणम्। केषाम् ? असुरनागसुपर्णद्वीपशेषाणाम्। असुराश्च नागाश्च २५ सुपर्णाश्च द्वीपाश्च शेषाश्च असुरनागसुपर्णद्वीपशेषास्तेषामसुरनागसुपर्णद्वीपशेषाणाम्। कथम्भूता स्थितिः ? सागरोपमत्रिपल्योपमार्द्धहीनमिता। सागरोपमा चासौ त्रिपल्योपमा च सागरोपमत्रिपल्योपमा, सा चासौ अर्द्धहीनमिता च सागरोपमत्रिपल्योपमार्द्धहीनमिताः। अथवा सागरोपमञ्च त्रिपल्योपमानि च अर्द्धार्द्धपल्यहीनानि पल्यानि च सागरोपमत्रिपल्योपमार्द्धहीनानि तैर्मिता मपिता सागरोपमत्रिपल्योपमार्द्धहीनमिता। अस्यायमर्थः—असुराणाम्

[१] मनुष्येभ्यः आ०, ब०, ज०, व०।

उत्कृष्टा स्थितिः एकसागरोपमा। यथाक्रमबलान्नागानां त्रीणि पल्योपमानि उत्कृष्टा स्थितिः। सुपर्णानामुत्कृष्टा स्थितिः [1]सार्द्धं पल्यद्वयम्। द्वीपानामुत्कृष्टा स्थितिः [2]अर्द्धार्द्धहीनत्वात् पल्यद्वयम्। शेषाणां विद्युत्कुमाराग्निकुमारवातकुमारस्तनितकुमारोदधिकुमारदिक्कुमारनामकानां षट्प्रकाराणां भवनवासिनां प्रत्येकं [3]सार्द्धं पल्योपममेकम् उत्कृष्टा स्थितिर्भवति। जघन्यां स्थितिं तु भवनवासिनां कथयिष्यामीति ज्ञातव्यम्। ५

अथेदानीं व्यन्तरज्योतिष्कदेवानां स्थितिमनुक्रमप्राप्तामुल्लङ्घ्य वैमानिकानां स्थितिं सूचयन्ति। कस्माद् व्यन्तरज्योतिष्कदेवानां स्थितेरनुक्रमप्राप्तायाः उल्लङ्घनं कृतमिति चेत्? सत्यम्, लघुना सूत्रोपायेन तेषां स्थितिवचनं यथा भवति तदर्थमित्यर्थः। तत्र वैमानिकानां स्थितिनिरूपणे आद्ययोः कल्पयोः सौधर्म्मैशाननाम्नोः स्थितिनिरूपणार्थं सूत्रमिदमाहुः—

सौधर्म्मैशानयोः सागरोपमे अधिके ॥ २९ ॥ १०

सौधर्मश्च ऐशानश्च सौधर्म्मैशानौ तयोः सौधर्म्मैशानयोः सप्तमीद्विवचनमिदम् "**अधिकरणे सप्तमी**" [का० सू० २।४।११ दौर्ग० वृत्ति] इति वचनात्। सौधर्म्मैशानयोः द्वयोः कल्पयोः स्थितिः द्वे सागरोपमे भवतः। 'सागरोपमे' इत्यत्र सामान्यापेक्षया नपुंसकत्वे द्विवचनं वर्तते। सागरोपमञ्च सागरोपमञ्च सागरोपमे। कथम्भूते [4] सागरोपमे? अधिके किञ्चिदधिके सातिरेके इत्यर्थः। "**द्विवचनमनौ**" [का० सू० ३।२।२] [7]इत्यनेन १५ निषेधसन्धिः। अधिके इत्ययं शब्दः सहस्रारकल्पपर्यन्तमधिकारवान् ज्ञातव्यः। तेन सानत्कुमारमाहेन्द्रयोरपि सप्तसागरोपमानि सातिरेकाणि ज्ञातव्यानि। तथा ब्रह्मलोकब्रह्मोत्तरयोरपि दश सागरोपमानि सातिरेकाणि ज्ञातव्यानि। एवं द्वयोर्द्वयोः [8]कल्पयोरायुर्विशेषे सातिरेकः शब्दः प्रयोक्तव्यः। आ कुतः? आ सहस्रारात्। आनतप्राणतयोरारणाच्युतयोश्चापि इत्यादिषु सातिरेकार्थो नास्ति। कस्मात्? "**त्रिसप्तनवैकादशत्रयोदशपञ्चदशभिरधिकानि तु।**" [त० सू० ४।३१] इत्यत्र सूत्रे तुशब्दस्य ग्रहणात्। २०

अथ विस्तरः—सौधर्म्मैशानयोः यानि एकत्रिंशत् पटलानि वर्तन्ते तेषु प्रत्येकं स्थितिविशेषः कथ्यते। तथाहि—[9]ऋतुपटले पल्योपमकोटीनां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्योपमानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिस्तथा पल्योपमस्य कृतत्रिभागस्य भागद्वयञ्च ।१। चन्द्र- २५ नाम्नि द्वितीयपटले पल्योपमकोटीनामेका कोटी त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत् सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्योपमानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्योपमस्य भागत्रयस्य एको भागः ।२। विमलनाम्नि

---

१ सार्धप- आ०, द०, ज०, ब०। २ अध्यर्धही- ता०। ३ सार्धप- आ०, द०, ज०, व०। ४ इति सा- आ०, द०, ज०, व०। ५ -ते द्वे सा-ता०, ब०। ६ -मानो ब०। ७ इति नि- आ०, द०, ज०। ८ -कल्पयोर्वि- आ०, द०, ज०। ९ ऋतुनाम्नि प्रथमप- ब०। ऋजुप- आ०, द०, ज०।

तृतीयपटले पल्योपमकोटीनां द्वे कोट्यौ। ३। वल्गुनाम्नि चतुर्थपटले पल्योपमकोटीनां द्वे कोट्यौ षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्योपमानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्यभागत्रयस्य द्वौ भागौ। ४। वीरनाम्नि पञ्चमे पटले पल्यकोटीनां कोट्यः तिस्रः त्रयस्त्रिंशत्लक्षाणि त्रयस्त्रिंशत्सहस्राणि
५ त्रीणि शतानि त्रयस्त्रिंशत्, तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत् सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यभागत्रयस्य एको भागः। ५। [1]अरुणनाम्नि षष्ठे पटले पल्यकोटीनां कोट्यश्चतस्रः। ६। नन्दननाम्नि सप्तमे पटले पल्यकोटीनां कोट्यश्चतस्रः षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्यानां षट्षटिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः पल्यभागत्रयस्य भागद्वयम्। ७। [2]नलिननाम्नि अष्टमे
१० पटले पल्यकोटीनां कोट्यः पञ्च त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत् सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यभागत्रयस्य एको भागः। ८। लोहितनाम्नि नवमे पटले पल्यकोटीनां कोट्यः षट्। ९। काञ्चननाम्नि दशमे पटले पल्यकोटीनां कोट्यः षट् षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः
१५ पल्यभागत्रस्य भागद्वयम्। १०। चञ्चनाम्नि एकादशे पटले पल्यकोटीनां कोट्यः सप्त त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत्, पल्यभागत्रयस्यैको भागः। ११। मारुतनाम्नि द्वादशे पटले पल्यकोटीनां कोट्योऽष्ट। १२। ऋद्धिनाम्नि त्रयोदशे पटले पल्यकोटीनां कोट्योऽष्ट षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः
२० तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः पल्यभागत्रयस्य भागद्वयम्। १३। [3]ईशानाम्नि चतुर्दशे पटले पल्यकोटीनां कोट्यो नव त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत्, तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् पल्यभागत्रयस्य भागैकः। १४। वैडूर्यनाम्नि पञ्चदशे पटले सागर एकः।१५। रुचकनाम्नि षोडशे पटले सागरैकः पल्यकोटीनां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि
२५ षट्शतानि षट्षष्टिः तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः पल्यभागत्रयस्य भागद्वयम्। १६। रुचिरनाम्नि सप्तदशे पटले सागर एकः पल्यकोटीनामेका कोटी त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् पल्यभागत्रयस्य भागैकः। १७। [4]अङ्कनाम्नि अष्टादशे पटले पल्यकोटीनां कोट्यो द्वादश। १८। स्फटिकनाम्नि एकोनविंशति-
३० तमे पटले पल्यकोटीनां कोट्यो द्वादश षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः

---

१ आरण- आ०। आरुण- द०। २ प्रललितना- आ०, द०, ज०। ३ ईशानाना- आ०। ईशानना- द०। ४ अकना- आ०। अकंना- ता०।

तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिस्तथा भागत्रयस्य भागद्वयम्। १९। तपनीयनाम्नि विंशतितमे पटले पल्यकोटीनां कोट्यः त्रयोदश, त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि। त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत् सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् पल्यभागत्रयस्य भागैकः। २०। मेघनाम्नि एकविंशतितमे पटले पल्यकोटीनां कोट्यश्चतुर्दश। २१। भद्रनाम्नि द्वाविंशतितमे पटले पल्यकोटीनां कोट्यश्चतुर्दश षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः पल्यभागत्रयस्य भागद्वयम्। २२। [1]हारिद्रनाम्नि त्रयोविंशतितमे पटले पल्यकोटीनां कोट्यः पञ्चदश त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् पल्यभागत्रयस्य भागैकः। २३। पद्मनाम्नि चतुर्विंशतितमे पटले पल्यकोटीनां कोट्यः षोडश। २४। लोहितनाम्नि पञ्चविंशतितमे पटले पल्यकोटीनां कोट्यः षोडश षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः पल्यभागत्रयस्य भागद्वयम्। २५। वज्रनाम्नि षट्विंशतितमे पटले पल्यकोटीनां कोट्यः सप्तदश, त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् पल्यभागत्रयस्य भागैकः। २६। [2]नन्द्यावर्तनाम्नि सप्तविंशतितमे पटले पल्यकोटीनां कोट्योऽष्टादश। २७। प्रभङ्करनाम्नि अष्टाविंशतितमे पटले पल्यकोटीनां कोट्योऽष्टादश षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः तथा पल्यानां षट्षष्टिलक्षाणि षट्षष्टिसहस्राणि षट्शतानि षट्षष्टिः पल्यभागत्रयस्य भागद्वयम्। २८। [3]पिष्टकनाम्नि एकोनत्रिंशत्तमे पटले पल्यकोटीनां कोट्य एकोनविंशतिः त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् तथा पल्यानां त्रयस्त्रिंशल्लक्षाणि त्रयस्त्रिंशत्सहस्राणि त्रीणि शतानि त्रयस्त्रिंशत् पल्यभागत्रयस्य भागैकः। २९। गजमस्तकनाम्नि त्रिंशत्तमे पटले पल्यकोटिकोट्यः विंशतिः। ३०। प्रभानाम्नि एकत्रिंशत्तमे पटले साधिकौ सागरौ द्वौ। ३१। इति सौधर्मैशानयोरेकत्रिंशत्प्रस्ताराणाम् उत्कृष्टा स्थितिर्ज्ञातव्या।

अथ सानत्कुमारमाहेन्द्रयोरुत्कृष्टस्थितिप्रतिपत्त्यर्थं सूत्रमिदमाहुः—

सानत्कुमारमाहेन्द्रयोः सप्त ॥ ३० ॥

सानत्कुमारश्च माहेन्द्रश्च सानत्कुमारमाहेन्द्रौ तयोः सानत्कुमारमाहेन्द्रयोः। अनयोर्द्वयोः कल्पयोः अमराणां सप्तसागरोपमानि साधिकानि उत्कृष्टा स्थितिर्भवति। तयोः सम्बन्धीनि पटलानि सप्त भवन्ति। तत्र अञ्जननाम्नि प्रथमपटले द्वौ सागरौ सागरसप्तभागानां पञ्च भागाश्च। १। वनमालनाम्नि द्वितीयपटले सागरास्त्रयः सागरसप्तभागानां त्रयो भागाश्च। २। नागनाम्नि तृतीयपटले चत्वारः सागराः सागरसप्तभागानामेको

१ हरिद्राना- आ०, द०, ज०। २ नद्यवर्तिना आ०, द०, ज०। ३ विष्टक- ता०।

भागश्च । ३ । गरुडनाम्नि चतुर्थपटले चत्वारः सागराः सागरसप्तभागानां षड् भागाश्च ।४। लाङ्गलनाम्नि पञ्चमे पटले सागराः पञ्च सागरसप्तभागानां चत्वारो भागाश्च । ५ । बलभद्र-नाम्नि षष्ठे पटले सागराः षट् सागरसप्तभागानां द्वौ भागौ च । ६ । चक्रनाम्नि सप्तमे पटले साधिका अर्णवाः सप्त । इति सानत्कुमारमाहेन्द्रयोः सप्तप्रस्ताराणामुत्कृष्टा स्थितिर्ज्ञातव्या ।

५ अथ ब्रह्मलोकादिषु अच्युतपर्यन्तेषु कल्पेषु स्थितिविशेषपरिज्ञानार्थं सूत्रमिदमाहुः—

त्रिसप्तनवैकादशत्रयोदशपञ्चदशभिरधिकानि तु ॥ ३१ ॥

त्रयश्च सप्त च नव च एकादश च त्रयोदश च पञ्चदश च त्रिसप्तनवैकादशत्रयो-दशपञ्चदश तैस्तथोक्तैः अधिकानि । कानि अधिकानि ? पूर्वसूत्रोक्तानि सप्तसागरोपमानि । अस्यायमर्थः—ब्रह्मलोकब्रह्मोत्तरयोः सप्तसागरोपमानि त्रिभिः सागरोपमैः अधिकानि दश १० सागरोपमानीत्यर्थः। लान्तवकापिष्टयोः सप्तसागरोपमानि सप्तभिः सागरोपमैरधिकानि चतुर्दश सागरोपमानीत्यर्थः । शुक्रमहाशुक्रयोः सप्तसागरोपमानि नवसागरोपमैरधिकानि षोडशसाग-रोपमानीत्यर्थः । शतारसहस्रारयोः सप्तसागरोपमानि एकादशसागरोपमैरधिकानि अष्टादश सागरोपमानीत्यर्थः । आनतप्राणतयोः सप्तसागरोपमानि त्रयोदशसागरोपमैरधिकानि विंशति-सागरोपमानीत्यर्थः । आरणाच्युतयोः सप्तसागरोपमानि पञ्चदशसागरोपमैरधिकानि द्वाविंश-१५ तिसागरोपमानीत्यर्थः । तुशब्दो विशेषणार्थः । कोऽसौ विशेषः ? 'सौधर्मैशानयोः सागरोपमे अधिके' इत्यत्र अधिकशब्दाधिकारः ब्रह्मलोकब्रह्मोत्तरलान्तवकापिष्टशुक्रमहाशुक्र-शतारसहस्रारपर्यन्तेषु चतुर्षु युगलेषु प्रवर्तते न त्वानतादिषु वर्तते इत्यर्थं विशेषयति । तेन यत्र यत्र यावन्ति सागरोपमानि उक्तानि तत्र तत्र साधिकानि वक्तव्यानि । आनतप्राणतयोः सागरोपमानि विंशतिरेवै आरणाच्युतयोर्द्वाविंशतिरेव न साधिकानि ।

२० अथ विस्तरः—ब्रह्मलोकब्रह्मोत्तरयोर्यानि चत्वारि पटलानि वर्तन्ते तेषां मध्ये अरिष्ट-नाम्नि प्रथमपटले पादहीनाः सरस्वन्तोऽष्टौ। देवसमितनाम्नि द्वितीयपटले जलधयः सार्धोऽष्ट ।२। ब्रह्मनाम्नि तृतीयपटले पादाधिका उदधयो नव ।३। ब्रह्मोत्तरनाम्नि चतुर्थपटले शशध्वजा दश । लान्तवकापिष्टयोर्द्वे पटले वर्तेते । तत्र ब्रह्महृदयनाम्नि प्रथमपटले अपाम्पतयो द्वादश । लान्तवनाम्नि द्वितीयपटले नदीपतयश्चतुर्दश साधिकाः । शुक्रमहाशुक्रयोरेकमेव पटलम् । तत्र २५ शुक्रनाम्नि पटले जलनिधयः साधिकाः षोडश। शतारसहस्रारयोरेकमेव पटलं तत्र शतारनाम्नि पटले रत्नाकराः साधिका अष्टादश । आनतप्राणतारणाच्युतेषु षट् पटलानि । तत्र आनतनाम्नि प्रथमपटले उदन्वन्त एकोनविंशतिः सागरस्य तृतीयो भागः किञ्चिदधिकस्तत्र हीनो भवति । प्राणतनाम्नि द्वितीयपटले सिन्धवो विंशतिः । पुष्पकनाम्नि तृतीयपटले आकूपाराः विंशतिः सागरभागत्रयस्य द्वौ भागौ च । शांतकनाम्नि चतुर्थपटले पारावारा एकविंशतिरेव । ३० आरणनाम्नि पञ्चमपटले सरित्पतयः एकविंशतिः सागरत्रिभागैकभागश्च । अच्युतनाम्नि षष्ठे पटले समुद्रा द्वाविंशतिरेव ।

[1]अथ ग्रैवेयकादीनां पटलेषु आयुर्विशेषप्रतिपत्त्यर्थं सूत्रमिदं प्रतिपादयन्ति—

आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥ ३२ ॥

आरणश्च अच्युतश्च आरणाच्युतं तस्मादारणाच्युतात्। आरणाच्युतयोर्द्वाविंशति-सागरोपमा उत्कृष्टा स्थितिरुक्ता तत ऊर्ध्वम् उपरि नवसु ग्रैवेयकेषु एकैकेन सागरोपमेन ५ अधिका स्थितिर्देवानां वेदितव्या। तेन अधोग्रैवेयकेषु [2]प्रथमे ग्रैवेयके सुदर्शननाम्नि त्रयो-विंशतिसागरा भवन्ति। [3]द्वितीये ग्रैवेयके अमोघनाम्नि चतुर्विंशतिरब्धयः स्युः। [4]तृतीये ग्रैवेयके सुप्रबुद्धनाम्नि पञ्चविंशतिर्वार्धयो भवन्ति। [5]मध्यमग्रैवेयकेषु प्रथमग्रैवेयके यशो-धरनाम्नि षड्विंशतिर्वारिधयो भवन्ति। द्वितीये ग्रैवेयके सुभद्रनाम्नि सप्तविंशतिः पयोधयो भवन्ति। तृतीये ग्रैवेयके सुविशालनाम्नि अष्टाविंशतिरम्भोधयो भवन्ति। उपरिमग्रैवेयकेषु १० प्रथमे ग्रैवेयके सुमनसनाम्नि एकोनत्रिंशदम्बुधयो भवन्ति। द्वितीये ग्रैवेयके सौमन-सनाम्नि त्रिंशत् पाथोधयो भवन्ति। तृतीये ग्रैवेयके प्रीतिङ्करनाम्नि एकत्रिंशदर्णोधयो भवन्ति। 'नवसु ग्रैवेयकेषु' इत्यत्र नवशब्दग्रहणं प्रत्येकम् एकैकसागरवृद्ध्यर्थम्, अन्यथा ग्रैवेयकमात्रग्रहणे सर्वेषु ग्रैवेयकेषु एक एव सागरो वर्द्धते तन्मा भूदिति। न केवलं नवसु ग्रैवेयकेषु एकैकेन सागरोपमेन एकैकं सागरोपममधिकं स्यात् किन्तु विजयादिषु विजय- १५ प्रकारेषु च। तेनायमर्थः—नवानुदिशेषु द्वात्रिंशत्सागरोपमानि भवन्ति। विजयवैजयन्तजयन्ता-पराजितेषु चतुर्षु विमानेषु त्रयस्त्रिंशत्सागरोपमानि उत्कृष्टा स्थितिर्भवति। 'सर्वार्थसिद्धौ च' इति पृथक्पदकरणं जघन्यस्थितिप्रतिषेधार्थम्। सर्वार्थसिद्धिं गतो जीवः परिपूर्णानि त्रयस्त्रिं-शत् सागरोपमानि भुङ्क्ते। विजयादिषु तु जघन्यस्थितिर्द्वात्रिंशत् सागरोपमानि।

[7]अथोक्तोत्कृष्टायुष्केषु कल्पवासिषु निकृष्टस्थितिपरिज्ञानार्थं सूत्रमिदमाहुः— २०

अपरा पल्योपममधिकम् ॥ ३३ ॥

अपरा जघन्या स्थितिः एकं पल्योपमं किञ्चिदधिकं भवति। तत्तु सौधर्मैशानप्रथम-प्रस्तारे एव ज्ञातव्यम्। तत्कथं ज्ञायते ? उत्तरसूत्रे 'परतः परतः' इति वक्ष्यमाणत्वात्।

अथ प्रथमप्रस्तारादूर्ध्वं जघन्यस्थितिपरिज्ञानार्थं सूत्रमिदमाहुः—

परतः परतः पूर्वा पूर्वानन्तरा ॥ ३४ ॥ २५

परतः परतः परस्मिन् परस्मिन् देशे प्रस्तारे प्रस्तारे कल्पयुग्मकल्पयुग्मादिषु या स्थितिः पूर्वा पूर्वा प्रथमा प्रथमा वर्तते सा अनन्तरा उपर्युपरितनी अपरा जघन्या स्थितिर्वे-दितव्या। तत्रापि जघन्यापि साधिका वेदितव्या। तेन कारणेन स्थूलरूपतया जघन्या

१ अथ नवग्रै– आ०, द०, ज०। २ प्रथमग्रै– व०, आ०, द०, ज०। ३ द्वितीयग्रै– व०, आ०, द०, ज०। ४ तृतीयग्रै– व०। ५ मध्यग्रै– आ०, द०, ज०। ६– सिद्धिगतजी– आ०, द०, ज०। ७ अथोत्कृष्टस्थित्युक्तेषु आ०, द०, ज०।

स्थितिरुच्यते-सौधर्म्मैशानयोः कल्पयोः द्वे सागरोपमे साधिके उक्ते ते तु सानत्कुमारमाहेन्द्रयोः जघन्या स्थितिर्भवति। सानत्कुमारमाहेन्द्रयोः सप्तसागरोपमानि साधिकानि कथितानि तानि ब्रह्मलोकब्रह्मोत्तरयोः जघन्या स्थितिः ज्ञातव्या। एवं विजयादिपर्यन्तेषु [1]वेदितव्यम्।

अथ नारकाणां पूर्वमुत्कृष्टा स्थितिः प्रतिपादिता, जघन्या तु नोक्ता तत्परिज्ञानार्थं ५ लघूपायेन अनधिकृतमपि सूत्रमधिक्रियते। कोऽसौ लघूपायः? 'अपरा' इत्यक्षरत्रयं वारद्वयं मा भूदिति।

नारकाणाञ्च द्वितीयादिषु ॥ ३५ ॥

नरके भवाः नारकास्तेषां नारकाणां द्वितीयादिषु भूमिषु प्रस्तारेषु च अपरा जघन्या स्थितिः भवति। चकारात् पूर्वापूर्वाऽनन्तरा इत्यनुकृष्यते। तेनायमर्थः—स्थूलतया रत्नप्रभायां १० प्रथमनरकभूमौ नारकाणामुत्कृष्टा स्थितिरे[2]कसागरोपमं प्रोक्तं सा शर्कराप्रभायां द्वितीयनरकभूमौ जघन्या वेदितव्या। शर्कराप्रभायां त्रीणि सागरोपमानि उत्कृष्टा स्थितिः कथिता सा वालुकाप्रभायां तृतीयनरकभूमौ जघन्या स्थितिः वेदितव्या इत्यादि यावत् सप्तमनरके द्वाविंशतिसागरोपमानि जघन्या स्थितिर्भवति—

अथ द्वितीयादिषु भूमिषु जघन्या स्थितिः यदि प्रतिपादिता तर्हि प्रथमायां नरकभूमौ १५ का जघन्या स्थितिरिति चेत्? उच्यते—

दशवर्षसहस्राणि प्रथमायाम् ॥ ३६ ॥

वर्षाणां सहस्राणि वर्षसहस्राणि, दश च तानि वर्षसहस्राणि दशवर्षसहस्राणि प्रथमायां प्रथमनरकभूमौ दशवर्षसहस्राणि अपरा जघन्या स्थितिर्ज्ञातव्या। सा तु प्रथमपटले सीमन्तकनाम्न्येव। द्वितीयपटले नवति[3]वर्षसहस्राणि जघन्या स्थितिः। तृतीयपटले नवति- २० वर्षलक्षाणि इत्यादि सर्वत्र समयाधिका सती जघन्या स्थितिर्ज्ञातव्या।

अथ भवनवासिनां जघन्या स्थितिरुच्यते—

भवनेषु च ॥ ३७ ॥

भवनेषु भवनवासिषु देवेषु दशवर्षसहस्राणि जघन्या स्थितिर्भवति। चकारः अपरास्थितिरित्यस्यानुकर्षणार्थः।

२५ अथ व्यन्तराणां जघन्या स्थितिरुच्यते—

व्यन्तराणाञ्च ॥ ३८ ॥

व्यन्तराणां किन्नरादीनां दशवर्षसहस्राणि जघन्या स्थितिर्भवति। चकारः अपरास्थिति[4]रित्यस्याऽनुकर्षणार्थः।

तर्हि व्यन्तराणामुत्कृष्टा का स्थितिरिति चेत्? उच्यते—

३० **परा पल्योपममधिकम् ॥ ३९ ॥**

परा उत्कृष्टा स्थितिर्व्यन्तराणाम् एकं पल्योपमं किञ्चिदधिकं भवति।

---

१ –न्ते वेदितव्या व०। २ –रेकं साग– आ०, द०, ज०, व०। ३ –तिर्वर्ष– ज०। ४ –तिर्दशवर्षसहस्राणि इत्यनु– ता०, व०।

अथ ज्योतिष्काणामुत्कृष्टस्थितिपरिज्ञानार्थं योगोऽयमुच्यते—

ज्योतिष्काणाञ्च ॥ ४० ॥

चकारः प्रकृतसमुच्चयार्थः। तेन ज्योतिष्काणां परा स्थितिः पल्योपमाधिकमिति ज्ञातव्यम्।

अथ ज्योतिष्काणां जघन्यस्थितिपरिज्ञानार्थं सूत्रमिदं ब्रुवन्ति स्म— ५

तदष्टभागोऽपरा ॥ ४१ ॥

तस्य पल्योपमस्य अष्टसु भागेषु कृतेषु एको भागः तदष्टभागः, अपरा अनुत्कृष्टा जघन्या स्थितिर्ज्योतिष्काणां भवतीति तात्पर्यम्। अत्र विशेषः कथ्यते—चन्द्राणां पल्यमेकं वर्षलक्षाधिकम्। सूर्याणां पल्यमेकं वर्षसहस्राधिकम्। शुक्राणां वर्षशताधिकं पल्योपमम्। बृहस्पतीनां पल्योपममेकमेव। बुधानां पल्यार्द्धम्। नक्षत्राणाञ्च पल्यार्द्धम्। प्रकीर्णकतारकाणां १० पल्यचतुर्थभागः परा स्थितिर्वेदितव्या। प्रकीर्णकतारकाणां नक्षत्राणाञ्च जघन्या स्थितिः पल्योपमाऽष्टमो भागः। सूर्यादीनां जघन्या स्थितिः पल्योपमचतुर्थभागः[1]। तथा च विशेषः[2]—

लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम्[3] ॥ ४२ ॥

ये लौकान्तिकास्ते विश्वेऽपि शुक्ललेश्याः पञ्चहस्तोन्नता अष्टसागरोपमस्थितय इति। १५ अस्मिन् चतुर्थेऽध्याये चतुर्णिकायदेवानां स्थानभेदाः सुखादिकञ्चोत्कृष्टाऽनुत्कृष्टस्थितिश्च लेश्याश्च निरूपिता इति सिद्धम्।

इति[4] सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ चतुर्थः पादः समाप्तः।

---

१ -गः लौका- आ०, द०, ज०। २ -षः ये लौकान्तिकाः ता०। ३ सूत्रमेतन्नास्ति ता० प्रतौ। ४ इत्यनवद्यगद्यपद्यविद्याविनोदनोदितप्रमोदपीयूषरसपानपावनमतिसमाजरत्नराजमतिसागरयतिराजराजितार्थसमर्थेन तर्कव्याकरणछन्दोलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्त्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य सञ्छर्दितमिथ्यामतदुर्गरेण श्रीश्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां चतुर्थोऽध्यायः समाप्तः। आ०, द०, ज०, व०।

अथ पञ्चमोऽध्यायः

अथेदानीं सम्यग्दर्शनविषया जीवादयः पदार्थास्तत्र जीवपदार्थः पूर्वं व्याख्यातः, अजीवपदार्थस्तु व्याख्यातुमारब्धः तस्य नामविशेषकथनार्थं श्रीमदुमास्वामिनः सूत्रमिदमाहुः—

अजीवकाया धर्म्माधर्म्माकाशपुद्गलाः ॥ १ ॥

५ न विद्यते जीव आत्मा येषां ते अजीवाः, कायवत् पुद्गलद्रव्यप्रचयात्मकशरीरवत् बहुप्रदेशा वर्तन्ते ये ते कायाः, अजीवाश्च ते कायाश्च अजीवकायाः, **"विशेषणं विशेष्येण"** [पा० सू० २।१।५७] इति सूत्रेण कर्म्मधारयसमासः। अत्र अजीवा इति विशेषणं काया इति विशेष्यं तेन विशेषणं विशेष्येण सह समस्यते कर्मधारयसमासो भवति। धर्मश्च अधर्मश्च आकाशश्च पुद्गलश्च धर्माधर्म्माकाशपुद्गलाः। एते चत्वारः पदार्थाः अजीवकाया भवन्ति।

१० ननु **"असङ्ख्येयाः प्रदेशा धर्माधर्मैकजीवानाम्"** [५।८] इत्यग्रे बहुप्रदेशत्वं ज्ञापयिष्यति किमर्थमत्र बहुप्रदेशत्वसूचनार्थं कायशब्दस्य ग्रहणम्? साधूक्तं भवता अत्र बहुप्रदेशसूचनलक्षणो विधिः कायशब्देन गृहीतः तस्यैव विधेरवधारणमग्रे करिष्यति[1]। किमवधारणं करिष्यति? असङ्ख्येयाः प्रदेशाः धर्म्माधर्म्मैकजीवानाम्। किमत्रावधारणम्? एतेषां धर्मादीनां त्रयाणां प्रदेशा असङ्ख्येया भवन्ति अनन्ताः सङ्ख्येयाश्च न भवन्तीति निर्धार-

१५ यिष्यति। तथा च कालप्रदेशाः प्रचयात्मका न भवन्तीति ज्ञापनार्थं कायशब्दग्रहणम्। यथा एकस्याणोः प्रदेशमात्रत्वात् द्वितीयादयः प्रदेशा न भवन्ति तथा कालपरमाणोरपि द्वितीयादयः प्रदेशा न भवन्ति, तेन कालोऽकाय इत्युच्यते। पुद्गलपरमाणोः यद्यपि निश्चयेन [3]अबहुप्रदेशत्वमुक्तं तथापि उपचारेण बहुप्रदेशत्वमस्त्येव, यतः पुद्गलपरमाणुः अन्यपुद्गलपरमाणुभिः सह मिलति एकत्र कायवत् पिण्डीभवति, तेनोपचारेण काय उच्यते। काल-

२० परमाणुस्तु उपचारेणापि कालपरमाणुभिः सह न मिलति तेनोपचारेणापि काय इति नोच्यते। स तु स्वभावेन रत्नराशिवत् मुक्ताफलसमूहवत् पृथक् तिष्ठति।

धर्म्माधर्म्माकाशपुद्गला अजीव इति सामान्यसंज्ञा, धर्म्मोऽधर्म आकाशः पुद्गलश्चेति विशेषसंज्ञा। ननु नीलोत्पलादिषु व्यभिचारो वर्तते '[4]उत्पलनीलम्' इत्यादि, कथं विशेषणं विशेष्येणेति घटते? सत्यम्; इहापि व्यभिचारो वर्तते–अजीवशब्दः कायरहिते कालेऽप्यस्ति,

२५ कायशब्दः जीवेऽप्यस्ति, तेन जीवकाय इत्यपि कथ्यते, नास्ति व्यभिचारस्य दोषः।

अथ **"सर्वद्रव्यपर्यायेषु केवलस्य"** [१।२९] इत्यस्मिन् सूत्रे द्रव्यशब्दः श्रुतः। कानि तानि द्रव्याणि इत्युक्ते सूत्रमिदमाहुः—

---

१ –ति अस– आ०, ब०, द०, ज०। २ –णं ते– आ०। ३ अबहुलप्र– आ०, ब०, द०, ज०। ४ उत्पले नील– आ०, द०, ज०।

द्रव्याणि ॥ २ ॥

[1]द्रूयन्ते गम्यन्ते प्राप्यन्ते यथास्वं यथार्थं[2] यथात्मीयपर्यायैर्यानि तानि द्रव्याणि। [3]द्रवन्ति वा पर्यायैः प्रवर्तन्ते यानि तानि द्रव्याणि। 'द्रव्यत्वयोगात् द्रव्याणि' इति[4] कथन्न व्युत्पत्तिः ? एवं सति उभयोर्द्रव्यपर्याययोरसिद्धिः स्यात्। दण्डदण्डिनोः पृथक्सिद्धयोर्योगो भवति न तु द्रव्यपर्याययोः पृथक् सिद्धिरस्ति चेत्; अपृथक्सिद्धयोरपि द्रव्यपर्याययोर्योगो भवेत्, तर्हि आकाशकुसुमस्य [5]प्रकृतिपुरुषस्य द्वितीयशिरसश्च योगो भवेत्। यदि द्रव्यपर्याययोः पृथक् सिद्धिरङ्गीक्रियते, तर्हि द्रव्यत्वकल्पना [6]वृथैव। यदि [7]गुणसमुदायो द्रव्यमुच्यते; तत्र गुणानां समुदायस्य च भेदाभावे तद्द्रव्यव्यपदेशो नोपपद्यते। यदि भेदोऽङ्गीक्रियते; तदा स एष दोषः। स कः ? द्रव्यत्वकल्पना[8]वृथात्वलक्षणः। ननु गुणान् [9]द्रवन्ति गुणैर्वा द्रूयन्ते यानि तानि द्रव्याणि' इति चेत् विग्रहोऽभिधीयते तदा स एव दोषः किन्न भवति ? सत्यम्; गुणैः सह कथञ्चिद् भेदाभेदौ वर्तेते तेन अनेन विग्रहेण द्रव्यव्यपदेशो द्रव्यनामसिद्धिरस्त्येव। कथञ्चिद्भेदः कथञ्चिदभेद इति कथं ज्ञायते ? यतः कारणात् व्यतिरेकेण अनुपलब्धिरभेदः, संज्ञालक्षणप्रयोजनादिभेदैर्भेदः। धर्म्माधर्माकाशपुद्गला इति चत्वारः पदार्था बहवः तेषां समानाधिकरणत्वं बहुत्वनिर्देशे सति सङ्ख्यानुवृत्तिवत् सर्वेषामपि पुल्लिङ्गत्वमेव द्रव्याणां प्राप्नोति, द्रव्याणीति कथम् ? तदसत्; आविष्टलिङ्गत्वात् शब्दाः कदाचिदपि लिङ्गं न [10]जहति न मुञ्चन्ति न व्यभिचरन्तीति यावत्। अतः कारणात् धर्म्माधर्माकाशपुद्गला द्रव्याणि भवन्ति इति [11]नैष नपुंसकलिङ्गत्वलक्षणो दोषः।

अथ किं चत्वार एव पदार्थाः द्रव्याणीत्युच्यन्ते उतान्योऽपि कश्चित् पदार्थो द्रव्यमुच्यते इति प्रश्ने सूत्रमिदमाहुः—

जीवाश्च ॥ ३ ॥

जीवन्ति जीविष्यन्ति जीवितपूर्वा वा जीवाः। जीवाश्च द्रव्याणि भवन्ति। चकारः द्रव्यसंज्ञानुवर्तनार्थः। बहुवचनन्तु पूर्वव्याख्यातपर्यायादिभेदपरिज्ञानार्थम्। एवं कालोऽपि द्रव्यतया वक्ष्यते, तेन सह द्रव्याणि षट् भवन्तीति ज्ञातव्यम्।

ननु "गुणपर्ययवद्द्रव्यम्" [५।३८] इत्यनेन वक्ष्यमाणसूत्रेण द्रव्यलक्षणकथनात्, तत्कथितलक्षणसंश्रयाच्च धर्म्माधर्माकाशपुद्गलजीवकालानां द्रव्यव्यपदेशः सङ्गच्छत एव।

---

१ द्रव्यन्ते आ०, द०, ज०। २ -यथं यथात्मीयं प- ता०। -यथमात्मीयं प- द०, आ०, ब०। -यथमात्मीयप-ज०। ३ द्रव्यन्ति आ०, द०, ब०, ज०। ४ वैशेषिकमतापेक्षया। ५ प्रकृतिकुसुमस्य आ०, द०, ज०। ६ पृथगेव आ०, द०, ज०। ७ गुणसन्द्रावो ता०, ब०, द०, ब०, आ०। "अन्वर्थं खल्वपि गुणसन्द्रावो द्रव्यम्।" -पात० महा० ५।१।११९। "गुणसमुदायो द्रव्यम्" -पात० महा० ४।१।१३। ८ -नापृथक्त्व- आ०, द०, ज०। ९ द्रव्यन्ति ता०। १० जहति नव्य- आ०, द०, ज०। ११ नैव आ०, द०, ज०।

[1]अर्थपरिगणनेन परिगणनं न पूर्यते यतोऽन्यवादिभिः[2] द्रव्याणि नव परिगणितानि वर्तन्ते अत्र तु षडेव; सत्यम्; अत एव ज्ञायते पृथिव्यादीनां परवादिकल्पितानां द्रव्यत्वे नि (त्वनि)-वृत्तिः कृता भवति। तत् कथमिति चेत्? उच्यते—पृथिव्यप्तेजोवायुमनसां पुद्गलद्रव्येऽन्तर्भावः। उक्तञ्च—

५ "पुढवी जलं च छाया चउरिंदियविसयकम्मपाउग्गं।
छव्विहभेयं भणियं पुग्गलदव्वं जिणिंदेहिं ॥ १ ॥
अइथूलथूलथूलं थूलं सुहुमं च सुहुमथूलं च।
सुहुमं च सुहुमसुहुमं धराइयं होइ छब्भेयं[3] ॥" [वसु० सा० १८, १९]

पुद्गलद्रव्ये रूपरसगन्धस्पर्शाश्च वर्तन्ते यतः तर्हि वायुमनसोर्न रूपादिगुणयोगोस्ति कथं १० पुद्गलद्रव्ये अन्तर्भावः? सत्यम्; वायुः स्पर्शवान् वर्तते कथन्न रूपादिमान्? घटपटादिवत् चक्षुरादिभिः ग्रहीतुं न शक्यते वायुः कथं रूपादिमान्? तन्न; एवं सति परमाण्वादीनामपि रूपादिमत्त्वाभावः प्रसज्यते। आपस्तु गन्धवत्यः स्पर्शवत्वात् पृथिवीवत् वर्तन्ते। तेजोऽपि रसयुक्तं गन्धयुक्तञ्च वर्तते तदपि रूपादिमान् (मत्) घटपटादिवत्। मनो द्विप्रकारं वर्तते—द्रव्यमनो-भावमनोभेदात्। तत्र द्रव्यमनः रूपादियोगात् पुद्गलद्रव्यस्यैव विकारः रूपादिमद् १५ वर्तते, चक्षुरिन्द्रियवत् ज्ञानोपयोगक[4]रणं वर्तते। भावमनस्तु ज्ञानम्, ज्ञानं तु जीवगुणः तस्य आत्मन्यन्तर्भावः। ननु अमूर्तोऽपि शब्दो ज्ञानोपयोगकारणं किन्न वर्तते यन्मूर्तस्य द्रव्यमनसः ज्ञानोपयोगकारणत्वमुच्यते भवद्भिः? सत्यम्; शब्दः पौद्गलिकः, तस्यापि मूर्तिमत्त्वमस्त्येव श्रुतिस्पर्शवत्त्वात्। यथा सर्वेषां परमाणूनां रूपादिमत्कार्यत्वदर्शनात् रूपादिमत्त्वं विद्यते न तथा वायुमनसो रूपादिमत्कार्यं दृश्यते कथं वायुमनसोः पुद्गल-२० द्रव्येऽन्तर्भावः? सत्यम्; तेषामपि—वायुमनःपुद्गलानामपि तदुपपत्तेः—दृश्यमानरूपादिमत्कार्योपपत्तेः, सर्वेषां परमाणूनां सर्वरूपादिमत्त्वकार्यत्वप्राप्तियोग्यताऽभ्युपगमात्। न च केचित् परमाणवः पार्थिवादिजातिविशेषयुक्ताः सन्ति किन्तु [5]जातिसङ्करेण आरम्भदर्शनं तथा वायुमनसोरपि रूपादिमत्कार्यदर्शनम्। दिशोऽपि विहायस्यन्तर्भावः, आदित्योदयापेक्षया आकाशप्रदेशपङ्क्तिषु "[6]अत इदम्" इति व्यवहारोपपत्तेः।

२५ अथोक्तानां द्रव्याणां विशेषपरिज्ञानार्थं सूत्रमिदमाहुः—

---

१ अर्थपरिगमनं आ०, द०, ज०। २ वैशेषिकैः। "पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि।" —वैशे० १।१।५। ३ पृथ्वी जलं च छाया चतुरिन्द्रियविषयकर्मप्रायोग्याः। षड्विधभेदं भणितं पुद्गलद्रव्यं जिनेन्द्रैः॥ अतिस्थूलस्थूलस्थूलानि स्थूलं सूक्ष्मं च सूक्ष्मस्थूलं च। सूक्ष्मं च सूक्ष्मसूक्ष्मं धरादिकं भवति षड्भेदम्॥ ४ -कारणं आ०, द०, ज०, व०। ५ काष्ठादनलस्य चन्द्रकान्ताज्जलस्य जलान्मुक्ताफलादेः व्यजनाच्चानिलस्योत्पत्तिदर्शनात्। ६ अतः इदं पूर्वं पश्चिममित्यादि व्यवहारोपपत्तेः। इत इदं ता०, व०।

नित्यावस्थितान्यरूपाणि ॥ ४ ॥

नित्यानि ध्रुवाणि । "नैर्ध्रुवे" [जैने० वा० ३।२।८२] इति साधु । अवस्थितानि सङ्ख्यया अव्यभिचारीणि षट्त्वसङ्ख्याया अपरिहारीणि, यथासम्भवं निजनिजप्रदेशा[२]-नामत्यागीनि चेतनत्वाचेतनत्वादिनिजनिजस्वरूपं न कदाचिदपि त्यजन्तीति वा अवस्थितानि नित्यानि च तानि अवस्थितानि नित्यावस्थितानि । द्रव्याणां नित्यत्वमवस्थितत्वञ्च द्रव्यनया-पेक्षया ज्ञातव्यमित्यभिप्रायः । न विद्यते रूपं येषां तानि अरूपाणि रूपरसादिरहितानि अमूर्तानीत्यर्थः ।

तर्हि यदि द्रव्याणि अरूपाणि प्रोक्तानि तन्मध्ये पुद्गला अपि द्रव्यानिर्देशं प्राप्नुवन्तः अरूपा भविष्यन्तीत्युत्सर्गप्रतिषेधार्थमपवादसूत्रमाहुः—

रूपिणः पुद्गलाः ॥ ५ ॥

रूपं रूपरसादिसंस्थानपरिणामलक्षणा[३] मूर्तिर्विद्यते येषां ते रूपिणः । अत्र नित्ययोगे इन् प्रत्ययः । तदुक्तम्—

"भूमिनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां[४] मन्त्वादयो भवन्त्यमी ॥ १ ॥"

[का० सू० २।६।१५ दौ० वृ० १]

पूरणगलनस्वभावत्वात् पुद्गलाः । अत्र बहुवचनं परमाणुस्कन्धाद्यनेकभेदपरिकल्पनार्थं विश्वरूपकार्यदर्शनाद् वेदितव्यम् । पुद्गला रूपिणो मूर्तिमन्तो भवन्तीति तात्पर्यार्थः ।

अथ यथा पुद्गलाः प्रत्येकं भिन्ना वर्तन्ते तथा धर्म्माधर्म्माकाशा अपि प्रत्येकं किं भिन्नत्वमाप्नुवन्ति उताभेदमित्यनुयोगे सूत्रमिदमाहुः—

आ आकाशादेकद्रव्याणि ॥ ६ ॥

आकाशमभिव्याप्य आ आकाशात्, सूत्रानुक्रमेण त्रीणि द्रव्याणि धर्म्मोऽधर्मः आका-शश्च एते त्रय एकद्रव्याणि अखण्डप्रदेशा भवन्ति न तु पुद्गलवत् भिन्नप्रदेशाः स्युः । धर्म्म एकद्रव्यम् अधर्म्मोपि एकद्रव्यम् आकाशोऽपि एकद्रव्यम् । बहुवचनं तु धर्मादीनां त्रयाणाम-पेक्षया । एकस्यापि अनेकार्थप्रतीत्युत्पादनसामर्थ्ययोगात् बहुवचनं कृतं तर्हि 'आ आकाशादे-कैकम्' इति लघुसूत्रं किमिति न कृतम् ? एवं सति सूत्रे द्रव्यग्रहणमनर्थकं किमिति कृतम् ? [७]साधूक्तं भवता; द्रव्यग्रहणं द्रव्यपेक्षया एकत्वकथनार्थं क्षेत्रभावापेक्षया असंख्येयत्वानन्त-त्वविकल्पप्रकटनार्थं च द्रव्यग्रहणं कृतं यथा जीवद्रव्यं नानाजीवापेक्षया भिन्नं भिन्नं वर्तते पुद्गलद्रव्यञ्च प्रदेशस्कन्धा[८]पेक्षया भिन्नं भिन्नमस्ति तथा धर्म्मोऽधर्मश्च आकाशञ्च भिन्नं भिन्नं न वर्तते ।

---

१ –ख्यया आ०, द०, ज० । २ –शान्न त्यजन्ति चे– आ०, द०, ज० । ३ –णमू– आ०, द०, ज० । ४ –यामन्वादेशो भ– व० । ५ –प्रत्यु– आ०, द०, ज० । ६ –र्थ्ययो– आ०, द०, ज०, व० । ७ साधु कथितं आ०, द०, ज० । ८ –स्कन्धत्वापे– आ०, द०, ज० ।

अथाधिकृतानां धर्म्माधर्माकाशैकद्रव्याणां विशेषपरिज्ञानार्थं सूत्रमिदमुच्यते—

निष्क्रियाणि च ॥ ७ ॥

बाह्याभ्यन्तरकारणवशात् सञ्जायमानो द्रव्यस्य पर्यायः देशान्तरप्राप्तिहेतुः क्रिया कथ्यते। तस्याः क्रियाया निष्क्रान्तानि निष्क्रियाणि। चकारः समुच्चये वर्तते। तेनायमर्थः- धर्माधर्माकाशद्रव्याणि न केवलमेकद्रव्याणि अपि निष्क्रियाणि च स्वस्थानं परित्यज्य जीव- ५ पुद्गलवत् परक्षेत्रं न गच्छन्तीत्यर्थः। ननु यदि धर्माधर्माकाशानि द्रव्याणि निष्क्रियाणि वर्तन्ते चलनादिक्रियारहितानि सन्ति तर्हि तेषामुत्पादो न सङ्गच्छते। उत्पादो हि क्रियापूर्वको व्याख्यातः घटादिवत्। उत्पादाऽभावे व्ययोऽपि न स्यात्। एवञ्च सति धर्म्माधर्माकाश- द्रव्याणाम् उत्पादव्ययध्रौव्यत्रयकल्पना वृथा; युक्तमुक्तं भवता हास्येन कथयति—युक्तमुक्तमयुक्त- मुक्तमित्यर्थः। एवं सर्वत्र [२]चालनायां ज्ञातव्यम्। चलनादिक्रियाकारणोत्पादाऽभावेऽपि १० धर्माधर्माकाशानामपरथाप्युत्पादो वर्तते[४] एव। तत्कथमिति चेत्? उच्यते—स्वनिमित्तः पर- प्रत्ययश्चेदु(त्यु)त्पादो द्विविधः। तत्र स्वनिमित्तः आगमप्रमाणत्वात् अगुरुलघुगुणानाम् अन- न्तानन्तानामङ्गीक्रियमाणानां षट्स्थानपतितया वृद्ध्या षट्स्थानपतितया हान्या च वर्तमाना- नामेषामुत्पादो व्ययश्च स्वभावादेव वर्तते। परनिमित्तोऽप्यस्ति [५]नरकरभादिगतिस्थित्यवगाह- निमित्तत्वान् समये समये तेषां भेदात् तद्धेतुत्वमपि भिन्नंभिन्नमिति परप्रत्ययापेक्ष[६] उत्पादो १५ व्ययश्चोपचर्यते। चर्चितमप्यनुचर्च्यते—ननु धर्म्माधर्म्माकाशानि चेत्क्रियारहितानि वर्तन्ते तर्हि जीवानां पुद्गलानाञ्च गतिस्थित्यवकाशहेतवः कथं भवन्ति? यतः [७]सर्वतोमुखादीनि स्वयं क्रियावन्ति वर्तन्ते तानि [८]तिम्यादीनां गतिस्थित्यवकाशदानकारणानि सङ्गच्छन्ते न निष्क्रियाणि धर्म्माधर्म्माकाशद्रव्याणि इति; सत्यम्; यथा चक्षू रूपग्रहणे निमित्तं तथा धर्मा- दीनि जीवानां बलाधाननिमित्तमिति। अत्र धर्म्माधर्म्माकाशानां निष्क्रियत्वमङ्गीकृतं जीव- २० पुद्गलानां सक्रियत्वमर्थापत्तेरेवायातम्, न तु कालस्य सक्रियत्वमस्ति जीवपुद्गलैः सह अनधिकारात् तेन कालोऽपि निष्क्रियत्वं प्राप्त इत्यर्थः। पुद्गलानां रूपित्वं धर्म्माधर्म्मा- काशानामेकद्रव्यत्वं निष्क्रियत्वञ्च त्रिभिः सूत्रैः प्रतिपादितम्, अर्थात् जीवानां यथायोग्यमरू- पित्वमनेकद्रव्यत्वं सर्वक्रि(सक्रि)यत्वञ्च सिद्धमिति।

अथ "अजीवकाया धर्म्माधर्म्माकाशपुद्गलाः" [५।१] इत्यत्र कायशब्दग्रहणात् २५ प्रदेशानामस्तित्वं निश्चितम्, परं प्रदेशानामियत्ता न ज्ञायते—कस्य द्रव्यस्य कियन्तः प्रदेशा इति तत्प्रदेशपरिज्ञानार्थं योगोऽयमुच्यते—

---

१ -व्यक- द०। २ चलना- आ०, ब०, ज०। ३ -यानिमित्तोत्पा- ज०। -याकणा- मुत्पा- आ०। ४ -ते त- ज०, आ०। ५ नरकगर्भादि- ब०। ६ -क्षयाउ- आ०, ज०, ब०। ७ जलादीनि। ८ मत्स्यादीनाम्।

असङ्ख्येयाः प्रदेशा धर्माधर्मैकजीवानाम् ॥ ८ ॥

सङ्ख्यायन्ते संख्येयाः न सङ्ख्येया असङ्ख्येयाः "आतूखनोरिच" [का० सू० ४।२।१२] प्रदिश्यन्ते[1] प्रदेशाः। धर्मश्च अधर्मश्च एकजीवश्च धर्म्माधर्म्मैकजीवाः, तेषां धर्म्माधर्मैकजीवानाम्। धर्मादीनां त्रयाणामसङ्ख्येया सङ्ख्यामतीताः प्रदेशा भवन्ति। को नाम प्रदेशः ? यावति क्षेत्रे पुद्गलपरमाणुरवतिष्ठते तावदाकाशं प्रदेश इत्युच्यते। असङ्ख्येय- ५ स्त्रिप्रकारः—जघन्य उत्कृष्टः जघन्योत्कृष्टश्च। अत्र जघन्योत्कृष्टः असङ्ख्येयो गृह्यते। एतेषु धर्म्माधर्म्मा निष्क्रियौ लोकाकाशं व्याप्य स्थितौ। एकजीवस्तु तत्प्रमाणप्रदेशोपि सन् संहारविसर्पस्वभावात् निजकर्मनिर्मितं सूक्ष्मं महद्वा शरीरमधितिष्ठन् तावन्मात्रमेवावगाह्य तिष्ठति अन्यत्र लोकपूरणात्। यदा जीवो दण्डकपाटप्रतरपूरणलक्षणं लोकपूरणं करोति तदा मेरोरधः चित्रवज्रपटलमध्ये अष्टौ मध्यप्रदेशान् परिहृत्य सर्वत्र तिष्ठति। लोकपूरणं १० चतुर्भिः समयैः करोति चतुर्भिः संहरति[2] च। एवं लोकपूरणकरणे अष्ट समया लगन्ति।

अथ आकाशस्य कियन्तः प्रदेशाः भवन्तीति प्रश्ने सूत्रमिदमाहुः—

आकाशस्यानन्ताः ॥ ९ ॥

आ समन्तात् लोके अलोके च [3]काशते तिष्ठति आकाशः, तस्य आकाशस्य। न विद्यते अन्तोऽवसानं येषां प्रदेशानां ते अनन्ताः। आकाशस्य नभसः अनन्ताः प्रदेशा भवन्ति। १५

अथ चतुर्णाममूर्तीनां प्रदेशपरिमाणं ज्ञातम्, मूर्तानां पुद्गलानान्तु प्रदेशपरिमाणं वक्तव्यं तदर्थं सूत्रमिदमाहुः—

सङ्ख्येयासङ्ख्येयाश्च पुद्गलानाम् ॥ १० ॥

सङ्ख्येयाश्च असङ्ख्येयाश्च सङ्ख्येयासङ्ख्येयाः। पुद्गलानां प्रदेशाः संख्येया असङ्ख्येयाश्च भवन्ति। चकारात् परीतानन्ताः युक्तानन्ता अनन्तानन्ताश्च त्रिविधानन्ताश्च २० भवन्ति। कस्यचित् पुद्गलद्रव्यस्य द्व्यणुकादेः सङ्ख्येयाः प्रदेशा भवन्ति। ते तु आगमोक्त-गणितशास्त्रपर्यन्तेपि सार्द्धशताङ्कपरिमिते अणुद्व्याधिके[4] सति यावान् स्कन्ध एक उत्पद्यते तावान् स्कन्धः सङ्ख्येयप्रदेश उच्यते। कस्यचित् पुद्गलस्कन्धस्य असङ्ख्येयाः प्रदेशा भवन्ति। ते तु यावन्तो लोकाकाशप्रदेशास्तावद्भिः पुद्गलपरमाणुभिर्मिलितैर्य एक स्कन्ध उत्पद्यते तत्परिमाणस्कन्ध असंख्येयप्रदेश उच्यते। तेन कश्चित् स्कन्ध असङ्ख्येयासङ्ख्येय- २५ प्रदेशश्च भवति, कश्चित् स्कन्धः परीतानान्तो भवति अपरः कोऽपि युक्तानन्तप्रदेशो भवति, अन्यतमः कोऽपि अनन्तानन्तप्रदेशश्च भवति। एतत् त्रिविधमप्यनन्तं चशब्देन सामान्येन गृहीतमिति ज्ञातव्यम्। ननु लोकस्तावत् असङ्ख्यातप्रदेशः, स लोक अनन्तप्रदेशस्य अनन्तानन्तप्रदेशस्य च स्कन्धस्य कथमाधार इति विरोधः, ततः पुद्गलस्य अनन्तप्रदेशता न युक्ता; सत्यम्; परमाण्वादयः सूक्ष्मत्वेन परिणता एकैकस्मिन्नपि आकाशप्रदेशे अनन्तानन्तास्तिष्ठन्ति १०

---

१ प्रदिश्यन्ति आ०, ज०। २ –ति ए– ज०, आ०। ३ काशते ज०, व०। ४ –के या– आ०, ज०। ५ –माणवः सू– आ०, ज०।

सम्मान्ति। कस्मात् ? सूक्ष्मपरिणामावगाहनशक्तियोगात्। पुद्गलपरमाणूनामवगाहने या शक्तिर्वर्तते सा अव्याहता वर्तते, तां शक्तिं कोऽपि व्याहन्तुं न शक्नोति। अतः कारणात् एकस्मिन्नाकाशप्रदेशे अनन्तानन्तानां परमाणूनामवस्थानं न विरुद्धम्।

अथ 'सङ्ख्येयाऽसङ्ख्येयाश्च पुद्गलानाम्' इति सूत्रे विशेषरहिताः पुद्गलाः प्रोक्ताः, ५ तेन अविशेषवचनतया एकस्यापि परमाणोः तादृशाः [1]प्रदेशा भविष्यन्तीत्याशङ्कायां तन्निषेधार्थं सूत्रमिदमुच्यते—

नाणोः ॥ ११ ॥

अणोः एकस्य परमाणोः 'प्रदेशाः न भवन्ति' इति वाक्यशेषः। कुतो न भवन्तीति चेत् ? अणोः एकप्रदेशमात्रत्वात्। यथा एकाकाशप्रदेशस्य प्रदेशभेदाभावात् अप्रदेशत्वं १० वर्तते, तथा एकस्य अविभागस्याणोरपि अप्रदेशत्वं ज्ञातव्यमिति। यतः एकस्य परमाणोर्भेदः कर्तुं केनापि न शक्यते।

"परमाणोः परं नाल्पं नभसो न परं महत्।" [ ] इति वचनात्

अणोरप्यणीयानपरो न वर्तते कथमणोः प्रदेशाः भिद्यन्ते ?

अथ धर्म्माधर्मजीवपुद्गलादीनामधिकरणपरिज्ञानार्थं सूत्रमिदमुच्यते—

१५ **लोकाकाशेऽवगाहः ॥ १२ ॥**

लोक्यन्ते विलोक्यन्ते धर्मादयः पदार्था यस्मिन्निति लोकः, लोकस्य सम्बन्धी आकाशो लोकाकाशः तस्मिन् लोकाकाशे। लोक इति **"करणाधिकरणयोश्च"** [का० त० ४।५।९५] इत्यनेन अधिकरणे घञ्। अवगाहनमवगाहः अवकाश इत्यर्थः। धर्म्माधर्म्मजीवपुद्गल-[2]कालद्रव्याणां लोकाकाशे अवगाहोऽवकाशो भवति, अलोकाकाशे धर्म्मादीनां द्रव्याणां प्रवेशो २० न भवतीत्यर्थः। यदि धर्म्माधर्मजीवपुद्गलकालानां लोकाकाशमधिकरणमाधारो वर्तते तर्हि आकाशस्य किमधिकरणमिति चेत् ? तन्न; आकाशस्याधिकरणमन्यन्न वर्तते, आकाशः[3] स्वप्रतिष्ठो वर्तते। यद्याकाशः स्वप्रतिष्ठोऽस्ति तर्हि धर्मादयोऽपि स्वप्रतिष्ठा एव, यदि धर्मादीना-माधारोऽन्यः प्रकल्प्यते भवद्भिः तर्हि आकाशस्याप्याधारोऽन्यः कल्प्यताम्, [4]एवञ्च सति अनवस्थाप्रसङ्गो भवतीति ; तन्न ; आकाशादधिकपरिमाणमन्यद् द्रव्यं न वर्तते यस्मिन् द्रव्ये २५ आकाशं स्थितमिति कथ्यते। आकाशो हि सर्वतोऽनन्तः। धर्मादीनां यत्पुनराधार आकाशः कल्प्यते तद्व्यवहारनयापेक्षया। एवम्भूतनयापेक्षया तु सर्व्वाण्यपि द्रव्याणि स्वप्रतिष्ठानि वर्तन्ते। एवम्भू[5]त इति कोऽर्थः ? निश्चयनय इत्यर्थः। तथा चाभाणि—

"ते पुणु वंदउं सिद्धगण जे अप्पाणि वसंति।
लोयालोउवि सयलु इहु अच्छहिं विमलु णियंत ॥"[6] [परमात्मप्र० १।५]

---

१ –दृशाः भ– ता०। २ –कालद्रव्याणां लो– आ०, ज०। ३ –शस्तु स्व– आ०, ज०। ४ एवं सति अनवस्थाप्रसङ्गोपि भ– आ०, ज०। ५ –भूतमिति ता०। ६ तान् पुनर्वन्दे सिद्धगणान् ये आत्मनि वसन्ति। लोकालोकमपि सकलमिह तिष्ठन्ति विमलं पश्यन्तः।

तथा च लोके केनचित् पृष्टं क त्वं तिष्ठसि ? स चाह—अहमात्मनि तिष्ठामि। अत्र आधाराधेयकल्पनायाः प्रयोजनं किम् ? इदमेव प्रयोजनं यल्लोकाकाशाद् बहिः न किमपि द्रव्यं वर्तते अन्यत्राकाशात्। अथ कश्चिदाह लोके वस्तूनामाधाराधेयभावः पूर्वोत्तरकालभावी दृश्यते। यथा पिटकः पूर्वं स्थाप्यते पश्चात् बदरादीनि तत्राधीयन्ते, तथा पूर्वकाले आकाशः स्थाप्यते उत्तरकाले तु धर्मादीन्याधीयन्ते, तेनोपचारेणापि आधाराधेयकल्पना न वर्तते; ५ सत्यम्; समकालभाविनामपि पदार्थानामाधाराधेयभावो दृष्ट एव घटवत्, यथा घटे रूपादयः काये करादयो युगपद् दृश्यन्ते तथा आकाशे धर्म्मादयो युगपद् भवन्तीति नास्ति दोषः।

आकाशं द्विप्रकारम्—लोकाकाशम् अलोकाकाशं च। कस्मात् ? [1] धर्माधर्मास्तिकायभावात्। असति धर्मास्तिकाये जीवपुद्गलानां गतिहेत्वभावो भवति, असति अधर्मास्तिकाये स्थितिहेत्वभावो भवति, उभयाऽभावे गतिस्थित्यभावे लोकालोकविभागो न भवेत्। अत १० एव गतिस्थितिसद्भावे लोकालोकविभागः सिद्धः।

अथ धर्म्माधर्मयोः विशेषशक्तिसूचनार्थं सूत्रमिदं प्रतिपालयन्ति—

धर्म्माधर्म्मयोः कृत्स्ने ॥ १३ ॥

धर्मश्चाधर्मश्च धर्माधर्मौ तयोः धर्माधर्मयोः। धर्मस्य अधर्मस्य च कृत्स्ने सर्वस्मिन् लोकाकाशे अवगाहो भवति, गृहस्थितस्य घटस्येव नियतोऽवगाहो नास्तीत्यर्थः किन्तु सर्वत्र १५ लोकाकाश एतयोर्द्वयोरवकाशोऽस्ति तिलेषु तैलवत्। स चावगाहः अवगाहनशक्तियोगाद् भवति, परस्परप्रवेशे सति परस्पर[2]स्य व्याघातो न भवति। अत्राह कश्चित्—स्थितिदानस्वभावस्य अधर्मद्रव्यस्य लोककाशे स्थितस्य परतोऽभावात् कथमलोकाकाशः स्थितिं करोति ? तथा कालद्रव्यं विना कथमलोकाकाशो वर्तते ? सत्यम्; यथा—तप्तायःपिण्डो जलपार्श्वे स्थितः एकस्मिन् पार्श्वे जलाकर्षणं करोति तज्जलं सर्वत्र लोहपिण्डे व्याप्नोति तथा लोकस्य पार्श्वे २० स्थितमलोकाकाशम् अधर्मं कालद्रव्यञ्च स्पृशत् स्थितिं करोति वर्तते च।

अतः (अथ) कारणात् विपरिणतानां मूर्तानाम्[3] एकप्रदेशसङ्ख्येयासङ्ख्येयानन्त[4]प्रदेशानामवगाहनविशेषपरिज्ञापनार्थं सूत्रमिदमाहुः—

एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥ १४ ॥

एकश्चासौ प्रदेशः एकप्रदेशः, एकप्रदेश आदिर्येषां द्वित्र्यादिप्रदेशानां ते एकप्रदेशादयः २५ तेषु एकप्रदेशादिषु। पुद्गलानामेकप्रदेशादिषु अवगाहो भाज्यो विकल्पनीयः भाषणीय इत्यर्थः। यथा व्याकरणे अवयवेन विग्रहो भवति समुदायः समासार्थो भवति तथा एकप्रदेशोऽपि गृह्यते बहवश्च प्रदेशा गृह्यन्ते। तथाहि—एकस्मिन् विहायःप्रदेशे एकस्य परमाणोरवगाहो भवति, एकस्मिन्नाकाशे द्वयोः परमाण्वोश्चावगाहो भवति, एवमेकस्मिन्नाकाशप्रदेशे त्र्यादीनामपि सङ्ख्येयासङ्ख्येयानन्तप्रदेशानां स्कन्धानामवकाशो वेदितव्यः। तथा द्वयोराकाशप्रदेशयोः ३०

---

१ धर्मास्तिकायभावात् व०। धर्मास्तिकायाभावाभा– व०। २ –परव्या– आ०। ३ –नाम प्रदेश सं– ता०, व०। ४ –यानन्त– ज०, आ०।

द्वौ परमाणू अबद्धौ अवकाशं प्राप्नुतः; त्रिषु च आकाशप्रदेशेषु द्वौ च परमाणू बहवश्च परमाणवो बद्धा अबद्धाश्चावगाहं लभन्ते। सोऽवगाहो लोकाकाशप्रदेशेष्वेव न परत इति प्रत्येतव्यम्। ननु धर्माधर्मौ अमूर्तौ वर्तेते तेन कारणेन यदि एकत्र अविरोधेनावरोधं लभेते अवस्थानम् अवगाहं लभेते, तत् युक्तम्, पुद्गलास्तु मूर्तिमन्तः ते एकसंख्येयासंख्येयप्रदे-
५ शेषु लोकाकाशेषु कथमेकसङ्ख्येयासङ्ख्येयप्रदेशाश्चकारादनन्तप्रदेशाश्च पुद्गलस्कन्धा अवस्थानं लभन्ते इति ? अत आह—सत्यम्; अवगाहनस्वभावान् सूक्ष्मपरिणामाच्च[3] तथा-विधे क्षेत्रे मूर्तिमन्तोपि अवस्थानं लभमानाः पुद्गलस्कन्धा न विरुद्ध्यन्ते। यथा [4]एकस्मिन्न-पवरके अनेके प्रदीपादिप्रकाशा अवगाहं लभन्ते तथा एकादिप्रदेशेष्वपि अनन्ताश्च पुद्गल-स्कन्धा अवकाशं लभन्त इति वेदितव्यम्। तथा प्रमाणभूतश्चागमोऽत्र वर्तते—

१० "[5]ओगाढगाढणिचिदो पुग्गलकायेहिं सव्वदो लोगो।
सुहुमेहिं बादरेहिं य णंताणंतेहिं विविहेहिं॥" [पवयणसा० २।७६]

तत्र महाकर्पासपिण्डोपि दृष्टान्तः।

अथ विज्ञातमेतत् पुद्गलानामवगाहनम्। जीवावगाहनं कीदृशमिति भण्यते—

असङ्ख्येयभागादिषु जीवानाम्॥ १५॥

१५ संख्यायते संख्येयः न संख्येयः असंख्येयः, असंख्येयो भाग आदिर्येषां भागानां ते असंख्येयभागादयस्तेषु असंख्येयभागादिषु। जीवन्ति जीविष्यन्ति जीवितपूर्वा वा जीवाः, तेषां जीवानाम्, लोकाकाशे असंख्येयभागादिषु अवगाहो भवति। कोऽर्थः ? लोकाकाशस्य असंख्येया भागाः क्रियन्ते, तेषां मध्ये एको भागो गृह्यते, तस्मिन्नेकस्मिन् भागे एको जीव-स्तिष्ठति। आदिशब्दात् द्वयोर्भागयोरेको जीवस्तिष्ठति, तथा त्रिषु भागेष्वेको जीवस्तिष्ठति, तथा
२० चतुर्षु भागेष्वेको जीवस्तिष्ठति। एवं पञ्चादिष्वपि भागेषु एको जीवस्तिष्ठति तथा यावत् सर्वानपि भागान् लोकपूरणापेक्षया व्याप्नोति। नानाजीवानां त्ववगाहः सर्व एव लोको वर्तते। अत्राह कश्चित्—यद्येकस्मिन् असंख्येयभागे एको जीवोऽवतिष्ठते तर्हि एकस्मिन् भागे द्रव्यप्रमाणतोऽनन्तानन्तो जीवराशिः शरीरसंयुक्तः कथमवतिष्ठते ? सत्यम्; लोका-काशे सूक्ष्मबादरभेदात् अवस्थितिः प्रत्येतव्या। तत्र बादराः परकृतबाधया चोपघातं लभन्ते,
२५ सूक्ष्मजीवास्तु सशरीरा अपि सूक्ष्मत्वात् एकस्मिन्निगोदजीवाऽव[6]गाढे प्रदेशेऽनन्ताऽनन्ता वसन्ति, ते सूक्ष्माः प्राणिनः परस्परेण प्रतिघातं न लभन्ते, बादरैश्च नैव प्रतिहन्तुं शक्यन्ते तेनावगाहविरोधो नास्ति।

अथ 'लोकाकाशतुल्यप्रदेशे किल एको जीवोऽवतिष्ठते इत्युक्तं भवद्भिः, तस्य [7]लोका-

---

१ –णवश्च त्र– आ०, ज०, ब०। २ –स्थाने अवगाहनं ल– आ०, ज०, ब०। ३ –मत्वाच्च आ०, ज०। ४ एकस्मिन्नेव आकाशे अनेके आ०, ज०, ब०। ५ अवगाढगाढ-निचितः पुद्गलकायैः सर्वतो लोकः। सूक्ष्मैः बादरैश्च अनन्तानन्तैः विविधैः॥ ६ –वगाहे प्र– आ०, ज०, ब०। ७ लोकसंख्येय– ब०। लोकस्यासंख्येय– ज०, आ०, ब०।

संख्येयभागादिषु प्रवृत्तिः कथम् सर्वलोकव्याप्तिर्भवत्येकस्य जीवस्य' इति प्रश्ने सति लोकप्रसिद्धदृष्टान्तेन अल्पप्रदेशव्याप्तिरपि भवतीति प्रतिपादनार्थं [2]सूत्रं स्वामिनः प्राहुः—

प्रदेशसंहारविसर्प्पाभ्यां प्रदीपवत् ॥ १६ ॥

प्रदिश्यन्ते प्रसार्य्यन्ते सङ्कोच्यन्ते वा प्रदेशाः, संहरणं सङ्कोचनं संहारः, विसर्पणं प्रसारणं विसर्पः, संहारश्च विसर्प्पश्च संहारविसर्पौ, प्रदेशानां संहारविसर्पौ प्रदेशसंहारविसर्पौ, ५ ताभ्यां प्रदेशसंहारविसर्पाभ्याम् । अस्यायमर्थः—लोकस्य असङ्ख्येयभागादिषु जीवस्यावगाहः प्रवृत्तिर्भवति । कस्मात् ? प्रदेशानां संहारात् सङ्कोचात् अल्पक्षेत्रे जीवस्तिष्ठति, प्रदेशानां विसर्पात् प्रसरणात् जीवो बहुषु भागेषु तिष्ठति । एवं व्याख्याने सति प्रदेशसंहारविसर्पाभ्यामित्यत्र पञ्चमीद्विवचनं घटते । करणापेक्षया तृतीयाद्विवचनं च घटते, तत्र प्रदेशसंहारेण प्रदेशविसर्पेण चेति व्याख्यातव्यम् । प्रदेशानां संहारः कथं विसर्प्पश्च कथं भवति ? प्रदीप- १० वत्—यथा प्रदीपस्य प्रकाशः निरावरणाकाशप्रदेशे अनवधृतप्रकाशपरिमाणं भवति, स एव दीपः यदा वर्द्धमानेन—शरावेण आव्रियते तदा तस्य प्रदीप[3]प्रकाशस्य शरावमात्रक्षेत्रे प्रवृत्तिर्भवति । यदा तु मानिकया [4]ढक्कणिकया स्थालीपिधानेन आव्रियते तदा शरावक्षेत्रात् किञ्चित् बहुतरक्षेत्रे प्रदीपप्रकाशप्रवृत्तिः भवति । यदा तु स एवं प्रदीपः कुण्डेनाव्रियते तदा मानिकाक्षेत्रात् किञ्चिन् बहुतरक्षेत्रे प्रदीपप्रकाशप्रवृत्तिर्भवति । यदा स एव प्रदीपः अपवर- १५ कादिनाव्रियते तदा तस्मादपि अधिकप्रकाशो भवति । एवं जीवोऽपि यद्यपि अमूर्तस्वभावो वर्तते तथापि अनादिसम्बन्धैक्यात् कथञ्चिन् मूर्तो भवन् कार्मणशरीरवशात् अणुशरीरं महच्छरीरञ्चाधितिष्ठन् तच्छरीरवशात् प्रदेशानां संहरणं विसर्पणं च करोति । तावत्प्रमाणतायाम् [6]सत्याम् असङ्ख्येयभागादिषु प्रदेशप्रवृत्तिर्जीवस्योपपद्यते । ननु धर्म्मादीनां परस्परप्रदेशानुप्रवेशो यदा भवति तदा सङ्करः सञ्जायते व्यतिकरो भवति। कोऽर्थः ? एकत्वं प्राप्नोति ; २० सत्यम् ; धर्मादीनामन्योन्यमत्यन्तश्ले[8]षेऽपि सति—व्यामिश्रतायामपि सत्यां धर्म्मादीनि द्रव्याणि निजनिजस्वभावं न मुञ्चन्ति—धर्मो मिलितोऽपि गतिं ददाति, अधर्मो मिलितोऽपि स्थितिं ददाति, आकाशो मिलितोऽपि अवकाशं ददाति इत्यादि स्वभावस्यापरिहारो वेदितव्यः । तथा चाभाणि—

"अण्णोण्णं पविसंता देंता अवकासमण्णमण्णस्स । २५
मिल्लंता वि य णिच्चं सगसब्भावं ण विजहंति ॥"[9]

[पंचास्ति० गा० ७]

अथ कस्तेषां स्वभाव इति प्रश्ने धर्म्माधर्मयोः स्वभावस्तावदुच्यते—

---

१ –कजी –ब० । २ सूत्रमिदं स्वा– आ०, ज०, ब० । ३ –पस्य प्र– आ०, ज०, ब० । ४ ढर्ढ कणिकस्थालीकयावा आ– आ०, ज०, ब० । ५ एव दीपः आ०, ज०, ब० । ६ सत्यम् आ०, ब०, ज० । ८ –षे सति आ०, ज०, ब० । ९ अन्योन्यं प्रविशन्तः ददन्तोऽवकाशमन्योऽन्यस्य । मिलन्तोऽपि च नित्यं स्वकस्वभावं न विजहन्ति ॥

गतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः ॥ १७ ॥

गमनं गतिः, स्थानं स्थितिः, उपगृह्यते इत्युपग्रहः। शब्दविग्रहः कृतः। इदानीं समासविग्रहः क्रियते—देशान्तरप्राप्तिकारणं गतिः, देशान्तराप्राप्तिप्रत्यया स्थितिः, गतिश्च स्थितिश्च गतिस्थिती, ते एव उपग्रहोऽनुग्रहः[1] कारणत्वं गतिस्थित्युपग्रहः। धर्मश्च अधर्मश्च ५ धर्माधर्मौ तयोः धर्माधर्मयोः। उपक्रियते इत्युपकारः। **"कर्तृकर्मणोः कृति नित्यम्"** [का० सू० २।४।४१] इति[2] वचनात्। धर्माधर्मयोरित्यत्र कर्तरि षष्ठी ज्ञातव्या। तेनायमर्थः—गत्युपग्रहो गतिकारणं धर्मेण कर्तृभूतेन जीवपुद्गलानाम् उपकारः कर्मतापन्नः क्रियते। स्थित्युपग्रहः स्थितिकारणमधर्मेण कर्तृभूतेन जीवपुद्गलानामुपकारः कर्मतापन्नः क्रियते। गतिस्थितिकारणं धर्माधर्मयोः उपकारः कार्यं भवतीत्यर्थः। एवं चेत् 'गत्युपग्रहः'[3] १० इत्यत्र द्विवचनं घटते, उपकारशब्देपि द्विवचनं घटते; तन्नाशङ्कनीयम्; सामान्येन व्युत्पादितः शब्दः उपात्तसङ्ख्या शब्दान्तरसम्बन्धेऽपि सति तत्पूर्वोपात्तसंख्यां न मुञ्चति। धर्माधर्मयोरित्यत्र द्विवचनसहितशब्दसम्बन्धेपि सति उपग्रह उपकारश्च द्वौ शब्दौ एकवचनत्वं न मुञ्चत इत्यर्थः, यथा 'मुनेः कर्तव्यं तपःश्रुते' इति। अत्रायमर्थः—गतिपरिणामयुक्तानां जीवपुद्गलानाम् उभयेषां गतिकारणे कर्तव्ये धर्मास्तिकायः सामान्याश्रयो भवति मीनानां १५ गमनप्रयोजने तोयवत्। एवं स्थितिपरिणामयुक्तानां जीवपुद्गलानाम् उभयेषां स्थित्युपग्रहे स्थितिकारणे उपकारे कर्तव्ये सति अधर्मास्तिकायः सामान्याश्रयो भवति अश्वादीनां स्थितिप्रयोजने सति पृथिवीधातुवत्। कोऽर्थः ? दधातीति धातुराधारः, पृथिव्येव धातुः पृथिवीधातुः, भूम्याधार इवेत्यर्थः। ननु उपग्रहशब्दोऽप्रयोजनः, उपकारशब्देनैव सिद्धत्वात्, तेन ईदृशं सूत्रं क्रियताम्। ईदृशं कीदृशम् ? 'गतिस्थिती धर्माधर्मयोरुपकारः'; सत्यम्; २० यथासङ्ख्यं मा भूत् इत्युपग्रहशब्दग्रहणम्। एवं सूत्रे सति धर्माधर्मयोः गतिस्थित्योश्च यथासङ्ख्ये जाते सति जीवपुद्गलानामपि यथासङ्ख्यं[4] जायते। तथा सत्ययं दोष उत्पद्यते। कोऽसौ दोषः ? धर्मस्योपकारो गतिर्जीवानां भवति, अधर्मस्योपकारः स्थितिः पुद्गलानां भवति, एवं सति महान् दोषः सम्पनीपद्यते तद्दोषनिराकरणार्थम् उपग्रहशब्दो गृह्यते। ननु धर्माधर्मयोरुपकारः गतिस्थितिलक्षण आकाशस्य सङ्गच्छते, यत आकाशे जीवाश्च २५ पुद्गलाश्च गच्छन्ति च तिष्ठन्ति च किं धर्माधर्मद्रव्यद्वयग्रहणेन ? सत्यम्; आकाशस्यापरोपकारस्य विद्यमानत्वात्। कोऽसावपरोपकारः ? धर्माधर्मजीवपुद्गलकालानामवगाहनमाकाशस्य[5] प्रयोजनम् **"आकाशस्यावगाहः"** [त० सू० ५।१८] इति वचनात्। [6]एकस्य द्रव्यस्य अनेकप्रयोजनस्थापनायां लोकालोकभेदो न स्यात्। ननु पृथिवीतोयादीन्येव तदुपकारसमर्थानि किं प्रयोजनं धर्माधर्माभ्यामिति ? सत्यम्; पृथिवीजलादीनि असाधारणाश्रयः। कथमसाधारणाश्रयः ? पृथिवीमाश्रित्य कश्चित् गतिं करोति कस्यचित् (कश्चित्) गतिभङ्गं

---

१ -हका- आ०, ज०, ब०, व०। २ -ति योगवच- आ०, ज०, ब०। ३ -ग्रहः स्थित्युपग्रह इ- व०। ४ -संख्ये जा- आ०, ब०, ज०। ५ -द्गलानामव- व०। ६ एकद्रव्य- व०

करोति, जलमपि कस्यचित् गतिं ददाति कस्यचिद् गतेः प्रतिबन्धकं भवति, तेन पृथिवी-जलादीनि विशेषोक्तानि एकस्य कार्यस्य अनेककारणसाध्यानि च तेन धर्माधर्मौ साधारणाश्रयः गतिस्थित्योरिति तावेव प्रमाणम्। ननु धर्माधर्मौ तुल्यबलौ वर्तेते तेन धर्मः स्थितिप्रतिबन्धको भविष्यति अधर्मस्तु गतिप्रबन्धको भविष्यतीति चेन्; न; तौ अप्रेरकावुक्तौ, धर्मो गतिकार्ये न प्रेरकः अधर्मश्च स्थितिकार्ये न प्रेरकः तेन न परस्परं प्रतिबन्धकाविति। ननु धर्माधर्मौ नोपलभ्येते तेन तौ न स्तः खरविषाणवदिति चेन्; न; सर्वेषां प्रवादिनामविप्रतिपत्तेः धर्म्माधर्म्मौ विद्येते एव। सर्वे हि प्रवादिनः प्रत्यक्षानप्रत्यक्षांश्च अर्थानभिवाञ्छन्ति, तेन अनुपलब्धिरिति हेतुः अस्मान् प्रति न सिद्ध्यति। यथा च निरतिशयप्रत्यक्षकेवलज्ञान-लोचनेन सर्वज्ञवीतरागेण धर्मादयः पदार्थाः सर्वे उपलभ्यन्ते "**सर्वद्रव्यसर्वपर्यायेषु केवलस्य**" [त० सू० १।२९] इति वचनात्, तस्य च उपदेशात् श्रुतज्ञानिभिरपि धर्म्मादय उपलभ्यन्ते।

अथात्राह कश्चित्—उपकारसम्बन्धबलेन अतीन्द्रिययोरपि धर्माधर्मयोरस्तित्वं भवद्भिरवधृतम्, ताभ्यामनन्तरं यदुक्तमाकाशं तस्य कः प्रवर्तत उपकारो येनातीन्द्रियस्यापि तस्याधिगमः सञ्जायते विदुषामिति प्रश्ने सूत्रमिदमाहुः—

आकाशस्यावगाहः ॥ १८ ॥

आ समन्तात् काशते चमत्करोति इति आकाशः। अवगाहनमवगाहः जीवपुद्गलादीनाम् अवगाहिनामवकाशदानमवगाह उच्यते। सः अवगाह आकाशस्य सम्बन्धी उपकारो भवति, जीवपुद्गलानाम्[1] आकाशेन उपकारः क्रियते इत्यर्थः। ननु जीवपुद्गला अवगाहिनः क्रियावन्तो वर्तन्ते तेषामवकाशदानम् आकाशस्य साम्प्रतमेव युक्तमेव[2], घटत एव—सङ्गच्छत इति यावत्, परं निष्क्रियाणां नित्यसम्बन्धानां धर्मास्तिकायादीनामवगाहः कथं घटते? सत्यम्; निष्क्रियाणामपि धर्मादीनाम् उपचारादवगाहः सङ्गच्छते। यथा सर्वं गच्छति इति सर्वगतः, आकाशस्तु गमनाऽभावे सर्वगत इत्युच्यते। कस्मात्? [3]न्यत्यत्ततो विद्यमानत्वात्। तथा धर्म्माधर्मावपि सर्वत्र व्याप्तिदर्शनादवगाहनक्रियाऽभावेपि अवगाहिनौ इत्युपचर्येते[4]। ननु आकाशस्य अवकाशदानं श्रीमद्भिरुच्यते तर्हि कुलिशादिभिः लोष्टादीनां मृत्पिण्डादीनां व्याघातो न भविष्यति, तथा [5]एडुकादिभिरश्वादीनां च व्याघातो न भविष्यति; सत्यम्; भिदुरपाषाणादीनां स्थूलत्वं वर्तते तेन स्थूलेन स्थूलो व्याहन्यत एव। कुलिशादीनां शिलादिव्याहनने आकाशस्यावकाशदानसामर्थ्यं न हीयते अवगाहिनामेव परस्परव्याघातात्। स्थूला वज्रादयोऽन्योन्यमवकाशदानं यदि न कुर्वन्ति तदा किमाकाशस्य दोषः? ये खलु सूक्ष्मपुद्गलाः तेऽपि अन्योन्यमवकाशदानं विदधति कथं सूक्ष्ममाकाशं सूक्ष्माणां धर्मादीनामवकाशं न ददाति? एवं चेत् आकाशस्यासाधारणम् अवकाशदानं लक्षणं न

१ -पुद्गलानां आ०, ब०, ज०। २ युक्तं घ- आ०, ब०, ज०। ३ प्रत्यक्ष- आ०, ब०, ज०। ४ -पचर्यते आ०, ब०, ज०, व०। ५ एडका- आ०, ब०।

भवति । कस्मात् ? अन्येषामवकाशदानसम्भवात् । सत्यम् ; आकाशस्याधारणं लक्षणमस्त्येव । कस्मात् ? सर्वेषां पदार्थानां साधारणावगाहनकारणत्वात् । ननु अलोकाकाशस्य अवगाहनदानाभावात् स्वलक्षणप्रच्यवनात् आकाशस्याभावः; सत्यम् ; स्वभावस्य अपरित्यागात् कथमाकाशस्याऽभावः ।

५ अथेदानीं पुद्गलानामुपकारो निरूप्यते—

शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् ॥ १९ ॥

शीर्यन्ते विघटन्ते शरीराणि, उच्यते वाक्, मन्यते मनः, प्राणिति जीवति येन जीवः स प्राणः, [2]अपअनिति हर्षेण जीवति विकृत्या वा जीवति येन जीवः सः अपानः, कोष्ठात् बहिर्निर्गच्छति यः स प्राण उच्छ्वास इत्यर्थः, बहिर्वायुरभ्यन्तरमायाति यः सः अपानः
१० निःश्वासः, प्राणश्च अपानश्च प्राणापानौ । शरीराणि च वाक् च मनश्च प्राणापानौ च शरीरवाङ्मनःप्राणापानाः । पूर्वं पूर्यन्ते पश्चाद् गलन्ति ये ते पुद्गलास्तेषां पुद्गलानाम्[3] । पुद्गलानां सम्बन्धिनः एते शरीरादयः पञ्च उपकाराः जीवानां भवन्ति ।

तत्र तावत् औदारिकवैक्रियिकाहारकतैजसकार्म्मणानि शरीराणि पञ्च । तत्र पञ्चसु शरीरेषु मध्ये यानि कार्मणानि तानि सूक्ष्माणि अप्रत्यक्षाणि तैरुत्पाद्यन्ते[4] उपचयशरीराणि ।
१५ उपचयशरीराण्यपि कानिचित् प्रत्यक्षाणि भवन्ति कानिचित् अप्रत्यक्षाणि भवन्ति, तेषां सर्वेषां शरीराणां कारणं [5]कर्माणीति ज्ञातव्यम् । आत्मपरिणामं निमित्तमात्रं प्राप्य पुद्गलाः कर्मतया परिणमन्ते, तैस्तु कर्मभिरौदारिकादीनि शरीराणि उत्पद्यन्ते । तेन सर्वाणि शरीराणि पौद्गलिकानि भवन्ति जीवानामुपकारेषु[6] प्रवर्तन्ते । तथा चोक्तम्—

"जीवकृतं परिणामं निमित्तमात्रं प्रपद्य पुनरन्ये ।
२० स्वयमेव परिणमन्तेऽत्र पुद्गलाः कर्मभावेन ॥" [पुरुषार्थसि० श्लो० १२]

ननु औदारिकादीनि शरीराणि आहारवन्ति तेषां पौद्गलिकत्वं सङ्गच्छत एव, कार्मणन्तु शरीरमनाहारकं तत्कथं पौद्गलिकमित्युच्यते ? सत्यम् ; कार्मणमपि शरीरं पौद्गलिकमेव, कर्मविपाकस्य मूर्तिमद्भिः सम्बन्धे सति उत्पत्तिनिमित्तत्वात् यथा व्रीह्यादीनां परिपाकः सलिलादिद्रव्यैः सम्बन्धे सति भवति तथा कार्मणमपि शरीरं सिताकण्टकादि-
२५ मूर्तिमद्द्रव्यसम्बन्धे सति विपच्यते बन्धमायाति तेन कार्मणमपि शरीरं पौद्गलिकमित्युच्यते । कथमन्यथा प्राणवल्लभं पश्यन्त्याः कमनीयकामिन्याः कञ्चुकस्तुट्यति रोमाञ्चकञ्चुकँवशात् ।

या वाक् पौद्गलिकी सा द्विप्रकारा—द्रव्यवाक्-भाववाक्प्रभेदात् । वीर्यान्तरायक्षयोपशमे सति मतिज्ञानावरणश्रुतज्ञानावरणक्षयोपशमे सति च अङ्गोपाङ्गनामकर्मलाभे च सति भाववाक् उत्पद्यते । सापि पुद्गलाश्रयत्वात् पौद्गलिकीत्युच्यते । यदि पूर्वोक्तकर्म्मपुद्गलक्षयोपशमो

---

१ –शदानस्या– आ०, ब०, ज० । २ अपनिति आ०, ब०, ज०, व० । ३ –नां स– आ०, ब०, व०, ज० । ४ –न्ते पंचशरीराणि उप– आ०, ब०, ब० । ५ कर्मणीति ता० । कार्मणीति व० । ६ –षु व– आ०, ब० । ७ –कवत् आ०, ब०, ज० ।

न भवति अङ्गोपाङ्गनामकर्मलाभश्च न स्यात् तदा वागुच्चारण उत्साहो नोत्पद्यते तेन भाववाक् पौद्गलिकी भवति। भाववाक्सामर्थ्यसहितेन जीवेन चेष्टावता चोद्यमानाः पुद्गलाः वचनत्वेन विविधं परिणमन्ते, तेन कारणेन द्रव्यवागपि स्फुटं पौद्गलिकी भवति। सा द्रव्यवाक् शब्दग्रहेन्द्रियगोचरा भवति। ननु पौद्गलिकी वाक् कर्णेन्द्रियविषया यथा भवति तथाऽपरेन्द्रियविषया कथन्न स्यात्? सत्यम्; अपरेन्द्रियाणां वाचोयुक्तौ अनुचितत्वात् तद्विषया ५ न स्यात्, गन्धग्राहकनासिकेन्द्रियस्य रसाद्यविषयत्ववत्।

ननु वागमूर्ता कथं पौद्गलिकी भवद्भिरुच्यते? सत्यम्; मूर्तिमद्ग्रहणावरोधव्याघाताभिभवादिसद्भावात् वाग् मूर्तिमत्येव। अस्यायमर्थः—वाक् मूर्तिमता कर्णेन्द्रियेण यदि गृह्यते तर्हि कथममूर्त्ता? तथा, मूर्तिमता कुड्यादिना यदि अवरुध्यते प्रतिबध्यते तर्हि कथं वागमूर्ता? तथा, वाग्ग्राहकमपि श्रोत्रेन्द्रियं काहलादिशब्देनान्तरितमपरं शब्दं ग्रहीतुं न १० शक्नोति बधिरत्वलक्षणो व्याघातो भवति वाक् कर्णेन्द्रियमागन्तुं न शक्नोति। शब्देन व्याहन्यमाना वाक् कथममूर्ता? तथा, मूर्तियुक्तेन प्रतिकूलेन मरुता वाक् व्याहन्यते कथममूर्ता? तथाभिमतप्रदेशे गच्छतः पदार्थस्य व्यावर्तनम् अभिभव उच्यते। स कर्णेन्द्रियस्य झटिति शब्दग्रहणजननसामर्थ्यं घटादिशब्दैः खण्ड्यते तिर्यग्वातेन च शब्दोऽभिभूयते कथं वाक् अमूर्ता? तथा, पटहादिशब्दैर्मशकादिशब्दा अभिभूयन्ते। तदेतदसमीक्षाभिधानं वाचाममूर्तत्वं १५ भवद्भिः कृतमिति।

मनोऽपि द्रव्यभावभेदाभ्यां द्विप्रकारम्। तत्र द्रव्यमनः ज्ञानावरणवीर्यान्तरायक्षयोपशमाङ्गोपाङ्गनामलाभहेतवः पुद्गला जीवस्य गुणदोषविचारस्मरणादिप्रणिधानाभिमुखस्य उपकारका मनस्त्वेन परिणताः द्रव्यमनः पौद्गलिकमेव। भावमनोऽपि लब्ध्युपयोगलक्षणम्। तदपि पुद्गलावलम्बनं पौद्गलिकमेव जीवस्योपकारकं भवति। ननु मनोऽणुमात्रम्, कोऽर्थः? २० सूक्ष्मम्, द्रव्यान्तररूपरसादिपरिणामरहितं पौद्गलिकं कथम्? सत्यम्; मनः पौद्गलिकमेव। अणुमात्रं मनो हृषीकेणात्मना च सम्बद्धम्, असम्बद्धं वा? असम्बद्धं चेत्; तत् आत्मन उपकारकं न भवति, हृषीकस्य च सहायत्वं न विदधाति। यदि हृषीकेणात्मना च सम्बद्धं वर्तते, तर्हि एकस्मिन् प्रदेशे सम्बद्धं सत् तन्मनः अणु सूक्ष्ममपरेषु प्रदेशेष्वात्मन उपकारं नो विदध्यात्? अपि तु विदध्यादेव। तेन पौद्गलिकेन इन्द्रियेण मिलितस्यात्मनः २५ उपकारं कुर्वत् पौद्गलिकमेव। भवतु नाम उपकारकं मनः, अदृष्टवशादस्य मनसः आत्मा आलातचक्रवत् उल्मुकचक्रवत् परिभ्रमणं करोति; तन्न; परिभ्रमणसामर्थ्याभावात्। आत्मा ह्यमूर्तः निष्क्रियश्च वर्तते, तस्यात्मनः अमूर्तत्वं निष्क्रियत्वञ्च गुणोऽदृष्टो वर्तते, स आत्मा क्रियारहितः सन् मनसः क्रियारम्भं कर्तुमसमर्थः। मारुतद्रव्यविशेषस्य क्रियावतः स्पर्शवतश्च गुणो दृष्टो वर्तते स मा (म)रुतो वनस्पतेश्च परिस्पन्दहेतुर्भवति तद्युक्तमेव, आत्मा तु ३०

---

१ –गलाभ–आ०, ब०, ज०। २ अथ तु ब०।

निष्क्रियः स्पर्शरहितश्च मनसः क्रियाहेतुर्न भवति। अत्र निश्चयनयो योजनीयः। उपचारेण तु क्रियाहेतुरस्त्येव जीवः।

अथ प्राणापानस्वरूपं निरूप्यते–वीर्यान्तरायस्य ज्ञानावरणस्य च क्षयोपशमम् अङ्गोपाङ्ग-नामकर्मोदयं चापेक्षमाणो जीवोऽयं कोष्ठवातं बहिरुदस्यति प्रेरयति स वातः प्राणः उच्छ्वासा-५ परनामधेयः। तथा, तादृग्विधो जीवः बहिर्वातमभ्यन्तरे करोति गृह्णाति नासिकादिद्वारेण सोऽपानः निश्वासापरनामधेयः। तौ द्वावपि जीवस्य जीवितकारणत्वात् अनुग्राहिणौ उपका-रकौ भवतः। ते मनःप्राणापानाः त्रयोऽपि प्रतिघातादिविलोकनात् मूर्तिमन्तो भवन्ति। मनःप्रतीघातो विद्युत्पातादिभिर्विलोक्यते, मनोऽभिभवो मद्यादिभिर्दृश्यते। प्राणा-पानप्रतीघातः करतलपुटादिमुखसंवरणाद् भवति, प्राणापानाभिभवः [1]सिध्मना निरीक्ष्यते। १० यदि मनःप्राणापाना अमूर्ता भवन्ति तर्हि मूर्तिमद्भिः अशन्यादिभिरभिघातादयो न भवन्ति, ते च दृश्यन्ते, कथममी मूर्तिमन्तो न भवन्ति? अत एव कारणात् जीवस्यास्तित्वं सिद्धम्। यन्त्रप्रतिमाक्रिया यथा प्रयोक्तुरदृश्यमानस्याप्यस्तित्वं कथयति तथा प्राणापानादिक्रियापि जीवस्य क्रियावतोऽस्तित्वं सिद्धमाख्याति।

अथापरोऽपि जीवस्य पुद्गलादुपकार उच्यते—

१५ **सुखदुःखजीवितमरणोपग्रहाश्च ॥ २० ॥**

सुखयति सुखम्, दुःखयति दुःखम्, जीवनं जीवितम्, म्रियतेऽनेनेति मरणम्, उपग्रहणानि उपग्रहाः। सुखं च दुःखं च सुखदुःखम् [2]समाहारे द्वन्द्वः, तच्च जीवितञ्च मरणञ्च सुखदुःखजीवितमरणानि, तान्येव उपग्रहाः[3] उपकाराः सुखदुःखजीवितमरणो-पग्रहाः। एते चत्वारोऽपि पुद्गलानामुपकारा जीवस्य भवन्ति। सद्वेद्यासद्वेद्ययोरुदये अन्त-२० रङ्गहेतौ सति बहिर्द्रव्यादिपरिपाककारणवशादुत्पद्यमानः प्रीतिपरितापलक्षणः परिणामः सुखदुःखमुच्यते। भवधारणकारणस्य आयुष्कर्मण उदयात् भवस्थितिं धरतो जीवस्य प्राणा-पानक्रियायाः अविच्छेदो जीवितम्। प्राणापानक्रियोच्छेदो मरणमुच्यते। एतच्चतुष्टयं पुद्गल-कृतोपकारो जीवस्य वेदितव्यः। स मूर्तिमत्कारणसन्निधाने समुत्पद्यते यतस्ततः पौद्गलिक एव। ननु उपग्रहशब्देनोपकार[4] इत्युच्यते। स उपकारः अधिकारादेव लभ्यते किमर्थं पुन-२५ रुपग्रहणम्? इत्याह–सत्यम्; पुनरुपग्रहग्रहणं पुद्गलानां पुद्गलकृतोपकारसूचनार्थम्। तथाहि–ताम्रादीनामम्लादिभिरुपकारः, उदकादीनां कतकादिभिरुपकारः, लोहादीनां जलादिभिरुप-कारो भवति। चकारः समुच्चये वर्तते। तेन चक्षुरादीनि इन्द्रियाण्यपि शरीरादिवत् जीवो-पकारकाणि भवन्ति।

अथ ज्ञातो धर्माधर्माकाशपुद्गलोपकारः, जीवस्य क उपकार इति प्रश्ने ग्रहणमिद-३० मुच्यते—

---

१ रोगविशेषेण किलासनाम्ना। सिद्मानां नि– आ०, ब०, ज०। २ –हारो द्व– ता०, ३ –ग्रहाः सु– आ०, ब०, ज०। ४ –र उ– ता०, ब०।

परस्परोपग्रहो जीवानाम् ॥ २१ ॥

परस्पर: अन्योन्यसम्बन्धी, उपग्रहः कार्यम्, परस्परश्चासावुपग्रहः परस्परोपग्रहः। जीवानां प्राणिनाम् अन्योन्यस्य कार्यकरणम् उपकारो भवति। यथा [1]बापः पुत्रस्य पोषणादिकं करोति, पुत्रस्तु बप्तुरनुकूलतया देवार्चनादिकं कारयन् श्रीखण्डघर्षणादिकं करोति। तथा, यथा आचार्यः इहलोकपरलोकसौख्यदायकमुपदेशं दर्शयति तदुपदेशकृतक्रियानुष्ठानं कारयति, शिष्यस्तु [2]गुर्वानुकूल्यवृत्त्या तत्पादमर्दननमस्कारविधानगुणस्तवनाभीष्टवस्तुसमर्पणादिकमुपकारं करोति। तथा, यथा राजा किङ्करेभ्यो धनादिकं ददाति, भृत्यास्तु स्वामिने हितं प्रतिपादयन्ति अहितप्रतिषेधं च कुर्वन्ति, स्वामिनं च पृष्ठतः कृत्वा स्वयमग्रे भूत्वा स्वामिशत्रुभङ्गाय युद्ध्यन्ते। उपग्रहाधिकारे सत्यपि पुनरुपग्रहग्रहणं जीवानां परस्परं सुखदुःखजीवितमरणकरणोपकारसूचनार्थम्। तेन यथा सुखादिकं[3] चतुष्टयं पुद्गलोपकारः तथा जीवानामप्युपकारः। यो जीवो यस्य जीवस्य सुखं करोति स जीवस्तं जीवं बहुवारान् सुखयति, यो दुःखयति स तं बहुवारान् दुःखयति, यो जीवयति स तं बहुवारान् जीवयति, यो मारयति स तं बहुवारान् मारयति। तथा चाह योगीन्द्रो भगवान्—

> "मारिवि चूरिवि जीवडा जं तुहुँ दुक्खु करीसि।
> तं तह पासि अणंतगुण अवसेँ जीव लहीसि ॥ १ ॥
> मारिवि जीवहँ लक्खडा जं तुहुँ पावकरीसि।
> पुत्तकलत्तहँ कारणेण तं तुहुँ एक्कु सहीसि[4] ॥ २ ॥"

[परमात्मप्र० गा० १२५, १२६]

अथ यदि सत्तारूपेण वस्तुना उपकारः क्रियते इति विद्यमानस्य वस्तुनोऽनुमितिर्विधीयते भवद्भिः, तर्हि कालद्रव्यमपि सत्तारूपेण वर्तते कस्तस्योपकार [5]इत्याहुः—

वर्तना परिणाम[6]: क्रिया परत्वापरत्वे च कालस्य ॥ २२ ॥

वर्तना इत्येकं पदम्, परिणाम इति द्वितीयं पदम्, क्रियेति तृतीयं पदम्, परत्वापरत्वे इति चतुर्थं पदम्, च इति पञ्चमम्, कालस्येति षष्ठं पदमिति षट्पदं सूत्रमिदम्। क्वचित् चतुष्पदश्च दृश्यते, तदा 'वर्तनापरिणामक्रियाः' इत्येकं परत्वापरपरत्वे इति द्वितीयं पदम्, च इति तृतीयम्, कालस्येति चतुर्थम्। तदा ईदृग्विधः समासः वर्तना च परिणामश्च क्रिया च वर्तनापरिणामक्रियाः। परत्वञ्चापरत्वं च परत्वापरत्वे इतरेतरद्वन्द्वः। कल्यते ज्ञायते

---

१ पिता। २ गुरोरनुकूलवृ- आ०, ब०, ज०। गुर्वानुकूलवृ- व०। ३ -क चतु- ता०, ज०। ४ मारयित्वा जीवयित्वा जीवान् यत्त्वं दुःखं करिष्यसि। तत्तदपेक्षया अनन्तगुणमवश्यमेव जीव लभसे ॥ मारयित्वा जीवानां लक्षाणि यत्त्वं पापं करिष्यसि। पुत्रकलत्राणां कारणेन तत्त्वमेकः सहिष्यसे॥ ५ इत्यर्थः ब०। इत्याह ता०। ६ -मक्रि आ०, ब०। ७ सर्वार्थसिद्धितत्त्वार्थवार्तिकादौ।

निश्चीयते सङ्ख्यायते समयादिभिः पर्यायैः [१]मुख्यः कालो निर्णीयते यः सः कालः। **"अकर्तरि च कारके संज्ञायाम्"** [का० सू० ४।५।४] घञ्।

[२]वर्तन्ते स्वयमेव[३] स्वपर्यायैः बाह्योपग्रहं विना पदार्थाः, तान् वर्तमानान् पदार्थान् [४]अन्यान् प्रयुङ्क्ते या सा वर्तना। वृतेरिनन्तात् कर्मणि भावे वा युट् स्त्रीलिङ्गे वर्तना इति ५ भवति। वर्तते वर्तना इति कर्मणि विग्रहः। वर्तनं वर्तना इति भावे विग्रहः। अत्र लोकप्रसिद्धो दृष्टान्तः कथ्यते—यथा तण्डुलानां विक्लेदनं पचनं पाक उच्यते ते तु तण्डुलाः पच्यमानाः शनैः शनैः ओदनत्वेन परिणमन्ति तण्डुलानां स्थूलत्वदर्शनात् समयं समयं प्रति सूक्ष्मः पाको भवतीति निश्चीयते। यदि प्रतिक्षणं तण्डुलानां सूक्ष्मपाको न भवेत् तदा अनु अक्षतोचितस्थूलपाकस्याभावो भवेत्। एवं सर्वेषां द्रव्याणां स्थूलपर्यायविलोकनात् स्वयमेव वर्तनस्वभावत्वेन बाह्यं १० निश्चयकालं परमाणुरूपमपेक्ष्य प्रतिक्षणमुत्तरोत्तरसूक्ष्मपर्यायेषु वर्तनं परिणमनं यद् भवति सा वर्तना निर्णीयते। चेत् द्रव्याणां प्रतिसमयं परिणामो नैवं भवेत् तर्हि द्रव्याणां स्थूलपर्यायोऽपि न स्यात् तेन सा वर्तना अणुरूपस्य मुख्यकालस्य निमित्तभूतेति कारणात् वर्तनया कृत्वा मुख्यकालोऽणुरूपोऽस्तीति निश्चीयते। वर्तनालक्षणो निश्चयकालस्योपकार इत्यायातम्। ननु यदि निश्चयकालो द्रव्यपर्यायाणां वर्तयिता वर्तते तर्हि स कालः क्रियावान् सञ्जातः निष्क्रियः १५ कथमुक्तः ? सत्यम्; निमित्तमात्रेऽपि वस्तुनि हेतुकर्तृत्वं दृश्यते यथा भिक्षा वासयते कारीषोऽग्निरध्यापयति इति हेतुकर्तृताव्यपदेशो भिक्षाग्न्योर्दृश्यते, तथा कालस्यापि हेतुकर्तृत्वमस्ति निष्क्रियत्वं च न विनश्यति कालस्य। पर्यायोत्पादिका वर्तना तावत् विज्ञाता।

इदानीं परिणामः कालस्योपकारः कथ्यते—द्रव्यस्य स्वभावान्तरनिवृत्तिः स्वभावान्तरोत्पत्तिश्च परिस्पन्दात्मकः पर्यायः परिणाम उच्यते। स परिणामः जीवस्य क्रोधमानमायालोभा- २० दिकः। पुद्गलस्य परिणामः वर्णगन्धरसस्पर्शादिकः। धर्मस्याधर्मस्य आकाशस्य च अगुरुलघुगुणवृद्धिहानिविहितः परिणामो वेदितव्यः। विज्ञातस्तावत् पर्यायरूपः परिणामः कालस्योपकारः।

इदानीं क्रियालक्षणः कालोपकारः कथ्यते—परिस्पन्दात्मकः चलनरूपः पर्यायः क्रिया कथ्यते। सा[८] क्रिया द्विप्रकारा—प्रायोगिकी, वैश्रसिकी च। तत्र प्रायोगिकी क्रिया हलमुशलशकटादीनां भवति। वैश्रसिकी स्वाभाविकी मेघविद्युदादीनां भवति। सा द्विधापि २५ क्रिया कालद्रव्योपकारः कथ्यते। विज्ञाता तावत् क्रिया।

इदानीं परत्वापरत्वयोरवसरः। परत्वापरत्वे[९] क्षेत्रकृते [कालकृते] च, कालोपकारप्रकरणात् सूत्रे कालकृते गृह्येते। तथाहि—अतिसमीपदेशवर्तिनि अतिवृद्धे व्रतादिगुणहीने चाण्डाले परत्वव्यवहारो वर्तते, दूरदेशवर्तिनि गर्भरूपे व्रतादिगुणसहिते च अपरत्वव्यवहारो

---

१ मुख्यका- आ०, ब०, ज०। २ वर्तते ता०, व०। ३ -व पर्या- आ०, ब०, ज०। ४ अन्या प्रयुङ्क्ते ता०, आ०, ब०, ज०। ५ -स्याभावो भ- आ०, ब०, ज०। ६ न भ- ता०, व०। ७ पुद्गलस्य परिणाम उच्यते पुद्गलस्य आ०, ब०, ज०। पुद्गलस्य परिणाम उच्यते वर्ण- व०। ८ सा द्वि- आ०, ब०, ज०। ९ -त्वे द्वे लक्षणकृते च आ०, ज०, ब०। -त्वे क्षणकृते च व०।

वर्तते। ते द्वे अपि परत्वाऽपरत्वे उक्तलक्षणे कालकृते ज्ञातव्ये। कालोपकार इत्यर्थः। परिणामादयश्चत्वारः सूर्यादिक्रियाकारणसमयावलिकादिव्यवहारकालकृता ज्ञातव्याः। समयस्तु अणोरण्वन्तरविघटनलक्षणप्रमाणो मुख्यकालकृतो वेदितव्यः। एते वर्तनादयः पञ्चोपकाराः कालस्यास्तित्वं ज्ञापयन्ति। ननु वर्तनाग्रहणं यत् कृतं तेनैव पूर्यते परिणामादयस्तु चत्वारः वर्तनाया[1] भेदा एव किमिति परिणामादीनां ग्रहणं पृथग् विधीयते ? तदनर्थकम्; सत्यम्; परिणामादीनां प्रपञ्चः कालद्वयसूचनार्थः। किन्तत् कालद्वयम् ? निश्चयकालो व्यवहारकालश्च। तत्र निश्चयकालो वर्तनालक्षणः परिणामादिचतुर्लक्षणो व्यवहारकालः। उक्तञ्च—

"दव्वपरियट्टरूवो जो सो कालो हवेइ ववहारो।
परिणामादी लक्खो वट्टणलक्खो दु परमट्ठो॥" [द्रव्यसं० गा० २१]

तत्र व्यवहारकालो भूतभविष्यत्वर्तमानलक्षणः गौणः निश्चयकाले, कालाभिधानं मुख्यम्। व्यवहारकाले भूतभविष्यत्वर्तमानव्यपदेशो मुख्यः कालव्यपदेशस्तु गौणः। कस्मान्मुख्यः कस्माद् गौणः ? क्रियायुक्तसूर्यादिद्रव्यापेक्षत्वात् मुख्यः, कालकृतत्वात् च गौण इति।

'अथ धर्मस्याधर्मस्याकाशस्य पुद्गलस्य जीवस्य कालस्य चोपकाराः प्रोदिताः। "उपयोगो लक्षणम्" [त० सू० २।८] इत्यादिभिर्लक्षणञ्चोक्तम्, पुद्गलानां तु सामान्य[2]लक्षणं प्रोक्तं विशेषलक्षणन्तु नोक्तं तदिदानीं पुद्गलानां विशेषलक्षणमुच्यताम्' इत्युपन्याससम्भवे सूत्रमिदमाहुः—

स्पर्शरसगन्धवर्णवन्तः पुद्गलाः॥ २३॥

स्पृश्यते स्पर्शनं वा स्पर्शः। "अकर्तरि च कारके संज्ञायाम्" [का० सू० ४।५।४] घञ्। पक्षे "भावे" [का० सू० ४।५।३] घञ्। रस्यते रसनं वा रसः। गन्ध्यते गन्धनं वा गन्धः। वर्ण्यते वर्णनं वा वर्णः। स्पर्शश्च रसश्च गन्धश्च वर्णश्च स्पर्शरसगन्धवर्णाः, स्पर्शरसगन्धवर्णा विद्यन्ते येषां पुद्गलानां ते स्पर्शरसगन्धवर्णवन्तः। पूर्यन्ते गलन्ति च पुद्गलाः, धातोस्तदर्थातिशयेन योगः मयूरभ्रमरादिवत्[3]। [4]मन्तुरत्र नित्ययोगे यथा क्षीरिणो वृक्षाः वटादयः। पुद्गलाः स्पर्शादिगुणवन्तो भवन्ति। तत्र स्पर्शोऽष्टप्रकारः—मृदुकर्कशगुरुलघुशीतोष्णस्निग्धरूक्षभेदात्। रसः पञ्चप्रकारः—तिक्ताम्लकटुमधुरकषायभेदात्[5]। गन्धो द्विप्रकारः—सुरभिदुरभिभेदात्। वर्णः पञ्चप्रकारः—कृष्णनीलपीतशुक्ललोहितभेदात्। एते पुद्गलानां स्पर्शादयो मूलगुणभेदाः। ते च प्रत्येकं द्वित्र्यादिसंयोगगुणभेदेन [6]संख्येयासंख्येयानन्तभेदाश्च भवन्ति। लवणरसस्य मधुररसे अन्तर्भावो वेदितव्यः। अथवा सर्वेषां रसानां

---

१ –या भवा एव आ०, ब०, ज०। –या भेद एव ता०। २ –मान्यं ल– आ०, ब०, ज०। ३ –मरादिषुवत् आ०, ब०, ज०। ४ वंतुरत्र ता०। ५ –कटुकम– आ०, ब०, ज०। ६ संख्येयानन्तशो भे– आ०, ब०, ज०।

व्यञ्जको लवणरस इति कारणात् पञ्चस्वपि रसेष्वन्तर्भावः। येषु च जलादिषु एको द्वौ त्रयो वा गन्धादयः प्रकटा न ज्ञायन्ते तत्र स्पर्शसद्भावात् अप्रकटाः सन्तीति निश्चीयते। ननु "**रूपिणः पुद्गलाः**" [५।५] इत्यत्र सूत्रे पुद्गलानां रूपगुणः प्रोक्तः, रूपगुणाविनाभाविनश्च रसादयो गुणाः तस्मिन्नेव सूत्रे संगृहीता इति कारणात् पुद्गलानां रूपादिमत्त्वं तेनैव
५ सूत्रेण सिद्धं किमर्थमिदं सूत्रमनर्थकम् ? इत्याह–सत्यम्; "**नित्यावस्थितान्यरूपाणि**" [५।४] इत्यस्मिन् सूत्रे धर्माधर्माकाशादीनां नित्यत्वादिनिरूपणे पुद्गलानामपि अरूपत्वप्राप्तौ सत्यां तस्याः प्रतिषेधार्थं "**रूपिणः पुद्गलाः**" इति सूत्रं तत्रोक्तम्. "**स्पर्शरसगन्धवर्णवन्तः पुद्गलाः**" इति तु सूत्रं पुद्गलानां परिपूर्णस्वरूपविशेषपरिज्ञानार्थमुक्तं तेनानर्थकं न भवति।

१० अथ पुद्गलानां सम्पूर्णविशेषपरिज्ञाने सञ्जातेऽपि पुद्गलानां विकारपरिज्ञानमवशिष्टं वर्तते, तदर्थं सूत्रमिदमुच्यते—

शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च ॥ २४ ॥

सूक्ष्मस्य भावः सौक्ष्म्यम्, स्थूलस्य भावः स्थौल्यम्। शब्दश्च बन्धश्च सौक्ष्म्यं च स्थौल्यं च संस्थानं च भेदश्च तमश्च छाया च आतपश्च उद्योतश्च शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थान-
१५ भेदतमश्छायातपोद्योताः, ते विद्यन्ते येषां पुद्गलानां ते शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तः। एतैर्दशभिः पुद्गलविकारैः सहिता पुद्गला भवन्ति।

तत्र तावच्छब्दस्वरूपं निरूप्यते। शब्दो द्विप्रकारः—भाषात्मकोऽभाषात्मकश्चेति। तत्र भाषात्मकोऽपि द्विप्रकारः—साक्षराऽनक्षरभेदात्। तत्र साक्षरः शब्दः शास्त्रप्रकाशकः संस्कृताऽसंस्कृतात्मकः आर्यम्लेच्छव्यवहारप्रत्ययः। अनक्षरः शब्दो द्वीन्द्रियत्रीन्द्रियचतुरि-
२० न्द्रियपञ्चेन्द्रियाणां प्राणिनां ज्ञानातिशयस्वभावकथनप्रत्ययः। ज्ञानातिशयस्तु एकेन्द्रियापेक्षया ज्ञातव्यः, एकेन्द्रियाणां तु ज्ञानमात्रं वर्तते अतिशयज्ञानं नास्ति अतिशयज्ञानहेत्वभावात्। अतिशयज्ञानवता सर्वज्ञेन एकेन्द्रियाणां स्वरूपं निरूप्यते। स भगवान् परमातिशयज्ञानवान्, अन्यः पुमान् रथ्यापुरुषसदृशः नाममात्रेण सर्वज्ञः हरिहरादिकः।

अत्र केचित् सर्वज्ञस्य अनक्षरात्मकं शब्दं प्रतिपादयन्ति[3], "**नष्टो वर्णात्मको**
२५ **ध्वनिः**" [ ] इति वचनात्; तन्न सङ्गच्छते; अनक्षरात्मकेन शब्देन अर्थप्रतीतेरभावात्। तथा चोक्तम्—

"**देवकृतो ध्वनिरित्यसदेतत् देवगुणस्य तथा विहतिः स्यात्।**
साक्षर एव च वर्णसमूहान्नैव विनार्थगतिर्जगति स्यात्॥" [ ]

भाषात्मकः सर्वोऽपि साक्षरानक्षररूपः प्रायोगिक इत्युच्यते पुरुषप्रयोगहेतुत्वात्।

---

१ प्रकटतया न ज्ञा– ज०। प्रकटज्ञानं ज्ञा– आ०, ब०। २ –ण प्रो–ता०, व०। ३ –न्ति नष्टवर्णात्मकं शब्दं प्रतिपादयन्ति आ०, ब०, ज०।

अभाषात्मकोपि द्विप्रकारः—प्रायोगिकवैश्रसिकभेदात् । पुरुषप्रयोगे भवः प्रायोगिकः, विश्रसा स्वभावेन सञ्जातः वैश्रसिकः । विश्रसा इत्ययं शब्दः आकारान्तोऽव्ययं स्वभावार्थवाची । तत्र प्रायोगिकश्चतुष्प्रकारः—ततविततघनसुषिरभेदात् । तत्र ततः शब्दः चर्म्मतननेन सञ्जातः । योऽसौ पुष्करः पटहः भेरी दुन्दुभिः दर्दुरो जङ्घावादित्रविशेषः 'र बाब' इति देश्याम्, इत्यादिकः तत इति कथ्यते । विततः शब्दः तन्त्रीविहितवीणाद्युद्भवः । सुघोषैः ५ किन्नरैश्च उल्लपित इत्यादिको वितत उच्यते । घनः शब्दः तालकंसताल[1]नादिन्याद्यभिघात-जातः । सुषिरः शब्दः कम्बुवेणुभंभाकाहलादिप्रभवः सुषिर उच्यते ॥ १ ॥

अथ बन्धसम्बन्धः । बन्धो द्विप्रकारः—प्रायोगिकवैश्रसिकभेदात् । तत्र प्रायोगिकः पुरुषप्रयोगोद्भवः । अजीवविषयजीवाजीवविषयभेदात् सोऽपि द्विप्रकारः । तत्र अजीव-विषयो बन्धः दारुलाक्षादिलक्षणः । जीवाजीवविषयः कर्मनोकर्मबन्धः । वैश्रसिको बन्धः १० स्वाभाविको बन्धः स्निग्धरूक्षत्वगुणप्रत्ययः शक्रचापमेघोल्कातडिदादिविषयः ॥ २ ॥

अथ सौक्ष्म्यमुच्यते । तद् द्विप्रकारम्-अन्त्यापेक्षिकभेदात् । तत्र परमाणूनां सौक्ष्म्यम् अन्त्यमुच्यते । अपेक्षायां भवमापेक्षिकम् । कपित्थबिल्वाद्यपेक्षया आमलकादीनि सूक्ष्माणि, आमलकाद्यपेक्षया बदरादीनि सूक्ष्माणि, बदराद्यपेक्षया कक्कोलादीनि सूक्ष्माणि एवं मरिच-सर्षपासुरीप्रभृतीनि सूक्ष्माणि ज्ञातव्यानि ॥ ३ ॥ १५

अथ स्थौल्यमुच्यते । तदपि द्विप्रकारम्-अन्त्यापेक्षिकभेदात् । तत्र जगद्व्यापी महास्क-न्धः अन्त्यस्थूलः । राजिकासर्षपमरिचकक्कोलबदरामलकबिल्वकपित्थादीनि अपेक्षास्थूलानि ॥४॥

अथ संस्थानमुच्यते । तदपि द्विप्रकारम्-इत्थंलक्षणानित्थंलक्षणभेदात् । तत्रेत्थंलक्षणं संस्थानं वर्तुलत्रिकोणचतुःकोणदीर्घपरिमण्डलादिकम् । इदं वस्तु इत्थम्भूतं वर्तते इति वक्तुम-शक्यत्वात् अनित्थंलक्षणं संस्थानमुच्यते । तत्तु मेघपटलादिषु अनेकविधं वेदितव्यम् ॥५॥ २०

अथ भेदस्वरूपं निरूप्यते । भेदः षट्प्रकारः—उत्करः चूर्णः खण्डः चूर्णिका प्रतरोऽणु-चटनं चेति । दार्वादीनां क्रकचकुठारादिभिः उत्करणं भेदनम् उत्करः । यवगोधूमचणकादीनां सक्तुकणिकादिकरणं चूर्णमुच्यते । घटकरकादीनां भित्तशर्करादिकरणं खण्डः प्रतिपाद्यते । अतिसूक्ष्मातिस्थूलवर्जितं मुद्गमाषराजमाषहरिमन्थकादीनां दलनं चूर्णिका कथ्यते । मेघपटला-दीनां विघटनं प्रतर उच्यते । अतितप्तलोहपिण्डादिषु द्रुघणादिभिः कुट्यमानेषु अग्निकणनि- २५ र्गमनम् अणुचटनमुच्यते ॥ ६ ॥

अथ तमो निरूप्यते । प्रकाशविपरीतं चक्षुःप्रतिबन्धनिमित्तं तमोऽपि पुद्गलविकारः ॥७॥

प्रकाशावरणकारणभूता छाया द्विप्रकारा । एका वर्णादिविकृतिपरिणता । कोऽर्थः ? गौरादिवर्णं परित्यज्य श्यामादिभावं गता । द्वितीया छाया [6]प्रतिच्छन्दमात्रात्मिका ॥ ८ ॥

---

१ -नादिनाद्य-आ०, द०, ज०, व० । २ -प्रयोगाद् भवो आ०, द०, ज० । ३ -सुपारी-व० । असुरी कृष्णिका । ४ अपेक्ष्यस्थू- आ०, द०, ज० । ५ चणको हरिमन्थकः । ६ प्रति-बिम्बरूपा । अथवा प्राकृतगाथायाः संस्कृतछन्दरूपेण छाया वा ।

उष्णप्रकाशलक्षणः सूर्यबर्हिःप्रभृतिनिमित्त आतप उच्यते ॥ ९ ॥

ज्योतिरिङ्गणरत्नविद्युजातः प्रकाश उद्योत उच्यते ॥ १० ॥

एते शब्दादयो दश भेदा पुद्गलद्रव्यविकारा वेदितव्याः । चकारात् अभिघातचोदनादयः पुद्गलपरिणामाः परमागमसिद्धाः संमुच्चिता[1] ज्ञातव्याः ।

५ अथेदानीं पुद्गलानां प्रकारः निरूप्यते—

अणवः स्कन्धाश्च ॥ २५ ॥

प्रदेशमात्रभाविना स्पर्शादिपर्यायाणामुत्पत्तिसामर्थ्येन परमागमे अण्यन्ते [2]शब्द्यन्ते कार्यलिङ्गं विलोक्य सद्रूपतया [3]प्रतिपाद्यन्ते इति अणवः "**सर्वधातुभ्यः उः**" [ ] तथा चोक्तम्—

१० "**अणवः कार्यलिङ्गाः स्युः द्विस्पर्शाः परिमण्डलाः ।**
एकवर्णरसा नित्याः स्युरनित्याश्च पर्ययैः ॥" [ ]

ननु येऽतिसूक्ष्मा अणवो वर्तन्ते तेषां[4] क आदिः को मध्यः कश्चान्तः ? सत्यम्; तेषां स्व एव आदिः स्व एव मध्यः स्व एवान्तश्च "**आद्यन्तवदेकस्मिन्**" [पा० सू० १।१।२१] इति परिभाषणात् । तथा चोक्तम्—

१५ "**अत्तादि अत्तमज्झं अत्तंतं णेव इंदिए गिज्झं ।**
जं दव्वं अविभागी तं परमाणु वियाणाहि ॥" [नियमसा० गा० २६]

स्थूलत्वेन ग्रहणनिक्षेपणादिव्यापारं [5]स्कन्धन्ति गच्छन्ति ये ते स्कन्धा इत्युच्यन्ते । क्वचित् वर्तमाना क्रिया उपलक्षणवशात् रूढिं प्राप्नोतीति कारणात् ग्रहणनिक्षेपणादिव्यापाराणामनुचितेष्वपि द्व्यणुकादिषु स्कन्धेषु स्कन्धसंज्ञा वर्तते । ननु पुद्गलानामनन्ता २० भेदा[6] वर्तन्ते अणुस्कन्धभेदतया द्विप्रकारत्वं कथम् ? सत्यम्; अणव इत्युक्ते अणुजातितया सर्वेऽपि अणवो गृहीताः, स्कन्धजातितया सर्वेऽपि स्कन्धा गृहीताः । ननु जातावेकवचनं भवति बहुवचनं कथम् ? सत्यम्; अणूनां स्कन्धानां च अनेकभेदसंकथनार्थं बहुवचनं वर्तते । तर्हि 'अणुस्कन्धाश्च' इति एकमेव पदं किमिति न कृतम् ? अणवः स्कन्धाश्चेति भेदाभिधानं किमर्थम् ? सत्यम्; भेदाभिधानं पूर्वोक्तसूत्रद्वयभेदसम्बन्धनार्थम् । तेनायमर्थः— २५ अणवः स्पर्शरसगन्धवर्णवन्तः, स्कन्धास्तु शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च तथा स्पर्शरसगन्धवर्णवन्तश्च स्कन्धा भवन्ति । चकारः [7]परस्परं समुच्चये वर्तते । तेनायमर्थः—न केवलम् अणव एव पुद्गलाः किन्तु स्कन्धाश्च पुद्गला भवन्ति

---

१ समुदिता आ०, ब०, ज० । २ साध्यन्ते आ०, ब०, ज० । ३ प्रतिपद्यन्ते आ०, ब०, ज० । ४ –षां मध्ये क आ०, ब०, ज० । ५ स्कन्दन्ति ब० । ६ भेदाः प्रव– आ०, ब०, ज० । ७ परस्परसमु– ब० ।

निश्चयव्यवहारनयद्वयक्रमादित्यर्थः। निश्चयनयादणव एव पुद्गलाः, व्यवहारनयात् स्कन्धा अपि पुद्गला भवन्तीत्यर्थः।

अथ पुद्गलपरिणामः अणुरूपः स्कन्धरूपश्च वर्तते। असावनादिर्वर्तते आहोस्वित् सादिरस्ति? उत्पत्तिलक्षणत्वात् सादिरङ्गीक्रियते, तर्हि किन्निमित्तमाश्रित्योत्पद्यन्तेऽणवश्च (णवः) किन्निमित्तमाश्रित्योत्पद्यन्ते स्कन्धाश्चेति प्रश्ने तत्र तावत् स्कन्धानामुत्पत्तिनिमित्त- ५ संसूचनार्थं सूत्रमिदमाहुः—

भेदसङ्घातेभ्य उत्पद्यन्ते ॥ २६ ॥

भेदश्च सङ्घातश्च भेदसंघातश्च भेदसंघातास्तेभ्यः भेदसंघातेभ्यः,· रूपे रूपं प्रविष्टं **"सरूपाणामेकशेषः"** [पा० सू० १।२।६४] इति वचनात् भेदसङ्घातशब्दलोपः। उत्पद्यन्ते जायन्ते स्कन्धा इत्यर्थः। संघातानां द्वितयनिमित्तवशात् विदारणं भेदः। भिन्नानाम् एकत्र १० मेलापकः संघातः। भेदात् संघातात् तदुभयाच्च स्कन्धा उत्पद्यन्ते इत्यर्थः। अस्यायमर्थः— द्वयोरण्वोः मेलापकादेकत्रीभवनात् द्विप्रदेशः स्कन्धः सञ्जायते। द्विप्रदेशस्य स्कन्धस्य एकस्य चाणोर्मेलापकात्त्रिप्रदेशः स्कन्ध उत्पद्यते। त्रयाणां वा भिन्नानामणूनां मेलापकात्त्रिप्रदेशः स्कन्धो जायते। द्विप्रदेशस्य स्कन्धस्य अपरस्य च द्विप्रदेशस्य[1] स्कन्धस्य मेलापकाच्चतुः- प्रदेशः स्कन्धः सञ्जायते। अथवा त्रिप्रदेशस्य स्कन्धस्य एकस्य चाणोर्मेलापकाच्चतुःप्रदेशः १५ स्कन्धः सञ्जायते। अथवा चतुर्णाम् अणूनां भिन्नानां मेलापकाच्चतुः प्रदेशः स्कन्धः सञ्जायते। त्रिप्रदेशस्य स्कन्धस्य द्विप्रदेशस्य च स्कन्धस्य एकत्रीभवनात् पञ्चप्रदेशः स्कन्ध उत्पद्यते। चतुःप्रदेशस्य स्कन्धस्य एकस्य चाणोर्मेलापकात् पञ्चप्रदेशः स्कन्धः सञ्जायते। पञ्चानामणूनां वा भिन्नानां मेलापकात् पञ्चप्रदेशः स्कन्धः सञ्जायते। इत्यादिसंख्येयानामणू- नामसंख्येयानामणूनाम् अनन्तानाम् अणूनां च मेलापकात् संख्येयप्रदेशः असंख्येयप्रदेशः २० अनन्तप्रदेशः अनन्तानन्तप्रदेशश्च स्कन्ध उत्पद्यते। एतेषामेव स्कन्धानां पूर्वरीत्या भेदात् नाना स्कन्धा उत्पद्यन्ते द्व्यणुकः स्कन्धो यावत्। यथा भेदात् संघाताच्च स्कन्धोत्पत्तिर्निगदिता तथा भेदसंघाताभ्याम् एकसमयोत्पन्नाभ्यां द्विप्रदेशादयः स्कन्धाः [2]सम्प्रजायन्ते अन्यस्माद् भेदेन अन्यस्य मेलापकेन तदुभयप्रदेशः स्कन्ध उत्पद्यते इत्यर्थः।

अथ यदि स्कन्धा एवमुत्पद्यन्ते तर्हि अणुः कथमुत्पद्यते इति प्रश्ने सूत्रमिदमाहुः— २५

भेदादणुः ॥ २७ ॥

अणुरुत्पद्यते। कस्माद्? भेदात्। न संघातात् न च भेदसंघाताभ्याम[3]णुरुत्पद्यते किन्तु भेदादे[4]वाणुरुत्पद्यते इति नियमार्थमिदं सूत्रम् **"सिद्धे सत्यारम्भो नियमाय"** [ ] इति[5] वचनात्।

---

१ –स्य मे– आ०, ब०, ज०। २ संजाय– आ०, ब०, ज०, व०। ३ –मुत्प– आ०, ब०, ज०। ४ –देवोत्प– आ०, ब०, ज०। ५ "सिद्धे सत्यारम्भो नियमार्थः" –न्यायसं० पृ० २५। "सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति" –पा० म० भा० १।१३।

अथ स्कन्धानामुत्पत्तिः संघातात् भवति, "**भेदसंघातेभ्यः उत्पद्यन्ते**" इत्यत्र भेदग्रहणं निरर्थकम्; नैवम्[1]; भेदग्रहणे प्रयोजनमस्ति, तदर्थमेव सूत्रमिदमुच्यते[2]—

भेदसंघाताभ्यां चाक्षुषः ॥ २८ ॥

भेदश्च संघातश्च भेदसंघातौ ताभ्यां भेदसंघाताभ्याम्। चक्षुषा गृह्यते चाक्षुषः चक्षु-
५ र्ग्राह्यः स्कन्ध इत्यर्थः। अनन्तानन्ताणुमेलापकजातोऽपि कश्चित् स्कन्धः चाक्षुषः चक्षुर्ग्राह्यो भवति कश्चित् स्कन्धोऽचाक्षुषो भवति। तयोर्मध्ये योऽचाक्षुषः स चाक्षुषः कथं भवति? सूक्ष्मपरिणामस्कन्धस्य भेदे सति सौक्ष्म्यस्याऽपरिहारात् एकत्र अचाक्षुपत्वमेव, द्वितीयस्तु अचाक्षुषः स्कन्धः अन्यसङ्घातेन चाक्षुषेण मिलितः सन् सूक्ष्मपरिणामपरित्यागे सति स्थूलत्वोत्पत्तौ सत्यामचाक्षुषोऽपि चाक्षुषो भवति। तेन 'भेदसङ्घातेभ्यः उत्पद्यन्ते' इत्यत्र
१० भेदग्रहणमनर्थकं न भवति। अत्रायं भावः—केवलात् भेदात् सूक्ष्मस्य स्कन्धस्य चाक्षुषत्वं न भवति, किन्तु चाक्षुषेण सह मिलितस्य सूक्ष्मस्य चाक्षुषत्वं भवति।

अथ धर्माधर्माकाशपुद्गलकालजीवद्रव्याणां निजनिजलक्षणानि विशेषभूतानि विद्वद्वि-शेषकेणोमास्वामिना प्रोक्तानि, षण्णामपि सामान्यलक्षणमद्यापि नोक्तं वर्तते, तत्प्रतिपत्त्यर्थं[3] सूत्रमिदं सूच्यते—

१५ **सद् द्रव्यलक्षणम् ॥ २९ ॥**

द्रव्याणां लक्षणं द्रव्यलक्षणं द्रव्यस्य वा लक्षणं द्रव्यलक्षणम्। सद् भवति। कोऽर्थः? यत् सत् विद्यमानं तत् द्रव्यं भवति, यत् सत् नास्ति तत् द्रव्यं न भवति। तत्सत्त्वं सर्वेषामेव षण्णां द्रव्याणां वर्तत एव।

अथ सदेव तावत् पूर्वं न ज्ञायते यत् द्रव्याणां लक्षणभूतं सामान्यतया वर्तते, तत्परि-
२० ज्ञानार्थं सूत्रं वक्तुमर्हन्ति भवन्त इति प्रश्ने सूत्रमिदमाहुः—

उत्पादव्ययध्रौव्ययुक्तं सत् ॥ ३० ॥

चेतनद्रव्यस्य अचेतनद्रव्यस्य वा निजां जातिममुञ्चतः कारणवशात् भावान्तरप्राप्तिः उत्पादनमुत्पादः, यथा मृत्पिण्डविघटने घटपर्याय उत्पद्यते। पूर्वभावस्य व्ययनं[4] विघटनं विगमनं विनशनं व्यय उच्यते, यथा घटपर्यायोत्पत्तौ सत्यां मृत्पिण्डाकारस्य व्ययो भवति।
२५ अनादिपारिणामिकस्वभावेन निश्चयनयेन वस्तु न व्येति न चोदेति किन्तु ध्रुवति स्थिरीसम्पद्यते यः स ध्रुवः तस्य भावः कर्म वा ध्रौव्यमुच्यते, यथा मृत्पिण्डस्य व्यये घटपर्यायोत्पत्तावपि मृत्तिका मृत्तिकान्वयं न मुञ्चति, एवं पर्यायस्योत्पादे व्यये च जातेऽपि सति वस्तु ध्रुवत्वं न मुञ्चति। उत्पादश्च व्ययश्च ध्रौव्यं च उत्पादव्ययध्रौव्याणि तैर्युक्तमुत्पादव्ययध्रौव्ययुक्तम्। यद् वस्तु उत्पादव्ययध्रौव्ययुक्तं भवति तत् वस्तु सद् भण्यते। यद् वस्तु उत्पादव्ययध्रौव्ययुक्तं

१ नैव भे- ता०। २ -मिदमुच्य- आ०, ब०, ज०। ३ -र्थं वक्तु- आ०, ब०, ज०। ४ -नं विग- ता०, ब०। ५ -व्यमित्युच्य- आ०, ब०, ज०।

न भवति तद् वस्तु नास्ति। ननु भेदे सति युक्तशब्दो दृश्यते यथा 'देवदत्तो दण्डेन युक्तो वर्तते' इत्युक्ते देवदत्तो दण्डाद्भिन्न इति ज्ञायते, तथा च सति उत्पादव्ययध्रौव्याणामभावो भवति[1] द्रव्यस्य वा अभावः; युक्तमुक्तं भवता; उत्पादादीनामभेदेऽपि सति कथञ्चिद्भेदेन येन युक्तशब्दोऽत्र दृष्टः, यथा 'स्तम्भः सारयुक्तः' इत्युक्ते न सर्वथा स्तम्भात् सारो भिन्नो वर्तते किन्तु द्वयोरप्यविनाभावोऽस्ति। तेनायमर्थः–उत्पादव्ययध्रौव्यसहितं सदुच्यते। ५
अथवा, 'युजिर् योगे' इति रौधादिको धातुर्न भवति किं तर्हि 'युज् समाधौ' इति दैवादिकोऽयं धातुः। तथा सति उत्पादव्ययध्रौव्ययुक्तम् उत्पादव्ययध्रौव्यसमाहितम् उत्पादव्ययध्रौव्यात्मकम् उत्पादव्ययध्रौव्यमयम् उत्पादव्ययध्रौव्यस्वभावं यद् वस्तु तत् सदुच्यते। तथा चोक्तम्—

"स्थितिजननिरोधलक्षणं चरमचरं च जगत् प्रतिक्षणम्।
इति जिन सकलज्ञलाञ्छनं वचनमिदं वदतां वरस्य ते॥" १०

[बृहत्स्व० श्लो० ११४]

अस्मिन् सूत्रे उत्पादव्ययध्रौव्याणि द्रव्यस्य लक्षणानि उक्तानि। द्रव्यं तु लक्ष्यं प्रोक्तम्। पर्यायार्थिकनयेन उत्पादादीनां[2] परस्परमर्थान्तरभावः, तेनैव च नयेन द्रव्यात् उत्पादादीनामर्थान्तरभावः। द्रव्यार्थिकनयेन तु परस्परं व्यतिरेको नास्ति किन्तु तन्मयत्वं वर्तते। अनया रीत्या[3] लक्ष्यलक्षणयोर्भावाभावौ सिद्धाविति। १५

अथ "नित्यावस्थितान्यरूपाणि" [५।४] इति यत् पूर्वमुक्तं तत्र किं नित्यं तदस्माभिर्न ज्ञायते इति प्रश्ने नित्यलक्षणसूचनपरं[4] सूत्रमाहुः[5]—

तद्भावाव्ययं नित्यम् ॥ ३१ ॥

भवनं भावः तस्य भावस्तद्भावः, तद्भावेन अव्ययमविनाशं ध्रुवं तद्भावाव्ययं नित्यमुच्यते। तद्भावः कः? प्रत्यभिज्ञानहेतुता तद्भावः। प्रत्यभिज्ञानहेतुता का? 'तदेवेदम्' इति[6] २० विकल्पः प्रत्यभिज्ञानम्। तत्प्रत्यभिज्ञानमकस्मान्न भवति निर्हेतुकं न भवति। यो यस्य हेतुः स तद्भावः। येन स्वभावेन वस्तु पूर्वं दृष्टं तेनैव स्वभावेन पुनरपि तदेवेदमिति प्रत्यभिज्ञायते उपचर्यते सङ्कल्प्यते, यथा[7] मृत्पिण्डे दृष्टस्य द्रव्यमृत्तिकालक्षणस्य भावः मृत्पिण्डदृष्टरूपेणावस्थानम्—घटाकारकालेऽपि मृत्पिण्डद्रव्यस्यावस्थानम्, घटं दृष्ट्वा तदेवेदमिति—तदेव मृत्पिण्डद्रव्यमिति प्रत्यभिज्ञानेन प्रतीयते। यथा वृद्धं दृष्ट्वा स एवायं शिशुः योऽस्माभिः २५ पूर्वमेव दृष्टः, अनया रीत्या यदव्ययं तन्नित्यमुच्यते। यदि अत्यन्तं निरोधो भवति विनाशः स्यात्, तदा अभिनवप्रादुर्भावमात्रमेव स्यात् मूलद्रव्यविलोपो भवति। घटाङ्गीकारे

---

१ –ति कस्माद् द्रव्यस्य चाभा– ब०। –ति द्रव्यस्य चाभा– ता०। २ परमर्था– आ०, ब०, ज०। ३ –त्या लक्षणयो– आ०, ब०, ज०, व०। ४ –नार्थं परं सूत्रमाहुर्भगवन्तः आ०, ब०, ज०। ५ –सूत्रमिदमाहुः ब०। ६ –ति स्मरणमिति विक– ता०, आ०, ब०, ज०। ७ मृत्पिण्डदृ– ब०।

मृत्पिण्डमृत्तिकाद्रव्यवत् [१]लोकव्यवहारोऽपि तदधीनो[२] विलुप्यते । तस्मात् कारणात् तद्भावेन नित्यं निश्चीयते । मृत्पिण्डात् घटपर्यायस्तु उपसर्जनीभूतः अप्रधानभूतः, तद्भावस्तु प्रधानभूतः तेन नित्यमिति । तन्नित्यं कथञ्चिन् वेदितव्यम्—केनचिन्नयप्रकारेण ज्ञातव्यम्—द्रव्यार्थिकनयेन ज्ञातव्यमित्यर्थः । सर्वथा नित्यत्वे अन्यथाभावस्याभावः स्यात्,
५ तथा सति [३]संसार-संसारविनिवृत्तिहेतुभूतप्र[४]क्रियाविरोधो भवति ।

अथ, ननु तदेव नित्यं तदेवानित्यमिति विरुद्धमेतत्—चेन्नित्यमङ्गीक्रियते तर्हि उत्पादव्यययोरभावः स्यात्, एवं सत्यनित्यताया विनाशः स्यात्, चेद[५]नित्यमङ्गीक्रियते तर्हि स्थितेरभावः स्यात्—ध्रौव्याभावो भवेन, तथा सति नित्यतायाः विघातः स्यात्; युक्तमुक्तं भवता; अस्यैव एकवस्तुनि नित्यानित्ययोर्विरोधस्योच्छेदनार्थं स्याद्वादिभिरिदं सूत्रमुच्यते—

१० **अर्पितानर्पितसिद्धेः ॥ ३२ ॥**

अर्प्पणमर्प्पितम्, न अर्पणमनर्प्पितम्, अर्पितं च अनर्पितं च अर्पितानर्पिते । अर्पितानर्पिताभ्यां सिद्धिः अर्पितानर्पितसिद्धिः तस्याः अर्पितानर्पितसिद्धेः कारणात् नित्यानित्ययोः कथनं भवति, तत्र नास्ति विरोध इत्यर्थः । अस्यायमर्थः–वस्तु तावदनेकान्तात्मकं वर्तते । तस्य वस्तुनः कार्यवशात् यस्य कस्यचित्स्वभावस्य प्रापितमर्पितं प्राधान्यम् उपनीतं विवक्षित-
१५ मिति यावत्, नार्पितं न प्रापितं न प्राधान्यं नोपनीतं न विवक्षितमनर्पितमुच्यते प्रयोजनाभावात्, सतोऽपि स्वभावस्याविवक्षितत्वात् । उपसर्जनीभूतमप्रधानभूतम् अनर्पितमुच्यते, यथा कश्चित् पुमान् पिता इत्युच्यते । स पिता कस्यचित् पुत्रस्य विवक्षया पिता भवति । स एव पिता पुत्र इत्युच्यते, तत्रापि पितुरपि कश्चित् पिता वर्तते, तद्विवक्षया स एव पिता पुत्र इत्युच्यते । तथा स एव पुत्रत्वेन विवक्षितः पिता भ्रातापि कथ्यते । कस्मात् ? तस्य [६]पुत्र-
२० त्वेन पितृत्वेन विवक्षितस्य पुंसोऽन्यः कश्चिद् भ्राता वर्तते, तदपेक्षया स एव पुमान् भ्रातापि भवति । तथा भ्रातृत्वेन पुत्रत्वेन पितृत्वेन विवक्षितः पुमान्[७] भागिनेय इत्युच्यते तस्य मातुलापेक्षया । इत्यादयः सम्बन्धा एकस्यापि पुरुषस्य जनकत्वजन्यत्वादिकारणाद् बहवो भवन्ति, नास्ति तत्र विरोधः, तथा द्रव्यमपि सामान्यविवक्षया अर्प्पणया नित्यमुच्यते, विशेषविवक्षया विशेषार्पणया नित्यमपि वस्तु अनित्यमित्युच्यते, अनित्यताकारणसन्दर्शनात्
२५ मृत इत्यादिवत्, तत्रापि नास्ति विरोधः । तौ च सामान्यविशेषौ केनचिन्नयप्रकारेण कथञ्चिद् भेदा (भेदाभेदा) भ्यां व्यवहारकारणं भवतः । एवम् अर्पितानर्पितसिद्धिवशान्नित्यत्वानित्यत्वे नीलत्वानीलत्वे एकत्वानेकत्वे भिन्नत्वाभिन्नत्वे अपेक्षितत्वानपेक्षितत्वे दैवत्वपौरुषत्वे पुण्य-

---

१ लोकस्य व्य– आ०, ब०, ज०, व० । २ –नोऽपि वि– आ०, ब०, ज०, ता० । ३ –ति संसारविनि– आ०, ब०, ज०, व० । ४ –तक्रि– आ०, ब०, ज०, व० । ५ –चेद-नित्यमेवा– व० । ६ पुत्रत्वेन पितापितृत्वेन व० । पुत्रपितृत्वेन आ०, ब०, ज० । ७ –न् भवति भा– आ०, ब०, ज० ।

त्वपापत्वे इत्यादयो धर्म्मा एकस्मिन् पदार्थे [1]योजयितव्याः ।

अथ परमाणूनां परस्परं बन्धनिमित्तसूचनपरं सूत्रमुच्यते—

स्निग्धरूक्षत्वाद्बन्धः ॥ ३३ ॥

स्निह्यति स्म बहिरभ्यन्तरकारणद्वयवशात् स्नेहपर्यायप्रादुर्भावाच्चिक्कणः सञ्जातः स्निग्ध इत्युच्यते । तथा बहिरभ्यन्तरकारणद्वयवशात् रूक्षपरिणामप्रादुर्भावात् रूक्षयति परुषो भवति रूक्षः । रूक्षणं वा रूक्षः । स्निग्धश्च रूक्षश्च स्निग्धरूक्षौ स्निग्धरूक्षयोर्भावः स्निग्धरूक्षत्वं तस्मात् स्निग्धरूक्षत्वात्—चिक्कणलक्षणपर्यायपरुषलक्षणपर्यायहेतुत्वादित्यर्थः । बन्धो भवति—संश्लेष उत्पद्यते—द्व्यणुकादिपरिणामः स्कन्ध उत्पद्यते । द्वयोर्द्वयोः परमाण्वोः स्निग्धरूक्षयोः अन्योन्यसंश्लेषलक्षणे बन्धे सति द्व्यणुकस्कन्धो भवति । त्रयाणां [3]संश्लेषेण [4]त्र्यणुकस्कन्धो भवति । इत्यादिरीत्या सङ्ख्येयासङ्ख्येयानन्तानन्तप्रदेशस्कन्धो भवतीति वेदितव्यः । तत्र स्नेहगुण एकविकल्पो द्विविकल्पस्त्रिविकल्पश्चतुर्विकल्प इत्यादिसङ्ख्येयविकल्पः असङ्ख्येयविकल्पः अनन्तविकल्पः । एवं रूक्षगुणश्च एकद्वित्रिचतुःसङ्ख्येयासङ्ख्येयानन्तविकल्पः । एवंविधगुणसंयुक्ताः परमाणवो वर्तन्ते । यथा उदकस्नेहात् अजाक्षीरमधिकस्नेहम्, अजाक्षीरात् अजाघृतमधिकस्नेहम्, एवं गोक्षीरघृते अधिकस्नेहे गोक्षीरान्महिषीक्षीरमधिकस्नेहम्, गोघृतान्महिषीघृतमधिकस्नेहम् , महिषीक्षीरात् क्रमेलिकाक्षीरमधिकस्नेहम्, महिषीघृतान्मयीघृतमधिकस्नेहं वर्तते । तथा, यथा पांशुकणिकाभ्यः शर्करोपला अधिकरूक्षाः, तेभ्योऽपि पाषाणवज्रादयोऽधिकरूक्षगुणाः, तथा पुद्गलपरमाणवोऽपि अधिकाधिकस्निग्धरूक्षगुणैर्वृत्तयः प्रकर्षाप्रकर्षेणानुमीयन्ते ।

अथ स्निग्धरूक्षत्वगुणहेतुको बन्ध उक्तस्तत्र स्निग्धरूक्षगुणयोर्विशेषो नोक्तः, सामान्येन प्रसक्ते सति अनिष्टगुणप्रतिषेधार्थं सूत्रमिदमुच्यते—

न जघन्यगुणानाम् ॥ ३४ ॥

'स्निग्धरूक्षत्वाद् बन्धः' इत्यत्र सामान्येन बन्ध उक्तः । 'न जघन्यगुणानाम्' इदं सूत्रन्तु अनिष्टगुणनिवृत्त्यर्थं वर्तते । अस्यैव सूत्रस्य तावद् व्याख्यानं क्रियते तथाहि—जघनमेव जघन्यम्, शरीरावयवेषु किल जघनं निकृष्टोऽवयवः तथाऽन्योऽपि यो निकृष्टः स जघन्य उच्यते । "यदुगवादितः" [का० सू० २।६।११] इत्यनेन सूत्रेण यत् प्रत्यये सति जघन्यशब्दः सिद्धः । [7]केचित् शाखादित्वात् यं प्रत्ययं मन्यन्ते, यथा शाखायां भवः शाख्यस्तथा जघने भवो जघन्यः । गुणशब्दस्तु अनेकार्थः क्वचिदप्रधानेऽर्थे यथा "गुणप्रधानार्थमिदं हि वाक्यम्" [बृहत्स्व० श्लो० ४५] अप्रधानार्थमित्यर्थः । यथा अस्मिन् राज्ये वयं गुणभूता अप्रधानभूता

---

१ योजितव्याः आ०,ब०,ज० । एतेषां स्याद्वाददृष्ट्या विशेषपरिज्ञानार्थम् आप्तमीमांसादयो विलोकनीयाः । २ -दिकारणनामस्क- आ०,ब०,ज० । ३ संश्लेषणे ता०, ब० । ४ द्व्यणु- आ०, ब०,ज० । ५ -णप्रत्र- ब० । ६ सूत्रमिदमाहुराचार्याः ब० । ७ पाणिनीयाः ।

इत्यर्थः। क्वचित् [1]राजौ—द्विगुणा रज्जुः समावयवा इत्यर्थः। द्वे रज्जू एकत्र मेलिते बुनिते इत्यर्थः। क्वचित् द्रव्ये गुणशब्दो वर्तते यथा गुणवान् मालवो देशः, [2]गोशस्यादिप्रचुरद्रव्यवानित्यर्थः। क्वचिदुपकारे गुणशब्दो वर्तते यथा गुणज्ञोऽयं विद्वान् कृतोपकारज्ञ[3] इत्यर्थः। क्वचित् रूपादिषु गुणशब्दो वर्तते, यथा गुणा रूपरसादयः। क्वचिद् दोषविपरीतार्थे यथा गुणवान् साधुः ५ ज्ञानादिमानित्यर्थः। क्वचिद् विशेषणे किं गुणोऽयम्। क्वचिद् भागे यथा द्विगुणेषु चणकेषु च त्रिगुणा गोधूमाः, द्विभागेषु चणकेषु त्रिभागा गोधूमा इत्यर्थः। एवं शौर्यादिसन्ध्यादिसत्त्वादितन्तु[4]र्मूपकारप्रत्यञ्चादिषु गुणशब्दो ज्ञातव्यः। एतेष्वर्थेषु अत्र भागार्थो गुणशब्दो ज्ञातव्यः। तेनायं विग्रहः—जघन्या निकृष्टा गुणा भागा येषामण्वादीनां ते जघन्यगुणाः तेषां जघन्यगुणानाम्, बन्धो न भवति। तत्कथम्? एकगुणस्निग्धस्य एकगुणेन स्निग्धेन द्विगुणेन त्रिगुणेन चतुर्गुणेन १० पञ्चगुणेन संख्येयगुणेन असङ्ख्येयगुणेन अनन्तगुणेन वा स्निग्धेन बन्धो न भवति। तथा एकगुणस्निग्धस्य एकगुणेन रूक्षेण बन्धो न भवति। एवं द्वित्रिचतुःपञ्चादिसंख्येयगुणासंख्येयगुणानन्तगुणरूक्षेण वा बन्धो न भवति। एवमेकगुणरूक्षस्य एकगुणस्निग्धेन द्विगुणत्रिगुणचतुःपञ्चादिसङ्ख्येयगुणासङ्ख्येयगुणानन्तगुणेन स्निग्धेन वा बन्धो न भवति। अत्रायमर्थः—जघन्यगुणस्निग्धजघन्यगुणरूक्षौ विहायापरेषां स्निग्धानां रूक्षाणां चान्योन्यं बन्धोऽ- १५ स्तीति वेदितव्यम्।

अथ अस्मिन्नपि सूत्रेऽविशेषप्रसङ्गोऽबन्धस्य, केषां बन्धप्रतिषेधो भवतीति विशेषज्ञापनार्थं सूत्रमिदमाहुः—

गुणसाम्ये सदृशानाम् ॥ ३५ ॥

गुणानां साम्यं गुणसाम्यं तस्मिन् गुणसाम्ये भागतुल्यत्वे सति, सदृशानां तुल्यजाती- २० यानां परमाणूनां बन्धो न भवतीति[5] शेषः। अस्यायमर्थः—द्विगुणस्निग्धानाम् द्विभागस्निग्धानां परमाणूनां द्विगुणरूक्षैः—द्विभागरूक्षैः परमाणुभिः सह बन्धो न भवति। [6]त्रिगुणस्निग्धानां त्रिभागस्निग्धानां परमाणूनां त्रिगुणरूक्षैस्त्रिभागरूक्षैः परमाणुभिः सह बन्धो न भवति। तथा द्विगुणस्निग्धानाम्—द्विभागस्निग्धानां [7]द्विगुणस्निग्धानां द्विगुणस्निग्धैः द्विभागस्निग्धैः परमाणुभिः सह बन्धो न भवति। तथा द्विगुणरूक्षाणां द्विभागरूक्षाणां द्विगुणरूक्षैः २५ द्विभागरूक्षैः सह बन्धो न भवति। ननु गुणसाम्ये भागतुल्यत्वे यदि बन्धो न भवति तर्हि 'सदृशानाम्' इति पदं व्यर्थं साम्यशब्देनैव सदृशार्थप्रतिपादनात्; सत्यम्; 'सदृशानाम्' इति ग्रहणं गुणवैषम्ये बन्धो भवतीति परिज्ञानार्थम्। तेन गुणवैषम्ये बन्धो भवतीति सम्प्रत्ययः सम्यक्प्रतीतिः उत्तरसूत्रे करिष्यते इति।

अथ विषमभागानां तुल्यजातीयानामतुल्यजातीयानाम् अनियमात् बन्धे प्रसक्ते सति ३० विशिष्टबन्धसम्प्रत्ययनिमित्तं सूत्रमिदं ब्रुवन्त्याचार्य्याः—

---

१ रज्जौ ता०, व०। २ गोधूमसस्या– आ०, ब०, ज०। ३ –कार इ– आ०, ब०, ज०। ४ –रूपकार– व०। सुष्ठु उपकारः सूपकारः। ५ –ति विशेषः आ०, ब०, ज०, व०। ६ –वाक्यमेतन्नास्ति ता०। ७ पदमेतदधिकं वर्तते।

द्व्यधिकादिगुणानान्तु ॥ ३६ ॥

तु शब्दः पादपूरणावधारणविशेषणसमुच्चयेषु चतुर्ष्वर्थेषु यद्यपि वर्तते तथाप्यत्र सूत्रे विशेषणार्थे ज्ञातव्यः। किन्तद् विशेषणम् ? **'न जघन्यगुणानाम्' 'गुणसाम्ये सदृशानाम्'** इति सूत्रद्वये यो बन्धप्रतिषेध उक्तस्तं प्रतिषेधाधिकारं प्रतिषिध्य बन्धं विशेषयति–'बन्धो भवति' इति कथयत्ययं तुशब्दः। द्वाभ्यां गुणाभ्याम् अधिकः द्व्यधिकः चतुर्गुण इत्यर्थः। द्व्यधिक आदिः प्रकारो येषां ते द्व्यधिकादयः, द्व्यधिकादयः द्व्यधिकप्रकारा गुणा येषां परमाणूनां ते द्व्यधिकादिगुणाः, तेषां द्व्यधिकादिगुणानाम्। द्व्यधिकतायां त्रिगुणस्य पञ्चगुणेन सह बन्धो भवतीत्यादि सम्प्रत्ययः स्यात्, तेन कारणेन द्व्यधिकादिगुणानां तुल्यजातीयानामतुल्यजातीयानाञ्च बन्धो भवति [1]नो इतरेषाम्। के च तुल्यजातयः के च अतुल्यजातयः इति न ज्ञायते ? कथयामि–स्निग्धस्य स्निग्धस्तुल्यजातिः, स्निग्धस्य रूक्षोऽतुल्यजातिः, रूक्षस्य रूक्षस्तुल्यजातिः, रूक्षस्य स्निग्धोऽतुल्यजातिरिति। तथाहि–द्विगुणस्निग्धस्य परमाणोरेकगुणस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा बन्धो न भवति, चतुर्गुणस्निग्धेन तु बन्धो भवति। तस्यैव तु द्विगुणस्निग्धस्य पञ्चगुणस्निग्धेन बन्धो न भवति, षट्गुणस्निग्धेन सप्तगुणस्निग्धेन अष्टगुणस्निग्धेन [2]सङ्ख्येयगुणस्निग्धेन असङ्ख्येयगुणस्निग्धेन अनन्तगुणस्निग्धेन वा बन्धो न भवति। त्रिगुणस्निग्धस्य पञ्चगुणस्निग्धेन तु बन्धो भवति शेषैः पूर्वोत्तरैः बन्धो न भवति। के पूर्वे के चोत्तरे च इति न ज्ञायते ? कथयामि–बन्धसम्बन्धात् यत् पूर्वमुक्तं तन्न भवति। तत् किम् ? द्विगुणस्निग्धस्य परमाणोः एकगुणस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा बन्धो न भवति इति पूर्वमुक्तम्। बन्धसम्बन्धात् यत् पश्चादुक्तं तदपि न भवति। तत् किम् ? तस्यैव तु द्विगुणस्निग्धस्य पञ्चगुणस्निग्धेन षड्गुणस्निग्धेन सप्तगुणस्निग्धेनाष्टगुणस्निग्धेन सङ्ख्येयगुणस्निग्धेन असंख्येयगुणस्निग्धेन अनन्तगुणस्निग्धेन वा बन्धो न भवति इत्युत्तरवचनम्। चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेन भवति बन्धः, शेषैः पूर्वोत्तरैः न भवति बन्धः। पूर्वोत्तरशब्दार्थपरिज्ञानार्थं पुनरुक्तमिदं व्याख्यानम्। एवं शेषेष्वपि बन्धो योज्यः। शेषेष्वपीति किम् ? रूक्षबन्धप्रकारेष्वपि बन्धो योज्यः। तथाहि–द्विगुणरूक्षस्य एकगुणरूक्षेण[3] द्विगुणरूक्षेण त्रिगुणरूक्षेण न भवति बन्धः। द्विगुणरूक्षस्य चतुर्गुणरूक्षेण तु भवति बन्धः। तस्यैव द्विगुणरूक्षस्य पञ्चगुणरूक्षादिभिर्न भवति बन्धः। त्रिगुणरूक्षादीनां पञ्चगुणादिरूक्षैर्भवति बन्धः द्विगुणाधिकत्वात्। एवं भिन्नजातीयेष्वपि [4]बन्धो योजनीयः–रूक्षैः सह स्निग्धो योजनीय इत्यर्थः। तथा चोक्तं परमागमे–

"णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स लुक्खेण दुराहिएण।
णिद्धस्स लुक्खेण उवेदि बन्धो जहणवज्जे विसमे समे वा [5]॥"

[गो० जीव० गा० ६१४ (?)]

---

१ नेतरेषाम् आ०, ब०, ज०। २ संख्येयासंख्येयगुणस्निग्धेनानन्त– ब०। ३ –ण त्रिगुण– आ०, ब०, ज०। ४ –पि यो– आ०, ब०, ज०। ५ उद्धृतेयं प्राचीनगाथा सर्वार्थसिद्ध्यादिषु।

अथ किमर्थमधिकगुणविषयो बन्धो निरूपितः समगुणविषयो बन्धो न व्याख्यात इति प्रश्ने सूत्रमिदमुच्यते—

बन्धेऽधिकौ पारिणामिकौ च ॥ ३७ ॥

भावान्तरोपादानं पारिणामिकत्वमुच्यते। बन्धे बन्धनिमित्ते बन्धकार्ये सति पारिणा-
५ मिकौ यस्मात् कारणात् अधिकौ अधिकगुणौ भवतः तस्मात् कारणादधिकगुणविषयो बन्धो निरूपितः। समगुणविषये तु भेदः स्यात् विघटनं भवति तेन समगुणविषयो बन्धो न भवति। यथा आर्द्रो गुडः अधिकमधुररसः स पारिणामिकः, तदुपरि ये रेण्वादयः पतन्ति ते भावान्तरम्, तेषामुपादानं क्लिन्नो गुडः करोति—अन्येषां रेण्वादीनां स्वगुणमुत्पादयति—परिणामयतीति परिणामकः, परिणामक एव पारिणामिकः। स पारिणामिको गुडो यथा
१० अधिकगुणो भवति तथा अन्योऽपि अधिकगुणोऽल्पीयसः—अल्पगुणस्य परिणामक इत्युच्यते। अत्रायमर्थः—द्विगुणादिस्निग्धस्य चतुर्गुणादिस्निग्धः पारिणामिकः, द्विगुणादिस्निग्धस्य चतुर्गुणादिरूक्षः पारिणामिकः [1]तथा द्विगुणादिरूक्षस्य चतुर्गुणादिरूक्षः पारिणामिकः [2]तथा द्विगुणादिरूक्षस्य चतुर्गुणादिस्निग्धः पारिणामिकः। ततः पूर्वावस्थापरिहरणपूर्वकं तार्तीयिकमवस्थान्तरमाविर्भवति। कोऽर्थः? एकत्वमुत्पद्यते इत्यर्थः। तृतीयमेव तार्तीयिकं
१५ तृतीयादिकण् स्वार्थे, ह्रस्वस्य दीर्घता। अन्यथा, यदि अधिकगुणः पारिणामिको न भवति तदा श्वेतरक्तादितन्तुवत् संयोगमात्रे सत्यपि सर्वं पृथग्रूपेण तिष्ठति अपारिणामिकत्वात्। यथा तन्तुवायेन आतन्यमाना बुन्यमानाश्च तन्तवः शुक्लतन्तुसमीपे मिलिता रक्तादयोऽपि तन्तवः समानगुणत्वात् परस्परं न मिलन्ति, तथा अधिकं गुणपारिणामिकत्वं विना अल्पीयो गुणं विना च परमाणवो न मिलन्ति। एवमुक्तेन प्रकारेण बन्धे सति
२० ज्ञानावरणदर्शनावरणवेदनीयादीनां कर्मणां त्रिंशत्सागरोपमकोटीकोट्यादिकः[3] स्थितिबन्धोऽपि सङ्गच्छते जीवस्य स्निग्धादिगुणेनाधिकत्वात्। अत्र यथा गुडरेणुदृष्टान्तो दत्तस्तथा जलसक्त्वादिदृष्टान्तोऽपि ज्ञातव्यः। तत् कथम्? यथा रूक्षाः सक्तवः जलकणास्तु स्निग्धा द्वाभ्यां गुणाभ्यामधिका भवन्ति ते जलकणाः पारिणामिकस्थानीया रूक्षगुणानां सक्तूनां पिण्डत्वेन पारिणामिका विलोक्यन्ते, तथा परमाणवोऽपि। तथा चोक्तं तत्त्वार्थश्लोक-
२५ वार्तिके—

"बन्धेऽधिकौ गुणौ यस्मादन्येषां पारिणामिकौ।
दृष्टौ सक्तुजलादीनां नान्यथेत्यत्र युक्तवाक्॥" [त० श्लो० ५।३७]

अथ द्रव्यलक्षणमुत्पादव्ययध्रौव्ययुक्तं सदिति पूर्वमेवोक्तमिदानीं तु पुनरपि अपरेण सूत्रेण द्रव्यलक्षणं लक्षयन्त्याचार्याः—

---

१ वाक्यमेतन्नास्ति ता०। २ वाक्यमेतन्नास्ति आ०, ब०, ज०। ३ -करिथ- आ०, ब०, ज०।

गुणपर्ययवद्‌द्रव्यम् ॥ ३८ ॥

गुण्यते विशिष्यते पृथक् क्रियते द्रव्यं द्रव्यात् यैस्ते गुणाः। गुणैर्विना द्रव्याणां सङ्करव्यतिकरः स्यात। कोऽर्थः ? सङ्करस्य व्यामिश्रतायाः व्यतिकरः-प्रघट्टकः स्याद्-भवेदित्यर्थः। स्वभावविभावपर्यायरूपतया परि-समन्तात्[1] परिगच्छन्ति परिप्राप्नुवन्ति ये ते पर्यायाः। "दिहिलिहिश्लिषिश्वसिव्यध्यतीणश्याताश्च।" [का० सू० ४।२।५८] इत्यनेन णप्रत्ययः। अत्र तु पर्ययशब्दोऽस्ति तत्र पर्ययणं पर्ययः स्वभावविभावपर्याय-रूपतया परिप्राप्तिरित्यर्थः। "स्वरवृद्गमिग्रहामल्" [का० सू० ४।५।४१]। गुणाश्च पर्ययाश्च गुणपर्ययाः, गुणपर्ययाः विद्यन्ते यस्य तत् गुणपर्ययवत। द्रवति गच्छति प्राप्नोति, द्रोष्यति गमिष्यति प्राप्स्यति, अदुद्रुवत् अगमत् [2]प्राप्तवान् (वत्) ताँस्तान् पर्यायान् इति द्रव्यम्। "स्वराद्यः" [का० सू० ४।२।१०] इति साधुः। कथञ्चित् भेदापेक्षया नित्य-योगापेक्षया वन्तुर्मन्तव्यः। के गुणाः, के पर्यया इति चेत् ? उच्यते-अन्वयिनो गुणाः। व्यतिरेकिणः कादाचित्काः पर्ययाः, तदपेक्षया संसर्गे मन्तुः तैरुभयैरपि युक्तं द्रव्यमुच्यते। तदुक्तम्—

> "द्रव्यविधानं हि गुणाः द्रव्यविकारोऽत्र पर्ययो भणितः।
> तैर[3]न्यूनं द्रव्यं नित्यं स्यादयुतसिद्धमिति[4] ॥" [ ]

तदप्युक्तमास्त—

> "अनाद्यनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणम्।
> उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले ॥" [ ]

गुणेन द्रव्यं विशिष्यते यथा धर्मस्य गुणो गतिः, अधर्मस्य स्थितिरित्यादि। अविद्यमाने गुणे द्रव्यसङ्करप्रसङ्गः तथाहि—चेतनादिभिर्गुणैः जीवोऽचेतनादिपुद्गलेभ्यो विशिष्यते। रूपादिभिर्गुणैः पुद्गलादयश्च जीवाद् विशिष्यन्ते। तस्मात् कारणात् ज्ञानात् रूपादिभ्यश्च गुणेभ्योऽविशेषे सति सङ्करो व्यामिश्रता स्यात्। तेन सामान्यापेक्षया—सर्वजीवापेक्षया जीवस्य ज्ञानादयोऽन्वयिनो गुणाः। जीवगुणाः—जीवमया इत्यर्थः। पुद्गलादीनां तु रूपादयोऽन्वयिनो गुणाः। तेषां गुणानां विकाराः विशेषत्वेन भिद्यमानाः पर्याया उच्यन्ते। यथा जीवस्य ज्ञानगुणस्य पर्यायो घटज्ञानं पटज्ञानम् अम्भःस्तम्भकुम्भज्ञानं कोपो मदः [5]रूपं गन्धः तीव्रो मन्दः इत्यादयो जीवस्य ज्ञानगुणस्य विकाराः पर्याया वेदितव्याः। तेभ्यो

---

१ परिप्राप्नुवन्ति परिगच्छन्ति ये आ०, ब०, ज०। २ प्राप्तं वा ता- ता०। ३ -रनूनं आ०, ब०, ज०। ४ तुलना- "उक्तञ्च- गुण इदि दव्वविहाणं दव्वविकारो य पज्जवो भणिदो। तेहि अणूणं दव्वं अजुदपसिद्धं हवे णिच्चं ॥" —स० सि० ५।३७। ५ 'रूपं गन्धस्तीव्रो मन्दः' इत्यादयः पुद्गलद्रव्यस्य रूपगन्धादिगुणानां पर्यायाः ज्ञातव्याः, न तु ज्ञानगुणस्य।

द्रव्येभ्यः कथञ्चित् अन्यत्वमाप्नुवन् घटज्ञानादिसमुदायः पर्यायो व्यवहारनयापेक्षया द्रव्य-मुच्यते । यदि हि सर्वथैकान्तेन घटज्ञानादिसमुदायोऽपि अनर्थान्तरभूत एवोच्यते द्रव्यमेव कथ्यते तदा सर्वाभावो भवेत् समुदाये विघटिते द्रव्यमपि विघटते यस्मात् ।

अथ कालद्रव्यमुच्यते—

५ **कालश्च ॥ ३९ ॥**

कलयतीति कालः । चकारः परस्परसमुच्चये । तेनायमर्थः—न केवलं धर्म्माधर्म्मा-काशपुद्गला जीवाश्च द्रव्याणि भवन्ति किन्तु कालश्च द्रव्यं भवति द्रव्यलक्षणोपेतत्वात् । द्रव्यस्य लक्षणं द्विप्रकारमुक्तम्—**'उत्पादव्ययध्रौव्ययुक्तं सत्' 'गुणपर्ययवत् द्रव्यम्'** इति च । एतदुभयमपि लक्षणं कालस्य वर्तते, तेन कालोऽपि द्रव्यव्यपदेशभाग् भवति । कालस्य तावत्

१० ध्रौव्यं स्वप्रत्ययं [2]वर्तते स्वभावव्यवस्थानात् । व्ययोत्पादौ तु कालस्य परप्रत्ययौ वर्तेते । न केवलं व्ययोत्पादौ कालस्य परप्रत्ययौ वर्तेते अगुरुलघुगुणवृद्धिहान्यपेक्षया स्वप्रत्ययौ च वर्तेते । तथा कालस्य गुणा अपि वर्तन्ते । ते द्विप्रकाराः—साधारणा असाधारणाश्च । तत्र साधारणा गुणाः—अचेतनत्वम् अमूर्तत्वं सूक्ष्मत्वम् अगुरुलघुत्वञ्चेत्यादयः । असाधारणो गुणः कालस्य वर्तनहेतुत्वम् । कालस्य पर्यायास्तु व्ययोदयस्वरूपा वेदितव्याः । एवं द्विविधल-

१५ क्षणोपेतः काल आकाशादिवत् द्रव्यव्यपदेशभाक् सिद्धः । कालस्यास्तित्वलक्षणं वर्तना, धर्मादीनां गत्यादिवत् । ननु कालः पृथक् किमित्युक्तः; **'अजीवकाया धर्म्माधर्माकाशकाल-पुद्गलाः'** [५।१] इत्येवं सूत्रं विधीयताम् ? इत्याह सत्यम्; यद्येवं सूत्रं क्रियते तदा कायत्व-प्रसङ्गः कालस्य स्यात् । स तु कायप्रसङ्गः सिद्धान्ते न वर्तते, मुख्यतया उपचारेण च कालस्य [3]प्रदेशप्रचयकल्पनाया अभावात् । धर्माधर्माकाशैकजीवानां चेतनानां प्रदेशप्रचयो मुख्यतयोक्तः

२० **"असङ्ख्येयाः प्रदेशाः धर्माधर्मैकजीवानाम्, आकाशस्यानन्ताः"** [त० सू० ५।८,९] इति वचनात् । एकप्रदेशस्याप्यणोः पूर्वोत्तरभावप्रज्ञापननयेन व्यवहारनयेन उपचारकल्पनेन प्रदेशप्रचय उपचरितः । **"सङ्ख्येयासङ्ख्येयाश्च पुद्गलानाम्"** [त० सू० ५।१०] इति वचन(नात्)त्रिविधप्रदेशप्रचयकल्पनं तत्पूर्वोत्तरभावात् । **"भूतपूर्वकस्तद्वदुपचारः"** [4] [न्या० सं० न्या० ८ पृ० ९] इति परिभाषणात् 'भाविनि भूतवदुपचारः' इति परियुक्तत्वाच्च

२५ एकस्याप्यणोः सङ्ख्येयासङ्ख्येयानन्तप्रचयः सङ्गच्छते । [5]अनेहसस्तु मुख्यतया उपचारेण प्रदेशप्रचयकल्पना न वरीवर्तते, तेन दिष्टस्य अकायत्वम् । तथा धर्माधर्माकाशानां निष्क्रियत्वं प्रतिपादितम्, जीवपुद्गलानां तु सक्रियत्वमुक्तम्, तथाविधसूत्रे सति कालस्यापि सक्रियत्वं प्राप्नोति, तन्न घटते 'अजीवकाया धर्माधर्मकालाकाशपुद्गलाः'[6] चेदेवं निर्दिश्यते तदा **"आ आकाशादेकद्रव्याणि"** [५।६] इति वचनात् कालस्यैकद्रव्यत्वं प्राप्नोति, न च तथा [7]तस्मात्

१ द्रव्यमेव कथ्यते आ०, ब०, ज० । २ प्रवर्तते आ०, ब०, ज० । ३ प्रचयकलना– ब० । –प्रवचनकल्पना– आ०, ब०, ज० । ४ –कस्तदुप– आ०, ब०, ज०, ब० । ५ कालस्य । ६ –लाश्च चेदेवं ज० । ७ यस्मा– आ०, ब०, ज० ।

कारणात् कालादेशः पृथग् विधीयते । यद्यनेकद्रव्यत्वं कालस्य भवद्भिः विधीयते तत् किंप्रमाणमनेकद्रव्यत्वं कालस्य ? उच्यते—लोकाकाशस्य यावन्तोऽसङ्ख्येयप्रदेशा वर्तन्ते तावन्तः कालाणवोऽपि सन्ति । ते तु कालाणवो निष्क्रिया वर्तन्ते एकैकस्मिन् वियत्प्रदेशे एकैकवृत्त्या सर्वं लोकं व्याप्य ते कालाणवः स्थिता वर्तन्ते, पृथक्तया रत्नराशिवत् । तथा चोक्तं नेमिचन्द्रसिद्धान्तदेवेन भगवता— ५

"लोगागासपदेसे एक्केक्के जे ट्ठिया हु एक्केक्का ।
रयणाणं रासीविव ते कालाणू असंखदव्वाणि ॥" [2][गो० जीव० गा० ५८८]

ते तु कालाणवोऽमूर्ता इति वक्तव्याः रूपादिगुणाभावात् ।

अथ वर्तनालिङ्गस्य वरेण्यकालस्य प्रमाणं भणितं भवद्भिः, परिणामादिलक्षणस्य व्यवहारदिष्टस्य प्रमाणं कियत् वर्तते इति प्रश्ने सूत्रमिदमाहुः— १०

सोऽनन्तसमयः ॥ ४० ॥

व्यवहारलक्षणः कालोऽनन्तसमयो वर्तते । अनन्ताः समया यस्येति सोऽनन्तसमयः, यद्यपि वर्तमानव्यवहारकालापेक्षया कालस्यैकः समयो वर्तते तथापि अतीतापेक्षया भविष्यदपेक्षया च अनन्ताः समयाः कालस्य वर्तन्ते । अथवा, एकोऽपि कालाणुर्मुख्यभूतः अनन्तसमय इत्युपचर्यते अनन्तपर्यायवर्तनाहेतुत्वात् । एवंविधे व्याख्याने तु वरेण्यस्यैव कालस्य १५ प्रमाणपरिज्ञापनार्थमिदं सूत्रमुक्तम् । समयस्तावत् परमनिरुद्धः कालांशः उच्यते । परमनिरुद्ध इति कोऽर्थः ? बुद्ध्या अविभागभेदेन भेदितः परमाणुवत् भेत्तुं न शक्यते इत्यर्थः । अत्र तु समयशब्देन समयसमूहविशेषः आवलिकोच्छ्वासादिलक्षणो ज्ञातव्यः । उक्तञ्च—

"[3]आवलि असंखसमया संखिज्जावलिहि होइ उस्सासो ।
सत्तुस्सासो थोवो सत्तत्थोवो लवो भणिओ । १ ॥ २०
अट्ठतीसद्धलवा णाली दोणालिया मुहुत्तं तु ।
समऊणं तं भिन्नं अंतमुहुत्तं अणेयविहं ॥" [जंबू० प० १३।५,६]

इत्यादिकोऽहोरात्र-पक्ष-मास-ऋतु-अयन-संवत्सर-युग-पल्योपम-सागरोपमादिकः कालः समयोऽत्र गम्यते ।

अथ गुणपर्ययवद्द्रव्यमिति यदुक्तं तत्र न ज्ञायते के गुणा वर्तन्ते ? 'उच्यन्ताम्' २५ इति प्रश्ने योगमिमं चक्रुः—

---

१ यद्येक- आ०, ब०, ज० । २ उद्धृतेय स० सि० ५।३९ । ३ आवलि असंख्यसमया संख्यातावलिभिः भवति उच्छ्वासः । सप्तोच्छ्वासाः स्तोकः सप्तस्तोकाः लवो भणितः । अष्टत्रिंशदर्धलवाः नाली द्वेनालिके मुहूर्तं तु । समयोनं तत् भिन्नं अन्तर्मुहूर्तमनेकविधम् ॥

द्रव्याश्रया निर्गुणा गुणाः ॥ ४१ ॥

द्रव्यमाश्रयो येषां ते द्रव्याश्रयाः। गुणेभ्यो निष्क्रान्ता निर्गता निर्गुणाः। एवं विशेषणद्वयविशिष्टा ये ते गुणा भवन्ति। निर्गुणा इति विशेषणं द्व्यणुकत्र्यणुकादिस्कन्धनिषेधार्थम्, तेन स्कन्धाश्रया गुणा गुणा नोच्यन्ते। कस्मात्? कारणभूतपरमाणुद्रव्याश्रयत्वात्।
५ तस्मात् कारणात् निर्गुणा इति विशेषणात् स्कन्धगुणाः गुणा न भवन्ति पर्यायाश्रयत्वात्। ननु घटादिपर्यायाश्रिताः संस्थानादयो ये गुणा वर्तन्ते तेऽपि द्रव्याश्रया निर्गुणाश्च वर्तन्ते, तेषामपि संस्थानादीनां गुणत्वमास्कन्दति द्रव्याश्रयत्वात्, यतो घटपटादयोऽपि द्रव्याणीत्युच्यन्ते। साध्वभाणि भवता; ये नित्यं द्रव्यमाश्रित्य वर्तन्ते त एव गुणा भवन्ति न तु पर्यायाश्रया गुणा भवन्ति, पर्यायाश्रिता गुणाः कादाचित्काः-कदाचित् भवाः वर्तन्ते इति।

१० अथ अनेकवारान् यः परिणामशब्दः श्रुतस्तस्यार्थो न ज्ञायते, स वक्तुमवतारयितुं योग्य इति प्रश्ने अध्यायस्य समाप्तौ सूत्रमिदमुच्यते—तद्भावः परिणामः। अथवा अन्यकार्यसूचनार्थं तद्भावः परिणाम इति सूत्रमुच्यते। किं तदन्यत् कार्यम्? केचित् वदन्ति गुणा द्रव्यादर्थान्तरभूताः, तत्किमार्हतानामभीष्टम्? नाभीष्टम्। यद्यपि व्यपदेशादिभेदहेतुना द्रव्यात् कथञ्चित् भिन्नाः वर्तन्ते—अर्थान्तरभूताः सन्ति गुणाः, तथापि द्रव्यादव्यतिरेकाद्
१५ द्रव्यमयत्वाद् द्रव्यपरिणामाच्च अर्थान्तरभूता गुणा न भवन्ति। एवं चेत् सः कः परिणामः स एवोच्यतामिति प्रश्ने परिणामपरिज्ञानार्थं सूत्रमिदमुच्यते—

तद्भावः परिणामः ॥ ४२ ॥

तेषां धर्मादीनां द्रव्याणां येन स्वरूपेण भवनं भावः तद्भावः[१]। तद्भावः कोऽर्थः? तेषां धर्मादीनां द्रव्याणां तत्त्वं स्वरूपं परिणाम इत्युच्यते। स परिणामः अनादिः सादिश्च
२० भवति। गत्युपग्रहादिर्धर्मादीनाम् अनादिः परिणामः। स अनादिपरिणामः सामान्यापेक्षया भवति। स एव सामान्यः परिणामः विशेषापेक्षया पर्यायरूपः सादिश्च भवति। तेनायमर्थः–गुणाश्च पर्यायाश्च द्रव्याणां परिणाम इति सिद्धः॥ ४२ ॥

[२]इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ पञ्चमः पादः समाप्तः।

---

१ –वः तद्भावेति को– व०। –वः को– आ०, ज०, ब०। २ इत्यनवद्यगद्यपद्यविद्याविनोदितप्रमोदपीयूषपानपावनमतिसभाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणच्छन्दोऽलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य सञ्छर्दितमिथ्यामतदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां पञ्चमोऽध्यायः समाप्तः॥ ५॥ आ०, ब०।

षष्ठोऽध्यायः

अथ अजीवपदार्थव्याख्यानन्तरम् आस्रवपदार्थव्याख्यानार्थं सूत्रमिदमुच्यते—

कायवाङ्मनःकर्म योगः ॥ १ ॥

चीयते कायः। उच्यते वाक्। मन्यते मनः। क्रियते यत्तत्कर्म। योजनं योगः। कायश्च वाक् च मनश्च कायवाङ्मनांसि कायवाङ्मनसां कर्म कायवाङ्मनःकर्म-शरीरवचनमानसानां यत्कर्म क्रिया स योग इत्युच्यते आत्मनः प्रदेशचलनं योगः। योगो ५ निमित्तभेदात् त्रिप्रकारो भवति। ते के त्रयः प्रकाराः? कायनिमित्तात् आत्मनः काययोगः। वाङ्निमित्तादात्मनो वाग्योगः। मनोनिमित्तादात्मनो मनोयोगः। तत्र काययोगो वीर्यान्तरायक्षयोपशमे सति औदारिक-औदारिकमिश्र-वैक्रियिक-वैक्रियिकमिश्राहारकाहारकमिश्र-कार्मणलक्षणसप्तप्रकारशरीरवर्गणानां मध्ये अन्यतमवर्गणालम्बनापेक्षम्[1] आत्मप्रदेशचलनं परिस्पन्दनं परिस्फुरणं काययोग उच्यते। शरीरनामकर्मोदयो- १० त्पादितवाग्वर्गणालम्बने सति वीर्यान्तरायक्षयोपशमे सति मतिज्ञानावरणक्षयोपशमे सति अक्षरादिश्रुतज्ञानावरणक्षयोपशमे सति अभ्यन्तरवचनलब्धिसामीप्ये च सति वचनपरिणामाभिमुखस्य जीवस्य प्रदेशानां परिस्पन्दनं चलनं परिस्फुरणं वचनयोग उच्यते। सत्यासत्योभयानुभयभेदात् स चतुर्विधो भवति। अभ्यन्तरवीर्यान्तरायमानसावरणक्षयोपशमस्वरूपमनोलब्धिनैकट्ये सति बाह्यकारणमनोवर्गणावलम्बने च सति चित्तपरिणामसन्मुखस्य १५ जीवस्य प्रदेशानां परिस्पन्दनं परिचलनं परिस्फुरणं मनोयोग इति मन्यते। सत्यासत्योभयानुभयभेदात् सोऽपि चतुःप्रकारः। कायादिचलनद्वारेण[2] आत्मनश्चलनं योग इत्यर्थः। सयोगकेवलिनस्तु वीर्यान्तरायादिक्षये[3] सति त्रिप्रकारवर्गणालम्बनापेक्षम्[4] आत्मप्रदेशपरिस्पन्दनं परिचलनं परिस्फुरणं योगो वेदितव्यः। सयोगकेवलिनो[5] योगोऽचिन्तनीयः। तथा चाभाणि समन्तभद्रस्वामिना— २०

"कायवाक्यमनसां प्रवृत्तयो नाभवंस्तव मुनेश्चिकीर्षया।
नासमीक्ष्य भवतः प्रवृत्तयो धीर तावकमचिन्त्यमीहितम् ॥ १ ॥"

[बृहत्स्व० श्लो० ७४]

अभ्युपगतो योगस्तावत् त्रिविधः। प्रतिज्ञात आस्रव उच्यतामिति प्रश्ने सूत्रमिदमाहुः—

स आस्रवः ॥ २ ॥ २५

स पूर्वोक्तस्त्रिविधोऽपि योग आस्रवः कथ्यते। आस्रवति आगच्छति आत्मप्रदेशसमीपस्थोऽपि पुद्गलपरमाणुसमूहः कर्मत्वेन परिणमतीत्यास्रवः। अत्र आस्रवशब्दस्य सकारो

---

१ –क्षया आ– आ०, ज०, ब०। २ –दिलक्षणद्वारेण आ०, ज०, ब०। ३ –येऽपि सति ता०। ४ –पेक्षाया आ– आ०, ब०, ज०। ५ –नोऽयो– ता०।

दन्त्यो ज्ञातव्यः[1], न तालव्यः। "षुस्रु दुद्रु कृच्छगमृसृपृ गतौ" [ ] इति सूत्रोक्तस्रु-धातोः प्रयोगात्। यथा[2] सरोवरजलवाहकं सरोवरद्वारं जलास्रवणहेतुत्वात् प्रणालिका आस्रव उच्यते, तथा योगप्रणालिकया जीवस्य कर्म समास्रवतीति त्रिविधोऽपि योग आस्रव इति व्यपदिश्यते। दण्डकपाटप्रतरलोकपूरणलक्षणो[3] यो योगो वर्तते स योगोऽनास्रवरूपो-
५ ऽप्यस्ति[4] भिन्नः। यथा आर्द्रमंशुकं समन्ताद् मरुदानीतं रजःसमूहं गृह्णाति, तथा कषायजलेनार्द्रो जीवः त्रिविधयोगादानीतं कर्म सर्वप्रदेशैरुपादत्ते। अथवा, अन्योऽप्यस्ति दृष्टान्तः। यथा तप्तलोहपिण्डः पयसि निक्षिप्तः समन्ताद्वारि गृह्णाति, तथा कषायसन्तप्तात्मा त्रिविधयोगानीतं[5] कर्म परिगृह्णाति "मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः" [त० सू० ८।१] इति य उक्त आस्रवः स सर्वोऽपि त्रिविधयोगेऽन्तर्भवतीति
१० वेदितव्यम्।

अथ कर्म द्विप्रकारम्—पुण्यं पापञ्च। तस्य कर्मण आस्रवणहेतुर्योगः। स किम् अविशेषेणास्रवणहेतुरथवाऽस्ति[6] कश्चिद्विशेष इति प्रश्ने सति आस्रवस्य विशेषसूचनार्थं सूत्रमिदमाहुः—

शुभः पुण्यस्याशुभः पापस्य ॥ ३ ॥

१५ शोभते शुभः। पुनात्यात्मानमिति पुण्यम्, पूयते पवित्रीक्रियते[7] आत्माऽनेनेति वा पुण्यम्, सद्वेद्यशुभायुर्नामगोत्रलक्षणम्, तस्य पुण्यस्य। न शोभते अशुभः। पात्यवति रक्षति आत्मानं कल्याणादिति पापम्, असद्वेद्याशुभायुरशुभनामाशुभगोत्रलक्षणम्, तस्य पापस्य। शुभो योगः पुण्यस्य आस्रवहेतुः, अशुभो योगः पापस्यास्रवहेतुरिति विशेषः। तत्र प्राणिरक्षणाचौर्यब्रह्मचर्यादिः शुभः काययोगः। सत्यहितमितमृदुभाषणादिः[8] शुभो वाग्-
२० योगः। अर्हदादिभक्तिस्तपोरुचिःश्रुतविनयादिश्च शुभो मनोयोगश्चेति। विशुद्धपरिणामजनितास्त्रयः शुभयोगाः। तथा प्राणातिपाताऽदत्तादानमैथुनादिकः अशुभः काययोगः। असत्याहितामितकर्कशकर्णशूलप्रायभाषणादिः अशु[9]भो वाग्योगः। वधचिन्तनेर्ष्याभिसूयादिकः अशुभो मनोयोगः। एते त्रयोऽप्यशुभयोगाः अशुभसङ्क्लिष्टपरिणामजनिता भवन्ति—पापकर्मोपार्जनहेतुभूतार्तरौद्रध्यानपरिणामैरुत्पादिता भवन्तीत्यर्थः। शुभो योगः शुभफलकर्म-
२५ पुद्गलहेतुः। अशु[10]भो योगः अशुभफलकर्मपुद्गलहेतुर्भवति। शुभपरिणामनिर्वृत्तो निष्पन्नो योगः शुभः कथ्यते। अशुभपरिणामनिर्वृत्तो निष्पन्नो योगः अशुभः कथ्यते, न तु शुभाशुभकर्महेतुमात्रत्वेन शुभाशुभौ योगौ वर्तेते। तथा सति सयोगकेवलिनोऽपि शुभाशुभकर्मप्रसङ्गः स्यात्, न च तथा। ननु शुभयोगोऽपि ज्ञानावरणादिबन्धहेतुर्वर्तते। यथा केनचिदुक्तम्—

---

१ -व्यः पु- आ०, ब०, ज०। २ -था सरोवरद्वा- आ०, ब०, ज०। ३ -णो योगो व- आ०, ब०, ज०। ४ -स्ति तत्र आ०, ब०, ज०। ५ -योगनी- ता०। ६ -णास्रवहे- आ०, ब०, ज०। ७ -तेऽने- आ०, ब०, ज०। ८ शुभवा- ता०। ९ -भका- आ०, ब०, ज०। १० -शुभवा- आ०, ब०, ज०। ११ -शुभयो- आ०, ब०, ज०।

'भो विद्वन्, त्वमुपोषितो वर्तसे तेन त्वं पठनं मा कुरु विश्रम्यताम्' इति, तेन हितेऽप्युक्तेऽपि ज्ञानावरणादि प्रयोक्तुर्भवति, तेन एक एवाशुभयोगोऽङ्गीक्रियताम्, शुभयोग एव नास्ति; सत्यम्; स यदा हितेन परिणामेन पठन्तं [1]विश्रमयति तदा तस्य चेतस्येवेमभिप्रायो वर्तते— 'यदि इदानीमयं [2]विश्राम्यति तदाऽग्रे अस्य बहुतरं तपःश्रुतादिकं भविष्यति' इत्यभिप्रायेण तपःश्रुतादिकं वारयन्नपि अशुभास्रवभाग् न स्यात् विशुद्धिभाक्परिणामहेतुत्वादिति। तदुक्तम्— ५

"विशुद्धिसङ्क्लेशाङ्गं चेत् स्वपरस्थं सुखासुखम्।
पुण्यपापास्रवो युक्तो न चेद् व्यर्थस्तवार्हतः ॥१॥" [आप्तमी० श्लो० ९५]

अथेदानीं ययोर्जीवयोः ययोः कर्मणोः आस्रवो भवति तावात्मनौ ते कर्मणी च कथ्येते—

सकषायाकषाययोः साम्परायिकेर्यापथयोः ॥ ४ ॥ १०

कषशिषजषझषवषमषरुषरिषयूषजूषहिंसार्थाः। कषति हिनस्त्यात्मानं दुर्गतिं प्रापयतीति कषायः। अथवा, कषायो न्यग्रोधत्वग्विभीतकहरीतकादिकः वस्त्रे मञ्जिष्ठादिरागश्लेषहेतुर्यथा तथा क्रोधमानमायालोभलक्षणः कषायः कषाय इव आत्मनः कर्मश्लेषहेतुः। सह कषायेण वर्तते य आत्मा मिथ्यादृष्ट्यादिः स सकषाय इत्युच्यते। पूर्वोक्तलक्षणः कषायो न विद्यते यस्य उपशान्तकषायादेः सोऽकषाय इत्युच्यते। सकषायश्च १५ अकषायश्च सकषायाकषायौ तयोः सकषायाकषाययोः षष्ठीद्विवचनमत्र। सं सम्यक् पर उत्कृष्टः अयो गतिः पर्यटनं प्राणिनां यत्र भवति स सम्परायः संसार इत्यर्थः, सम्परायः प्रयोजनं यस्य कर्मणः तत् कर्म साम्परायिकम्, संसारपर्यटनकारकं कर्म साम्परायिकमित्युच्यते। ईर गतौ कम्पने च। ईरणम् ईर्या। "ऋवर्णव्यञ्जनान्ताद् घ्यण्" [का० सू० ४।२।३५] ईर्येति कोऽर्थः? योगो गतिः योगप्रवृत्तिः कायवाङ्मनोव्यापारः कायवाङ्मनोवर्गणावलम्बी २० आत्मप्रदेशपरिस्पन्दो जीवप्रदेशचलनम् ईर्येति भण्यते। तद्द्वारकं कर्म ईर्यापथमुच्यते। तदेव कषायादिकं द्वारमास्रवमार्गो यस्य कर्मणः तत्तद्द्वारकम्। साम्परायिकञ्च ईर्यापथञ्च साम्परायिकेर्यापथे तयोः साम्परायिकेर्यापथयोः। अत्रापि षष्ठीद्विवचनम्। अस्यायमर्थः सकषायस्य मिथ्यादृष्टेर्जीवस्य साम्परायिकस्य संसारपरिभ्रमणकारणस्य कर्मणः आस्रवो भवति। अकषायस्य उपशान्तकषायादिकस्यात्मनः ईर्यापथस्य संसारेऽपरिभ्रमणहेतोः कर्मण आस्रवो २५ भवति। ईर्यापथकर्मास्रवः संसारापरिभ्रमणकारणं कथम्? अकषायस्य उपशान्तकषायादेर्योगवशादुपात्तस्य कर्मणः कषायाभावाद् बन्धाभावे सति शुष्ककुड्यपतितलोष्टवद् अनन्तरसमये निवर्तमानस्य ईर्यापथस्यास्रवः बन्धकारणं न भवति यस्मात्। सकषायस्य तु आत्मनो मिथ्यादृष्ट्यादेर्योगवशादानीतस्य स्थित्यनुभागबन्धका[3]रस्य साम्परायिकस्य कर्मणः आस्रवो भवकारणं भवति यस्मात्। अत्र सकषायस्य साम्परायिकस्यास्रवो भवति। अकषायस्य ३० ईर्यापथस्य आस्रवो भवतीति यथाक्रमं वेदितव्यम्।

---

१ विश्राम- आ०, ब०, ज०। २ विश्रम्य- ता०। ३ -कारकस्य- आ०, ब०, ज०।

अथ सकषायस्य आस्रवस्य भेदपरिज्ञापनार्थं सूत्रमिदमुच्यते—

इन्द्रियकषायाव्रतक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसङ्ख्याः पूर्वस्य भेदाः ॥५॥

इन्द्रियाणि च कषायाश्च अव्रतानि च क्रियाश्च इन्द्रियकषायाव्रतक्रियाः। पञ्च च चत्वारश्च पञ्च च पञ्चविंशतिश्च पञ्चचतुःपञ्चपञ्चविंशतयः ता सङ्ख्या यासाम् अनुक्रमेण इन्द्रियकषायाव्रतक्रियाणां ताः पञ्चचतुःपञ्चपञ्चविंशतिसङ्ख्याः। अस्यायमर्थः—स्पर्शनरसनघ्राणचक्षुश्श्रोत्राणि निजनिजविषयव्यापृतानि पूर्वोक्तानि इन्द्रियाणि पञ्च। क्रोधमानमायालोभलक्षणोपलक्षिता वक्ष्यमाणस्वरूपाः कषायाश्चत्वारः। हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्योऽविरतिलक्षणोपलक्षितानि वक्ष्यमाणानि अव्रतानि पञ्च। साम्प्रतं व्यावर्ण्यमानाः पञ्चविंशतिक्रियाः। एते चत्वारो राशयः पूर्वस्य साम्परायिकास्रवस्य भेदाः प्रकाराः भवन्ति।

तत्र पञ्चविंशतिक्रियास्वरूपं निरूप्यते—चैत्यगुरुप्रवचनार्चनादिस्वरूपा सम्यग्दर्शनवर्द्धिनी अन्यक्रियाभ्यो विशिष्टा सम्यक्त्वक्रिया।१। परदेवतास्तुतिरूपा मिथ्यात्वप्रवृत्तिकारणभूता मिथ्यात्वक्रिया।२। गमनागमनादिषु मनोवाक्कायैः परप्रयोजकत्वं प्रयोगक्रिया।३। संयतस्य सतः अविरत्याभिमुख्यं प्रयत्नेनोपकरणादिग्रहणं वा समादानक्रिया।४। ईर्यापथकर्महेतुका ईर्यापथक्रिया।५। क्रोधाविष्टस्य दुष्टत्वं प्रादोषिकी क्रिया।६। प्रदुष्टस्य सतः कायाभ्युद्यमः कायिकी क्रिया।७। हिंसोपकरणग्रहणात् आधिकारिणिकी क्रिया।८। दुःखोत्पत्तौ [२]परितप्तिपरवशत्वं पारितापिकी क्रिया।९। दशप्राणवियोगकरणं प्राणातिपातिकी क्रिया।१०। रागार्द्रीकृतस्य प्रमादवतः हृद्यरूपविलोकनाभिनिवेशो दर्शनक्रिया।११। प्रमादपरतन्त्रस्य कमनीयकामिनीस्पर्शनानुबन्धः स्पर्शनक्रिया।१२। अपूर्वहिंसादिप्रत्ययविधानं प्रतीतिजननं प्रात्यायिकी क्रिया।१३। स्त्रीपुरुषपशवाद्यागमनप्रदेशे मलमूत्राद्युत्सर्जनं समन्तानुपातनक्रिया।१४। अप्रतिलेखिताऽनिरीक्षितप्रदेशे शरीरादिनिक्षेपणमनाभोगक्रिया।१५। कर्मकरादिकरणीयायाः क्रियायाः स्वयमेव करणं स्वकरक्रिया।१६। पापप्रवृत्तौ परानुमतदानं निसर्गक्रिया।१७। परविहितगुप्तपापप्रकाशनं विदारणक्रिया।१८। चारित्रमोहोदयात् जिनोक्तावश्यकादिविधानासमर्थस्य अन्यथाकथनम् आज्ञाव्यापादनक्रिया।१९। शठत्वेन अलसत्वेन च जिनसूत्रोपदिष्टविधिविधानेऽनादरः अनाकाङ्क्षा क्रिया।२०। प्राणिच्छेदनभेदनहिंसनादिकर्मपरत्वं प्राणिच्छेदनादौ परेण विधीयमाने वा प्रमोदनं प्रारम्भक्रिया।२१। परिग्रहाणामविनाशे प्रयत्नः पारिग्राहिकी क्रिया।२२। ज्ञानदर्शनचारित्रतपस्सु तद्वत्सु पुरुषेषु च मायावचनं वञ्चनाकरणं मायाक्रिया।२३। मिथ्यामतोक्तक्रियाविधानविधापनतत्परस्य साधु त्वं विदधासीति मिथ्यामतदृढनं मिथ्यादर्शनक्रिया।२४। संयमघातककर्मविपाकपारतन्त्र्यान्निवृत्तौ अवर्तनम् अप्रत्याख्यानक्रिया।२५। एताः पञ्चविंशतिक्रिया ज्ञातव्याः। इन्द्रियाणि कषाया अव्रतानि च त्रयो राशयः कारणभूताः, पञ्चविंशतिस्तु क्रियाः कार्यरूपाः प्रवर्तन्त इति इन्द्रियादिभ्यः क्रियाणां भेदो वेदितव्यः। साम्परायिकास्रव उक्तः।

---

१ -नाथना- आ०, ब०, ज०। २ -तप्त्यं प- ता०। ३ -त्रादिव्युत्स- आ०, ब०, ज०।

अथ योगत्रयं सर्वसाधारणम्, तदास्रवबन्धफलानुभवनं तु विशेषवद् वर्तते जीवपरिणामानन्तविकल्पत्वात्। स तु फलानुभवनलक्षणो विशेषः तत्सङ्क्षेपसूचनार्थं सूत्रमिदमुच्यते—

तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः ॥ ६ ॥

बहिरन्तःकारणोदीरणवशात् तीव्रते स्थूलो भवति उद्रेकं प्राप्नोति उत्कटो भवति यः परिणामः स तीव्र इत्युच्यते। मन्दते अल्पो भवति अनुत्कटः सञ्जायते यः परिणामः स ५ मन्द उच्यते। [1]हनिष्यामि एतं पुमांसमिति ज्ञात्वा प्रवर्तनं ज्ञातमित्युच्यते। मदेन प्रमादेन वा अज्ञात्वा हननादौ प्रवर्तनम् अज्ञातमिति भण्यते। अधिक्रियन्ते अर्थाः यस्मिन्निति अधिकरणं द्रव्यमित्यर्थः। द्रव्यस्य पुरुषादेर्निजशक्तिविशेषो वीर्यमुच्यते। भावशब्दः प्रत्येकमभिसम्बध्यते, तेनायमर्थः—तीव्रभावश्च मन्दभावश्च ज्ञातभावश्च अज्ञातभावश्च अधिकरणञ्च वीर्यञ्च तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्याणि, तेषां विशेषा भेदाः तीव्रमन्द- १० ज्ञाताज्ञातभावाधिकरणवीर्यविशेषाः, तेभ्यस्तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यः। तस्य आस्रवस्य विशेष तद्विशेषः। क्रोधरागद्वेषशिष्टाशिष्टप्राणिसं[2]योगदेशकालाद्यनेकबहिःकारणवशात् इन्द्रियकषायव्रतक्रियाणां कुत्रचिदात्मनि तीव्रो भावो भवति तस्य तीव्र आस्रवः स्यात्, इन्द्रियकषायाव्रतक्रियाणां कुत्रचिदात्मनि मन्दो भावो भवति निर्बलः परिणामः स्यात् तस्य मन्द आस्रवो भवति। इन्द्रियकषायाव्रतक्रियाप्रवर्तने कस्यचिदात्मनः [3]ज्ञातत्वं भवति तस्य १५ महान् आस्रवः स्यात्। इन्द्रियादीनामज्ञातभावे प्रवृत्तौ सत्याम् अल्पास्रवः स्यात्। तथा अधिकरणविशेषे[4]ऽपि सति आस्रवस्य विशेषो भवति, यथा वेश्यादीनामालिङ्गने अल्पास्रवः स्यात् राजपत्नी[5]लिङ्गिनीप्रभृत्यालिङ्गने[6] महान् आस्रवो भवति। वीर्यविशेषे च [7]वज्रर्षभनाराचसंहननमण्डितपुरुषहृपीकादिव्यापारे महानास्रवो भवति, अपरसंहननसंयुक्तपुरुषपापकर्मकरणे अल्पास्रवो भवति, अल्पादप्यल्पो भवति, तत्रापि वीर्यविशेष[8]न्तर्भावात्। एवं २० क्षेत्रकालादावपि आस्रवविशेषो वेदितव्यः। गृहब्रह्मचर्यभङ्गेऽल्पास्रवः स्यात्, देवभवनब्रह्मचर्यभङ्गे महानास्रवः स्यात्, तस्मादपि तीर्थमार्गे [9]महानास्रवः स्यात्, तीर्थमार्गादपि तीर्थे महास्रवो[10] भवेत्। एवं कालादौ, देववन्दनाकाले परकालात् महास्रवः स्यात्। एवं पुस्तकादिद्रव्यादौ आस्रवभेदो मन्तव्यः। तस्य भेदा अनन्ता इति कारणभेदात् कार्यभेद इति।

अथ अधिकरणं यदुक्तं तत्स्वरूपं न ज्ञायते, तत् कीदृशमिति प्रश्ने सूत्रमिदं २५ बभणुराचार्याः—

अधिकरणं जीवाजीवाः ॥ ७ ॥

अधिक्रियन्तेऽर्था अस्मिन्नित्यधिकरणं द्रव्यमुच्यते। यद्द्रव्यमाश्रित्य आस्रव उत्पद्यते

---

१ हनिष्यामि तं आ०, ब०, ज०। २ -क्रिया प्रवर्तक- आ०, ब०, ज०। ३ ज्ञातव्यम- आ०, ब०, ज०। ४ -षे सति आ०, ब०, ज०। ५ भिक्षुणी। ६ -नेन म- आ०, ब०, ज०। ७ वज्रवृष- आ०, ब०, ज०। ८ -षान्तरामा- आ०, ब०, ज०। ९ महास्रवः ता०। १० महानास्रवो आ०, ब०, ज०।

तद्द्रव्यमधिकरणमुच्यते। सर्वोऽपि शुभाशुभलक्षण आस्रवो यद्यप्यात्मनो भवति जीवस्य सञ्जायते तथापि य आस्रवो मुख्यभूतेन जीवेन [1]उत्पाद्यते तस्यास्रवस्य जीवोऽधिकरणं जीवद्रव्यमाश्रयो भवति। यस्तु आस्रवोऽजीवद्रव्यमाश्रित्य जीवस्योत्पद्यते तस्य आस्रवस्याधिकरणमाश्रयोऽजीवद्रव्यमुच्यते। जीवाश्च अजीवाश्च जीवाजीवाः, तेषां लक्षणं पूर्वमेवोक्तम् **"जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम्"** [त० सू० १।४] इत्यधिकारे। यदि जीवाजीवलक्षणं पूर्वमेवोक्तं तेनैवाधिकारेण जीवाजीवा लभ्यन्ते किं पुनः जीवाजीवग्रहणेन ? साधूक्तं भवता; अधिकरणविशेषज्ञापनार्थम् पुनर्जीवाजीवग्रहणम्–अधिकरणविशेषस्तु ज्ञापनीय एव तेन पुनर्जीवाजीवग्रहणं कृतम्। कोऽसावधिकरणविशेषः ? हिंसाद्युपकरणभावः। भवतु नामैवं जीवश्चाजीवश्च जीवाजीवौ एवं द्विवचने [3]अश्रेषप्राप्ते बहुवचनं किमर्थं कृतम् ? युक्तमुक्तं भवता, द्विवचने प्राप्ते यद् बहुवचनेन निर्दिश्यते तेन जीवाजीवयो[4]र्द्रव्ययोर्ये सन्ति पर्यायास्तेऽप्यास्रवस्याधिकरणं [5]भवन्ति तेन बहुवचनं युक्तमेव।

अथ जीवाधिकरणाऽजीवाधिकरणयोर्मध्ये जीवाधिकरणभेदपरिज्ञापनार्थं योगोऽयमुच्यते—

आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ८ ॥

आदौ भवं आद्यम्। संरम्भश्च समारम्भश्च आरम्भश्च संरम्भसमारम्भारम्भा योगाश्च ते कृतकारितानुमताश्च योगकृतकारितानुमताः, योगकृतकारितानुमताश्च कषायविशेषाश्च योगकृतकारितानुमतकषायविशेषाः, संरम्भसमारम्भारम्भा योगकृतकारितानुमतकषायविशेषैरुपलक्षिताः संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषास्तैस्तथोक्तैः। त्रिः त्रीन् वारान्, पुनश्च त्रिः त्रीन् वारान्, पुनश्च त्रिः त्रीन् वारान्, चतुश्चतुरो वारान्, एकशः एकैकं प्रति संरम्भं समारम्भम् आरम्भं प्रति गणनं भवति। तेषामेव संरम्भादीनामेव चतुर्भिः कषायैश्च गणनं भवति। आद्यं जीवाधिकरणम् आस्रवोत्पादकं भवति। अस्यायमर्थः–प्रमादवतो जीवस्य प्राणव्यपरोपणादिषु प्रयत्नावेशः संरम्भं [6]उच्यते। प्राणव्यपरोपणादीनाम् उपकरणाभ्यासकरणं समारम्भः कथ्यते। प्राणव्यपरोपणादीनां प्रथमारम्भ एव आरम्भ उच्यते। कायवाङ्मनोलक्षणस्त्रिविधो योगः। कृतः स्वतन्त्रेण विहितः। कारितः परप्रयोजकत्वम्। अनुमतः केनचित् क्रियमाणे प्राणव्यपरोपणादौ अनुमोदनम्। कषायाः क्रोधमानमायालोभाः। अर्थोऽर्थान्तराद् विशिष्यते यः स विशेषः। स विशेषशब्दः प्रत्येकमभिसम्बद्ध्यते–संरम्भविशेषः समारम्भविशेषः आरम्भविशेष इत्यादि। त्रयः संरम्भसमारम्भारम्भाः। त्रयो योगाः। त्रयः

---

१ उत्पाद्य– ता०, आ०, ब०। २ –स्याधि– आ०, ब०, ज०। ३ न्यायप्राप्ते। ४ –योर्ये आ०, ब०, ज०। ५ भवति आ०, ब०, ज०। ६ कथ्यते आ०, ब०, ज०। ७ –षः प्र– आ०, ब०, ज०।

कृतकारितानुमताः । चत्वारः कषायाः । एतेषां गणनाया अभ्यावृत्तिः पुनःपुनर्गणना[1] सुच्प्रत्ययेन सूच्यते । एकमेकं प्रत्येकशः इति वीप्सावचनम् । एकैकं प्रति त्र्यादीन् प्रापयेदित्यर्थः । तथाहि—क्रोधकृतकायसंरम्भः, मानकृतकायसंरम्भः, मायाकृतकायसंरम्भः लोभकृतकायसंरम्भः, क्रोधकारितकायसंरम्भः, मानकारितकायसंरम्भः, मायाकारितकायसंरम्भः, लोभकारितकायसंरम्भः, क्रोधानुमतकायसंरम्भः, मानानुमतकायसंरम्भः, मायानुमतकायसंरम्भः ५ लोभानुमतकायसंरम्भ इति द्वादशप्रकारः कायसंरम्भो भवति । एवं वाक्योगो द्वादशप्रकारः क्रोधकृतवाक्संरम्भः, मानकृतवाक्संरम्भः, मायाकृतवाक्संरम्भः, लोभकृतवाक्संरम्भः, क्रोधकारितवाक्संरम्भः, मानकारितवाक्संरम्भः, मायाकारितवाक्संरम्भः लोभकारितवाक्संरम्भः, क्रोधानुमतवाक्संरम्भः, मानानुमतवाक्संरम्भः, मायानुमतवाक्संरम्भः, लोभानुमतवाक्संरम्भ इति द्वादशप्रकारो वाक्संरम्भः । क्रोधकृतमनःसंरम्भः, मानकृतमनःसंरम्भः, १० मायाकृतमनःसंरम्भः, लोभकृतमनःसंरम्भः, क्रोधकारितमनःसंरम्भः, मानकारितमनःसंरम्भः, मायाकारितमनःसंरम्भः, लोभकारितमनःसंरम्भः, क्रोधानुमतमनःसंरम्भः, मानानुमतमनःसंरम्भः, मायानुमतमनःसंरम्भः, लोभानुमतमनःसंरम्भः इति द्वादशप्रकारो मनःसंरम्भः । एवं षट्त्रिंशत्प्रकारः संरम्भः, तथा षट्त्रिंशत्प्रकारः समारम्भः, तथा षट्त्रिंशत्प्रकार आरम्भः एवमष्टोत्तरशतप्रकारः जीवाधिकरणास्रवो भवति । चकारः किमर्थम्? १५ अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसञ्ज्वलनकषायभेदकृतान्तर्भेदसमुच्चयार्थः ।

अथाऽजीवाधिकरणभेदपरिज्ञानार्थं सूत्रं सूचयन्ति[2]—

निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परम् ॥ ९ ॥

निर्वर्त्यते निष्पाद्यते निर्वर्तना निष्पादना । निक्षिप्यते स्थाप्यते यः स निक्षेपः स्थापना । संयुज्यते मिश्रीक्रियते संयोगः । निःसृज्यते प्रवर्तते निसर्गः प्रवर्तनम् । निवर्तना २० च निक्षेपश्च संयोगश्च निसर्गश्च निवर्तनानिक्षेपसंयोगनिसर्गाः । द्वौ च चत्वारश्च द्वौ च त्रयश्च द्विचतुर्द्वित्रयः, ते भेदाः येषां निर्वर्तनानिक्षेपसंयोगनिसर्गाणां ते द्विचतुर्द्वित्रिभेदाः । पिपर्ति पूरयति परभागमिति परम् । अस्यायमर्थः—निर्वर्तना द्विभेदा द्विप्रकारा । निक्षेपश्चतुर्भेदः चतुःप्रकारः । संयोगो द्विभेदो द्विप्रकारः । निसर्गस्त्रिभेदः त्रिप्रकारः । एते चत्वारो भेदाः परम् अजीवाधिकरणं भवन्ति । ननु पूर्वसूत्रे आद्यमित्युक्ते जीवाधिकरणं लब्धम्, २५ अजीवाधिकरणन्तु अवशिष्टं स्वयमेव लभ्यते, तेन 'निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः' इत्येवं सूत्रं क्रियताम् किमनर्थकेन परशब्दग्रहणेन? इत्याह–सत्यमुक्तं भवता; परमित्युक्ते संरम्भादिभ्यो निर्वर्तनादिकचतुष्टयं परमन्यत् भिन्नम् इत्यर्थः, अन्यथा जीवाधिकरणाधिकारात् निर्वर्तनादयश्चत्वारोऽपि जीवपरिणामा भवन्तीति भ्रान्तिरुत्पद्यते, तदर्थं

१ -णनं सु- ता० । २ -न्त्याचार्याःआ०, ब०, ज० । ३ -करणं ननु आ०, ब०, ज० ।

परमिति गृहीतम्। तत्र निर्वर्तनाधिकरणं द्विभेदं यदुक्तं तत्किम्? मूलगुणनिर्वर्तनाधिकरणम्, उत्तरगुणनिर्वर्तनाधिकरणं चेति निर्वर्तना द्विभेदा। तत्र मूलगुणनिर्वर्तनाधिकरणं पञ्चभेदम्–शरीरं वाक् मनः प्राणाः अपानाश्चेति। उत्तरगुणनिर्वर्तनाधिकरणं काष्ठपाषाणपुस्तकचित्रकर्मादिनिष्पादनं जीवरूपादिनिष्पादनं लेखनञ्चेत्यनेकविधम्। निक्षेपश्चतुर्भेदः–अप्रत्यवेक्षितनिक्षेपाधिकरणं दुष्प्रतिलेखितनिक्षेपाधिकरणं सहसानिक्षेपाधिकरणम् अनाभोगनिक्षेपाधिकरणं चेति। अनाभोग इति कोऽर्थः? पुनरनालोकितरूपतया उपकरणादि[1]स्थापनम् अनाभोग इत्युच्यते। संयोगो द्विभेदः– अन्नपानसंयोगाधिकरणम् उपकरणसंयोगाधिकरणं चेति। निसर्गस्त्रिभेदः–कायनिसर्गाधिकरणं वाङ्निसर्गाधिकरणं मनोनिसर्गाधिकरणं चेति। एतच्चतुष्टयम् अजीवमाश्रित्य आत्मन आस्रव उत्पद्यते तेनाऽजीवाधिकरणमुच्यते।

अथ सामान्यतया कर्मास्रव भेद उक्तः, अधुना सर्वकर्मणां विशेषेणास्रवा उच्यन्ते। तत्र ज्ञानावरणदर्शनावरणकर्मणोरास्रवभेदपरिज्ञानार्थं सूत्रमिदमाहुराचार्य्याः—

तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥१०॥

सम्यग्ज्ञानस्य सम्यग्दर्शनस्य च सम्यग्ज्ञानसम्यग्दर्शनयुक्तस्य पुरुषस्य वा त्रयाणां मध्ये अन्यतमस्य केनचित्पुरुषेण प्रशंसा विहिता, तां प्रशंसामाकर्ण्य अन्यः कोऽपि पुमान् पैशुन्यदूषितः स्वयमपि ज्ञानदर्शनयोस्तद्युक्तपुरुषस्य वा प्रशंसां न करोति श्लाघनं न व्याहरति [2]कत्थनं नोच्चारयते तदन्तःपैशुन्यम् अन्तर्दुष्टत्वं प्रदोष उच्यते। यत् किमपि [3]कारणं मनसि धृत्वा विद्यमानेऽपि ज्ञानादौ एतदहं न वेद्मि एतत्पुस्तकादिकमस्मत्पार्श्वे न वर्तते इत्यादि ज्ञानस्य[4] यदपलपनं विद्यमानेऽपि नास्तिकथनं निह्नव उच्यते। आत्मसदभ्यस्तमपि ज्ञानं दातुं योग्यमपि दानयोग्यायापि पुंसे केनापि हेतुना यन्न दीयते तन्मात्सर्यमुच्यते। विद्यमानस्य प्रबन्धेन प्रवर्तमानस्य मत्यादिज्ञानस्य विच्छेदविधानम् अन्तराय उच्यते। कायेन वचनेन च सतो ज्ञानस्य विनयप्रकाशनगुणकीर्तनादेरकरणमासादनमुच्यते। युक्तमपि ज्ञानं वर्तते तस्य युक्तस्य ज्ञानस्य अयुक्तमिदमज्ञानमिति दूषणप्रदानम् उपघात उच्यते, सम्यग्ज्ञानविनाशाभिप्राय इत्यर्थः। ननु आसादनमेव उपघातः कथ्यते, पुनरुपघातग्रहणं व्यर्थमिदम्; युक्तमुक्तं भवता; विद्यमानस्य ज्ञानस्य यद्विनयप्रकाशनगुणकीर्तनादेरकरणं तदासादनम्, उपघातस्तु ज्ञानस्य अज्ञानकथनं ज्ञाननाशाभिप्रायो वर्तते, कथमनयोर्महान् भेदो नास्ति? प्रदोषश्च निह्नवश्च मात्सर्यञ्च अन्तरायश्च आसादनञ्च उपघातश्च प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाताः। तयोः ज्ञानदर्शनयोः। एते षट् पदार्थाः ज्ञानदर्शनावरणयोः ज्ञानावरणदर्शनावरणयोरास्रवा भवन्ति आस्रवकारणं भवन्ति। ज्ञानं च दर्शनं च ज्ञानदर्शने साकारनिराकाररूपे। अत्र विशेषज्ञापनं ज्ञानम्, सत्तावलोकनमात्रं दर्शनम्, तयोरावरणे ज्ञानदर्शनावरणे तयोः ज्ञानदर्शनावरणयोः।

---

१ –स्थापितमना– आ०, ब०, ज०। २ कथनं नो– आ०, ब०, ज०। ३ करणं आ०, ब०, ज०। ४ –स्य अप– अ० ब०, ज०।

ननु तच्छब्देन ज्ञानदर्शने कथं लभ्येते पूर्वं ज्ञानदर्शनयोरनिर्देशात् ? सत्यम् **"श्रौतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्" [ ]** इति[1] परिभाषासूत्रबलात् तच्छब्देन ज्ञानं दर्शनं च लभ्यते। ज्ञानदर्शनावरणयोरिति सूत्रे शब्दश्रवणात् तेन पूर्वसूत्रोक्तनिर्वर्तनादिकं न शङ्कनीयम्। केनचिदुक्तम् ज्ञानदर्शनावरणयोरास्रवाः के इति प्रश्ने उत्तरं दीयते तत्प्रदोषादय इति ज्ञानदर्शनयोः प्रदोषादय इति। एते प्रदोषादयः ज्ञाने ५ कृता अपि दर्शनावरणस्यापि कारणं भवन्ति एकहेतुसाध्यस्य कार्यस्य अनेकस्य कार्यस्य दर्शनात्। अथवा ये ज्ञानविषयाः प्रदोषादयः ते ज्ञानावरणस्य कारणं ये तु दर्शनविषयाः प्रदोषादयस्ते तु दर्शनावरणहेतवो ज्ञातव्याः। तथा ज्ञानावरणस्य कारणम् आचार्ये शत्रुत्वम्, उपाध्याये[2] प्रत्यनीकत्वम्, अकाले अध्ययनम्, अरुचिपूर्वकं पठनम्, पठतोऽप्यालस्यम्, अनादरेण व्याख्यानश्रवणम्, प्रथमानुयोगे वाच्यमाने अपरानुयोगवाचनम् तीर्थोपरोध १० इत्यर्थः, बहुश्रुतेषु गर्वविधानम्, मिथ्योपदेशश्च, बहुश्रुतापमाननम्, स्वपक्षपरिहरणं परपक्षपरिग्रहः—तदेतद्द्वयं तार्किकदर्शनार्थम् ख्यातिपूजालाभार्थम्, असम्बद्धः प्रलापः, उत्सूत्रवादः, कपटेन ज्ञानग्रहणम्, शास्त्रविक्रयः, [3]प्राणातिपातादयश्च ज्ञानावरणस्य आस्रवाः। तथा दर्शनावरणस्य आस्रवाः देवगुर्वादिदर्शनमात्सर्यम्, दर्शनान्तरायः, चक्षुरुत्पाटनम्, इन्द्रियाभिमतित्वम्, निजदृष्टेर्गौरवम्, दीर्घनिद्रादिकम्, निद्रा, आलस्यम्, नास्तिकत्वप्रतिग्रहः, १५ सम्यग्दृष्टेः सन्दूषणम्, कुशास्त्रप्रशंसनम्, यतिवर्गजुगुप्सादिकम्, प्राणातिपातादयश्च दर्शनावरणस्य आस्रवाः।

अथ वेदनीयं कर्म द्विविधं वर्तते सद्वेद्यमसद्वेद्यं च। सद्वेद्यं सुखकरम्, असद्वेद्यं दुःखकरम्। तत्र असद्वेद्यस्य कारणानि सूचयत्सूत्रमिदमाहुः—

दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थान्यसद्वेद्यस्य ॥ ११ ॥ २०

दुःखयतीति दुःखं वेदनालक्षणः परिणामः, शोचनं शोकः चेतनाचेतनोपकारकवस्तुसम्बन्धविनाशे वैक्लव्यं दीनत्वमित्यर्थः, तापनं तापः निन्दाकारणात् मानभङ्गविधानाच्च कर्कशवचनादेश्च सञ्जातः [4]आविलान्तःकरणस्य कलुषितचित्तस्य तीव्रानुशयोऽतिशयेन पश्चात्तापः खेद इत्यर्थः। आक्रन्द्यते आक्रन्दनं परितापसञ्जातवाष्पपतनबहुलविलापादिभिर्व्यक्तं प्रकटम् २५ अङ्गविकारादिभिर्युक्तं क्रन्दनमित्यर्थः। हननं वधः।

"पंच वि इंदियपाणा मनवचकाएण तिण्णि बलपाणा।
आणप्पाणप्पाणा आउगपाणेण होंति [6]दस पाणा ॥ १ ॥" [बोधपा० ५३] इति

---

१ "श्रुतानुमितयोः श्रौतो विधिर्बलीयान्"– न्यायसं० पृ० ६९। परिभाषेन्दु० परि० ११३। २ ध्याय प्रत्य- आ०, ब०, ज०। ३ प्राणिनिपा– आ०, ब०, ज०। ४ अविला– आ०, ब०, ज०। ५ बहुविला– आ०, ब०, ज०। ६ दह पा– आ०, ब०, ज०।

गाथोक्तलक्षणदशप्राणवियोगकरणमित्यर्थः। परिदेव्यते परिदेवनं सङ्क्लेशपरिणामविहितावलम्बनं स्वपरोपकाराकाङ्क्षालिङ्गम् अनुकम्पाभूयिष्ठं रोदनमित्यर्थः। दुःखं च शोकश्च तापश्चाक्रन्दनं च वधश्च परिदेवनं च दुःखशोकतापाक्रन्दनवधपरिदेवनानि। आत्मा च परश्च उभयश्च आत्मपरोभयास्तेषु तिष्ठन्तीति आत्मपरोभयस्थानि। एतानि षट् कर्माणि कोपाद्यावेशवशात् आत्मस्थानि परस्थानि उभयस्थानि च असद्वेद्यस्य दुःखरूपस्य कर्मणः आस्रवनिमित्तानि भवन्तीति वेदितव्यम्। ननु शोकादयः पञ्चापि दुःखमेव, तेन 'दुःखमात्मपरोभयस्थमसद्वेद्यस्य' इति सूत्रं क्रियतां किं शोकादिग्रहणेन ? इत्याह—साधूक्तं भवता; यद्यपि शोकादयो दुःखमेव वर्तन्ते, तथापि कतिपयविशेषकथनेन दुःखजातेरनुविधानं विधीयते अनुकरणमुच्यते इत्यर्थः। यथा गौरित्यभिहिते अनिर्ज्ञाते विशेषे सति गोविशेषकथनार्थं खण्डमुण्डशुक्लकृष्णाद्युपादानं विधीयते तथा दुःखविषयाश्च [2]विशेषा असंख्येयलोकभेदसम्भवा अपि कतिपया अत्र निर्दिश्यन्ते तद्विवेकप्रतिपत्त्यर्थमित्यर्थः।

अत्र किञ्चिद् विधीयते चर्चनम्—चेद् दुःखादीन्यात्मपरोभयस्थान्यसद्वेद्यास्रवकारणानि वर्तन्ते तर्हि आर्हतैः केशोत्पाटनम् उपवासादिप्रदानम् आतापनयोगोपदेशनं सर्वमित्यादिकमाचरणं दुःखकारणमेवास्थीयते प्रतिज्ञायते भवद्भिः तर्हि आत्मपरोभयान् प्रति किमित्युपदिश्यते ? साधूक्तं भवता; अन्तरङ्गक्रोधावेशपूर्वकाणि दुःखशोकादीनि असद्वेद्यास्रवकारणानि भवन्ति, क्रोधाद्यावेशाभावान्न भवन्ति विशेषोक्तत्वात्। यथा कश्चिद्वैद्यः परमकरुणाचित्तस्य मायामिथ्यादिनिदानशल्यरहितस्य संयमिनो मुनेरुपरि गण्डं पिटकं विस्फोटं[5] शस्त्रेण पाटयति तच्छस्त्रपातनं यद्यपि दुःखहेतुरपि वर्त्तते तथापि भिषग्वरस्य बाह्यनिमित्तमात्रादेव कोपाद्यावेशं विना पापबन्धो न भवति, तथा संसारसम्बन्धिमहादुःखाद्भीतस्य मुनेः दुःखनिवृत्त्युपायं प्रति सावधानचित्तस्य शास्त्रोक्ते कर्मणि प्रवर्तमानस्य सङ्क्लेशपरिणामरहितत्वात् केशोत्पाटनोपवासादिदानदुःखकारणोपदेशेऽपि[6] पापबन्धो न भवति। तथा चोक्तम्[7]—

"न दुःखं न सुखं यद्वद्धेतुर्दृष्टश्चिकित्सिते।
चिकित्सायां तु युक्तस्य स्याद् दुःखमथवा सुखम्॥ १॥
न दुःखं न सुखं तद्वद्धेतुर्मोक्षस्य साधने।
मोक्षोपाये तु युक्तस्य स्याद् दुःखमथवा सुखम्॥ २॥" [　]

एतस्य श्लोकद्वयस्य व्याख्यानम्—यथा चिकित्सिते रोगचिकित्साकरणे हेतुः शस्त्रादिकः स स्वयं दुःखं न भवति सुखं च न भवति कस्मादचेतनत्वादित्यर्थः, चिकित्सायां तु प्रतीकारे प्रवृत्तस्य वैद्यस्य दुःखम् अथवा सुखं स्यादेव। कथम् ? यदि वैद्यः क्रोधादिना शस्त्रेण

१ –कारका– आ०, ब०, ज०। २ विविधविषयसू च अ– आ०, ब०, ज०। ३ –क्तवान्य– आ०, ब०, ज०। ४ –करुणानिचिंतस्य आ०, ब०, ज०। ५ –टकं आ०, ब०, ज०। ६ –देशोपि आ०, ब०, ज०। ७ उद्धृतौ इमौ स० सि० ६।११।

विस्फोटं पाटयति तदा [ऽ] धर्मकर्मोपार्जनाद् भिषजो दुःखं भवति, यदा तु [1]कारुण्यं कृत्वा तद्व्याधिविनाशार्थं मुनेः सुखजननार्थं विस्फोटं पाटयति तदा क्रोधाद्यभावाद् धर्मकर्मोपार्जनाद् वैद्यस्य सुखमेव भवति । दृष्टान्तश्लोको गतः । इदानीं दार्ष्टान्तश्लोको व्याख्यायते–एवं मोहक्षयसाधनहेतुरुपवासलोचादिकः स स्वयमेव सुखदुःखरूपो न भवति किन्तु य उपवासादिकं करोति कारयति वा शिष्यं गुर्वादिकः तस्य दुःखं सुखं वा भवति, यदि गुरुः क्रोधादिना उपवासादिकं ५ करोति कारयति वा तदा [ऽ] धर्मकर्मोपार्जनात् दुःखमेव प्राप्नोति, यदा तु कारुण्येन संसारदुःखविनाशार्थमुपवासादिकं कारयति करोति वा तदा धर्मकर्मोपार्जनात् सुखमेव प्राप्नोति । यथा दुःखादयः असद्वेद्यास्रवकारणानि षट् प्रोक्ताः[2], तथा अन्यान्यपि भवन्ति । तथाहि– अशुभः प्रयोगः, परनिन्दनम्, पिशुनता, अननुकम्पनम्, अङ्गोपाङ्गच्छेदनभेदनादिकम्, ताडनम्, त्रासनम्, तर्जनम्, भर्त्सनम्, तर्जनम् अङ्गुल्यादिसञ्ज्ञया, भर्त्सनं वचना- १० दिना, मारणम्, रोधनम्, बन्धनम्, मर्दनम्, दमनम्, परनिन्दनम्, आत्मप्रशंसनम्, संक्लेशोत्पादनम्, महारम्भः, महापरिग्रहः, मनोवाक्कायवक्रशीलता, पापकर्मोपजीवित्वम्[3], अनर्थदण्डः, विषमिश्रणम्, शरजालपाशवागुरापञ्जरमारणयन्त्रोपायसर्जनादिकम्, एते पापमिश्राः पदार्था आत्मनः परस्य उभयस्य वा क्रोधादिना क्रियमाणा असद्वेद्यास्रवा भवन्ति ।

अथेदानीं सद्वेद्यास्रवस्वरूपं निरूपयन्नाह— १५

भूतव्रत्यनुकम्पादानसरागसंयमादियोगक्षान्तिशौचमिति

सद्वेद्यस्य ॥ १२ ॥

नारकतिर्यङ्मनुष्यदेवपर्य्यायलक्षणासु चतसृषु गतिषु निजनिजकर्मोदयवशाद् भवन्तीति भूतानि प्राणिवर्गाः । अहिंसासत्यास्तेयब्रह्मचर्य्याऽपरिग्रहदिवाभुक्तलक्षणानि व्रतानि एकदेशेन सर्वथा च विद्यन्ते येषां ते व्रतिनः श्रावका यतयश्च । परोपकारार्द्रचित्तस्य[4] २० परपीडामात्मपीडामिव मन्यमानस्य पुरुषस्य अनुकम्पनम् अनुकम्पा कारुण्यपरिणामः । भूतानि च व्रतिनश्च भूतव्रतिनस्तेषु तेषां वा अनुकम्पा भूतव्रत्यनुकम्पा । परोपकारार्थं निजद्रव्यव्ययो दानम् । संसारहेतुनिषेधं प्रति उद्यमपरः अक्षीणाशयश्च सरागो भण्यते । षट्जीवनिकायेषु षडिन्द्रियेषु च पापप्रवृत्तेर्निवृत्तिः संयम उच्यते । सरागस्य पुरुषस्य संयमः सरागसंयमः, सरागः संयमो वा यस्य स सरागसंयमः । सरागसंयम आदिर्येषां २५ संयमासंयमाऽकामनिर्जराबालतपःप्रभृतीनां ते सरागसंयमादयः । भूतव्रत्यनुकम्पा च दानं च सरागसंयमादयश्च भूतव्रत्यनुकम्पादानसरागसंयमादयः तेषां योगः सम्यक् प्रणिधानं सम्यक् चिन्तनादिकं भूतव्रत्यनुकम्पादानसरागसंयमादियोगः । क्रोधमानमायानां निवृत्तिः क्षान्तिः । लोभप्रकाराणां विरमणं शौचमित्युच्यते । भूतव्रत्यनुकम्पादानसरागसंयमादि-

---

१ कारणं आ०, ब०, ज० । २ प्रोक्तानि आ०, ब०, ज० । ३ –लतया पाप– आ०, ब०, ज० । ४ –रार्द्रीचि–ता० ।

योगश्च क्षान्तिश्च शौचं च भूतव्रत्यनुकम्पादानसरागसंयमादियोगक्षान्तिशौचम् । **समाहारो** द्वन्द्वः । इति एवं प्रकार अर्हत्पूजाविधानतात्पर्यम्, बालवृद्धतपस्विनां च वैयावृत्त्यादिकं सर्वमेतत् सद्वेद्यस्य आस्रवाः सुखरूपस्य कर्मणः कारणं भवन्ति[1] । ननु व्रतिनः किं भूतानि न भवन्ति यत्पृथग् गृह्यन्ते ? युक्तमुक्तं भवता ; भूतग्रहणात् सिद्धे
५ सति यद् व्रतिशब्दग्रहणं तद् व्रतिनामनुकम्पा प्रधानतया कर्तव्येति सूचनार्थम् ।

अथ मोहकर्मास्रवसूचनार्थं सूत्रद्वयं मनसि धृत्वा सम्यक्त्वमोहास्रवकारणसङ्कथनार्थं तत्रेदं सूत्रमुच्यते—

केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य ॥ १३ ॥

द्विपदमिदं सूत्रम् ।

१० **"क्षायिकमेकमनन्तं त्रिकालसर्वार्थयुगपदवभासम् ।**
सकलसुखधाम सततं वन्देऽहं केवलज्ञानम् ॥"

[सं० श्रुतभ० श्लो० २९]

इत्यार्योक्त (क्तं) केवलं ज्ञानम् आवरणद्वयरहितं ज्ञानं विद्यते येषां ते केवलिनः । श्रूयते स्म श्रवणं वा श्रुतं सर्वज्ञवीतरागोपदिष्टम्, अतिशयवद्बुद्धिऋद्धिसमुपेतगणधरदेवानु-
१५ स्मृतग्रन्थगुम्फितं श्रुतमित्युच्यते । सम्यग्दर्शनज्ञानचारित्रपात्राणां श्रमणानां परमदिगम्बराणां गणः समूहः सङ्घ उच्यते । अहिंसा सत्यमस्तेयं ब्रह्मचर्यं निःसङ्गत्वमित्यादिलक्षणोपलक्षितः सर्वज्ञवीतरागकेवलिप्रणीतः धर्म इत्युच्यते, दुर्गतिदुःखादुद्धृत्य इन्द्रादिपूजितपदे धरतीति धर्म इति निरुक्तेः **"अर्तिहुसुधृक्षिणीपदभायास्तुभ्यो मः ।"** [का० उ० १।५३] भवनवासिव्यन्तरज्योतिष्ककल्पवासिलक्षणोपलक्षिताः मनसा अमृताहाराः पूर्वोक्तलक्षणा
२० देवाः । केवलिनश्च श्रुतं च सङ्घश्च धर्मश्च देवाश्च केवलिश्रुतसङ्घधर्मदेवाः, तेषां तेषु वा अवर्णवादो निन्दावचनं केवलिश्रुतसङ्घधर्मदेवावर्णवादः । केवलिनामवर्णवादस्तावत्— केवलिनः किल केवलज्ञानिनः कवलाहारजीविनः, तेषां च रोगो भवति उपसर्गश्च सञ्जायते, नग्ना भवन्त्येव परं वस्त्राभरणमण्डिता दृश्यन्ते इत्यादिकं सर्वं केवलज्ञानिनां गुणवतां महतामसद्भूतदोषोद्भवनमवर्णवादो वेदितव्यः । मांसभक्षणं मद्यपानं मातृस्वस्रादिमैथुनं
२५ जलगालने[2] महापापमित्यादिकमाचरणं किल शास्त्रोक्तं श्रुतस्यावर्णवादः । गुणवतो महतः श्रुतस्य असद्भूतदोषोद्भवनमवर्णवादः श्रुते धूर्तजनसम्मेलित्वात्[3] । एते दिगम्बराः खलु शूद्रा अशुचयः अस्नानाः त्रयीबहिर्भूताः कलिकालोत्पन्ना[4] इत्यादि गुणवतां महतां दिगम्बराणाम् असद्भूतदोषोद्भवनं सङ्घस्यावर्णवादः । अर्हदुपदिष्टो धर्मः खलु निर्गुणः तद्विधायका

---

१ भवति आ०, ब०, ज० । २ जलगालनकन्दमूलभक्षणमहा–आ०, ब०, द० । ३ –जनमेलि– आ०, ब०, ज० । ४ -कालोद्भूताः आ०, ब०, द० ।

ये पुरुषा वर्तन्ते ते सर्वेऽपि असुरा भविष्यन्ति इत्यादिकं गुणवति महति केवलिप्रणीते धर्मेऽसद्भूतदोषोद्भवनम् अविद्यमानदोषकथनं धर्मस्यावर्णवादः। देवाः किल मांसोपसेवाप्रियाः तदर्थं तद्वचनविधातार उर्वन्तरिक्षं लभन्ते इत्यादिको देवावर्णवादः। एतत्सर्वमदोषदोषोद्भवनं सम्यक्त्वमोहास्रवकारणं वेदितव्यम्।

अथ चरित्रमोहास्रवप्रकारप्रतिपादनार्थं समर्थ्यते सूत्रमेतत्— ५

कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥ १४ ॥

कषन्ति हिंसन्ति सम्यक्त्वादीनिति कषायाः कषायाणामुदयः कषायफलजननरूपः कषायोदयस्तस्मात्कषायोदयात् तीव्रपरिणामः अत्युत्कटमनस्कारः चारित्रमोहस्य चारित्रावरणकर्मण आस्रवो भवति। ते कषाया द्विप्रकाराः—कषायाः अकषायाश्च। तत्र कषायवेदनीयस्य आस्रवः परेषामात्मनश्च कषायोत्पादनं व्रतशीलसंयुक्तयतिजनचारित्रदूषणप्रदानं १० धर्मध्वंसनं धर्मान्तरायकरणं देशसंयतगुणशीलसन्त्याजनं मात्सर्यादिना विरक्तचित्तानां विभ्रमोत्पादनम् आर्त्तरौद्रजनकलिङ्गव्रतादिधारणं कषायवेदनीयस्यास्रवा भवन्ति। अकषायवेदनीयं नवप्रकारम्—हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदभेदात्। तत्र सद्धर्मजनोपहसनं दीनजनानामतिहसनं कन्दर्पहसनं बहुप्रलपनम् उपहसनशीलतादिकं हास्यवेदनीयस्यास्रवा भवन्ति। नानाप्रकारक्रीडनतत्परत्वं विचित्रक्रीडनभावो देशाद्य-[1] १५ नौत्सुक्यप्रीतिजननादिकं व्रतशीलादिष्वरुचिरित्येवमादिकं रतिवेदनीयस्यास्रवा भवन्ति। परेषामरतेराविर्भवनं परेषां रतेर्विनाशनं पापशीलजनानां संसर्गादिकं पापक्रियाप्रोत्साहनं चेत्यादयः अरतिवेदनीयस्य आस्रवा भवन्ति। आत्मनः शोकोत्पादनं परेषां शोककरणं शोकप्लुतानां जनानामभिनन्दनञ्चेत्यादयः शोकवेदनीयस्यास्रवा भवन्ति। स्वयं भये [2]परिणमनं परेषां भयोत्पादनं निर्दयत्वं त्रासनादिकं चेत्यादयो भयवेदनीयस्यास्रवा २० भवन्ति। पुण्यक्रियाचारजुगुप्सनं परपरिवादशीलत्वं चेत्यादयः जुगुप्सावेदनीयस्यास्रवा भवन्ति। पराङ्गनागमनं स्वरूपधारित्वम् असत्याभिधानं परवञ्चनपरत्वं परच्छिद्रप्रेक्षित्वं [3]वृद्धरागत्वं चेत्यादयः स्त्रीवेदनीयस्यास्रवा भवन्ति। अल्पकोपनम् अजिह्मवृत्तिरगर्वत्वं लीलाङ्गनासमवायालपरागित्वम्[4] अनीर्षत्वं स्नाने गन्धद्रव्ये स्रजि आभरणादौ च रागवस्तुनि अनादरः स्वदारसन्तोषः परदारपरिहरणं चेत्यादयः पुंवेदनीयस्य आस्रवा भवन्ति। २५ प्रचुरकषायत्वं गुह्येन्द्रियविनाशनं पराङ्गनापमानावस्कन्दनं स्त्रीपुरुषानङ्गव्यसनित्वं व्रतशीलादिधारिपुरुषप्रमथनं तीव्ररागश्चेत्यादयो नपुंसकवेदनीयस्यास्रवा भवन्ति।

---

१ –क्रीडनं भावोद्देशा –ज०। २ परिभ्रमनं आ०, ब०, ज०। ३ परवृद्ध–आ०, ब०, ज०। ४ –रागत्व आ०, ब०, ज०।

अथायुष्कर्म चतुर्विधं वर्तते नारकतिर्यङ्मनुष्यदेवायुर्भेदात्। तत्र तावन्नारकायुःकारण-प्रकाशनार्थं सूत्रमिदं ब्रुवन्ति—

बह्वारम्भपरिग्रहत्वं नारकस्यायुषः ॥१५॥

आरभ्यते इत्यारम्भः प्राणिपीडाहेतुर्व्यापारः, परिगृह्यत इति परिग्रहः 'ममेदम्' इति ५ बुद्धिलक्षणः, आरम्भाश्च परिग्रहाश्च आरम्भपरिग्रहाः, बहवः प्रचुरा [1]आरम्भपरिग्रहाः यस्य स बह्वारम्भपरिग्रहः, बह्वारम्भपरिग्रहस्य भावः बह्वारम्भपरिग्रहत्वम्। नरके भवमुत्पन्नं यत् तन्नारकं तस्य नारकस्य। बह्वारम्भपरिग्रहत्वम् नारकस्य नरकसम्बन्धिनः आयुषः आयुः-कर्मणः आस्रवो भवति। विस्तरेण तु मिथ्यादर्शनं तीव्ररागः अनृतवचनं परद्रव्यहरणं निः-शीलता[3] निश्चलवैरं परोपकारमतिरहितत्वं यतिभेदः समयभेदः कृष्णलेश्यत्वं विषयातिवृद्धिः १० रौद्रध्यानं हिंसादि[4]क्रूरकर्मनिरन्तरप्रवर्तनं बालवृद्धस्त्रीहिंसनं चेत्यादय अशुभतीव्रपरिणामा नारकायुरास्रवा भवन्ति।

अथ तिर्यग्योन्यायुरास्रव उच्यते—

माया तैर्यग्योनस्य ॥ १६ ॥

मिनोति प्रक्षिपति चतुर्गतिगर्त्तमध्ये प्राणिनं या सा माया, चारित्रमोहकर्मोदया-१५ विर्भूतात्मकुटिलतालक्षणा निकृतिरित्यर्थः। तिरश्चां योनिः तिर्यग्योनिः, तिर्यग्योनौ भवं यदायुस्तत्तैर्यग्योनं तस्य तैर्यग्योनस्य। माया योगवक्रतास्वभावः तैर्यग्योनस्यायुषः तिर्यक्-योनिसम्बन्धिन आयुष्कर्मण आस्रवो भवति। विस्तरेण तु मिथ्यात्वसंयुक्तधर्मोपदेशकत्वम् अस्तोकारम्भपरिग्रहत्वं निःशीलत्वं वञ्चनप्रियत्वं नीललेश्यत्वं कापोतलेश्यत्वं मरणकालार्त्त[5]-ध्यानत्वं कूटकर्मत्वं भूभेदसमानरोषत्वं भेदकरणत्वम् अनर्थोद्भावनं कनकवर्णिकान्यथाकथनं २० कृत्रिमचन्दना[6]दिकरणं जातिकुलशीलसन्दूषणं सद्गुणलोपनमसद्गुणोद्भावनं चेत्यादयः तिर्यगायुरास्रवा भवन्ति।

अथ मानुषायुरास्रव[7] उच्यते—

अल्पारम्भपरिग्रहत्वं मानुषस्य ॥ १७ ॥

आरम्भाश्च परिग्रहाश्च आरम्भपरिग्रहाः, [8]अल्पे आरम्भपरिग्रहा यस्य स अल्पा-२५ रम्भपरिग्रहः, अल्पारम्भपरिग्रहस्य भावः अल्पारम्भपरिग्रहत्वं नारकायुःकारणविपरीतत्व-मित्यर्थः। मानुषस्येदं मानुषं तस्य मानुषस्य। अल्पारम्भपरिग्रहत्वं मानुषस्यायुषः आयुः-कर्मण आस्रवो भवति। विस्तरेण तु विनीतप्रकृतित्वं स्वभावभद्रत्वम् अकुटिलव्यवहारत्वं

१ आरम्भाः प- आ०, ब०, ज०। २ यदायु त-आ०, ब०, ज०। ३ -ताश्च निश्चलतावै- आ०, ब०, ज०। ४-खरक- आ०, ब०, ज०। ५ -कालार्त्तध्या-आ०, ब०, द०। ६ -नानि क- आ०, ब०, ज०। ७ -स्रवा उच्यन्ते आ०,ब०, ज०। ८-अल्पा आ- आ०, ब०, ज०।

तनुकषायत्वम् अन्तकालेऽसंक्लेशत्वं मिथ्यादर्शनसहितस्य विनीतत्वं सुखसंबोध्यत्वं धूलि-रेखासमानरोषत्वं जन्तूपघातनिवृत्तिः प्रदोषरहितत्वं विकर्मवर्जितत्वं प्रकृत्यैव सर्वेषामागत-स्वागतकरणं मधुरवचनता उदासीनत्वमनसूयत्वम् अल्पसङ्क्लेशः गुर्वादिपूजनं कापोतपीतले-श्यत्वञ्चेत्यादयो मानुषायुरास्रवा भवन्ति ।

अथापरमपि मानुषायुरास्रवकारणमाह— ५

स्वभावमार्दवञ्च ॥ १८ ॥

मृदोर्भावो मार्दवं मानाभावः । स्वभावेन प्रकृत्या गुरूपदेशं विनाऽपि मार्दवं मृदुत्वं स्वभावमार्दवं मानुषायुरास्रवो भवति । चकारः परस्परसमुच्चये । तेनायमर्थः—न केवलम् अल्पारम्भपरिग्रहत्वं मानुषस्यायुष आस्रवो भवति किञ्च स्वभावमार्दवत्वञ्च मानुषस्यायुष आस्रवो भवति । यद्येवं तर्हि 'अल्पारम्भपरिग्रहत्वं स्वभावमार्दवञ्च मानुषस्यायुषः' इत्येवमेकं १० सूत्रं किमिति न कृतम् ? सत्यमेवैतत् ; किन्तु पृथग्योगविधानम् उत्तरायुरास्रवसम्बन्धार्थम् । तेनायमर्थः—स्वभावमार्दवं सरागसंयमादिकञ्च देवायुरास्रवो भवतीति वेदितव्यम् ।

अल्पारम्भपरिग्रहत्वं स्वभावमार्दवञ्च एतद्द्वयमेव किं मानुषस्यायुष आस्रवः ? नैवम् ; अपरमपि मानुषस्यायुष आस्रवो वर्तते । तत् किमिति प्रश्ने सूत्रमिदं ब्रुवन्ति[1] भगवन्तः— १५

निःशीलव्रतत्वञ्च सर्वेषाम् ॥ १९ ॥

शीलानि च गुणव्रतत्रयं [2]शिक्षाव्रतचतुष्टयं च शीलानीत्युच्यन्ते व्रतानि अहिंसादीनि पञ्च शीलव्रतानि, शीलव्रतेभ्यो निष्क्रान्तो निर्गतः निःशीलव्रतः शीलव्रतरहितः निःशील-व्रतस्य भावः निःशीलव्रतत्वम् । चकारादल्पारम्भपरिग्रहत्वञ्च सर्वेषां नारकतिर्यङ्मनुष्य-देवानाम् आयुष आस्रवो भवति । ननु ये शीलव्रतरहितास्तेषां देवायुरास्रवः कथं सङ्गच्छते ? २० युक्तमुक्तं भवता; भोगभूमिजाः शीलव्रतरहिता अपि ईशानस्वर्गपर्यन्तं गच्छन्ति तदपेक्षया सर्वेषामिति ग्रहणम् । केचिदल्पारम्भपरिग्रहा अपि अन्यदुराचारसहिता [3]नरकादिकं प्राप्नुवन्ति तदर्थञ्च सर्वेषामिति गृहीतम् ।

अथ देवायुरास्रवकारणं प्राहुः—

सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य ॥२०॥ २५

संसारकारणनिषेधं प्रत्युद्यतः अक्षीणाशयश्च सराग इत्युच्यते, प्राणीन्द्रियेषु अशुभ-प्रवृत्तेर्विरमणं संयमः, पूर्वोक्तस्य सरागस्य संयमः सरागसंयमः महाव्रतमित्यर्थः । अथवा सरागः संयमो यस्य स सरागसंयम इति बहुव्रीहिरपि । संयमश्चासावसंयमः संयमासंयमः श्रावकव्रतमित्यर्थः । [4]अकामेन निर्जरा अकामनिर्जरा, यः पुमान् चारकनिरोधबन्धनबद्धः ।

---

१ -न्ति नि- ता० । २ शीलव्र- आ०, ब०, ज० । ३ नारकादि प्रा-आ०, ब०, ज० । ४ अकामे नि- आ०, ब०, ज० ।

कोऽर्थः ? चारकेण बन्धविशेषेण [1]निरोधबन्धनबद्धो गाढबन्धनबद्धः चारकनिरोधबन्धनबद्धः, तादृशः पुमान् पराधीनपराक्रमः सन् बुभुक्षानिरोधं तृष्णादुःखं ब्रह्मचर्यकृच्छ्रं भूशयनकष्टं मलधारणं परितापादिकञ्च सहमानः सहनेच्छारहितः सन् यदीषत् कर्म निर्जरयति सा अकामनिर्जरा इत्युच्यते। बालानां मिथ्यादृष्टितापससान्न्यासिकपाशुपतपरिव्राजकैकदण्ड-
५ त्रिदण्डपरमहंसादीनां तपःकायक्लेशादिलक्षणं निकृतिबहुलव्रतधारणञ्च बालतप उच्यते। सरागसंयमश्च संयमासंयमश्च अकामनिर्जरा च बालतपश्च सरागसंयमसंयमासंयमाकाम-निर्जराबालतपांसि। देवेषु चतुर्णिकायेषु भवं यदायुस्तद्दैवं तस्य दैवस्य। एतानि चत्वारि कर्माणि दैवायुरास्रवकारणानि भवन्ति।

अथ 'किमेतान्येव देवायुरास्रवाः भवन्ति, उताहोऽन्यदपि किमपि देवायुरास्रवनिमित्तं
१० वर्तते न वा' इति प्रश्ने सूत्रमिदमाहुः—

सम्यक्त्वञ्च ॥ २१ ॥

सम्यक्त्वं तत्त्वश्रद्धानलक्षणं देवायुरास्रवकारणं भवति। किं भवनवास्यादिष्वपि देवेषु सम्यक्त्ववान् उत्पद्यते ? नैवम्; यद्यपि सम्यक्त्वमिति देवायुरास्रवकारणमिति अविशेषेणोक्तं तथापि सम्यक्त्ववान् पुमान् सौधर्मादिविशेषस्वर्गदेवेषु उत्पद्यते न तु
१५ भावनादिषु अन्यत्र पूर्वबद्धायुष्कात्। [2]एतदपि कस्मात् ? पृथग्योग्यात्, अन्यथा 'सम्यक्त्व-सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य' इति सूत्रं कुर्यात्। यदा तु सम्यक्त्व-हीनः पुमान् भवति तदा सरागसंयमादिमण्डितोऽपि भवनवासित्रयं सौधर्मादिकञ्च यथागमम् उभयमपि प्राप्नोति।

अथ नामकर्मास्रवसूचनार्थं सूत्रत्रयं मनसि धृत्वा तदादौ अशुभनामकर्मास्रवसूचनार्थं
२० सूत्रमिदमाहुः[3]—

योगवक्रता विसंवादनञ्चाशुभस्य नाम्नः ॥ २२ ॥

कायवाङ्मनःकर्म योगः त्रिविधः, योगस्य वक्रता कौटिल्यं योगवक्रता कायेनान्यत् करोति वचसाऽन्यद् ब्रवीति मनसाऽन्यच्चिन्तयति एवंविधा योगवक्रता। अन्यथास्थितेषु पदार्थेषु परेषामन्यथाकथनं विसंवादनमुच्यते। ननु योगवक्रताविसंवादनयोरर्थभेदः कोऽपि
२५ न वर्तते, तेन योगवक्रता एव वक्तव्या किं विसंवादनग्रहणेन ? इत्याह—साधूक्तं भवता; योगवक्रता आत्मगता वर्तत एव। [4]तस्यां सत्यां परगतं विसंवादनम् तत्किमिति चेत् ? कश्चि-त्पुमान् अभ्युदयनिःश्रेयसार्थासु क्रियासु सम्यक् स्वयं वर्तते तं तत्र वर्तमानमन्यं पुमांसम् अन्यः कोऽपि विपरीतकायवाङ्मनोभिः प्रयोजयति विसंवादयति मिथ्याप्रेरयति—'देवदत्त, त्वमेवं मा कार्षीः, इदं कार्यं त्वमेवं कुरु' इत्येवं परप्रेरणं विसंवादनमुच्यते। तेन योगवक्रताया
३० विसंवादनस्य च महान् भेदो वर्तते। एतदुभयमपि अशुभनामकर्मण आस्रवकारणं भवति।

---

१ विरो– आ०, ब०, ज०। २ तदपि आ०, ब०, ज०। ३ –हुराचार्याः आ०, ब०, ज०। ४ तस्यां तस्यां ता०।

चकारात् मिथ्यादर्शनम्, पिशुनतायां स्थिरचित्तत्वम्, कूटमानतुलाकरणम्, कूटसाक्षित्व-भरणम्, परनिन्दनम्, आत्मप्रशंसनम्, परद्रव्यग्रहणम्, असत्यभाषणम्, महारम्भमहा-परिग्रहत्वम्, सदोज्ज्वलवेषत्वम्, सुरूपतामदः, परुषभाषणम्, [1]असदस्यप्रलपनम्, आक्रोशविधानम्, उपयोगेन सौभाग्योत्पादनम्, चूर्णादिप्रयोगेन परवशीकरणम्, मन्त्रादि-प्रयोगेण परकुतूहलोत्पादनम्, देवगुर्वादिपूजामिषेण गन्धधूपपुष्पाद्यानयनम्, परविडम्बनम्, ५ उपहास्यकरणम्, इष्टकोच्चयपाचनम्, दावानलप्रदानम्, प्रतिमाभञ्जनम्, चैत्यायतनवि-ध्वंसनम्, आरामखण्डनादिकम्, तीव्रक्रोधमानमायालोभत्वम्, पापकर्मोपजीवित्वञ्चेत्यादयोऽ-शुभनामास्रवा भवन्ति।

अथ शुभनामकर्मास्रवस्वरूपं निरूप्यते—

तद्विपरीतं शुभस्य ॥ २३ ॥ १०

तस्याः कायवाङ्मनोवक्रताया विपरीतत्वम् ऋजुत्वम्। तद्विपरीतं यत्कर्म तत्तद्विपरीतं तस्मात्पूर्वोक्तलक्षणाद्विसंवादनाद्विपरीतं तद्विपरीतं शुभस्य नाम्न आस्रवकारणं वेदितव्यम्। यच्च पूर्वसूत्रे चकारेण गृहीतं तस्मादपि विपरीतं तद्विपरीतम्। तथाहि—धार्मिकदर्शनसम्भ्रम-सद्भावोपनयनम्। तत्किम्? धार्मिकस्य यतिनाथादेः सम्भ्रमेण आदरसद्भावेन न तु मायया उपनयनं समीपे गमनम्। तथा संसारभीरुत्वम् प्रमादवर्जनम्, पिशुनतायामस्थिरचित्त- १५ त्वम्, अकूटसाक्षित्वम्, परप्रशंसनम्, आत्मनिन्दनम्, सत्यवचनभाषणम्, परद्रव्या-परिहरणम्, अल्पारम्भपरिग्रहत्वम्, अपरिग्रहत्वञ्च, अन्तरेऽन्तरे उज्ज्वलवेशत्वम्, रूप-मदपरिहरणम्, मृदुभाषणम्, सदस्यजल्पनम्, शुभवचनभाषणम्, सहजसौभाग्यम्, स्वभावेन वशीकरणम्, परेषामकुतूहलोत्पादनम्, अमिषेण पुष्पधूपगन्धपुष्पाद्यानयनम्, परेषामविडम्बनम्, परवर्कराकरणम्, इष्टिकापाकदावानलप्रदानव्रतम्, प्रतिमानिर्मापणम्, २० तत्प्रासादकरणम्, आरामाखण्डनादिकम्, मन्दक्रोधमानमायालोभत्वम्, अपापकर्मजीवि-त्वञ्चेत्यादयः शुभनामकर्मास्रवा भवन्ति।

अथ यदनन्तनिरुपमप्रभावम् अचिन्त्यनीयैश्वर्यविशेषकारणं त्रिभुवनैकविजयकरं तीर्थङ्करनामकर्म वर्तते तस्यास्रवविधिप्रकारं सूचयन्ति सूरयः—

दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतिचारोऽभीक्ष्णज्ञानोपयोग- २५ संवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदा-चार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिमार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ॥२४॥

दर्शनविशुद्धिः दर्शनस्य सम्यक्त्वस्य विशुद्धिर्निर्मलता दर्शनविशुद्धिः। पृथङ्निर्देशः किमर्थम्? सम्यक्त्वं किल जिनभक्तिरूपं तत्त्वार्थश्रद्धानरूपं वा केवलमपि तीर्थकरत्वनाम- ३०

१ असभ्यभाषणम्। २ -वरू- आ०, ब०, ज०। ३ -करणं ती- आ०, ब०, ज०।

कर्मास्रवकारणं भवति। तदुक्तम्—

"एकाऽपि समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुम्।
पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः॥ १॥" [यश० उ० पृ० ३८९]

इति कारणाद्दर्शनविशुद्धेर्द्वितीयसूचनार्थं पृथङ्निर्देशः कृतः, यतस्तत्पूर्वा अन्याः पञ्चदश
५ भावना व्यस्ताः समस्ता वा तीर्थकरत्वनामकारणं भवन्ति [1]तेन रहिता तु एकाऽपि भावना कारणं न भवति। तदुक्तम्—

"विद्यावृत्तस्य सम्भूतिस्थितिवृद्धिफलोदयाः।
न सन्त्यसति सम्यक्त्वे बीजाभावे तरोरिव॥ १॥" [रत्नक० श्लो० ३२]

अथ काऽसौ दर्शनस्य विशुद्धिरिति चेत्? उच्यते—इहलोकभयं परलोकभयं पुरुषाद्य-
१० रक्षणमत्राणभयम् [2]आत्मरक्षोपायदुर्गाद्यभावादगुप्तिभयं वेदनाभयं विद्युत्पाता[3]द्याकस्मिकभय-मिति सप्तभयरहितत्वं जैनदर्शनं सत्यमिति निःशङ्कितत्वमुच्यते। इहपरलोकभोगोपभोगकाङ्क्षारहितत्वं निःकाङ्क्षितत्वम्। शरीरादिकं पवित्रमिति मिथ्यासङ्कल्पनिरासो निर्विचिकित्सता। अनार्हतदृष्टतत्त्वेषु मोहरहितत्वममूढदृष्टिता। उत्तमक्षमादिभिरात्मनो धर्मवृद्धिकरणं चतुर्विध-सङ्घदोषझम्पनं चोपगूहनम्, उपबृंहणमित्यपरनामधेयम्। क्रोधमानमायालोभादिषु धर्म-
१५ विध्वंसकारणेषु विद्यमानेष्वपि धर्माद[4]प्रच्यवनं स्थितिकरणम्। जिन[5]शासने सदानुरागित्वं वात्सल्यम्। सम्यग्दर्शनज्ञानचारित्रतपोभिरात्मप्रकाशनं जिनशासनोद्योतकरणं वा प्रभावना। तथा मूढत्रयरहितत्वं षडायतनवर्धनम् अष्टमदरहितत्वम् अजिनजलस्याऽनास्वादनं मूलकपद्मिनीकन्दपलाण्डुतुम्बककलिङ्गसूरणकन्दसर्वपुष्पसन्धानकभक्षणनिराकरणञ्चेत्यादिकं दर्शनविशुद्धिरुच्यते। १।

२० रत्नत्रयमण्डिते रत्नत्रये च महानादरः अकषायत्वञ्च विनयसम्पन्नता कथ्यते। २। अहिंसादिषु व्रतेषु तत्प्रतिपालनार्थञ्च क्रोधादिवर्जनलक्ष[6]णेषु शीलेषु अनवद्या वृत्तिः शीलव्रतेष्वनतिचारः। ३। जीवादिपदार्थनिरूपकात्मतत्त्वकथकसम्यग्ज्ञानानवरतोद्यमः अभीक्ष्णज्ञानोपयोग उच्यते। ४। भवदुःखादनिशं भीरुता संवेगः कथ्यते। ५। आहाराभयज्ञानानां त्रयाणां विधिपूर्वकमात्मशक्त्यनुसारेण पात्राय दानं शक्तितस्त्याग उच्यते। ६। निजशक्ति-
२५ प्रकाशनपूर्वकं जैनमार्गाविरोधी कायक्लेशः शक्तितस्तप उच्यते। ७। यथा भाण्डागारेऽग्नौ समुत्थिते येन केनचिदुपायेन तदुपशमनं विधीयते बहूनामुपकारकत्वात् तथाऽनेकव्रतशीलसमन्वितस्य यतिजनस्य कुतश्चिद्विघ्ने समुत्पन्ने सति विघ्ननिवारणं समाधिः, साधूनां समाधिः साधुसमाधिः। ८। अनवद्येन विधिना गुणवतां दुःखापनयनं वैयावृत्त्यमुच्यते। ९। अर्हतां स्नपनपूजनगुणस्तवननामजपनादिकमर्हद्भक्तिर्निगद्यते। १०। आचार्याणामपूर्वोपकरणदानं

---

१ तद्रहिता ए– ता०। २ आद्यर– आ०, ब०, ज०। ३ –द्याश्चाक– आ०, ब०, ज०।
४ –दच्यव– आ०, ब०, ज०। ५ जिनचरणे स– आ०, ब०, ज०। ६ –षु च शी– ता०।

सन्मुखगमनं सम्भ्रमविधानं पादपूजनं दानसन्मानादिविधानं मनःशुद्धियुक्तोऽनुरागश्चाचार्यभक्तिरुच्यते। ११। तथा बहुश्रुतभक्तिरपि ज्ञातव्या। १२। तथा प्रवचने रत्नत्रयादिप्रतिपादकलक्षणे मनःशुद्धियुक्तोऽनुरागः प्रवचनभक्तिरुच्यते। १३। सामायिके चतुर्विंशतिस्तवे एकतीर्थकरवन्दनायां कृतदोषनिराकरणलक्षणप्रतिक्रमणे नियतकालागामिदोषपरिहरणलक्षणे प्रत्याख्याने शरीरममत्वपरिहरणलक्षणे कार्योत्सर्गे च एवंविधे षडावश्यके यथाकाल- ५ प्रवर्तनम् आवश्यकापरिहाणिरुच्यते। १४। ज्ञानेन दानेन जिनपूजनविधानेन तपोऽनुष्ठानेन जिनधर्मप्रकाशनं मार्गप्रभावना भण्यते। १५। यथा सद्यःप्रसूता धेनुः स्ववत्से स्नेहं करोति तथा प्रवचने सधर्मणि जने स्नेहलत्वं प्रवचनवत्सलत्वमभिधीयते[3]। १६।

अत्र समासशुद्धिः—दर्शनस्य विशुद्धिः दर्शनविशुद्धिः। विनयेन[4] सम्पन्नता परिपूर्णता विनयसम्पन्नता। शीलानि च व्रतानि च शीलव्रतानि तेषु शीलव्रतेषु न अतिचारः अनतिचारः। १० अभीक्ष्णमविच्छिन्नं ज्ञानस्य उपयोगोऽभ्यासः अभीक्ष्णज्ञानोपयोगः, अभीक्ष्णज्ञानोपयोगश्च संवेगश्च अभीक्ष्णज्ञानोपयोगसंवेगौ। शक्तितस्त्यागश्च तपश्च शक्तितस्त्यागतपसी। साधूनां साधुषु वा समाधिः साधुसमाधिः। व्यावृत्तेर्भावो वैयावृत्त्यं वैयावृत्त्यस्य करणं विधानं वैयावृत्त्यकरणम्। अर्हन्तश्च आचार्याश्च बहुश्रुताश्च प्रवचनञ्च अर्हदाचार्यबहुश्रुतप्रवचनानि तेषां तेषु वा भक्तिः अर्हदाचार्यबहुश्रुतप्रवचनभक्तिः। सुमुहूर्ताद्यनपेक्षम् अवश्यं निश्चयेन कर्तव्यानि आवश्यकानि तेषामपरिहाणिः आवश्यकाऽपरिहाणिः। मार्गस्य प्रभावना मार्गप्रभावना। १५ प्रवचने वत्सलत्वं प्रवचनवत्सलत्वम्। आवश्यकापरिहाणिश्च मार्गप्रभावना च प्रवचनवत्सलत्वञ्च आवश्यकापरिहाणिमार्गप्रभावनाप्रवचनवत्सलत्वं समाहारो द्वन्द्वः। इति षोडश प्रत्ययाः। एतानि षोडश कारणानि तीर्थकरत्वस्य तीर्थङ्करनामकर्मण आस्रवकारणानि भवन्ति।

अथ उच्चनीचगोत्रद्वयस्यास्रवसूचनपरं सूत्रद्वयं मनसि धृत्वा तत्र तावन्नीचैर्गोत्रस्य २० आस्रवकारणं निरूपयन्तः सूत्रमिदमाहुः—

परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२५॥

परश्च आत्मा च परात्मानौ निन्दा च प्रशंसा च निन्दाप्रशंसे, परात्मनोः निन्दाप्रशंसे परात्मनिन्दाप्रशंसे—परस्य निन्दा आत्मनः प्रशंसा इत्यर्थः। सन्तो विद्यमानाः असन्तोऽविद्यमानाः सदसन्तः, ते च ते च गुणाः ज्ञानतपःप्रभृतयः सदसद्गुणाः, उच्छादनञ्च २५ लोपनम् उद्भावनञ्च प्रकाशनम् उच्छादनोद्भावने, सदसद्गुणानामुच्छादनोद्भावने सदसद्गुणोच्छादनोद्भावने सद्गुणोच्छादनमसद्गुणोद्भावनमित्यर्थः। एतानि चत्वारि कर्माणि नीचैर्गोत्रस्य मलिनगोत्रस्य आस्रवकारणानि कर्मागमनहेतवो भवन्ति। चकाराज्जातिमदः कुलमदः बलमदः रूपमदः श्रुतमदः आज्ञामदः ऐश्वर्यमदः तपोमदश्चेत्यष्ट मदाः, परेषामपमाननम्,

---

१ –त्रयलक्षणे ता०। २ –तिसंस्तवने ती–आ०, ब०, ज०। ३ –त्समानसे विधी– आ०, ब०, ज०। ४ विनये स– आ०, ब०, ज०।

परोत्प्रहसनम्, परप्रतिवादनम्, गुरूणां [1]विभेदकरणम्, गुरूणामस्थानदानम्, गुरूणामवमाननम्, गुरूणां निर्भर्त्सनम्, गुरूणामजल्ययोटनम्, गुरूणां स्तुतेरकरणम्, गुरूणामनभ्युत्थानञ्चेत्यादीनि नीचैर्गोत्रस्यास्रवा भवन्ति ।

अथोच्चैर्गोत्रास्रवा उच्यन्ते—

५ **तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥२६॥**

तस्य पूर्वोक्तार्थस्य विपर्ययो विपर्यासः आत्मनिन्दापरप्रशंसारूपः सद्गुणोद्भावनाऽसद्गुणोच्छादनरूपश्च तद्विपर्ययः । गुणोत्कृष्टेषु विनयेन प्रह्वीभावः नीचैर्वृत्तिरुच्यते । ज्ञानतपःप्रभृतिर्गुणैर्यदुत्कृष्टोऽपि सन् ज्ञानतपःप्रभृतिभिर्मदमहङ्कारं यन्न करोति सोऽनुत्सेक इत्युच्यते । नीचैर्वृत्तिश्च अनुत्सेकश्च नीचैर्वृत्त्यनुत्सेकौ । एतानि षट्कार्याणि उत्तरस्य नीचैर्गोत्राद-
१० परस्य उच्चैर्गोत्रस्यास्रवा भवन्ति । चकारात् पूर्वसूत्रोक्तचकारगृहीतविपर्ययश्चात्र गृह्यते । तथाहि—

"ज्ञानं पूजां कुलं जातिं बलमृद्धिं तपो वपुः ।
अष्टावाश्रित्य मानित्वं स्मयमाहुर्गतस्मयाः ॥ १ ॥" [रत्न क० श्लो० २५]

इति श्लोकोक्ताष्टमदपरिहरणम् परेषामनपमाननम्, अनुत्प्रहसनम् अपरीवादनम्, गुरूणामपरिभवनमनुद्घट्टनं गुणख्यापनम्, अभेदविधानं स्थानार्पणं सन्माननं मृदुभाषणं
१५ चाटुभाषणञ्चेत्यादयः उच्चैर्गोत्रस्यास्रवा भवन्ति ।

अथान्तरायस्यास्रव उच्यते—

विघ्नकरणमन्तरायस्य ॥ २७ ॥

विहननं विघ्नः दानलाभभोगोपभोगवीर्याणां प्रत्यूहः, विघ्नस्य करणं विघ्नकरणम्, अन्तरायस्य दातृपात्रयोरन्तरे मध्ये एत्यागच्छतीत्यन्तरायः तस्यान्तरायस्य, यद्विघ्नकरणं तत्
२० अन्तरायस्यास्रवो भवति । चकाराधिकाराद् दाननिन्दाकरणम्, [2]द्रव्यसयोगः, देवनैवेद्यभक्षणम्, परवीर्यापहरणम्, धर्मच्छेदनम्, अधर्माचरणम्, परेषां निरोधनम्, बन्धनम्, कर्णच्छेदनम्, गुह्यच्छेदनम्, नासाकर्तनम्, चक्षुरुत्पाटनञ्चेत्यादय अन्तरायस्यास्रवा भवन्ति । ये तत्प्रदोपादय आस्रवा उक्तास्ते निजनिजकर्मणः निजा निजा आस्रवाः स्थित्यनुभागबन्धकारणं भवन्ति, प्रकृतिप्रदेशबन्धयोस्तु कारणानि सर्वेऽपि आस्रवा भवन्ति अन्यत्रायुष्कबन्धादिति ॥ २७ ॥

२५ [4]इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ षष्ठः पादः समाप्तः ।

---

१ विभेदनम् ता० । २ द्रव्ययोगः आ०, ब०, ज० । ३ –युष्कर्मब– आ०, ब०, ज० ।

४ इत्यनवद्यगद्यपद्यविद्याविनोदनोदितप्रमोदपीयूषरसपानपावनमतिसमाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोऽलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य विद्यानन्दिदेवस्य सञ्छर्दितमिथ्यामतदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां षष्ठः पादः समाप्तः । –आ०, ब० ।

सप्तमोऽध्यायः

अथ षष्ठाध्याये आस्रवपदार्थो यो व्याकृतः तस्याध्यायस्य प्रारम्भसमये यत्सूत्रमुक्तम्—"**शुभः पुण्यस्याशुभः पापस्य**" [६।३] इति सूत्रे शुभो योगः पुण्यस्यास्रवो भवति अशुभो योगः पापस्यास्रवो भवति, तदेतत् शुभाशुभयोगद्वयं सामान्यतयोक्तम्। तत्र शुभयोगस्य विशेषपरिज्ञानार्थं कः शुभो योग इति प्रश्ने सूत्रमिदमाहुः—

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥ १ ॥ ५

हिंसनं हिंसा प्रमत्तयोगात्प्राणव्यपरोपणमित्यर्थः। न ऋतं न सत्यम् अनृतम् असदभिधानमित्यर्थः। स्तेन्यते स्तेयम्, "**ऋवर्णव्यञ्जनान्ताद् ध्यण**" [का० सू० ४।२।३५] इति ध्यणि प्राप्ते "**स्तेनाद्यन्तलोपश्च**" [ ] यत्प्रत्ययः, अन्तलोपश्चेति नकारलोपः स्तेयम् अदत्तादानम्। बृंहन्ति अहिंसादयो गुणा यस्मिन् सति तद् ब्रह्म ब्रह्मचर्यम्, न ब्रह्म अब्रह्म मैथुनमित्यर्थः। परि समन्ताद् गृह्यते परिग्रहः मनोमूर्च्छालक्षणः ग्रहणेच्छालक्षणः परिग्रह १० उच्यते। हिंसा चानृतञ्च स्तेयञ्च अब्रह्म च परिग्रहश्च हिंसानृतस्तेयाब्रह्मपरिग्रहास्तेभ्यः हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यः। विरमणं विरतिः हिंसादिपञ्चपातकेभ्यो या विरतिः विरमणम् अभिसन्धिकृतो नियमः व्रत उच्यते। अथवा, इदं मया कार्यमिदं मया न कार्यमिति व्रतं कथ्यते। ननु "**ध्रुवमपायेऽपादानम्**" [पा० सू० १।४।२] इति वचनाद् अपाये सति यद् ध्रुवं तदपादानं भवति, हिंसानृतस्तेयाब्रह्मपरिग्रहपरिणामास्तु अध्रुवाः १५ वर्तन्ते कथं तत्र पञ्चमीविभक्तिर्घटते? सत्यमेवैतत्; परन्तु हिंसादिभ्या बुद्धेरपाये सति विरमणलक्षणे विश्लेषे सति हिंसादीनामाचार्येण ध्रुवत्वं विवक्ष्यते "**वक्तुर्विवक्षितपूर्विका शब्दार्थप्रतिपत्तिः**" [ ] इति परिभाषणादत्र पञ्चमी घटते। यथा—'कश्चित् पुमान् धर्माद्विरमति' इत्यत्रायं पुमान् सम्भिन्नबुद्धिर्विपरीतमतिः सन् मनसा धर्मं पश्यति पश्चाद्विचारयति—'अयं धर्मो दुष्करो वर्तते अस्य धर्मस्य च फलं श्रद्धामात्रगम्यं वर्तते' एवं २० पर्यालोच्य स पुमान् बुद्ध्या धर्मं संप्राप्य तस्मादध्रुवरूपादपि धर्मान्निवर्तते, पञ्चद्द्लते तत्र यथा पञ्चमी तथाऽत्रापि एष मानवः प्रेक्षापूर्वकारी विचारपूर्वकारीक्षते—एते हिंसादयः परिणामाः पापोपार्जनहेतुभूता वर्तन्ते, ये तु पापकर्मणि प्रवर्तन्ते ते नृपैरिहैव दण्ड्यन्ते परत्र च दुःखिनो भवन्ति इति स बुद्ध्या हिंसादीन् सम्प्राप्य तेभ्यो निवर्तते, ततस्तस्मात् कारणाद् बुद्ध्या ध्रुवत्वविवक्षायां हिंसादीनामपादानत्वं घटते। तेनायमर्थः—हिंसाया २५ विरतिः अनृताद्विरतिः स्तेयाद् विरतिः अब्रह्मणो विरतिः परिग्रहाद्विरतिश्चेति विरतिशब्दः प्रत्येकं प्रयुज्यते। तस्मिन् सति अहिंसाव्रतमादौ ध्रियते सत्यादीनां मुख्यत्वात्, सत्यादीनि

व्रतानि हि अहिंसाप्रतिपालनार्थं वर्तन्ते धान्यस्य वृतिवेष्टनवत्। व्रतं हि सर्वसावद्ययोगनिवृत्तिलक्षणमेकं सामायिकमेव छेदोपस्थापनाद्यपेक्षया तु पञ्चविधमुच्यते।

अत्राह कश्चित्—व्रतस्यास्रवकारणत्वं न घटते संवरकारणेषु अन्तर्भावात् "स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः" [९।२] इति वक्ष्यमाणत्वात्, तत्र दशलक्षणे ५ धर्मे चारित्रे वा व्रतानामन्तर्भावो वर्तते, कथमास्रवहेतवो व्रतानि भवन्तीति? साधूक्तं भवता; वक्ष्यमाणः संवरः [1]निवृत्तिलक्षणो वर्तते, अत्र तु अहिंसासत्यदत्तादानब्रह्मचर्यस्वीकारापरिग्रहत्वाङ्गीकारतया प्रवृत्तिर्वर्तते तेनास्रवहेतवो घटन्ते व्रतानि। गुप्तिसमित्यादयः संवरस्य परिकर्म वर्तते परिकरोऽस्ति, यः साधुर्व्रतेषु कृतपरिकर्मा भवति विहितानुष्ठानो भवति स सुखेन संवरं विदधाति तेन कारणेन व्रतानां पृथक्कृतया उपदेशो विधीयते।

१० अत्राह कश्चित्—ननु रात्रिभोजनविरमणं षष्ठमणुव्रतं वर्तते तस्येहोपसङ्ख्यानं नास्ति कथनं न वर्तते तदत्र वक्तव्यम्? युक्तमुक्तं भवता; अहिंसाव्रतस्य पञ्च भावना वक्ष्यन्ते—"वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च" [७।४] इति पञ्चसु अहिंसाव्रतभावनासु यदुक्तम् आलोकितपानभोजनं तत् आलोकितपानभोजनं रात्रौ न घटते, [2]तद्भावनाग्रहणेन रात्रिभोजनविरमणं सङ्गृहीतमेवाचार्यैः।

१५ अथ पञ्चप्रकारव्रतस्य भेदपरिज्ञानार्थं सूत्रमिदमुच्यते[3]—

देशसर्वतोऽणुमहती ॥ २ ॥

देशश्च एकदेशः सर्वश्च परिपूर्णः समस्त इत्यर्थः देशसर्वौ देशसर्वाभ्यां देशसर्वतः। अणु च महच्च अणुमहती। अस्यामर्थः—देशतो विरतिरणुव्रतं भवति सर्वतो विरतिर्महाव्रतं भवति। अणुव्रतं गृहिणां व्रतम्, महाव्रतं निर्ग्रन्थानां भवति, इत्यनेन श्रावकाचारो यत्याचारश्च २० सूचितो भवति।

अथ यथा उत्तममौषधं लिकुचफलरसादिभिर्भावितं रुग्दुःखविनाशकं भवति तथा व्रतमपि भावनाभिर्भावितं सत् [4]कर्मरोगदुःखविनाशकं भवति, तेन कारणेन एकैकस्य व्रतस्य पञ्च पञ्च भावना भवन्ति। 'किमर्थं भवन्ति' इत्युक्ते सूत्रमिदमुच्यते—

तत्स्थैर्यार्थं भावना पञ्च पञ्च ॥ ३ ॥

२५ स्थिरस्य भावः स्थैर्यं तेषां व्रतानां स्थैर्यं तत्स्थैर्यं तत्स्थैर्यस्य अर्थः प्रयोजनं यस्मिन् [5]भावनकर्मणि तत्तत्स्थैर्यार्थं पञ्चानां स्थिरीकरणार्थमित्यर्थः। एकैकस्य व्रतस्य पञ्च पञ्च भावना भवन्ति। समुदिताः पञ्चविंशतिर्भवन्ति।

---

१ सन्नि– आ०, ब०, ज०। २ सद्भाव– ता०। ३ –ते स्वामिना देश– आ०, ब०, ज०। ४ कर्मभोगदुःख– आ०, ब०, ज०। ५ भावक– ता०।

तत्र तावत् अहिंसाव्रतस्य पञ्च भावना उच्यन्ते—

वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च ॥४॥

गुप्तिशब्दः द्वयोः प्रत्येकं प्रयुज्यते, वाग्गुप्तिश्च मनोगुप्तिश्च वाङ्मनोगुप्ती। समिति-शब्दः प्रत्येकं द्वयोः सम्बद्ध्यते, ईर्यासमितिश्च आदाननिक्षेपणसमितिश्च ईर्यादाननिक्षेपण-समिती। पानञ्च भोजनञ्च पानभोजने आलोकिते सूर्यप्रत्यक्षेण पुनः पुनर्निरीक्षिते ये ५ पानभोजने ते आलोकितपानभोजने, अथवा पानञ्च भोजनञ्च पानभोजनं समाहारो द्वन्द्वः, आलोकितञ्च तत् पानभोजनञ्च आलोकितपानभोजनम्। ततः वाङ्मनोगुप्ती च ईर्यादान-निक्षेपणसमिती च आलोकितपानभोजनञ्च वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपान-भोजनानि। एताः पञ्च अहिंसाव्रतभावना वेदितव्याः।

अथ सत्यव्रतभावनापञ्चकमुच्यते—　　　　　　　　　　　　　　　　१०

क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचिभाषणञ्च पञ्च ॥ ५ ॥

भीरोर्भावो भीरुत्वम्, हसस्य भावो हास्यम्, क्रोधश्च लोभश्च भीरुत्वञ्च हास्यञ्च क्रोधलोभभीरुत्वहास्यानि तेषां प्रत्याख्यानानि वर्जनानि क्रोधलोभभीरुत्वहास्यप्रत्या-ख्यानानि चत्वारि। अनुवीचिभाषणं विचार्य भाषणमनवद्यभाषणं वा पञ्चमम्। अस्याय-मर्थः–क्रोधप्रत्याख्यानं क्रोधपरिहरणम्, लोभप्रत्याख्यानं [1]लोभविवर्जनम्, भीरुत्व- १५ प्रत्याख्यानं भयत्यजनम्, हास्यप्रत्याख्यानं वर्करपरिहरणम्, एतानि चत्वारि निषेधरूपाणि, अनुवीचिभाषणं विधिरूपं कर्त्तव्यतयाऽनुष्ठानम्। चकारः परस्परसमुच्चये वर्तते। एताः पञ्च भावनाः सत्यव्रतस्य वेदितव्याः।

अथाऽचौर्यव्रतभावनाः पञ्चोच्यन्ते—

शून्यागारविमोचितावासपरोपरोधाकरणभैक्षशुद्धिसधर्मा-　　२०
विसंवादाः पञ्च ॥ ६ ॥

शून्यानि च तानि आगाराणि शून्यागाराणि पर्वतगुहावृक्षकोटरनदीतटप्रभृतीनि अस्वामिकानि स्थानानि शून्यागाराण्युच्यन्ते। विमोचितानि उद्वसग्रामनगरपत्तनानि शत्रु-भिरुद्वासितानि स्थानानि विमोचितान्युच्यन्ते, तेषु आवासौ शून्यागारविमोचितावासौ। परेषामुपरोधस्य हठस्य अकरणं परोपरोधाकरणम्। भिक्षाणां समूहो भैक्षं समूहे अण् २५ भैक्षस्य शुद्धिः भैक्षशुद्धिः, उत्पातनादिदोषरहितता। समानो धर्मो जैनधर्मो येषां ते सधर्माणः "**धर्मादनिच् (र) केवलात्**" [पा० सू० ५।४।१२४]। विरूपकं सम्मुखीभूय वदनं तवेदं ममेदमिति भाषणं विसंवादः न विसंवादः अविसंवादः, सधर्मभिः सह अविसंवादः सधर्माविसंवादः। शून्यागारविमोचितावासौ च परोपरोधाकरणञ्च भैक्षशुद्धिश्च सधर्मा-विसंवादश्च शून्यागारविमोचितावासपरोपरोधाकरणभैक्षशुद्धिसधर्माविसंवादाः पञ्च भावना ३०

---

१ –भपरिव– आ०, ब०, ज०।

[1]अदत्तादानविरमणव्रतस्य भवन्ति। शून्यागारेषु यस्यावासो भवति स निस्पृहः स्यात् तस्य अदत्तादानविरमणव्रतं स्थिरीभवति। यश्च विमोचितेषु स्थानेषु आवासं करोति [2]तस्यापि मनः परिग्रहेषु निस्पृहं भवति तेनापि अदत्तादानविरतिव्रतस्य[3] परमं स्थैर्यं स्यात्। एवं द्वे भावने भवतः। परोपरोधाकरणो[4]ऽपि पराग्रहणात् तत् स्थिरं स्यात्। तथान्तरायादि-
५ प्रतिपालने मनसा सह चौर्यं न भवति तेनापि [5]तद्व्रतं स्थिरीभवति। सधर्मभिः सह विसंवादे जिनवचनस्त्यैन्यं भवति, तदभावे तत् स्थिरं स्यात्।

अथेदानीं ब्रह्मचर्यव्रतस्य पञ्च भावना उच्यन्ते—

स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पञ्च ॥ ७ ॥

१० स्त्रीणां रागस्य सम्बन्धिनी कथा स्त्रीरागकथा, तस्याः श्रवणमाकर्णनम्। तासां स्त्रीणां मनोहराणि हृदयानुरञ्जकानि यानि अङ्गानि वदनस्तनजघनादीनि तेषां निरीक्षणमवलोकनं तन्मनोहराङ्गनिरीक्षणम्। पूर्वञ्च तत् रतञ्च पूर्वरतं पूर्वकालभुक्तभोगः तस्य अनुस्मरणमनुचिन्तनं पूर्वरतानुस्मरणम्। वृषे वृषभे साधवो वृष्याः येषु रसेषु भुक्तेषु पुमान् वृषभवद् उन्मत्तकामो भवति ते रसा वृष्या इत्युच्यन्ते, उपलक्षणत्वात् येषु रसेषु
१५ भुक्तेषु वाजीव अश्ववदुन्मत्तकामो भवति ते वाजीकरणरसाः वृषशब्देन उपलक्षकेनोपलक्ष्यन्ते[6], इष्टामनोरसनानुरञ्जकाः, वृष्याश्च ते इष्टाश्च ते च ते रसाः वृष्येष्टरसाः इन्द्रियाणामुत्कटत्वसम्पादका उत्कटरसा इत्यर्थः। स्वमात्मीयं तच्च तच्छरीरञ्च स्वशरीरं निजशरीरं तस्य संस्कारः दन्तनखकेशादिशृङ्गारः स्वशरीरसंस्कारः। स्त्रीरागकथाश्रवणञ्च तन्मनोहराङ्गनिरीक्षणञ्च पूर्वरतानुस्मरणञ्च वृष्येष्टरसाश्च स्वशरीरसंस्कारश्च स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षण-
२० पूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्काराः तेषां त्यागाः वर्जनानि ते तथोक्ताः। एताः पञ्च भावना ब्रह्मचर्यव्रतस्य स्थिरीकरणार्थं भवन्ति।

अथ परिग्रहविरमणव्रतस्य पञ्च भावना उच्यन्ते—

मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पञ्च ॥८॥

मनो जानन्तीति मनोज्ञाश्चित्तानुरञ्जकाः। तद्विपरीता अमनोज्ञाः। मनोज्ञाश्च अमनो-
२५ ज्ञाश्च मनोज्ञामनोज्ञाः ते च ते इन्द्रियाणां स्पर्शनरसनघ्राणचक्षुःश्रोत्राणां विषयाः स्पर्शरसगन्धवर्णशब्दरूपाः तेषु रागश्च द्वेषश्च तयोर्वर्जनानि परित्यागाः-पञ्चानामिन्द्रियाणामिष्टेषु विषयेषु रागो न विधीयते अनिष्टेषु च विषयेषु द्वेषो न क्रियते। एताः पञ्च भावनाः परिग्रहपरित्यागव्रतस्य स्थैर्यार्थं भवन्ति।

१– दानव्रतस्य आ०, ब०, ज०। २ तस्य म– आ०, ब०, ज०। ३–स्यस्थै– ता०। ४–णेऽपि ग्रह–आ०, ब०, ज०। ५ सद्व्रतं ता०। ६ –पलभ्यन्ते आ०, ब०, ज०।

अथ यथा व्रतस्थैर्यार्थं भावना क्रियन्ते तथा व्रतस्थैर्यार्थं व्रतविरोधिष्वपि भावना क्रियन्त इत्यभिधेयसूचकं सूत्रमुच्यते—

हिंसादिष्विहामुत्रापायावद्यदर्शनम् ॥ ९ ॥

हिंसा आदिर्येषाम् अनृतस्तेयाब्रह्मपरिग्रहाणां ते हिंसादयः तेषु हिंसादिषु, इह अस्मिन् जन्मनि अमुत्र च भविष्यद्भवान्तरे, अपायश्चाभ्युदयनिःश्रेयसार्थक्रियाविध्वंसकप्रयोगः ५ सप्तभयानि वा, अवद्यं न उदितं (तुं) योग्यम् अवद्यं निन्दनमित्यर्थः। अपायश्चावद्यञ्च अपायावद्ये अपायावद्ययोर्दर्शनम् अपायावद्यदर्शनम्। इहलोके परलोके च अपायावद्य-दर्शनं जीवस्य भवति।

हिंसादिषु पञ्च पातकेषु कृतेष्विति[1] भावनीयम्। तथाहि–हिंसकः पुमान् लोकानां नित्य-मेव उद्वेजनीयो भवति, नित्यानुबद्धवैरश्च रुञ्जायते। इह भवेऽपि वधबन्धनादिक्लेशा- १० दीन् [2]परिप्राप्नोति, मृतोऽपि सन् नरकादिगतिं प्रतिलभते। लोके निन्दनीयश्च भवति। तस्मात्कारणात् केनापि हेतुना हिंसा न कर्तव्या। हिंसाविरमणं श्रेयस्करं भवति अजगज-वाजिद्विजादीनां हवनं च महानरकपातकं भवति परेषां दुःखजनकत्वात्।

असत्यवादी पुमान् अविश्वसनीयो भवति। जिह्वाकर्णनासिकादिच्छेदनञ्च प्रति-प्राप्नोति। मिथ्यावचनदुःखिताश्च पुरुषा बद्धवैराः सन्तः प्रचुराणि[3] व्यसनानि मिथ्यावादिन १५ उत्पादयन्ति[4], गर्हणञ्च कुर्वन्ति। तस्मात्कारणादसत्यवचनादुपरमणं श्रेयस्करम्।

परद्रव्यापहारी पुमान् कर्मचाण्डालानामप्युद्वेजनीयो भवति। इहलोकेऽपि निष्ठुर-प्रहार-वध-बन्ध-करचरणश्रवणरसनोत्तरदन्तच्छदच्छेदन-सर्वस्वापहरण [5]अबालवलियारोह-णादिकं प्रतिप्राप्नोति। मृतोऽपि सन्नरकादिगतिगर्तेषु पतति। सर्वलोकनिन्दनीयश्च भवति। ततो लोप्त्रोपजीवनं न श्रेयस्करमिति भावनीयम्। २०

अब्रह्मचारी पुमान् मदोन्मत्तो भवति। विभ्रमोपेत उद्भ्रान्तमना यूथनाथ इव करिणीविवञ्चितः परवशः सन् वधबन्धपरिक्लेशान् प्राप्नोति। मोहकर्माभिभूतश्च सन् कार्यमकार्यञ्च नो जानीते। स्त्रीलम्पटः सन् दानपूजनजिनस्तवनोपवसनादिकं किमपि पुण्यकर्म नैवाचरति। परपरिग्रहाश्लेषणसङ्गतिकृतरतिश्च अस्मिन्नपि भवे वैरानुबन्धि-जनसमूहात् [7]शेफोविकर्तन-तदादितर्कादिप्रवेश-वध-बन्धसर्वस्वापहरणादिकमपायं प्रतिलभते। २५ मृतोऽपि सन् नरकादिगतिगर्तदुःखकर्दमनिमज्जनं प्रतिलभते। सर्वलोकनिन्दनीयश्च भवति। तेन स्मरमन्दिररतिविरतिरात्मनः श्रेयस्करीति भावनीयम्।

सपरिग्रहः पुमान् परिग्रहार्थिनां परिभवनीयो भवति पक्षिणां परिगृहीतमांसखण्ड-

---

१– ष्वपि भा– आ०, ब०, ज०। २ प्रतिप्रा–ता०। ३ वा व्यसनिन उ— आ०, ब०, ज०। ४ –निर्ग्रहण–आ०, ब०, ज०। ५ मुण्डितः सन् गर्दभारोहणादिकम्। अबलवाले– आ०, ब०, ज०। ६ –नीयो भ– आ०, ब०, ज०। ७ लिङ्गच्छेद– लिङ्गाग्रभागे शलाकाप्रवेश।

पक्षिवत्। परिग्रहोपार्जने तद्रक्षणे तत्क्षये च प्रचुरान्यादीनवानि[1] समन्तात् लभते। धनैस्तु इन्धनैरिव बर्हिषः तृप्तिर्न भवति। लोभाभिभूतः सन् उचितमनुचितं न जानीते। पात्रेष्वप्यागतेषु मिथ्योत्तरं ददाति। कपाटपुटसन्धिबन्धं विधत्ते, ददाति चेदर्द्धचन्द्रम्। मृतोऽपि सन्निरयादिगतिसरिदशातजलावगाहनं भृशं कुरुते, लोकनिन्दनीयश्च भवति। ५ तेन परिग्रहविरमणं नराणां श्रेयस्करम्। इत्यादिकं हिंसादिपञ्चपातकेषु अपायाऽवद्यदर्शनं नित्यमेव भावितव्यम्।

अथ हिंसादिषु पञ्चपातकेषु अन्यापि भावना भावनीयेति सूत्रमुच्यते—

दुःखमेव वा ॥१०॥

वा–अथवा हिंसादयः पञ्च पातकाः दुःखमेव भवन्ति दुःखस्वरूपाण्येवेति भावना १० भावनीया। ननु हिंसादयो दुःखमेव कथं भवन्ति? सत्यम्; दुःखकारणात् दुःखम्, यद्वस्तु यस्य कारणं तत्तदेवोच्यते उपचारात्, अन्नं खलु प्राणा इति यथा प्राणानां कारणत्वात् अन्नमपि प्राणा इत्युच्यन्ते। अथवा दुःखकारणस्य कारणत्वात् हिंसादयो दुःखमुच्यन्ते, तथाहि—हिंसादय असातावेदनीयकर्मणः कारणम्, असातावेदनीयञ्च कर्म दुःखस्य कारणं तेन दुःखकारणकारणत्वाद् वा दुःखमित्युपचर्यन्ते। यथा 'प्राणिनां धनं प्राणः' इत्युक्ते धनं १५ हि अन्नपानकारणम् अन्नपानञ्च प्राणकारणं तत्र यथा धनं प्राणकारणकारणं प्राणा इत्युपचर्यते तथा दुःखकारणकारणाऽसद्वेद्यकारणत्वाद् हिंसादयोऽपि दुःखमुपचर्यन्ते। इत्येवमपि भावना व्रतस्थैर्यार्थं भवति। ननु विषयेषु रतिसुखसद्भावान् सर्वमेव कथं दुःखम्? सत्यम्; विषयरतिसुखं सुखं न भवति वेदनाप्रतीकारत्वात् खर्जूनखादिमार्जनवत्।

भूयोऽपि व्रतानां स्थिरीकरणार्थं भावनाविशेषात् सूत्रेणानेन भगवानाह—

२० मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्वगुणाधिकक्लिश्यमानाविनेयेषु ॥११॥

मित्रस्य भावः कर्म वा मैत्री। "यत्स्त्रीनपुंसकाख्या" [ ] इति वचनात् स्त्रीत्वम्, नपुंसके तु [2]मैत्र्यमित्यपि भवति। कायवाङ्मनोभिः कृतकारितानुमतैरन्येषां कृच्छ्रानुत्पत्तिकाङ्क्षा मैत्रीत्युच्यते। मनोनयनवदनप्रसन्नतया विक्रियमाणोऽन्तर्भक्तिरागः २५ प्रमोद इत्युच्यते। हीनदीनकानीनानयनजनानुग्रहत्वं कारुण्यमुच्यते। करुणाया भावः कर्म वा कारुण्यम्। मध्यस्थस्य भावः कर्म वा माध्यस्थ्यम्, रागद्वेषजनितपक्षपातस्याभावः माध्यस्थ्यमुच्यते। मैत्री च प्रमोदश्च कारुण्यञ्च माध्यस्थ्यञ्च मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि। पापकर्मोदयवशात् नानायोनिषु सीदन्ति दुःखीभवन्तीति सत्त्वाः प्राणिनः। ज्ञानतपःसंयमादिभिर्गुणैरधिकाः प्रकृष्टा गुणाधिकाः। असद्वेद्यकर्मविपाकोत्पादितदुःखाः क्लिश्यन्ते इति

---

१ आदीनवो दोषः। २ मैत्रमि–आ०, ब०, ज०।

क्लिश्यमानाः । तत्त्वार्थाकर्णनस्वीकरणाभ्यामृते अनुत्पन्नसम्यक्त्वादिगुणा न विनेतुं शिक्षयितुं शक्यन्ते ये ते अविनेयाः । सत्त्वाश्च गुणाधिकाश्च क्लिश्यमानाश्च अविनेयाश्च सत्त्वगुणाधिकक्लिश्यमानाविनेयास्तेषु तथोक्तेषु । अस्यायमर्थः—सत्त्वेषु सर्वजीवेषु मैत्री भावनीया गुणाधिकेषु सद्दृष्ट्यादिषु प्रमोदो विधेयः । क्लिश्यमानेषु दुःखीभवत्सु प्राणिषु कारुण्यं करुणाभावो विधेयः । अविनेयेषु अविनीतेषु मिथ्यादृष्ट्यादिषु जिनधर्मबाह्येषु निर्गुणेषु प्राणिषु माध्यस्थ्यं मध्यस्थता औदासीन्यं भावनीयम् । एतासु भावनासु भाव्यमानासु अहिंसादयो व्रताः मनागूना अपि परिपूर्णा भवन्ति । चकारः परस्परसमुच्चये वर्तते पूर्वोक्तसूत्रार्थेषु अत्र च । ५

अथ भूयोऽपि व्रतभावनाविशेषप्रतिपादनार्थं सूत्रमिदमाहुः—

जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् ॥१२॥ १०

गच्छतीति जगद् "**द्युतिगमोर्द्वे च**" [का० सू० ४।४।५८] इति साधुः । जगच्च कायश्च जगत्कायौ जगत्काययोः स्वभावौ जगत्कायस्वभावौ । संवेजनं संवेगः, विरागस्य भावः कर्म वा वैराग्यम् । संवेगश्च संसारभीरुता धर्मानुरागो वा वैराग्यञ्च शरीरभोगादिनिर्वेदः संवेगवैराग्ये, तयोरर्थः प्रयोजनं यस्मिन् भावनकर्मणि तत् संवेगवैराग्यार्थम् । जगत्स्वभावः संसारस्वरूपचिन्तनं लोकस्वरूपभावनम् , कायस्वभावः अशुचित्वादिस्वरूपचिन्तनम् । एतद् भावनाद्वयं संवेगवैराग्यार्थं भवति । वाशब्दः पक्षान्तरं सूचयति, तेनाहिंसादिव्रतानां स्थैर्यार्थं च वेदितव्यम् । १५

तत्र तावज्जगत्स्वभावः उच्यते—जगत् त्रैलोक्यम् अनादिनिधनम् , अधोजगत् वेत्रासनाकारं मध्यजगत् झल्लरीसदृशम् ऊर्ध्वजगत् मृदङ्गसन्निभम् ऊद्ध्वर्मर्दलाकारम् । अस्मिञ्जगति अनादिसंसारे अनादिकालं चतुरशीतिलक्षयोनिषु प्राणिनः शारीरमानसागन्तुकदुःखमसातं भोजं भोजं भुक्त्वा भुक्त्वा पर्यटन्ति परिभ्रमन्ति । अत्र जगति किञ्चिदपि धनयौवनादिकं नियतं न वर्तते शाश्वतं नास्ति, आयुर्जलबुद्बुदसमानं भोगसम्पदः तडिन्मेघेन्द्रचापादिविकृतिचञ्चलाः । अस्मिञ्जगति जीवस्य इन्द्रधरणेन्द्रचक्रवर्त्यादिकः कोऽपि विपदि त्राता न वर्तते । इदं जगज्जन्मजरामरणस्थानं वर्तते । इत्यादि भावनायाः संसारसंवेगो भवभीरुता भवति, अहिंसादयो व्रताश्च स्थिरत्वं प्रतिलभन्ते । २० २५

कायस्वभाव उच्यते—कायः खलु अध्रुवः दुःखहेतुः निःसारोऽशुचिः बीभत्सुर्दुर्गन्धः मलमूत्रनिधानं सन्तापहेतुः पापोपार्जनपण्डितः येन केनचित् पदेन पतनशीलः इत्येवं कायस्वभावभावनया विषयरागनिवृत्तिर्भवति, वैराग्यमुत्पद्यते, व्रतानां स्थैर्यञ्च भवति, तेनैतौ जगत्कायस्वभावौ भावनीयौ ।

अथ हिंसादीनां पञ्चपातकानां स्वरूपनिरूपणार्थं सूत्राणि मनसि धृत्वा युगपद् वक्तु- ३०

---

१ -दृष्टिषु आ०, ब०, ज० । २ -सूत्रेष्वत्र च आ०, ब०, ज० । ३ सन्तापहे- आ०, ब०, ज० ।

मशक्यत्वात् तत्र तावत् हिंसालक्षणप्रतिपादकं सूत्रमिदमुच्यते—

प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा ॥ १३ ॥

प्रमाद्यति स्म प्रमत्तः प्रमादयुक्तः पुमान् कषायसंयुक्तात्मपरिणाम इत्यर्थः। अथवा इन्द्रियाणां प्रचारमनवधार्य अविचार्य यः पुमान् प्रवर्तते स प्रमत्तः। अथवा प्रवृद्धकषायोदय[1]-
५ प्रविष्टः प्राणातिपातादिहेतुषु स्थित अहिंसायां शाठ्येन यतते कपटेन यत्नं करोति न परमार्थेन स प्रमत्त उच्यते। अथवा पञ्चदशप्रमादयुक्तः प्रमत्तः। के ते पञ्चदश प्रमादाः ? चतस्रो विकथाः चत्वारः कषायाः पञ्चेन्द्रियाणि निद्रा प्रेमा च। तथा चोक्तम्—

"विकहा तह य कसाया इंदियणिद्दा तहेव पणओ य।
चदुचदुपणमेगेग्गे होंति पमदा य पण्णरस ॥१॥" [पंचसं० १।१५]

१० प्रमत्तस्य योगः कायवाङ्मनःकर्मरूपः प्रमत्तयोगः, तस्मात् प्रमत्तयोगात्।

"पंच वि इंदियपाणा मणवचकाएण तिण्णि बलपाणा।
आणप्पाणप्पाणा आउगपाणेण होंति दस पाणा ॥"
[बोधपा० गा० ३५]

इति गाथाकथितक्रमेण ये प्राणिनां दश प्राणास्तेषां यथासम्भवं व्यपरोपणं वियोग-
१५ करणं व्यपरोपणचिन्तनं व्यपरोपणाभिमुख्यं वा हिंसेत्युच्यते। प्रमत्तयोगाभावे प्राणव्यपरोपणमपि हिंसा न भवति। सा हिंसा प्राणिनां दुःखहेतुत्वादधर्मकारणं ज्ञातव्या। चेत्प्रमत्तयोगो न भवति तदा केवलं प्राणव्यपरोपणमात्रम् अधर्माय न भवति।

"वियोजयति चासुभिर्न च वधेन संयुज्यते।" [द्वात्रिंशद्द्वा० ३।१६] इत्यभिधानात्। तथा चोक्तम्—

२० "उच्चालिदम्मि पादे इरियासमिदस्स णिग्गमट्ठाणे।
आवादेज्ज कुलिंगो मरेज्ज तज्जोगमासेज्ज ॥ १ ॥
ण हि तस्स तण्णिमित्ते बंधो सुहुमो वि देसिदो समए।
मुच्छा परिग्गहोच्चिय अज्झप्पपमाणदो भणिदो ॥ २ ॥"
[पवयणसा० क्षे० ३।१६, १७]

३० एतयोर्गाथयोरर्थसूचनं यथा—पादे चरणे उच्चालिदम्मि गमने प्रवृत्ते सति इरियासमिदस्स ईर्यासमितियुक्तस्य मुनेः णिग्गमणट्ठाणे निर्गमनस्थाने पादारोपणस्थाने आवादेज्ज यदि आपतेत् आगच्छेत् पादेन चम्पिते कुलिङ्गी सूक्ष्मजीवो मरेज्ज म्रियेत वा तज्जोगमासेज्ज पादसंयोगमाश्रित्य। ण हि तस्स तण्णिमित्ते न हि नैव न भवति तस्य जन्तुचम्पकस्य

---

१ –प्रतिष्ठः आ०, ब०, ज०।

मुनेः तण्णिमत्त मरणादेकारणमात्रेऽपि सति । किन्न भवति ? बंधो कर्मबन्धः । कियान् ? सुमुहो वि स्तोकोऽपि समये जिनसूत्रे न हि देसिदो नैव कथितः । अमुमेवार्थं दृष्टान्तेन द्रढयति—मूर्च्छा परिग्रहणाकाङ्क्षा परिग्रहो त्ति य परिग्रहश्चैव किल परिग्रहग्रहणाकाङ्क्षा परिग्रहमुच्यते । कुतः ? अज्झप्पपमाणदो अध्यात्मप्रमाणतः अन्तःसङ्कल्पानतिक्रमेणेत्यर्थः भणिदो परिग्रहः कथितः । एतेन किमुक्तं भवति प्राणातिपाताभावेऽपि प्रमत्तयोगमात्रात् ५ हिंसा भवत्येव । तथा चोक्तम्—

"मरदु व जियदु व जीवो अयदाचारस्स णिच्छिदा हिंसा ।
पयदस्स णत्थि बंधो हिंसामत्तेण समिदस्स ॥ १ ॥

[पवयणसा० ३।१७]

अस्यायमर्थः—म्रियतां वा जीवतु वा जीवः अयदाचारस्स अयत्नपरस्य जीवस्य १० निश्चिता हिंसा भवति । हिंसायामकृतायामपि अयत्नवतः पुरुषस्य पापं लगत्येव । पयदस्स प्रयत्नपरस्य[1] पुंसः बन्धो न भवति । केन ? हिंसामत्तेण हिंसामात्रेण समिदस्स समितिपरस्य । अत्र परिणामस्य प्राधान्यमुक्तम् । तथा चोक्तम्—

"अघ्नन्नपि भवेत्पापी निघ्नन्नपि न पापभाक् ।
परिणामविशेषेण यथा धीवरकर्षकौ ॥ १ ॥" [यश० उ० पृ० ३३५] १५

अन्यच्च[2]—

"स्वयमेवात्मनात्मानं हिनस्त्यात्मा प्रमादवान् ।
पूर्वं प्राण्यन्तराणां तु पश्चात्स्याद्वा न वधः ॥२॥" [ ]

अथ अनृतलक्षणमुच्यते—

असदभिधानमनृतम् ॥ १४ ॥ २०

अस्तीति सत् न सत् असत् अप्रशस्तमित्यर्थः । "वर्तमाने शत्तृङ्" [का० सू० ४।४।२] असतः असत्यवचनस्य अभिधानम् अनृतमुच्यते । न ऋतं न सत्यमनृतं यत् असदभिधानमसत्यकथनं तत् अनृतं भवति । विद्यमानार्थस्य[3] अविद्यमानार्थस्य वा प्राणिपीडाकरस्य वचनस्य यत् कथनं तत् अनृतं भवति । यत्प्रमत्तयोगादुच्यते तदनृतमित्यर्थः । अहिंसाव्रतप्रतिपालनार्थं सत्यादीनि व्रतानि इति प्रागेवोक्तम्, तेन यत् हिंसाकरं वचनं तदनृतमिति निश्चितम् । अत्र २५ दृष्टान्तः—वसुनृपः यथा धनश्री हिंसायाम् । तथा यद्वचनं कर्णकर्कशं कर्णशूलप्रायं हृदयनिष्ठुरं मनःपीडाकरं विप्रलापप्रायं विरुद्धप्रलापप्रायं विरोधवचनमिति यावत्, प्राणिवध-

---

१ ३- स्य प्राधान्यपुंसः आ०, ब०, ज० । २ उद्धृताऽयं स० सि० ३।१३ । ३ -मानस्य आ०, ब०, ज० ।

बन्धनादिकरं वैरकरं कलहादिकरम् उल्लासकरं गुर्वाद्यवज्ञाकरं तत्सर्वमनृतमित्युच्यते। अनृतस्य विवक्षापि अनृतवचनोपायचिन्तनमपि प्रमत्तयोगादनृतमुच्यते। त्याज्यानुष्ठानाद्यनुवदनमपि नानृतं प्रमत्तयोगाभावात्। एवं प्रमत्तयोगादिति उत्तरत्रापि योज्यम्।

अथ स्तेयलक्षणमुच्यते—

५ **अदत्तादानं स्तेयम् ॥१५॥**

दीयते स्म दत्तं न दत्तम् अदत्तम्, अदत्तस्य आदानं ग्रहणम् अदत्तादानं स्तेयं चौर्यं भवति। यल्लोकैः स्वीकृतं सर्वलोकाप्रवृत्तिगोचरः तद्वस्तु अदत्तम्, तस्य ग्रहणं जिघृक्षा वा ग्रहणोपायचिन्तनं च स्तेयमुच्यते। ननु यदि अदत्तादानं स्तेयम् तर्हि कर्मनोकर्मग्रहणमपि स्तेयं भवेत् परैरदत्तत्वात्; साधूक्तं भवता; यत्र दानमादानं च सम्भवति तत्रैव स्तेयव्यव-
१० हृतिर्भवति अदत्तग्रहणवचनस्य सामर्थ्यात्, दातृसद्भावे ग्राहकास्तित्वात्, कर्म-नोकर्मग्रहणे दायकः कोऽपि नास्ति अन्यत्रात्मपरिणामात्, त्रिभुवनभृततद्योग्याणुवर्गणानामस्वामिकत्वात् नैष दोषः। नन्वेवं सति मुनीनां ग्रामनगरादिपर्यटनावसरे रथ्याद्वारादिप्रवेशे अदत्तादानं सञ्जायते तेषां सस्वामिकत्वात् मुनीनामनभिहितत्वाच्च; इदमपि साधूक्तं भवता; नगरग्रामादिषु रथ्याद्वारादिप्रवेशादिषु च सर्वजनसामान्यतया तत्र प्रवृत्तिर्मुक्तैव वर्तते। कस्मात्? अर्थापत्ति-
१५ प्रमाणात्। कार्थापत्तिरत्र वर्तते इति चेत्? उच्यते—पिहितद्वारादिषु मुनिर्न प्रविशेत् अपिहितद्वारादिषु प्रविशेदित्यर्थापादनात्। पिहितद्वारादिषु यदि मुनीनाममुक्तिः अपिहितद्वारादिषु मुक्तिरापद्यत एव। अथवा प्रमत्तयोगाददत्तादानं स्तेयं भवति, न रथ्यादिषु प्रविशतां मुनीनां प्रमत्तयोगो वर्तते, तेन बाह्यवस्तुग्रहणे तदग्रहणे च सङ्क्लेशपरिणामसद्भावात् स्तेयं तदभावे न स्तेयमिति।

२० अथाब्रह्मलक्षणमुच्यते—

मैथुनमब्रह्म ॥ १६ ॥

मिथुनस्य कर्म मैथुनम्। किं तत् मिथुनस्य कर्म? स्त्रीपुरुषयोश्चारित्रमोहविपाके रागपरिणतिप्राप्तयोरन्योन्यपर्वणं (स्पर्शनं) प्रति अभिलाषः स्पर्शोपायचिन्तनं च मिथुनकर्मोच्यते। रागपरिणतेरभावे न स्पर्शनमात्रमब्रह्मोच्यते। लोकेऽप्याबालगोपालादिप्रसिद्धमेतत्—यत्
२५ स्त्रीपुंसयोः रागपरिणामकारणं चेष्टितं मैथुनम्। शास्त्रे च "अश्ववृषभयोर्मैथुनेच्छा [ ]" मिथुनकर्म। ततः कारणात् प्रमत्तयोगात् स्त्रीपुंस-पुरुषपुरुषादिमिथुनगोचरं रतिसुखार्थचेष्टनं मैथुनमित्यायातम्। अहिंसादयो गुणा यस्मिन् परिरक्ष्यमाणे बृंहन्ति वृद्धिं प्रयान्ति तद्ब्रह्मोच्यते। न ब्रह्म अब्रह्म। यन्मैथुनं तदब्रह्म इति सूत्रार्थः। मैथुने प्रवर्त्तमानो जीवः हिंसादिकं करोति, स्थावरजङ्गमान् जीवान् विध्वंसयति। तथा चोक्तम्—

३० "मैथुनाचरणे मूढ म्रियन्ते जन्तुकोटयः।
योनिरन्ध्रसमुत्पन्ना लिङ्गसंघट्टपीडिताः[1]" ॥१॥" [ज्ञानार्ण० १३।२]

१–पीडनात् आ०, ब०, ज०।

घाते घातेऽसंख्येयाः कोटयो जन्तवो म्रियन्ते इत्यर्थः। तथा कक्षद्वये स्तनान्तरे नाभौ स्मरमन्दिरे च स्त्रीणां प्राणिन उत्पद्यन्ते तत्र करादिव्यापारे ते म्रियन्ते। मैथुनार्थं मृषा वादं वक्ति, अदत्तमप्यादत्ते, बाह्याभ्यन्तरं परिग्रहञ्च। अत्र आरक्षकोपाख्यानमुद्भावनीयं स्तेये सत्यघोषवत्।

अथ परिग्रहलक्षणसूत्रमुच्यते— ५

मूर्च्छा परिग्रहः ॥ १७ ॥

मूर्च्छनं मूर्च्छा, परिगृह्यते परिग्रहः। या मूर्च्छा सा परिग्रह इत्युच्यते। काऽसौ मूर्च्छा ? अघ्न्याबलीवर्दगर्वरगर्वरीवाजिबडवादासीदासकलत्रपुत्रप्रभृतिश्चेतनः परिग्रहः। शौक्तिकेयमाणिक्यपुष्परागवैडूर्य्यपद्मरागहीरकेन्द्रनीलगरुडोद्गाराश्मगर्भदुर्वर्णसुवर्णपट्टकूलचीनाम्बरताम्रपिचव्यघृततैलगुडशर्करास्वापतेयप्रभृतिरचेतनो बाह्यपरिग्रहः। रागद्वेषमदमोह- १० कषायप्रभृतिरभ्यन्तर उपधिः। तस्योभयप्रकारस्यापि परिग्रहस्य संरक्षणे उपार्जने संस्करणे वर्द्धनादौ व्यापारो मनोऽभिलाषः मूर्च्छा प्रतिपाद्यते, न तु वातपित्तश्लेष्माद्युत्पादितोऽचेतनस्वभावो मूर्च्छा भण्यते "मूर्च्छा मोहसमुच्छ्राययोः" [पा० धातुपा० भ्वा० २१९] इति वचनात्। मूर्च्छिरयं सामान्येन मोहपरिणामे वर्तते। यः सामान्येनोक्तोऽर्थः स विशेषेष्वपि वर्तते, तेन सामान्यार्थमाश्रित्याचेतनत्वलक्षणोऽर्थो नाश्रयणीयः, किन्तु विशेप- १५ लक्षणोऽर्थो मनोऽभिलापलक्षणोऽर्थो मूर्च्छिधात्वर्थोऽत्र गृह्यते। एवं चेद् बाह्याः परिग्रहाः न भवन्ति मनोऽभिलापमात्राभ्यन्तरपरिग्रहार्थपरिग्रहात्; तन्न युक्तमुक्तं भवता; मनोऽभिलाषस्य प्रधानत्वात् अभ्यन्तर एव परिग्रहः सङ्गृहीतः, बाह्यपरिग्रहस्य गौणत्वात्। तेन ममत्वमेव परिग्रह उक्तः। तर्हि बाह्यः परिग्रहो न भवत्येव; सत्यम्; बाह्यः परिग्रहो मूर्च्छाहेतुत्वात् सोऽपि परिग्रह उच्यते। तेन आहारभयमैथुनादियुक्तः पुमान् सपरिग्रहो भवति; सञ्ज्ञा- २० नामपि ममेदमिति सङ्कल्पाश्रयत्वात् रागद्वेषमोहादिपरिणामवन्नास्ति दोषः। प्रमत्तयोगादिति पदमनुवर्तते तेन यस्य प्रमत्तयोगः स सपरिग्रहः यस्य तु प्रमत्तयोगो न वर्तते सोऽपरिग्रहः। सम्यग्दर्शनज्ञानचारित्रतपोयुक्तः प्रमादरहितो निर्मोहः तस्य मनोऽभिलाषलक्षणा मूर्च्छा नास्ति निःपरिग्रहत्वञ्च तस्य सिद्धम्। ननु ज्ञानदर्शनचारित्रतपोलक्षणः किं परिग्रहो न भवति ? न भवत्येव, ज्ञानादीनाम् आत्मस्वभावानामहेयत्वादपरिग्रहत्वं सिद्धम्। "यस्त्यक्तुं २५ शक्यते स एव परिग्रहः" [ ] इत्यभिधानात्। रागद्वेषादयस्तु कर्मोदयाधीनाः। अनात्मस्वभावा हेयरूपास्तेषु सङ्कल्पः परिग्रह इति सङ्गच्छते। तत्र प्राणातिपातोऽवश्यम्भावी तदर्थं चासत्यं वदति स्तैन्यञ्च विदधाति अब्रह्मकर्मणि नियतं यत्नवान् भवति। पूर्वोक्तैः पातकैस्तु नरकादिषु उत्पद्यते तत्र तु पञ्चप्रकारादि दुःखं भुङ्क्ते। तेन मुख्यतया रागादिमनोऽभिलाषः परिग्रह इत्यायातम्। तथा चोक्तम्— ३०

"बाह्यग्रन्थविहीना दरिद्रमनुजाः स्वपापतः सन्ति ।
पुनरभ्यन्तरसङ्गत्यागी लोकेषु दुर्लभो जीवः ॥१॥" [ ]

अभ्यन्तरपरिग्रहाश्चतुर्दश । बाह्यपरिग्रहास्तु दश । तथा चोक्तम्—

"मिथ्यात्ववेदहास्यादिषट्कषायचतुष्टयम् ।
रागद्वेषौ तु सङ्गाः स्युरन्तरङ्गाश्चतुर्दश ॥१॥
क्षेत्रं वास्तु धनं धान्यं द्विपदश्च चतुष्पदम् ।
यानं शयनासनं कुप्यं भाण्डश्चेति बहिर्दश ॥२॥" [ ]

अथ हिंसादिव्रतसम्पन्नः पुमान् कीदृशो भवतीति प्रश्ने सूत्रमिदमाहुः—

निःशल्यो व्रती ॥१८॥

१० शृणाति विध्वंसयति हिनस्तीति शल्यमुच्यते । वपुरनुप्रविश्य दुःखमुत्पादयति बाणाद्यायुधशल्यम् । शल्यमिव शल्यं प्राणिनां बाधाकरत्वात् शारीरमानसदुःखकारणत्वात् । कर्मोदयविकृतिः शल्यमुपचारात् । तच्छल्यं त्रिप्रकारम्—मायाशल्यं मिथ्यादर्शनशल्यं निदानशल्यञ्चेति । तत्र माया परवञ्चनम् । मिथ्यादर्शनं तत्त्वार्थश्रद्धानाभावः । निदानं विषयसुखाभिलाषः । एवंविधात्त्रिप्रकारात् शल्यात् निष्क्रान्तो निर्गतो निःशल्यः ।
१५ योऽसौ निःशल्यः स एव व्रतीत्युच्यते । अत्र किञ्चिच्चोद्यते मीमांस्यते विचार्यत इति यावत् । निःशल्यः किल शल्याभावाद् भवति, व्रताश्रयणाद्व्रती भवति, न हि निःशल्यो व्रती भवितुमर्हति, यथा देवदत्तः केवलदण्डधारी छत्रीति नोच्यते तथा निःशल्यो व्रती न भवति; अयुक्तमेवोक्तं भवता; निःशल्यमात्रो व्रती न भवति किन्तु उभयविशेषणविशिष्टः पुमान् व्रती भवति । निःशल्यो व्रतोपपन्नश्च व्रतीत्युच्यते । हिंसादिविरमणमात्राद्व्रती न भवति किन्तु
२० हिंसादिविरमणयुतः शल्यरहितश्च व्रती कथ्यते । अत्रार्थे दृष्टान्तः—प्रभूतदुग्धघृतसहितः पुमान् गोमानित्युच्यते यस्य तु [1]पुरुहू (हू) दुग्धाज्यादिकं नास्ति स विद्यमानास्वपि अघ्न्यासु गोमान् नोच्यते, तथा शल्यसंयुक्तः पुमान् व्रतेषु विद्यमानेष्वपि व्रती न कथ्यते, अहिंसादिव्रतानां [2]विशिष्टं फलं शल्यवान् न विन्दति । निःशल्यस्तु व्रती सन् अहिंसादिव्रतानां विशिष्टं फलं लभत इत्यर्थः ।
२५ अथ व्रतोपपन्नः पुमान् कतिभेदो भवतीति प्रश्ने सूत्रमिदमुच्यते ।

अगार्यनगारश्च ॥१९॥

अङ्ग्यते गम्यते प्रतिश्रयार्थिभिः पुरुषैः गृहप्रयोजनवद्भिः पुरुषैरित्यगारं गृहमुच्यते । अगारं गृहं पस्त्यमावासो विद्यते यस्य स अगारी । न विद्यते अगारं यस्य सोऽनगारः । अगारी च अनगारश्च द्विप्रकारो व्रती भवति । चकारः परस्परसमुच्चयार्थः । एवञ्चेत्तर्हि जिनगेह-

---

१ पुरुषस्य दु– ज० । पुरुहूतदु– आ०, ब० । २ विशिष्टफ– आ०, ब०, ज० ।

शून्यागारमठाद्यावासेषु वसन् मुनिरप्यगारी भवति तस्यागारसद्भावात्, तथा च अनिवृत्तविषय-तृष्णः केनचिद्धेतुना गृहं परिहृत्य वने तिष्ठन् गृहस्थोऽप्यनगारो भवति,साधूक्तं भवता; अगार-शब्देनात्र भावगृहं सूचितं ज्ञातव्यम्, चारित्रमोहोदये सति गृहसम्बन्धं प्रति अनियमपरि-णामः भावागारमभिधीयते। सोऽनियमपरिणामः यस्य पुरुषस्य विद्यते स पुमान् नग्नोऽ-नग्नो वा वने वसन्नपि अगारीत्युच्यते। गृहपरिणामाभावात् जिनचैत्यालयादौ वसन्नपि अन-　५
गार उच्यते। ननु अगारी व्रती न भवति अपरिपूर्णव्रतत्वात्; तदयुक्तम्; नैगमसंग्रहव्यव-हारनयत्रयापेक्षया अगारी व्रती भवत्येव पत्तनावासवत्। यथा कश्चित्पुमान् गृहे अपवरके वा वसति स पत्तनावास उच्यते, स किं सर्वस्मिन् पत्तने वसति ? किन्तु पत्तनमध्यस्थितनियत-गृहादौ वसति, तथा परिपूर्णानि व्रतानि अप्रतिपालयन्नपि एकदेशव्रताश्रितः पुमान् व्रतीत्युच्यते। एवञ्चेत्तर्हि हिंसादीनां पञ्चपातकानां मध्ये किमन्यतमपातकप्रतिनिवृत्तः खल्वगारी व्रती कथ्यते;　१०
न कथ्यते ; किन्तु पञ्चप्रकारामपि विरतिमपरिपूर्णां प्रतिपालयन् व्रती कथ्यते। अमुमेवार्थ मुत्तरसूत्रेण समर्थयति—

अणुव्रतोऽगारी ॥२०॥

अणूनि अल्पानि व्रतानि यस्य सोऽणुव्रतः सर्वसावद्यनिवृत्तेरयोगात्। य ईदृशः पुमान् स अगारीति कथ्यते। पृथिव्यप्तेजोवायुवनस्पतिकायान् जीवान् अनन्तकायवर्जान्[2] स्वकार्ये　१५
विराधयति, द्वित्रिचतुःपञ्चेन्द्रियान् जन्तून् न विराधयति तदादिममणुव्रतमुच्यते। लोभेन मोहेन स्नेहादिना गृहविनाशहेतुना ग्रामवासादिकारणेन वा जीवोऽनृतं वक्ति तस्मादनृतान्निवृत्तो योऽगारी भवति तस्य द्वितीयमणुव्रतं भवति। यद्धनं निजमपि संक्लेशेन गृह्यते तत्परपीडा-करम्, यच्च नृपभीतिवशान्निश्चयेन परिहृतमपि यद्दत्तं धनं तस्मिन् धने परिहृतादरो यः पुमान् स श्रावकस्तृतीयमणुव्रतं प्राप्नोति। पुमानित्युक्ते योषिदपि लभ्यते तस्या अपि तृतीय-　२०
मणुव्रतं भवति। एवं यथासम्भवं शब्दस्यार्थो वेदितव्यः। स्वीकृताऽस्वीकृता च या परस्त्री भवति तस्यां यो गृही रतिं न करोति स चतुर्थमणुव्रतं प्राप्नोति। क्षेत्रवास्तुधनधान्यहिरण्य-सुवर्णदासी-दासादीनां निजेच्छावशाद् येन गृहिणा परिमाणं कृतं स गृही पञ्चममणु-व्रतं प्राप्नोति।

अथ महाव्रतिनः गृहस्थस्य च किमेतावानेव विशेषः किं वाऽन्योऽपि कश्चिद् विशे-　२५
षोऽस्ति इति प्रश्ने सूत्रमिदमाहुः—

दिग्देशानर्थदण्डविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरि-माणातिथिसंविभागव्रतसम्पन्नश्च ॥२१॥

दिशश्च देशाश्च अनर्थदण्डाश्च दिग्देशानर्थदण्डाः तेभ्यो विरतिः दिग्देशानर्थदण्ड-विरतिः। विरतिशब्दः प्रत्येकं प्रयुज्यते। तेनायं विग्रहः-दिग्विरतिव्रतं च देशविरतिव्रतं च　३०
अनर्थदण्डविरतिव्रतं च सामायिकव्रतं च प्रोषधोपवासव्रतं च उपभोगपरिभोगपरिमाणव्रतं च

---

१ तदुक्तम् आ०, ब०, ज०। २ –कायावर्जनात् स्व– आ०, ब०, ज०।

अतिथिसंविभागव्रतश्च तानि दिग्देशानर्थदण्डविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतानि, तैः सम्पन्नः संयुक्तो यो गृही भवति स विरताविरतोऽगारीति कथ्यते। चकारोऽनुक्तसमुच्चयार्थः। तेन वक्ष्यमाणसल्लेखनादियुक्तः अगारीति, कथ्यते। अस्यायमर्थः—पूर्वदक्षिणपश्चिमोत्तराश्चतस्रो दिशः, अग्निकोणनैर्ऋत्यकोणवायुकोणेशान-
५ कोणलक्षणाश्चतस्रो विदिशः प्रतिदिशश्च कथ्यन्ते, ता अपि दिक्शब्देन लभ्यन्ते, तासु दिक्षु प्रदिक्षु च हिमाचलविन्ध्यपर्वतादिकम् अभिज्ञानपूर्वकं मर्यादां कृत्वा परतो नियमग्रहणं दिग्विरतिव्रतमुच्यते। तेन च दिग्विरतिव्रतेन बहिःस्थितस्थावरजङ्गमप्राणिनां सर्वथाविराधनाभावाद् गृहस्थस्यापि महाव्रतत्वमायाति। तस्माद्बहिःक्षेत्रे मुक्तदिग्बाह्यप्रदेशे धनादिलाभे सत्यपि मनोव्यापारनिषेधात् लोभनिषेधश्चागारिणो भवति।

१० गन्तव्यायामपि दिशि नियतदेशाद् ग्रामनदीक्षेत्रयोजनवनगृहकटकादिलक्षणान् परतो विरमणं देशविरतिव्रतमुच्यते। इदं हि व्रतं दिग्विरतिव्रतमध्ये अन्तर्व्रतमुत्पन्नम्। विशेषेण तु सपापस्थाने व्रतभङ्गसद्भावस्थाने[1] खुरासानमूलस्थानमखस्थानहिरमजस्थानादिगमनवर्जनं देशविरतिव्रतमुच्यते। तेनापि व्रतेन त्रसस्थावरहिंसानिवर्तनाद् गृहस्थस्यापि महाव्रतत्वं लोभनिवृत्तिश्चोपचर्यते।

१५ अनर्थदण्डः पञ्चप्रकारः—अपध्यानपापोपदेशप्रमादचरितहिंसाप्रदानदुःश्रुतिभेदात्। तत्रापध्यानलक्षणं कथ्यते—परप्राणिनां जयपराजयहननबन्धनप्रतीकविध्वंसनस्वापतेयाऽपहरणताडनादिकं द्वेषात् परकलत्राद्युद्दालनं रागात् कथं भवेदिति मनःपरिणामप्रवर्तनम्[2] अपध्यानमुच्यते। द्वितीयोऽनर्थदण्डः पापोपदेशनामा। स चतुःप्रकारः—तथाहि अस्मात्पूर्वादिदेशाद् दासीदासान् अल्पमूल्यसुलभानादाय अन्यस्मिन् गुर्जरादिदेशे तद्विक्रयो यदि क्रियते
२० तदा महान् धनलाभो भवेदिति क्लेशवणिज्या कथ्यते ॥१॥ अस्माद्देशात् सुरभिमहिषीबलीवर्दक्रमेलकगन्धर्वादीन् यदि अन्यत्र देशे विक्रीणीते तदा महान् लाभो भवतीति तिर्यग्वणिज्यानामको द्वितीयः पापोपदेशो भवति ॥ २ ॥ शाकुनिकाः पक्षिमारकाः, वागुरिकाः मृगवराहादिमारकाः, धीवराः मत्स्यमारकाः, इत्यादीनां पापोपकर्मोपजीविनाम् ईदृशीं वार्तां कथयति—अस्मिन् प्रदेशे वनजलाद्युपलक्षिते मृगवराहतित्तिरमत्स्यादयो बहवः सन्तीति कथनं बधकोप-
२५ देशनामा तृतीयः पापोपदेशः कथ्यते ॥३॥ पामरादीनामग्रे एवं कथयति भूरेवं कृष्यते उदकमेवं निष्कास्यते वनदाह एवं क्रियते क्षुपादय एवं चिकित्स्यन्ते इत्याद्यारम्भः अनेनोपायेन क्रियते इत्यादिकथनम् आरम्भोपदेशनामा चतुर्थः पापोपदेशो भवति ॥४॥

अथ प्रमादचरितनामा तृतीयोऽनर्थदण्डः कथ्यते-प्रयोजनं विना भूमिकुट्टनं जलसेचनम् अग्नित्तसन्धुक्षणं व्यजनादिवातक्षेपणं वृक्षवल्लीदलमूलकुसुमादिछेदनम्[3] इत्याद्यवद्यकर्म-
३० निर्माणं प्रमादचरितमुच्यते। अथ हिंसाप्रदाननामा चतुर्थोऽनर्थदण्डो निरूप्यते—परप्राणिघातहेतूनां शुनकमार्जारसर्पश्येनादीनां विषकुठारखड्गखनित्रज्वलनरज्ज्वादिबन्धनशृङ्खला-

---

१ -सद्भावे स्थानेषुरा- आ०, ब०, ज०। २ मनःपर्ययपरिणा- आ०, ब०, ज०।
३-तनिक्षे- आ०, ब०, ज०।

दीनां हिंसोपकरणानां यो विक्रयः क्रियते व्यवहारश्च क्रियते स्वयं वा सङ्ग्रहो विधीयते तत् हिंसाप्रदानमुच्यते । अथ हिंसाप्रवर्तकं शास्त्रम् अश्वमेधादि, रागप्रवर्तकं शास्त्रं कुक्कोकनामादि, द्वेषप्रवर्तकं शास्त्रं नानाप्रकारम्, मधुमांसादिप्रवर्तकं शास्त्रं स्मृत्यादि, तेषां शास्त्राणां कथनं श्रवणं शिक्षणं व्यापारश्च दुःश्रुतिरुच्यते । तथाऽनर्थकं पर्यटनं पर्यटनविषयोपसेवनम् अनर्थदण्ड उच्यते । तस्य सर्वस्यापि परिहरणम् अनर्थदण्डविरतिव्रतनामकं तृतीयं व्रतं भवति । एतानि ५ त्रीणि व्रतानि पञ्चानामणुव्रतानां गुणस्य कारकत्वादनुवर्द्धनत्वाद् गुणव्रतानीति कथ्यन्ते ।

सामायिकम्-समशब्दः एकत्वे एकीभावे वर्तते, यथा सङ्गतं घृतं सङ्गतं तैलम् एकीभूतमित्यर्थः । अयनमयः, सम एकत्वेन अयनं गमनं परिणमनं समयः, समय एव सामायिकम् स्वार्थे इकण् । अथवा समयः प्रयोजनमस्येति सामायिकं प्रयोजनार्थे इकण् । कोऽर्थः ? देववन्दनायां निःसंक्लेशं सर्वप्राणिसमताचिन्तनं सामायिकमित्यर्थः । एतावति देशे एतावति १० काले अहं सामायिके स्थास्यामीति या कृता प्रतिज्ञा वर्तते तावति काले सर्वसावद्ययोगविरतत्वाद् गृहस्थोऽपि महाव्रतीत्युपचर्य्यते । तर्हि स गृहस्थः तस्मिन् काले किं संयमी भवति ? नैवम्, संयमघातकर्मोदयसद्भावात् । उक्तञ्च—

"प्रत्याख्यानतनुत्वान्मन्दतराश्चरणमोहपरिणामाः ।
सत्त्वेन दुरवधारा महाव्रताय प्रकल्पन्ते ॥ १ ॥" [रत्नक० ३।२५] १५

प्रत्याख्यानशब्देन संयमघातकतृतीयकपायचतुष्क ज्ञातव्यम् । तर्हि तस्मिन् सामायिकपरिणते गृहस्थे महाव्रतत्वाभावः; तन्न; उपचारान्महाव्रतत्वाभावो न भवति, यथा राजत्वं विनापि सामान्योऽपि क्षत्रियः राजकुल इत्युच्यते यथा च बहुदेशे प्राप्तो देवदत्तः क्वचित्क्वचिदप्राप्तोऽपि सर्वगत इत्युच्यते, तथा च चैत्राभिधानोऽयं पुमान् चित्राद्यसद्भावेऽपि चैत्र इत्युच्यते तथा सामायिकव्रतपरिणतोऽगारी परिपूर्णसंयमं विनापि महाव्रतीत्युपचर्यते । २०

अष्टमी चतुर्दशी च पर्वद्वयं प्रोषध इत्युपचर्यते। प्रोषधे उपवास—स्पर्शरसगन्धवर्णशब्दलक्षणेषु पञ्चसु विषयेषु परिहृतौत्सुक्यानि पञ्चापि इन्द्रियाणि उपेत्य आगत्य तस्मिन्[1] उपवासे वसन्ति इत्युपवासः । अशनपानखाद्यलेह्यलक्षणचतुर्विधाहारपरिहार इत्यर्थः । सर्वसावद्यारम्भस्वशरीरसंस्कारकरणस्नानगन्धमाल्याभरणनस्यादिविवर्जितः[3] पवित्रप्रदेशे मुनिवासे चैत्यालये स्वकीयप्रोषधोपवासमन्दिरे वा धर्मकथां कथयन् शृण्वन् चिन्तयन् वा अवहितान्तकरण एकाग्रमनाः सन् उपवासं कुर्यात् । स श्रावकः प्रोषधोपवासव्रतो भवति । २५

उपभोगपरिभोगपरिमाणव्रतं कथ्यते—अशनपानगन्धमाल्यताम्बूलादिक उपभोगः कथ्यते । आच्छादनप्रावरणभूषणशय्यासनगृहयानवाहनवनितादिकः परिभोग उच्यते । उपभोगश्च परिभोगश्च उपभोगपरिभोगौ तयोः परिमाणम् उपभोगपरिभोगपरिमाणम् । भोगोपभोगपरिमाणमिति च क्वचित्पाठो वर्तते । तत्र अशनादिकं यत्सकृद्भुज्यते स भोगः, वस्त्रवनि- ३०

१ -न् काले उप- आ०, ब०, ज० । २ -रणादिवि- आ०, ब०, ज० । ३ पवित्रदेशे आ०, ब०, ज० ।

तादिकं यत् पुनः पुनर्भुज्यते स उपभोगः। उपभोगपरिभोगपरिमाणव्रते नियतकालसम्बन्धेऽपि मद्यं मांसं मधु च सदैव परिहरणीयं त्रसघातनिवृत्तचित्तेन पुंसा। केतकिनिम्बकुसुमार्द्रक-मूलकसर्वपुष्पानन्तकायिकछिद्रशाकनालीनलादिकं बहुजन्तुयोनिस्थानं तदपि यावज्जीवं परिहर्तव्यं बहुघातात्अल्पफलत्वात्। तथा चोक्तम्—

५ "अल्पफलबहुविघातान्मूलकमार्द्राणि शृङ्गवेराणि।
नवनीतनिम्बकुसुमं कैतकमित्येवमवहेयम् ॥" [रत्नक० ३।३९]

अथोपभोगविचारः—यानवाहनभूषणवसनादिकमेतावन्मात्रमेव ममेष्टमन्यदनिष्टमिति ज्ञात्वा अनिष्टपरिहारः कालमर्यादया यावज्जीवं वा कर्तव्यः।

संयममविराधयन् अतति भोजनार्थं गच्छति यः सोऽतिथिः। अथवा न विद्यते तिथिः १० प्रतिपद्द्वितीयातृतीयादिका यस्य सः अतिथिः अनियतकालभिक्षागमन इत्यर्थः। अतिथये समीचीनो विभागः निजभोजनाद् विशिष्टभोजनप्रदानमतिथिसंविभागः। स चतुर्विधो भवति–भिक्षादानम् उपकरणवितरणमौषधविश्राणनमावासप्रदानमिति। यो मोक्षार्थे उद्यतः संयमतत्परः शुद्धश्च भवति तस्मै निर्मलेन चेतसा अनवद्या भिक्षा दातव्या, धर्मोपकरणानि च पिच्छपुस्तकपट्टकमण्डल्या[१](ल्वा)दीनि रत्नत्रयवर्द्धकानि प्रदेयानि, औषधमपि योग्यमेव देयम्, १५ आवासश्च परमधर्मश्रद्धया प्रदातव्यः। अत्र च जिनस्नपनपूजादिकं वक्तव्यम्। एतानि चत्वारि शिक्षाव्रतानि भवन्ति। मातृपित्रादिवचनवदपत्यानामणुव्रतानां शिक्षाप्रदायकानि अविनाशकारकाणीत्यर्थः।

अथ चशब्देन गृहीतम् अपरमपि श्रावकव्रतं प्रतिपादयन् सूत्रमिदमाचष्टे—

मारणान्तिकीं सल्लेखनां जोषिता ॥२२॥

२० निजपरिणामेन [२]पूर्वभवादुपार्जितमायुः इन्द्रियाणि च बलानि च तेषां कारणवशेन योऽसौ विनाशः संक्षयः तन्मरणमुच्यते। "मृङ् प्राणत्यागे" [ ] इति वचनात्। मरणमेवान्तः[३]सद्भवावसानं मरणान्तः, मरणान्तः प्रयोजनं यस्याः सल्लेखनायाः सा मारणान्तिकी तां मारणान्तिकीम्। सत्शब्दः सम्यगर्थवाचकः। तेनायमर्थः–सत् सम्यक् लेखना कायस्य कषायाणां च कृशीकरणं तनूकरणं सल्लेखना। कायस्य सल्लेखना बाह्यसल्लेखना। २५ कषायाणां सल्लेखना अभ्यन्तरा सल्लेखना। क्रमेण कायकरणहापना कषायाणां च हापना सल्लेखनेत्युच्यते। तां सल्लेखनां जोषिता प्रीत्या सेविता पुमान् अगारी गृही भवति। पूर्वोक्तचकारात् मारणान्तिकीं सल्लेखनां जोषिता यतिश्च भवति। ननु 'प्रीत्या सेविता' इति किमर्थमुच्यते? अर्थविशेषोपपादनार्थम्। कोऽसौ अर्थविशेषः? यः पुमान् सल्लेखनां प्रीत्या सेवते प्रकटं भजते, यस्तु प्रीतावसत्यां भजते स व्रतेषु अनादरः कथ्यते तेन बलात्कारेण ३० सल्लेखना न कार्यते, सन्न्यासस्य प्रीतौ सत्यां स्वयमेव सल्लेखनां करोति। तेन सूरिणा जुषी धातुः प्रयुक्तः। ननु स्वयमेव क्रियमाणायां सल्लेखनायाम् अभिसन्धिपूर्वकं प्राणविसर्जनादात्म-

---

१ –मण्डलादी– आ०, ब०, ज०। १ पूर्वभये दुपा– ता०। २ तद्भावावसानं आ०, ब०, प०।

वधदोषो भविष्यति हिंसासद्भावात्; तन्न "प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा" [त० सू० ७।१३] इति जिनसूत्रे प्रोक्तम्, यस्तु मनःपूर्विकां सल्लेखनां करोति स अप्रमत्तस्तस्य प्रमादयोगो नास्ति। कस्मात्? रागद्वेषमोहाद्यभावात्। यस्तु पुमान् रागद्वेषमोहादिभिरविस्पृष्ट[1]: स्लष्टः सन् विषेण शस्त्रेण गलपाशकेन दहनप्रवेशेन कूपादौ निमज्जनेन भृगुपातेन रसनाखण्डादिना प्रयोगेण आत्मानमाहते स स्वघातपातकी भवत्येव। तथा च श्रुतिः— ५

"असूर्या नाम ते लोका अन्धेन तमसा वृताः।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥ १॥" [ईशावा० ३]

तेन सल्लेखनां प्रतिपन्नस्य पुंसः आत्मघातपातको नास्ति। तथा चोक्तम्[2]—

"रागादीणमणुप्पा अहिंसगत्तेति देसियं समये।
तेसिं चेदुप्पत्ती हिंसेति जिणेहि णिद्दिट्ठा॥ १॥" [ ] १०

रागादीनामनुत्पादादहिंसकत्वमिति देशितं समये। तेषां चेदुत्पत्तिः हिंसेति जिनैरुद्दिष्टा॥

अत्र खलु मरणमनिष्टं वर्तते वणिग्गृहविनाशवत्। यथा वणिजः नानाप्रकारपण्यानां भाण्डानां दाने आदाने सञ्चये च तत्परस्य पण्यभृतगृहविनाशोऽनिष्टो भवति पण्यभृतगृहस्य कुतश्चित् कारणात् विनाशे समायाते सति स वणिक् शक्त्यनुसारेण पण्यभृतं गृहं परित्यजति। परिहर्तुमशक्ये च पण्यगृहे यथा पण्यविनाशो न स्यात्तथा यत्नं विधत्ते। १५ एवमगार्यपि व्रतशीललक्षणपण्यसञ्चये प्रवर्तमानः व्रतशीलाश्रयस्य कायस्य पतनं नाकाङ्क्षति। कायपतनकारणे चागते सति निजगुणानामविरोधेन निजकायं शनैःशनैःपरिहरति। तथा परिहर्तुमशक्ये च निजकाये कदलीघातवत् युगपदुपस्थिते च निजकायविनाशे सति निजगुणानां विनाशो यथा न भवति तथा कायविनाशे प्रयत्नं विधत्ते कथमात्मघातपातकी भवति? तथा चोक्तम्— २०

"अन्तःक्रियाधिकरणं तपःफलं सकलदर्शिनः स्तुवते।
तस्माद्यावद्विभवं समाधिमरणे प्रयतितव्यम्॥" [रत्नक० ५।२]

अथ निःशल्यः खलु व्रती, शल्यानि तु मायामिथ्यानिदानलक्षणानि तेन मिथ्यादर्शनं शल्यमुच्यते; तेन कारणेन सम्यग्दृष्टिर्व्रती भवति 'तत्सम्यग्दर्शनं सदोषं निर्दोषं वा भवति' इति प्रश्ने कस्यचित् सदोषं सम्यग्दर्शनं भवतीति प्रतिपादनार्थं सूत्रमिदमाचक्षते विचक्षणाः— २५

शङ्काकाङ्क्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः॥ २३॥

शङ्कनं शङ्का, काङ्क्षणं काङ्क्षा, विचिकित्सनं विचिकित्सा, प्रशंसनं प्रशंसा, संस्तवनं संस्तवः। प्रशंसा च संस्तवश्च प्रशंसासंस्तवौ, अन्यदृष्टीनां मिथ्यादृष्टीनां प्रशंसासंस्तवौ

१–विस्पष्टः ता०। २–उद्धृतेयम्–स० सि० ७।२२।

अन्यदृष्टिप्रशंसासंस्तवौ । शङ्का च काङ्क्षा च विचिकित्सा च अन्यदृष्टिप्रशंसासंस्तवौ च शङ्का-काङ्क्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः । एते पञ्चातिचाराः पञ्च दोषाः सम्यग्दृष्टेः जीवस्य भवन्ति । तत्र शङ्का—यथा निर्ग्रन्थानां मुक्तिरुक्ता तथा सग्रन्थानामपि गृहस्थादीनां किं मुक्ति-र्भवति इति शङ्का । अथवा, भयप्रकृतिः शङ्का । इहपरलोकभोगकाङ्क्षणं काङ्क्षा । रत्नत्रयमण्डित-
५ शरीराणां जुगुप्सनं स्नानाद्यभावदोषोद्भावनं विचिकित्सा । मिथ्यादृष्टीनां मनसा ज्ञानचारित्र-गुणोद्भावनं प्रशंसा, विद्यमानानामविद्यमानानां मिथ्यादृष्टिगुणानां वचनेन प्रकटनं संस्तव उच्यते । ननु सम्यग्दर्शनमष्टाङ्गं प्रोक्तम्, अतिचारा अपि तस्याष्टौ भवन्ति कथमाचार्येण पञ्चतिचाराः प्रोक्ताः ? सत्यमुक्तं भवता; शीलव्रतेषु पञ्च पञ्चातिचारान् वक्तुमिच्छुराचार्यः । [अतः] अष्टस्वतिचारेषु सत्स्वपि सम्यग्दृष्टेः पञ्चातिचाराः प्रोक्ताः, इतरेषां त्रयाणा-मतिचाराणाम् अन्तर्भावितत्वात् अष्टातिचारा वेदितव्याः । कथमिति चेत् ? उच्यते—यः पुमान्
१० मिथ्यादृष्टीनां मनसा प्रशंसां करोति स तावन्मूढदृष्टिश्चतुर्थातिचारवान् भवत्येव । यस्तथाविधो मूढदृष्टिः स [1]प्रमादाशकनकारणोद्भवं रत्नत्रयमण्डितानां दोषं नोपगूहति तेषां स्थितीकरणञ्च न करोति वात्सल्यं तु दूरे तिष्ठतु शासनप्रभावनां च कथं कुरुते तेन अन्यदृष्टिप्रशंसासंस्तवयोर्मध्ये [2]अनुपबृंहणादयो दोषा अन्तर्गर्भिता भवन्तीति वेदितव्यम् । ते निःशङ्कितादीनामष्टानां गुणानां प्रतिपक्षभूता अष्ट दोषा ज्ञातव्याः ।

१५ अथ यथा पञ्चातिचाराः सम्यग्दृष्टेर्भवन्ति तथा [किं] व्रतशीलेष्वपि भवन्तीति प्रश्ने ओमित्युक्त्वा व्रतशीलातिचारसङ्ख्यानिरूपणार्थं सूत्रमिदमाहुराचार्याः—ओमिति कोऽर्थः ? ओमित्यङ्गीकारे ।

व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥ २४ ॥

व्रतानि च शीलानि च व्रतशीलानि तेषु व्रतशीलेषु । पञ्चसु अणुव्रतेषु दिग्विरति-
२० व्रतादिषु सप्तसु शीलेषु पञ्च पञ्चातिचाराः, द्वादशसु व्रतेषु यथाक्रममनुक्रमेण भवन्तीति संग्रहसूत्रमिदम् । ननु व्रतग्रहणेनैव द्वादशव्रतानि सिद्धानि शीलग्रहणमनर्थकम्; इत्याह—युक्तमुक्तं भवता; व्रतग्रहणेन द्वादशव्रतसिद्धौ यच्छीलग्रहणं तद्विशेषज्ञापनार्थम् । शीलं हि नाम व्रतपरिरक्षणम् । तेन दिग्विरतिव्रतादिभिः सप्तभिः व्रतैः पञ्चानामणुव्रतानां परिरक्षणं भवतीति शीलग्रहणे नास्ति दोषः । एते द्वादशव्रतानां प्रत्येकं पञ्च पञ्चातिचाराः
२५ मिलित्वा अगारिणः षष्टिरतिचारा भवन्ति अगार्यधिकारात् ।

तत्र तावदहिंसाव्रतस्य पञ्चातिचारानाह—

बन्धवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥२५॥

निजेष्टदेशगमनप्रतिबन्धकारणं बन्धनं बन्धः । यष्टितर्जनकवेत्रदण्डादिभिः प्राणिनां ताडनं हननं वधः,न तु अत्र प्राणव्यपरोपणं वध उच्यते तस्य पूर्वमेव निषिद्धत्वात् । [3]शब्दग्रह-
३० नासिकाङ्गुलिवराङ्गचक्षुरादीनामवयवानां विनाशनं छेद उच्यते । न्याय्याद्भारादधिक-

---

१ अशकनम् असामर्थ्यम् । २ अनुपगूहनादयो आ०, ब०, ज० । ३ कर्णम् ।

भारवाहनं राजदानादिलोभात् अतिभारारोपणम्। गोमहिषीबलीवर्दवाजिगजमहिषमानवशकुन्तादीनां क्षुत्तृष्णादिपीडोत्पादनम् अन्नपाननिरोधः। बन्धश्च वधश्च छेदश्च अतिभारारोपणञ्च अन्नपाननिरोधश्च बन्धवधछेदातिभारारोपणान्नपाननिरोधाः। एते पञ्चातिचारा अहिंसाणुव्रतस्य भवन्ति।

अथेदानीं सत्याणुव्रतस्य पञ्चातिचारा उच्यन्ते— ५

मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ।२६।

इन्द्रपदं तीर्थकरगर्भावतारजन्माभिषेकसाम्राज्यचक्रवर्तिपदनिःक्रमणकल्याणमहामण्डलेश्वरादिराज्यादिकं सर्वार्थसिद्धिपर्यन्तमहमिन्द्रं पदं सर्वं सांसारिकं विशिष्टमविशिष्टं सुखमभ्युदयमित्युच्यते। केवलज्ञानकल्याणं निर्वाणकल्याणमनन्तचतुष्टयं परमनिर्वाणपदं च निःश्रेयसमुच्यते। [1]तयोरभ्युदयनिःश्रेयसयोर्निमित्तं या क्रिया सत्यरूपा वर्तते तस्याः क्रियायाः मुग्धलोकस्य १० अन्यथाकथनमन्यथाप्रवर्तनं धनादिनिमित्तं परवञ्चनञ्च मिथ्योपदेश उच्यते। स्त्रीपुंसाभ्यां रहसि एकान्ते यः क्रियाविशेषोऽनुष्ठित कृत उक्तो वा स क्रियाविशेषो गुप्तवृत्त्या गृहीत्वा अन्येषां प्रकाश्यते तद् रहोऽभ्याख्यानमुच्यते। केनचित्पुरुषेण अकथितम् अनुक्तं यत् किञ्चित् कार्यं द्वेषवशात् परपीडनार्थम् एवमनेनोक्तमेवमनेन कृतम् इति परवञ्चनार्थं यल्लिख्यते राजादौ दर्श्यते सा कूटलेखक्रिया, पैशुन्यमित्यर्थः। केनचित् पुरुषेण निजमन्दिरे हिरण्यादिकं १५ द्रव्यं न्यासीकृतं निक्षिप्तमित्यर्थः, तस्य द्रव्यस्य ग्रहणकाले सङ्ख्या विस्मृता विस्मरणप्रत्ययादल्पं द्रव्यं गृह्णाति, न्यासवान् पुमान् अज्ञावचनं ददाति–देवदत्त, यावन्मात्रं द्रव्यं ते वर्तते तावन्मात्रं त्वं गृहाण किमत्र प्रष्टव्यमिति, जानन्नपि परिपूर्णं तस्य न ददाति न्यासापहार उच्यते। कार्यकरणमङ्गविकारं भ्रूक्षेपादिकं परेषां दृष्ट्वा पराकूतं पराभिप्रायमुपलभ्य ज्ञात्वा असूयादिकारणेन तस्य पराकूतस्य पराभिप्रायस्य अन्येषामग्रे आविष्करणं प्रकटनं यत् क्रियते २० स साकारमन्त्रभेद इत्युच्यते। मिथ्योपदेशश्च रहोभ्याख्यानञ्च कूटलेखक्रिया च न्यासापहारश्च साकारमन्त्रभेदश्च मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियासाकारमन्त्रभेदाः। एते पञ्चातिचाराः सत्याणुव्रतस्य भवन्ति।

अथाचौर्याणुव्रतस्य पञ्चातिचारा उच्यन्ते—

स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ २७ ॥ २५

कश्चित्पुमान् चौरीं करोति, अन्यस्तु कश्चित्तं चोरयन्तं स्वयं प्रेरयति मनसा वाचा कायेन, अन्येन वा केनचित्पुंसा तं चोरयन्तं प्रेरयति मनसा वाचा कायेन, स्वयमन्येन वा प्रेर्यमाणं चौरीं कुर्वन्तम् अनुमन्यते मनसा वाचा कायेन, एवंविधाः सर्वेऽपि प्रकाराः स्तेनप्रयोगशब्देन लभ्यन्ते। चौरेण चोराभ्यां चौरैर्वा यद्वस्तु चोरयित्वा आनीतं तद्वस्तु[2] मूल्यादिना गृह्णाति तत् ३०

---

१ तयोऽभ्यु- आ०, ब०, ज०। २ तद्वस्तु यत् मू- आ०, ब०, ज०।

तदाहृतादानम्। बहुमूल्यानि वस्तूनि अल्पमूल्येन नैव गृहीतव्यानि, अल्पमूल्यानि वस्तूनि बहुमूल्येन नैव दातव्यानि। राज्ञ [1]आज्ञाधिकरणं यदविरुद्धं कर्म तद् राज्यमुच्यते। उचित-मूल्यादनुचितंदानम् अनुचितं ग्रहणञ्च अतिक्रम उच्यते। विरुद्धराज्ये अतिक्रमः विरुद्ध-राज्यातिक्रमः। यस्मात्कारणात् राज्ञा घोषणा अन्यथा दापिता दानमादानं च अन्यथा करोति स

५ विरुद्धराज्यातिक्रमः। अथवा, राजघोषणां विनापि यद्वणिजो व्यवहरन्ति तं व्यवहारं यदि राजा तथैव मन्यते तदा तु विरुद्धराज्यातिक्रमो न भवति। प्रस्थः चतुःसेरमानम्, तत्काष्ठादिना घटितं मानमुच्यते, उन्मानं तु तुलामानम्, मानं चोन्मानञ्च मानोन्मानम्, एताभ्यां न्यूनाभ्यां ददाति अधिकाभ्यां गृह्णाति हीनाधिकमानोन्मानमुच्यते। ताम्रेण घटिता रूप्येण च सुवर्णेन च घटिता ताम्ररूप्याभ्यां च घटिता ये [3]द्रम्माः तत् हिरण्यमुच्यते, तत्सदृशाः केनचित् लोक-

१० वञ्चनार्थं घटिता [3]द्रम्माः प्रतिरूपका उच्यन्ते, तैर्व्यवहारः क्रयविक्रयः प्रतिरूपकव्यवहारः कथ्यते। स्तेनप्रयोगश्च तदाहृतादानं च-तेनानीतग्रहणम्-विरुद्धराज्यातिक्रमश्च हीनाधिक-मानोन्मानञ्च प्रतिरूपकव्यवहारश्च स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमा-नोन्मानप्रतिरूपकव्यवहाराः। एते पञ्चातिचारा अचौर्याणुव्रतस्य भवन्ति।

अथेदानीं ब्रह्मचर्यस्य पञ्चातिचारानाह—

परविवाहकरणेत्वरिकापरिगृहीताऽपरिगृहीतागमनानङ्गक्रीडा-

१५　　　　　　　　　**कामतीव्राभिनिवेशाः ॥ २८ ॥**

कन्यादानं विवाह उच्यते, परस्य स्वपुत्रादिकादन्यस्य विवाहः परविवाहः, परविवाहस्य करणं परविवाहकरणम्। एति गच्छति परपुरुषानित्येवं शीला इत्वरी, कुत्सिता इत्वरी इत्वरिका। एकपुरुषभर्तृका या स्त्री भवति सधवा विधवा वा सा परिगृहीता सम्बद्धा

२० कथ्यते। या [4]वाराङ्गनात्वेन पुंश्चलीभावेन वा परपुरुषानुभवनशीला निःस्वामिका सा अपरि-गृहीता असम्बद्धा कथ्यते। परिगृहीता च अपरिगृहीता च परिगृहीताऽपरिगृहीते, इत्वरिके च ते परिगृहीतापरिगृहीते इत्वरिकापरिगृहीताऽपरिगृहीते, इत्वरिकापरिगृहीताऽपरिगृहीतयोगमने प्रवृत्ती द्वे इत्वरिकापरिगृहीताऽपरिगृहीतागमने। गमने इति कोऽर्थः? जघनस्तनवदनादि-निरीक्षणं [5] सम्भाषणं पाणिभ्रूचक्षुरन्तादिसञ्ज्ञाविधानमित्येवमादिकं निखिलं रागित्वेन

२५ दुश्चेष्टितं गमनमित्युच्यते। अङ्गं स्मरमन्दिरं स्मरलता च ताभ्यामन्यत्र करकक्षकुचादि-प्रदेशेषु क्रीडनमनङ्गक्रीडा कथ्यते। न[6] अङ्गाभ्यां क्रीडा अनङ्गक्रीडेति विग्रहात्। कामस्य कन्दर्पस्य तीव्रः प्रवृद्धः अभिनिवेशः अनुपरतप्रवृत्तिपरिणामः कामतीव्राभिनिवेशः, यस्मिन् काले स्त्रियां प्रवृत्तिरुक्ता तस्मिन्नपि काले कामतीव्राभिनिवेश इत्यर्थः। दीक्षिताऽतिबालातिर्य-ग्योन्यादिगमनमपि कामतीव्राभिनिवेश इत्यर्थः। परविवाहकरणञ्च इत्वरिकापरिगृहीताऽ-

---

१ राज्ञा आज्ञादिक- आ०, ब०, ज०। २ -चितादा- आ०, ब०, ज०। ३ द्रम्नाः आ०, ब०, ज०। ४ वराङ्गनात्वेन आ०, ब०, ज०। ५ -क्षणसंभाषणपा- ता०। ६ अनङ्गा- आ०, ब०, ज०।

परिगृहीतागमने च द्वे अनङ्गक्रीडा च कामतीव्राभिनिवेशश्च परविवाहकरणेत्वरिकापरिगृहीताऽपरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः । स्वदारसन्तोष-परदारनिवृत्त्यणुव्रतस्य एते पञ्चातिचाराः भवन्ति ।

अथेदानीं परिग्रहपरिमाणाणुव्रतस्यातिचारान् वदन्ति—

क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥२९॥ ५

क्षेत्रं धान्योत्पत्तिस्थानम् । वास्तु च गृहम् । हिरण्यञ्च रूप्यादिद्रम्म[1]व्यवहारप्रवर्तनम् । सुवर्णं कनकम् । धनञ्च गोमहिषीगजवाजिबडवोष्ट्राजादिकम् । धान्यञ्च व्रीह्याद्यष्टादशभेदसुशस्यम्, तदुक्तम्—

"गोधूमशालियवसर्षपमाषमुद्गाः श्यामाककङ्गुतिलकोद्रवराजमाषाः ।
कीनाशनालमठवैणवमाढकी च सिंबाकुलत्थचणकादिषु बीजधान्यम् ॥१॥" १०
[ ]

कीनाशो लाङ्गलित्रिपुट इति यावत् । नालं मकुष्टः । [2]मठवैणवं ज्वारी । आढकी तुवरी ।

"तुवर्यश्चणका माषा मुद्गा गोधूमशालयः ।
यवाश्च मिश्रिताः सप्त धान्यमाहुर्मनीषिणः ॥" [ ]

तिलशालियवास्त्रिधान्यम् । दासी च चेटी, दासश्च चेटः । कुप्यं च क्षौमकौशेय- १५ कर्पासचन्दनादिकम् । तत्र क्षौमं शुभ्रपटोलकम् । कौशेयं टसरिचीरम् । क्षेत्रञ्च वास्तु च क्षेत्रवास्तु, हिरण्यञ्च सुवर्णञ्च हिरण्यसुवर्णम्, धनञ्च धान्यञ्च धनधान्यम्, दासी च दासश्च दासीदासम्, क्षेत्रवास्तु च हिरण्यसुवर्णं च धनधान्यं च दासीदासं च कुप्यञ्च क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यानि, चत्वारि द्वे द्वे मिलित्वा पञ्चमं केवलं ज्ञातव्यम्, तेषां प्रमाणानि तेषामतिक्रमा अतिरेका अतीव लोभवशात् प्रमाणातिलङ्घनानि । २० एते पञ्चातिचाराः परिग्रहपरिमाणव्रतस्य वेदितव्याः । पञ्चाणुव्रतानां व्यतिलङ्घनानि कथितानि ।

अथेदानीं शीलसप्तकव्यतिक्रमा उच्यन्ते[3] । तथाहि—

ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि ॥ ३० ॥

व्यतिक्रमो [4]विशेषेणातिलङ्घनं व्यतिपात इति यावत् । व्यतिक्रमशब्दः तिर्यगन्तेषु २५ त्रिषु शब्देषु प्रत्येकं प्रयुज्यते । तेनायमर्थः–ऊर्ध्वव्यतिक्रमः अधोव्यतिक्रमः तिर्यग्व्यतिक्रमः । शैलाद्यारोहणमूर्ध्वव्यतिक्रमः । अवटाद्यवतरणमधोव्यतिक्रमः । सुरङ्गादिप्रवेशस्तिर्यग्व्यतिक्रमः । व्यासङ्गमोहप्रमादादिवशेन लोभावेशाद् योजनादिपरिच्छिन्नदिक्सङ्ख्यायाः अधिकाकाङ्क्षणं क्षेत्रवृद्धिरुच्यते । यथा "मन्याखेटावस्थितेन केनचित् श्रावकेण[6] क्षेत्रपरिमाणं कृतं यद् 'धारापुरीलङ्घनं मया न कर्त्तव्यम्' इति, पश्चाद् उज्जयिन्याम् अन्येन ३०

१ –द्रम्म– ता० । २ मठः वै– ता० । ३ –न्ते ऊ– आ०, ब०, ज० । ४ –मोऽति– ता० । ५ –मान्याक्षेत्राव– आ०, ब०, ज० । ६ –केन परि– आ०, ब०, ज० ।

भाण्डेन महान् लाभो भवतीति तत्र गमनाकाङ्क्षा [1]गमनं वा क्षेत्रवृद्धिः। दक्षिणापथागतस्य[2] धाराया [3]उज्जयिनी पञ्चविंशतिगव्यूतिभिः किञ्चिन्न्यूनाधिकाभिः परतो वर्तते। स्मृतेरन्तरं विच्छित्तिः स्मृत्यन्तरं तस्य आधानं विधानं स्मृत्यन्तराधानम् अननुस्मरणं योजनादिकृतावधेर्विस्मरणमित्यर्थः। ऊर्ध्वञ्च अधश्च तिर्यक्च ऊर्ध्वाधस्तिर्यञ्चस्तेषां व्यतिक्रमास्त्रयोऽतिचाराः, क्षेत्रवृद्धिश्च स्मृत्यन्तराधानञ्च ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि। एते पञ्चातिचाराः दिग्विरतेर्भवन्ति।

अथ देशविरत्यतिचारान् प्रथयति—

आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥ ३१ ॥

आत्मसङ्कल्पितदेशस्थितोऽपि प्रतिषिद्धदेशस्थितानि वस्तूनि कार्यवशात् तद्वस्तुस्वामिनं कथयित्वा निजदेशमध्ये आनाय्य क्रयविक्रयादिकं यत्करोति तदानयनमुच्यते। एवं विधेहीति नियोगः प्रेष्यप्रयोगः। कोऽर्थः? प्रतिषिद्धदेशे प्रेष्यप्रयोगेणैव अभिप्रेतव्यापारसाधनम्। निषिद्धदेशस्थितान् कर्मकरादीन् पुरुषान् प्रत्युद्दिश्य अभ्युत्कासिकादिकरणम्, कण्ठमध्ये कुत्सितशब्दः कासनं कासः अभ्युत्कासिका कथ्यते, तं शब्दं श्रुत्वा ते कर्मकरादयो व्यापारं शीघ्रं साधयन्ति इति शब्दानुपातः। स्वशरीरदर्शनं रूपानुपातः। पुद्गलस्य लोष्टादेः क्षेपो निपातः पुद्गलक्षेपः। आनयनञ्च प्रेष्यप्रयोगश्च शब्दरूपानुपातौ च पुद्गलक्षेपश्च आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः। एते पञ्चातिचाराः देशविरतेर्भवन्ति।

अथानर्थदण्डविरतेरतिचारानाह—

कन्दर्पकौत्कुच्यमौखर्य्याऽसमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ॥३२॥

रागाधिक्यात् वर्करसंवलिताऽशिष्टवचनप्रयोगः कन्दर्प उच्यते। प्रहासवागशिष्टवाक्प्रयोगौ पूर्वोक्तौ द्वावपि तृतीयेन दुष्टेन कायकर्मणा संयुक्तौ [4]कौत्कुच्यमुच्यते। धृष्टत्वप्रायो बहुप्रलापो यत्किञ्चिदनर्थकं वचनं यद्वा तद्वा तद्वचनं मौखर्यमुच्यते। असमीक्ष्य अविचार्य अधिकस्य करणम् [5]असमीक्ष्याधिकरणम्। तत्त्रिधा भवति—मनोगतं वाग्गतं कायगतञ्चेति। तत्र मनोगतं मिथ्यादृष्टीनामनर्थकं काव्यादिचिन्तनं मनोगतम्। निष्प्रयो[6]जनकथा परपीडावचनं यत्किञ्चिद्वक्तृत्वादिकं वाग्गतम्। निःप्रयोजनं सचित्ताचित्तदलफलपुष्पादिछेदनादिकम् अग्निविषक्षारादिप्रदानादिकं कायगतम्। एवं त्रिविधम् असमीक्षा-(क्ष्या)धिकरणम्। न विद्यते अर्थः प्रयोजनं ययोस्तौ अनर्थकौ, अनर्थकयोर्भावः कर्म वा आनर्थक्यम्, उपभोगपरिभोगयोरानर्थक्यम् उपभोगपरिभोगानर्थक्यम्, अधिकमूल्यं

१ गमनं च क्षे- आ०, ब०, ज०। २ -गतधारायाम् ता०। ३ ऊर्जयि- ता०। ४ कौत्कुच्य उ- आ०, ब०, द०, ज०। ५ -क्षाधि- आ०, ब०, द०, ज०। ६ -जनकथनं प- आ०, ब०, द०, ज०।

दत्वा उपभोगपरिभोगग्रहणमित्यर्थः। कन्दर्पश्च कौत्कुच्यञ्च मौखर्यञ्च असमीक्ष्याधिकरणञ्च उपभोगपरिभोगानर्थक्यञ्च कन्दर्पकौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि। एते पञ्चातिचारा अनर्थदण्डविरमणस्य भवन्ति।

अथ सामायिकातिचारानाह—

योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि ॥ ३३ ॥ ५

कायवाङ्मनसां यत्कर्म स योग उच्यते, योगस्य दुष्टानि प्रणिधानानि प्रवृत्तयः योगदुःप्रणिधानानि, योगस्य अन्यथा प्रणिधानानि प्रवृत्तयः योगदुःप्रणिधानानि त्रयोऽतिचाराः। सामायिकावसरे क्रोधमानमायालोभसहिताः कायवाङ्मनसां प्रवृत्तयः दुष्टप्रवृत्तयः, शरीरावयवानामनिभृतत्वं कायस्यान्यथाप्रवृत्तिः संस्काररहितार्थागमकवर्णप्रयोगो वचोऽन्यथाप्रवृत्तिः, उदासीनत्वं मनोऽन्यथाप्रवृत्तिः। एवं द्विप्रकारमपि कायदुःप्रणिधानं वाग्दुःप्रणि- १० धानं मनोदुःप्रणिधानञ्चेति त्रयोऽतिचारा भवन्ति। चतुर्थोऽतिचार अनादरः अनुत्साहः अनुद्यम इति यावत्। पञ्चमोऽतिचारः स्मृत्यनुपस्थानं स्मृतेरनुपस्थानं विस्मृतिः—न ज्ञायते किं मया पठितं किं वा न पठितम्, एकाग्रतारहितत्वमित्यर्थः। योगदुःप्रणिधानानि च अनादरश्च स्मृत्यनुपस्थानञ्च योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि। एते पञ्चातिचाराः सामायिकस्य वेदितव्याः। १५

अथ प्रोषधोपवासातिचारानाह—

अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ॥ ३४ ॥

अत्र प्राणिनो विद्यन्ते न वा विद्यन्ते इति बुद्ध्या निजचक्षुषा पुनर्निरीक्षणं प्रत्यवेक्षितमुच्यते, कोमलोपकरणेन यत्प्रतिलेखनं क्रियते तत्प्रमार्जितमुच्यते, न विद्यते प्रत्यवेक्षितं २० येषु तानि अप्रत्यवेक्षितानि, न विद्यते प्रमार्जितं येषु तानि अप्रमार्जितानि, अप्रत्यवेक्षितानि च तानि अप्रमार्जितानि अप्रत्यवेक्षिताप्रमार्जितानि। अथवा, प्रत्यवेक्षन्ते स्म प्रत्यवेक्षितानि, न प्रत्यवेक्षितानि अप्रत्यवेक्षितानि, प्रमार्जन्ते स्म प्रमार्जितानि, न प्रमार्जितानि अप्रमार्जितानि, अप्रत्यवेक्षितानि च तानि अप्रमार्जितानि अप्रत्यवेक्षिताप्रमार्जितानि। मूत्रपुरीषादीनामुत्सर्जनं त्यजनम् उत्सर्गः। अर्हदाचार्यपूजोपकरणस्य गन्धपुष्पधूपादेरात्मपरिधानोपधानादि- २५ वस्तुनश्च ग्रहणमादानमुच्यते। संस्तरस्य प्रच्छदपटादेः[1] उपक्रमणमारोहणं संस्तरोपक्रमणं प्रस्तरणस्वीकरणमित्यर्थः। उत्सर्गश्च आदानञ्च संस्तरोपक्रमणञ्च उत्सर्गादानसंस्तरोपक्रमणानि। अप्रत्यवेक्षिताप्रमार्जितानि च तानि उत्सर्गादानसंस्तरोपक्रमणानि अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानि। कोऽर्थः ? अप्रत्यवेक्षिताप्रमार्जितभूमौ मूत्रपुरीषादेरुत्सर्गः, अप्रत्यवेक्षिताप्रमार्जितस्य पूजाद्युपकरणस्य आदानम्, अप्रत्यवेक्षिताऽप्रमार्जितस्य संस्तरस्य ३०

---

१ प्रच्छपुटादेः द०, आ०, ब०, ज०।

उपक्रमणम्। एते त्रयोऽतिचाराः। क्षुधातृषाद्यभ्यर्दितस्य पीडितस्य आवश्यकेष्वनुत्साहः अनादर उच्यते। स्मृतेरनुपस्थापनम् विस्मरणं स्मृत्यनुपस्थानम्। ततः अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानि च अनादरश्च स्मृत्यनुपस्थानञ्च अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि। एते पञ्चातिचाराः प्रोषधोपवासस्य भवन्ति।

५ अथ उपभोगपरिभोगातिचारानाह—

सचित्तसम्बन्धसन्मिश्राभिषवदुःपक्काहाराः॥ ३५॥

चेतनं चित्तम्, चित्तेन सह वर्तते सचित्तः, तेन सचित्तेन उपसंसृष्ट उपश्लिष्टः शक्यभेदकरणः संसर्गमात्रसहितः स्वयं शुद्धोऽपि सचित्तसङ्घट्टमात्रेण दूषित आहारः सम्बन्धाहारः। सचित्तद्रव्यतिकीर्णः सम्मिलितः सचित्तद्रव्यसूक्ष्मप्राण्यतिमिश्रः अशक्यभेदकरण आहारः १० सन्मिश्राहारः। सङ्ग-अतिसङ्गौ सम्बन्धसन्मिश्रयोर्भेदः। कथमस्य शीलवतः सचित्तादिषु प्रवृत्तिरिति चेत्? उच्यते– मोहेन प्रमादेन वा बुभुक्षापिपासातुरः पुमान् अन्नपानलेपनाच्छादनादिषु सचित्तादिविशिष्टेषु द्रव्येषु वर्तते। रात्रिचतुःप्रहरैः क्लिन्न ओदनो द्रव उच्यते. इन्द्रियबलवर्द्धनो मापविकारादिर्वृष्यः कथ्यते– वृषवत्कामी भवति येनाहारेण स वृष्यः, द्रवो वृष्यश्च उभयोऽभिपवः कथ्यते, अभिषवस्याहारः अभिषवाहारः। असम्यक् पक्को दुःपक्कः १५ अस्विन्नः, अतिक्लेदनेन वा दुष्टः पक्को दग्धपक्कः दुःपक्कः, तस्य आहारः दुःपक्काहारः। वृष्यदुःपक्कयोः सेवने सति इन्द्रियमदवृद्धिः सचित्तोपयोगः वातादिप्रकोपोदरपीडादिप्रतीकारे अग्न्यादिप्रज्वालने[2] महानसंयमः स्यादिति तत्परिहार एव श्रेयान्। आहारशब्दः प्रत्येकं प्रयुज्यते। तेन सचित्ताहारश्च सम्बन्धाहारश्च सन्मिश्राहारश्च अभिषवाहारश्च दुःपक्काहारश्च सचित्तसम्बन्धसन्मिश्राभिषवदुःपक्काहाराः। एते पञ्चातिचारा उपभोगपरिभोगपरिसङ्ख्यानस्य भोगो- २० पभोगसङ्ख्यापरनाम्नः[3] शीलस्य भवन्ति।

अथातिथिसंविभागस्यातिचारानाह—

सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः॥ ३६॥

चित्तेन सह वर्तते सचित्तम्, सचित्ते कदलीदलोल्लूकपर्णपद्मपत्रादौ निक्षेपः सचित्तनिक्षेपः। सचित्तेन अपिधानम् आवरणं सचित्तापिधानम्। "अर्थवशाद्विभक्तिपरिणामः" २५ [ ] इति परिभाषणात् सचित्तशब्दात् सप्तमीतृतीये निक्षेपापिधानविग्रहे[4] भवतः। अपरदातुर्देयस्यार्पणं मम कार्यं वर्तते त्वं देहीति परव्यपदेशः, परस्य व्यपदेशः कथनं परव्यपदेशः। अथवा परेऽत्र दातारो वर्तन्ते नाहमत्र दायको वर्ते इति व्यपदेशः परव्यपदेशः। अथवा परस्येदं [5]भक्त्याद्यासंदेयं न मया इदमीदृशं वा देयमिति परव्यपदेशः। ननु परव्यपदेशः

---

१ कथमवश्यं शी– आ०, ब०, द०, ज०। २ –नेन म– आ०, ब०, द०, ज०।
३ –ख्यानना– आ०, ब०, द०, ज०। ४ –हेण भ– आ०, ब०, द०, ज०। ५ –भक्त्याद्याभासं ता०।

कथमतिचार इति चेत् ? उच्यते– धनादिलाभाकाङ्क्षया अतिथिवेलायामपि द्रव्याद्युपार्जनं परिहर्तुमशक्नुवन् परदातृहस्तेन योग्योऽपि सन् दानं दापयतीति महान् अतीचारः । तदुक्तम्—

"आत्मवित्तपरित्यागात् परैर्धर्मविधापने ।
अवश्यमेव प्राप्नोति परभोगाय तत्फलम् ॥ १ ॥
भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः । ५
विभवो दानशक्तिश्च स्वयं धर्मकृतेः[1] फलम् ॥ २ ॥" [यश० उ० पृ० ४०५]

यद्दानं [2]प्रददन्नपि आदरं न कुरुते, अपरदातृगुणान् न क्षमते वा तन्मात्सर्यमुच्यते । अकाले भोजनम् अनगाराऽयोग्यकाले दानं क्षुधितेऽनगारे विमर्दकरणञ्च कालातिक्रमः । सचित्तनिक्षेपश्च सचित्तापिधानञ्च परव्यपदेशश्च मात्सर्यञ्च कालातिक्रमश्च सचित्तनिक्षेपापिधानपरव्यपदेश-मात्सर्यकालातिक्रमाः । एते पञ्चातिचाराः अतिथिसंविभागशीलस्य भवन्ति । १०

अथ सल्लेखनातिचारानाह—

जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि ॥ ३७ ॥

जीवितञ्च मरणञ्च जीवितमरणं तस्य आशंसने आशंसे जीवितमरणाशंसे । जीवितस्य मरणस्य चाभिलाषौ द्वावतीचारौ । कथम् ? निश्चितमध्रुवं हेयं चेदं तदवस्थितावादरो जीविताशंसा । रुगादिभीतेर्जीवितासङ्क्लेशेन मरणे मनोरथो मरणाशंसा । चिरन्तनमित्रेण १५ सह क्रीडनानुस्मरणं कथमनेन ममाभीष्टेन मित्रेण मया सह पांशुक्रीडनादिकं कृतम्, कथमनेन ममाभीष्टेन व्यसनसहायत्वमाचरितम्, कथमनेन ममाभीष्टेन मदुत्सवे सम्भ्रमो विहितः इत्याद्यनुस्मरणं मित्रानुरागः । एवं मया शयनवसनवस्त्रादिकं भुक्तम्, एवं मया हंसतूलोपरि दुकूलाच्छादितायां शय्यायां वरवनितया आलिङ्गितेन सुखं शयितम्, [3]एवंपुरुषरतवनितया सह क्रीडितञ्चेत्यादीनि सुखानि मम सम्पन्नानीत्यनुभूतप्रीतिप्रकारस्मृतिसमन्वाहारः २० सुखानुबन्धः–पूर्वभुक्तसुखानुस्मरणमित्यर्थः । [4]भोगाकाङ्क्षणेन निश्चितं दीयते मनो यस्मिन् येन वा तन्निदानम् "**करणाधिकरणतोश्च युट्**" [ ] इति साधुः । जीवितमरणाशंसे च मित्रानुरागश्च सुखानुबन्धश्च निदानञ्च जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि । एते पञ्च व्यतिपाताः सल्लेखनाया भवन्ति ।

अथाह कश्चित्–तीर्थकरत्वहेतुकर्मास्रवनिरूपणे शक्तितस्त्यागतपसीति त्यागशब्द- २५ वाच्यं दानमुक्तम्, शीलसप्तकनिरूपणे च अतिथिसंविभागशब्दवाच्यं पुनर्दानमुक्तम्, तस्य दानस्य लक्षणमस्माभिर्न ज्ञातमस्ति अतस्तल्लक्षणमुच्यतामिति प्रश्ने सूत्रमिदमाहुः—

अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥ ३८ ॥

---

१ –कृते फ– आ०, ब०, द०, ज० । २ प्रददपि ता० । ३–पुरुषं रत– आ०, द०, ज० । पुरुषं तरवनि– द० । ४ भोगका– आ०, ब०, द०, ज० ।

आत्मनः परस्य च उपकारः अनुग्रह उच्यते, सोऽर्थः प्रयोजनं यस्मिन् दानकर्मणि तत् अनुग्रहार्थम्। स्वोपकाराय [1]विशिष्टपुण्यसञ्चयलक्षणाय परोपकाराय सम्यग्दर्शनज्ञान-चारित्रादिवृद्धये स्वस्य धनस्य अतिसर्गोऽतिसर्जनं विश्राणनं प्रदानं दानमुच्यते। कथं सम्यग्दर्शनादिवृद्धिराहारादिना पात्रस्य भवतीति चेत्? सरसाहारेण यतेर्वपुषि शक्तिर्भवति,
५ आरोग्यादिकञ्च स्यात्, तेन [2]तु ज्ञानाभ्यासोपवासतीर्थयात्राधर्मोपदेशादिकं सुखेन प्रवर्तते। तथा पुस्तकपरस्यजायुसंयमशौचोपकरणादिदाने परोपकारः स्यात्। तच्च दानं योग्येन दात्रा स्वहस्तेन विज्ञानवता दातव्यम्। तदुक्तम्—

"धर्मेषु स्वामिसेवायां सुतोत्पत्तौ च कः सुधीः।
अन्यत्र कार्यदैवाभ्यां प्रतिहस्तं समादिशेत् ॥१॥" [यश०उ० पृ० ४०५]

१० विज्ञानवतो लक्षणम्। तदुक्तम्—

"विवर्णं विरसं विद्धमसात्म्यं प्रसृतञ्च यत्।
मुनिभ्योऽन्नं न तद्देयं यच्च भुक्तं गदावहम्॥ २ ॥
[3]उच्छिष्टं नीचलोकार्हमन्योद्दिष्टं [4]विगर्हितम्।
न देयं दुर्जनस्पृष्टं देवयक्षादिकल्पितम्॥ ३ ॥
१५ ग्रामान्तरात्समानीतं मन्त्रानीतमुपायनम्।
न देयमापणक्रीतं विरुद्धं वाऽयथर्तुकम्॥ ४ ॥
दधिसर्पि[ः]पयोभक्ष्यप्रायं पर्युषितं मतम्।
गन्धवर्णरसभ्रष्टमन्यत्सर्वञ्च निन्दितम्॥ ५ ॥" [यश०उ० पृ० ४०४]

अथैवं दानलक्षणमुक्तम्, तद्दानं किमविशिष्टफलमेव भवति उतस्विदस्ति कश्चिद्विशेष
२० इति प्रश्ने विशिष्टाविशिष्टफलनिरूपणार्थं सूत्रमिदमुच्यते—

विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥ ३९ ॥

सुपात्रप्रतिग्रहणं समुन्नतासनस्थापनं तच्चरणप्रक्षालनं तत्पादपूजनं तन्नमस्कारकरणं निजमनःशुद्धिविधानं वचननैर्मल्यं कायशुद्धिर्भक्तपानशुद्धिश्चेति नवविधपुण्योपार्जनं विधि-रुच्यते। तस्य विधेर्विशेष आदरोऽनादरश्च, आदरेण विशिष्टं पुण्यं भवति, अनादरेण
२५ अविशिष्टमिति। द्रव्यं [5]मकारत्रयरहितं तण्डुलगोधूमविकृतिघृतादिकं शुद्धं चर्मपात्रास्पृष्टम्, तस्य विशेषः—गृहीतुस्तपःस्वाध्यायशुद्धपरिणामादिवृद्धिहेतुः विशिष्टपुण्यकारणम्, अन्यथा

१ विशिष्टगुणस- आ०, ब०, ज०, द०। २ तेन ज्ञा- आ०, ब०, ज०, द०। ३ उत्सृष्टं आ०, ब०, ज०, द०। ४ -मनादिष्टं- आ०, ब०, ज०, द०। ५ मद्यमांसमधुत्रयरहितम्।

अन्यादृशकारणम्। दाता द्विजनृपवणिग्वर्णवर्णनीयः, तस्य विशेषः—पात्रेऽनसूया त्यागे विषादरहितः दित्सत्-ददत्-दत्तवत्प्रीतियोगः शुभपरिणामः दृष्टफलानपेक्षकः। तथा चोक्तम्—

"श्रद्धा तुष्टिर्भक्तिर्विज्ञानमलुब्धता क्षमा शक्तिः।
यत्रैते सप्तगुणास्तं दातारं प्रशंसन्ति ॥ १ ॥" [यश०उ० पृ० ४०४]

पात्रम्—उत्तममध्यमजघन्यभेदम्। तत्रोत्तमं पात्रं महाव्रतविराजितम्। मध्यमं पात्रं श्रावकव्रतपवित्रम्। जघन्यं पात्रं सम्यक्त्वेन निर्मलीकृतम्। त्रिविधमपि पात्रमुत्तममिति केचित्। तस्य विशेषः सम्यग्दर्शनादिशुद्ध्यशुद्धी। विधिश्च द्रव्यञ्च दाता च पात्रञ्च विधिद्रव्यदातृपात्राणि तेषां विशेषः विधिद्रव्यदातृपात्रविशेषः तस्माद्विधिद्रव्यदातृपात्रविशेषात्। तद्विशेषः तस्य दानस्य पुण्यफलविशेषस्तद्विशेषः। तथा चोक्तम्— ५

"क्षितिगतमिव वटबीजं पात्रगतं दानमल्पमपि काले। १०
फलति च्छायाविभवं बहुफलमिष्टं शरीरभृताम् ॥" [रत्नक० ४।२६]

इति सिद्धिः।

[1]इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ सप्तमः पादः समाप्तः।

---

१ इति श्रुतसागरसूरिणा विरचितायां तत्त्वार्थटीकायां स– द०। इत्यनवद्यगद्यपद्यविद्याविनोदितप्रमोदपीयूषरसपानपावनमतिसभाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य विद्यानन्दिदेवस्य संच्छर्दितमिथ्यामतदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां सप्तमोऽध्यायः समाप्तः ॥७॥ आ०, ब०।

अष्टमोऽध्यायः

अथेदानीम् आस्रवपदार्थसूचनानन्तरं बन्धपदार्थं सूचयन्ति सूरयः। स तु बन्धः निजहेतुपूर्वको भवति, अत एवादौ बन्धहेतून् पञ्चप्रकारान् प्रतिपादयन्ति—

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः ॥ १ ॥

मिथ्यादर्शनं तावदुक्तमेव। कस्मिन् स्थाने उक्तम्? **"तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्"**
५ [त० सू० १।२] इत्यस्मिन् सूत्रे सम्यग्दर्शनसूचनेन तत्त्वार्थानामश्रद्धानलक्षणं सम्यग्दर्शनस्य प्रतिपक्षभूतं मिथ्यादर्शनं सूचितमेव ज्ञातव्यम्। तथा च **"इन्द्रियकषायाव्रतक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसङ्ख्याः पूर्वस्य भेदाः"** [त० सू० ६।५] इत्यस्मिन् सूत्रे पञ्चविंशतिक्रियानिरूपणावसरे मिथ्यादर्शनक्रियानिरूपणेन मिथ्यादर्शनं सूचितं भवति। **"हिंसाऽनृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम्"** [त० सू० ७।१] इत्यस्मिन् सूत्रे व्रतप्रति-
१० पक्षभूता अविरतिरपि सूचिता भवति। पुण्यकर्मस्वनादरः प्रमाद उच्यते। आज्ञाव्यापादनक्रिया अनाकाङ्क्षाक्रिया एते द्वे क्रिये पञ्चविंशतिक्रियासु यदा सूचिते तदा प्रमादोऽपि सूचितो भवति तयोः [1]प्रमादेऽन्तर्भावात्। **"इन्द्रियकषायाव्रतक्रियाः "पञ्चचतुःपञ्चपञ्चविंशतिसङ्ख्याः पूर्वस्य भेदाः"** [त० सू० ६।५] अस्मिन्नेव सूत्रे कषाया अपि अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः प्रोक्ता भवन्ति। **"कायवाङ्मनःकर्म-**
१५ **योगः"** [त० सू० ६।१] इत्यस्मिन् सूत्रे योगोऽपि निरूपित एव वेदितव्यः। तत्र मिथ्यादर्शनं द्विप्रकारं भवति नैसर्गिकपरोपदेशपूर्वकभेदात्[1]। तत्र नैसर्गिकं मिथ्यादर्शनं मिथ्यात्वकर्मोदयात् तत्त्वार्थानामश्रद्धानलक्षणं परोपदेशं[2] विनापि समाविर्भवति। अत्र मरीचिर्भरतपुत्रो दृष्टान्ततया वेदितव्यः। परोपदेशपूर्वकं मिथ्यादर्शनं चतुःप्रकारं ज्ञातव्यं क्रियावादि-अक्रियावादि-अज्ञानिक-वैनयिकभेदात्। एकान्त-विपरीत-संशय-विनय-अज्ञानभेदात् पञ्चविधश्च मिथ्यादर्शनं भवति।
२० तत्र इदमेव इत्थमेवेति धर्मिधर्मयोर्विषयेऽभिप्रायः पुमानेवेदं सर्वमिति नित्य एवानित्य एवेति वाऽभिनिवेश एकान्तमिथ्यादर्शनम्। १। सपरिग्रहो निष्परिग्रहः पुमान् वा स्त्री वा कवलाहारी केवली भवतीति विपरीतमिथ्यादर्शनं विपर्ययमिथ्यादर्शनापरनामकम्। तदुक्तम्—

[3]**"सेयंवरो य आसंवरो य बुद्धो य तह य अण्णो य।**
समभावभावियप्पा लहेइ मोक्खं ण संदेहो ॥"

१—प्रमादान्तर्भावात्— आ०, ज०, द०। १—पूर्वभेदात् आ०, ज०, द०। २—देशनं विना—आ०, ज०, द०। ३ श्वेताम्बरश्च आशाम्बरश्च बुद्धश्च तथा चान्यश्च। समभावभावितात्मा लभते मोक्षं न सन्देहः ॥

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः किं भवेन्नो वा भवेदित्यन्यतरपक्षस्यापरिग्रहः संशयमिथ्यादर्शनम्। ३। सर्वे देवाः [1]सर्वसमयाश्च समानतया द्रष्टव्या वन्दनीया एव न च निन्दनीया इत्येवं सर्वविनयप्रकाशकं वैनयिकमिथ्यादर्शनम्। ४। हितमहितं वा यत्र न परीक्ष्यते तदज्ञानिकमिथ्यादर्शनम् । ५। तदुत्तरभेदसूचिकेयं गाथा—

"[2]असिदिसदं किरियाणं अकिरियाणं तह होदि चुलसीदी।
असतट्ठिण्णाणीणं वेणयियाणं तु बत्तीसं॥" [गो० क० ८७६] ५

पृथिव्यप्तेजोवायुवनस्पतिकायिका जीवाः पञ्चप्रकाराः स्थावरा उच्यन्ते। द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रिया जीवास्त्रसाः कथ्यन्ते। [3]पञ्चस्थावराणां त्रसषष्ठानां हननादिकं यत् क्रियते तत् षट्प्रकारः प्राण्यसंयमः। स्पर्शनरसनघ्राणचक्षुःश्रोत्राणां पञ्चानामिन्द्रियाणां मनःषष्ठानामसंयमनमिन्द्रियासंयमः षट्प्रकारः। एवमविरतिर्द्वादशप्रकारा। पञ्चसु समितिषु तिसृषु गुप्तिषु विनयकायवाङ्मनईर्यापथव्युत्सर्गभैक्ष्यशयनासनशुद्धिलक्षणास्वष्टसु शुद्धिषु दशलक्षणधर्मेषु चानुद्यमः प्रमादोऽनेकप्रकारः।

"[4]विकहा तहा कसाया इंदिय णिद्दा तहेव पणयो य।
चदु चदु पणमेगेग्गे होंति पमादा य पण्णरस" [गो० जी० गा० ३४]

इति गाथाकथितक्रमेण प्रमादः पञ्चदशप्रकारो वा[5]। षोडशकषाया नवनोकषायाश्चेति १५ पञ्चविंशतिकषायाः। सत्यासत्योभयानुभयलक्षणो मनोयोगश्चतुःप्रकारः, सत्यासत्योभयानुभयवाग्लक्षणो वाग्योगोऽपि चतुःप्रकारः, औदारिक-औदारिकमिश्रवैक्रियिकवैक्रियिकमिश्र-आहारक-आहारकमिश्रकार्मणकाययोगलक्षणः काययोगः सप्तप्रकारः। आहारककाययोगद्वयस्य प्रमत्तसंयत एव सद्भावात् योगस्त्रयोदशप्रकारः[6]। मिथ्यादृष्टेः पञ्चाप्यास्रवा बन्धहेतवो भवन्ति। सासादनसम्यग्दृष्टेः सम्यग्मिथ्यादृष्टेरसंयतसम्यग्दृष्टेश्चाविरतिप्रमादकषाययोगल- २० क्षणाश्चत्वार आस्रवा बन्धहेतवो भवन्ति। संयतासंयतस्य आर्याश्रावकश्राविकालक्षणस्य विरतिमिश्रा ह्यविरतिरास्रवो भवति, प्रमादकषाययोगाश्च त्रय आस्रवा भवन्ति। प्रमत्तसंयतस्य प्रमादकषाययोगलक्षणा आस्रवास्त्रयो भवन्ति। अप्रमत्तापूर्वकरणबादरसाम्परायसूक्ष्मसाम्परायाणां चतुर्णां कषायो योगश्चास्रवद्वयं भवति। उपशान्तकषायक्षीणकषायसयोगकेवलिनामेको योग एवास्रवः। अयोगकेवलिनस्तु आस्रवो नास्ति। अत्र समासशुद्धिर्विधीयते–मिथ्यादर्शन- २५ श्चाविरतिश्च प्रमादश्च कषायाश्च योगाश्च मिथ्यादर्शनाविरतिप्रमादकषाययोगाः। बन्धस्य हेतवो बन्धहेतवः। एते पञ्च पदार्थाः बन्धहेतवः कर्मबन्धकारणानि भवन्ति।

---

१ सर्वसमयश्च ता०। २ अशीतिशतं क्रियाणामक्रियाणां तथा च भवन्ति चतुरशीतिः। सप्तषष्टिरज्ञानिनां वैनयिकानां तु द्वात्रिंशत्॥ ३ –पञ्चधास्था– ता०। ४ विकथास्तथा कषाया इन्द्रियंनिद्रास्तथैव प्रणयश्च। चतुःचतुःपञ्चैकैकं भवन्ति प्रमादाश्च पञ्चदश॥ ५ 'वा' इति निरर्थकम्। ६ –प्रकारो वा मि– ता०।

अथेदानीं बन्धस्वरूपनिरूपणार्थं सूत्रमिदमाहुः—

सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः ॥२॥

कषन्तीति कषायाः, दुर्गतिपातलक्षणहिंसनस्वभावाः कषाया इत्यर्थः। कषायैः सह वर्तते सकषायः राजदन्तादिवत्कृते समासे सहशब्दस्य पूर्वनिपातः। सकषायस्य भावः
५ सकषायत्वं तस्मात् सकषायत्वात्। ननु **"मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः"** [त० सू० ८।१] इत्यस्मिन् सूत्रे कषायाणां बन्धहेतुत्वं पूर्वमेवोक्तं पुनः सकषायत्वादिति हेतुकथनं किमर्थम्? सत्यम्, उदराग्न्याशयानुसाराहारस्वीकारवत् तीव्रमन्दमध्यमकषायानुसारस्थित्यनुभागविशेषपरिज्ञानार्थं पुनः कषायनिर्देशः। तेन तीव्रमन्दमध्यमकषायकारणवशात् स्थित्यनुभागबन्धोऽपि तीव्रमन्दमध्यमरूपो भवति। ननु बन्धो जीवस्यैव भवति किमर्थं
१० पुनर्जीवग्रहणम्? सत्यम्; कश्चिदाह—आत्मा मूर्तिरहितत्वादकरः पाणिरहितः कथं कर्म गृह्णाति कथं बन्धवान् भवति इति चर्चितः सन्नुमास्वामिदेवः प्राणधारणायुःसम्बन्धसहितो जीवः कर्म गृह्णाति न त्वायुःसम्बन्धं विना कर्म आदत्ते इति सूचनार्थं जीवनाज्जीवस्तेन जीवशब्दस्य ग्रहणं चकार। आयुःसम्बन्धविरहे जीवस्यानाहारकत्वादेकद्वित्रिसमयपर्यन्तं कर्म (नोकर्म) नादत्ते जीवः **"एकं द्वौ त्रीन् वानाहारकः"** [त० सू० २।३०] इति वचनात्।

१५ ननु कर्मयोग्यान् पुद्गलानादत्ते इति लघौ निर्देशे सिद्धे कर्मणो योग्यानिति भिन्नविभक्तिनिर्देशः किमर्थम्? युक्तमुक्तं भवता; पृथग्विभक्त्युच्चारणं वाक्यान्तरस्य परिज्ञापनार्थम्। [1]किं तद् वाक्यान्तरम्? कर्मणो हेतुभूताज्जीवः सकषायो भवति इत्येकं वाक्यम्, अकर्मकस्य जीवस्य कषायलेपाभावात्। एतेन वाक्येन जीवकर्मणोरनादिसम्बन्ध उक्तः। तेन मूर्तिरहितो जीवः मूर्तकर्मणा कथं बध्यते इति चर्चितमपि निराकृतम्।
२० अन्यथा [2]सम्बन्धस्यादिमत्वे सति तत्पूर्वमत्यन्तशुद्धिं दधानस्य जीवस्य मुक्तवद्बन्धाभावः सङ्गच्छेत्। तेन कर्मबद्धो जीवो न कर्मरहितः। द्वितीयं तु वाक्यं कर्मणो योग्यान् पुद्गलानादत्ते इति षष्ठीनिर्देशः। **"अर्थवशाद् विभक्तिपरिणामः"** [ ]
इति परिभाषणात् कर्मण इति पञ्चम्यन्तं परिहृत्य षष्ठीं दत्त्वा व्याख्याति। तेन कर्मणो योग्यानिति कोऽर्थः? कर्मनिचयस्योचितान् पुद्गलानादत्ते इति सम्बन्धो भवति। पुद्गलानादत्ते
२५ इति पुद्गलशब्दः किमर्थम्? पुद्गलस्य कर्मणा सह तन्मयत्वसूचनार्थं कर्मणश्च पुद्गलेन सह तन्मयत्वसूचनार्थम्। तेन पुद्गलकर्म आत्मगुणो न भवति आत्मगुणस्य संसारकारणत्वाघटनात्। आदत्ते इति क्रियावचनं हेतुहेतुमद्भावसूचनार्थम्। मिथ्यादर्शनादिकं हेतुः तद्युक्त आत्मा हेतुमान्, तेन मिथ्यादर्शनादिभिरार्द्रीकृतस्य जीवस्य सर्वतो योगविशेषात् सूक्ष्मैकक्षेत्रावगाहा[3]-नामनन्तानन्तप्रदेशानां कर्मभावयोग्यानां [4]पुद्गलानामविभाग आख्यायते जीवप्रदेशैः सहान्योन्य
३० प्रदेशः कथ्यते न तु उपश्लेषो बन्ध इत्यर्थः। तदुक्तम्—

---

१ 'किम्' नास्ति ता०। २ बन्धस्य ता०। ३ –गाहस्थितानाम– आ०। ४–माविर्भाव आ– आ०, ज०, द०।

"[1]पयडिट्ठिदिअणुभागप्पदेसभेदादु चदुविधो बंधो।
जोगा पयडिपदेसा ठिदिअणुभागा कसायदो होंति॥" [द्रव्यसं० गा० ३३]

पुद्गलानां कर्मत्वेन परिणतिः केन दृष्टान्तेन भवति? यथा भाण्डविशेषे स्थापितानि नानारसवीर्याणि मधूदकधातुकीपुष्पाणि खर्जूरद्राक्षादिफलानि च मद्यत्वेन परिणमन्ति तथा पुद्गला अप्यात्मनि स्थिताः कषाययोगवशेन कर्मत्वेन परिणमन्तीति दृष्टान्तदार्ष्टान्तौ वेदितव्यौ। 'कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः' इत्यत्र सशब्दस्य ग्रहणं किमर्थम्? सशब्द अपरनिवृत्त्यर्थम्। स एव बन्धो भवति नापरो बन्धोऽस्तीति ज्ञापनार्थम्। तेन कारणेन गुणगुणिबन्धो न भवति। यस्मिन्नेव प्रदेशे जीवस्तिष्ठति तस्मिन्नेव प्रदेशे केवलज्ञानादिकं न भवति किन्तु अपरत्रापि प्रसरति। बन्धशब्दस्तु अत्र सूत्रे व्याख्येयो वर्तते। स तु बन्धः कर्मादिसाधनः, अनादिकर्मणा मिथ्यादर्शनादिभिश्च साध्यत इत्यर्थः। तेन सकषायत्वात् कषायसहितत्वाज्जीव आत्मा कर्मणो योग्यान् कर्मोचितान् पुद्गलान् सूक्ष्मपुद्गलानादत्ते गृह्णाति स एव बन्धः कथ्यत इति क्रियाकारकसम्बन्धः। अथेदानीं बन्धप्रकारनिरूपणार्थं सूत्रमिदमाहुः—

प्रकृतिस्थित्यनुभवप्रदेशास्तद्विधयः॥ ३॥

प्रक्रियते प्रभवति उत्पद्यते ज्ञानावरणादिकमस्या इति प्रकृतिः स्वभावः स्वरूपमिति यावत्। यथा पिचुमन्दस्य प्रकृतिः कटुकता भवति गुडस्य प्रकृतिर्मधुरता भवति तथा ज्ञानावरणस्य कर्मणः प्रकृतिः अर्थापरिज्ञानं भवति, दर्शनावरणस्य प्रकृतिरर्थानामनवलोकनं भवति, सद्वेद्यस्यासद्वेद्यस्य च द्विप्रकारस्यापि वेद्यस्य कर्मणः क्रमेण सुखसंवेदनमसुखसंवेदनञ्च प्रकृतिर्भवति, दर्शनमोहस्य प्रकृतिस्तत्त्वार्थानामश्रद्धानकारित्वमरुचिविधायित्वं भवति, चारित्रमोहस्य प्रकृतिरसंयमहेतुर्भवति, आयुःकर्मप्रकृतिर्भवधारणकारणं भवति, नामकर्मप्रकृतिर्गतिजात्यादिनामविधायिनी भवति, गोत्रकर्मप्रकृतिरुच्चनीचगोत्रोत्पादिका भवति, अन्तरायकर्मप्रकृतिर्दानलाभादिप्रत्यूहहेतुर्भवति। अष्टकर्माष्टप्रकृतिभ्योऽप्रच्युतिः स्थितिरुच्यते यथा अजाक्षीरस्य निजमाधुर्यस्वभावादप्रच्युतिः स्थितिर्भवति गोक्षीरस्य निजमाधुर्यस्वभावादप्रच्युतिः स्थितिर्भवति महिषीक्षीरस्य निजमाधुर्यस्वभावादप्रच्युतिः। एवं ज्ञानावरणादिकर्मणामर्थापरिज्ञानादिस्वरूपादप्रस्खलतिः स्थितिरुच्यते। अर्थापरिज्ञानादिकार्यविधायित्वरूपेणाप्रच्युतेनैतावत्कालमेते बध्यन्ते बद्धास्तिष्ठन्ति इत्यर्थः। स्थितौ सत्यां प्रकृतीनां तीव्रमन्दमध्यमरूपेण रसविशेषः अनुभवोऽनुभाग उच्यते। अजागोमहिष्यादिदुग्धानां तीव्रमन्दमध्यत्वेन रसविशेषवत् कर्मपुद्गलानां स्वगतसामर्थ्यविशेषः, [2]स्वकार्यकरणे समर्थाः परमाणवो बध्यन्त इत्यर्थः। कर्मत्वपरिणतपुद्गलस्कन्धानां परिमाणपरिच्छेदनेन[3] इयत्तावधारणं प्रदेश उच्यते। प्रकृतिश्च स्थितिश्च अनुभवश्च प्रदेशश्च प्रकृतिस्थित्यनुभवप्रदेशाः तस्य बन्धस्य विधयः प्रकाराश्चत्वारो भेदास्तद्विधयः। उक्तञ्च—

---

१ प्रकृतिस्थित्यनुभागप्रदेशभेदाच्चतुर्विधो बन्धः। योगात् प्रकृतिप्रदेशौ स्थित्यनुभागौ कषायतो भवतः॥ २–कर्मक– आ०, ज०, द०। ३–छेदेन ता०।

"प्रकृतिः परिणामः स्यात् स्थितिः कालावधारणम् ।
अनुभागो रसो ज्ञेयः प्रदेशः प्रचयात्मकः ॥" [ ]

तत्र प्रकृतिबन्धः प्रदेशबन्धश्च कायवाङ्मनोयोगकृतौ भवतः स्थित्यनुभवौ तु कषायकारणौ वेदितव्यौ । योगकषायाणामुत्कृष्टानुत्कृष्टभेदात् बन्धस्यापि वैचित्र्यं वेदितव्यम् । तथा
५ चाभ्यधायि—

"जोगा[1] पयडिपदेसा ठिदिअणुभागं कसायदो कुणदि ।
अपरिणदुच्छिण्णेसु य बंधट्ठिदिकारणं णत्थि ॥१॥" [गो० क० गा० २५७]

अस्यायमर्थः—योगात् प्रकृतिप्रदेशसंज्ञिनौ बन्धौ जीवः कुणदि करोति। ट्ठिदिअणुभागं स्थितिश्च अनुभागश्च स्थित्यनुभागं समाहारो द्वन्द्वः, एतद्बन्धद्वयं कसायदो कषायतः जीवः
१० कुणदि करोति । अपरिणदुच्छिण्णेसु य अपरिणतश्च उच्छिन्नश्च अपरिणतोच्छिन्नौ तयोरपरिणतोच्छिन्नयोः प्राकृते द्विवचनाभावाद् बहुवचनमत्र । अपरिणत उपशान्तकषायः, नित्यैकान्तवादरहितो वा, उच्छिन्नः क्षीणकषायादिकः एतयोर्द्वयोः बंधट्ठिदिकारणं णत्थि स्थितिबन्धहेतुर्न भवतीत्यर्थः ।

अथेदानीं प्रकृतिबन्धस्य प्रकारनिरूपणार्थं सूत्रमिदमाहुः—

१५ **आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः । ४ ।**

आदौ भवः आद्यः ज्ञायतेऽनेनेति ज्ञानम् "करणाधिकरणयोश्च" [ ] युट्प्रत्ययः । जानातीति वा ज्ञानम् "कृत्ययुटोऽन्यत्रापि च" [ ] इति कर्तरि युट्, दृश्यते अनेनेति दर्शनं पश्यतीति वा दर्शनम् उभयथापि युट् पूर्ववत् । आव्रियतेऽनेनेति आवरणम् आवृणोतीति वा आवरणम् । अत्रापि युट् पूर्ववत् । वेदयते वेदनीयं
२० "कृत्ययुटोऽन्यत्रापि च" [ ] कर्तरि अनीयः वेद्यते वा वेदनीयम्, "तव्यानीयौ" [ ] कर्मणि अनीयः । विद् वेदनाख्याननिवासनेषु चुरादावात्मनेपदी । विद् ज्ञाने चेद् हेताविन्प्रत्ययस्तु पूर्ववत् । विद्लृ लाभे तुदादौ विभाषितः तत्र विन्दति विन्दते वा वेदनीयमित्यपि भवति, विद विचारणे रुधादावात्मनेपदी तत्र विन्ते वेदनीयमित्यपि स्यात्, विद् सत्तायां दिवादावात्मनेपदी तत्र विद्यते वेदनीयमित्यपि स्यात्, वेदयतीति वेदनीयमिति वाक्ये
२५ हेताविन "इनञ् यजादेरुभयम्" [ ] इत्यपेक्षायां[3] परस्मैपदम् । मोहयतीति मोहनीयं मुह्यते वाऽनेनेति मोहनीयम् । नरनारकादिभवान्तराणि[4] एति गच्छत्यनेनेत्यायुः । अत्रायमायुःशब्दः सकारान्तो नपुंसके दर्शितः क्वचिदन्यत्र उकारान्तोऽपि दृश्यते यथा "वितरतु दीर्घमायु कुरुताद्

१ –योगात् प्रकृतिप्रदेशौ स्थित्यनुभागौ कषायतः करोति । अपरिणतोच्छिन्नयोश्च बन्धस्थितिकारणं नास्ति ॥ २ –स्य कारणानि– आ०, ज०, द० । ३ –पेक्षया ता० । ४–भवान्तरम् आ०, ज०, द० ।

गुरुतामव्रतादहर्द्विशम्" नमयत्यात्मानमिति नाम नम्यते वात्माऽनेनेति नाम। गूयते[1]शब्द्यते उच्चो नीचश्चेत्यनेन गोत्रम्। दातृपात्रयोर्देयादेययोश्च अन्तरं मध्यम् एति गच्छतीत्यन्तरायः। ज्ञानञ्च दर्शनञ्च ज्ञानदर्शने ज्ञानदर्शनयोरावरणे ज्ञानदर्शनावरणे ज्ञानावरणं दर्शनावरणञ्चेत्यर्थः। ते च वेदनीयञ्च मोहनीयञ्च आयुश्च नाम च गोत्रञ्च अन्तरायश्च ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः। एते अष्टौ मिलित्वा आद्यः ५ प्रकृतिबन्धो भवति। आत्मपरिणामेन केवलेन सङ्गृह्यमाणाः पुद्गलाः ज्ञानावरणादिबहुभेदान् प्राप्नुवन्ति एकवारभुक्तभोजनपरिणामरसासृङ्मांसमेदोऽस्थिमज्जाशुक्रवत् अनेकविकारसमर्थवातपित्तश्लेष्मखलरसलालाभाववच्च। कर्मसामान्यादेकं कर्म। पुण्यपापभेदात् द्विधा कर्म। प्रकृतिस्थित्यनुभागप्रदेशभेदाच्चतुर्धा कर्म। ज्ञानावरणादिभेदादष्टधा कर्म, इत्यादि संख्येयासंख्येयानन्तभेदञ्च कर्म भवति। [2]मूलप्रकृतिबन्धोऽष्टविधः प्रोक्तः। १०

अथेदानीमुत्तरप्रकृतिबन्धः कतिप्रकार इति प्रश्ने सूत्रमिदमुच्यते—

पञ्चनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रमम् ॥ ५ ॥

भेदशब्दः पञ्चादिभिः शब्दैः प्रत्येकं प्रयुज्यते। तेनायमर्थः—पञ्चभेदं ज्ञानावरणीयं नवभेदं दर्शनावरणीयं द्विभेदं वेदनीयम् अष्टाविंशतिभेदं मोहनीयं चतुर्भेदमायुः द्विचत्वारिंशद्भेदं नाम द्विभेदं गोत्रं पञ्चभेदोऽन्तरायः। पञ्चभेदञ्च नवभेदञ्च द्विभेदञ्च अष्टा- १५ विंशतिभेदञ्च चतुर्भेदञ्च द्विचत्वारिंशद्भेदञ्च द्विभेदञ्च पञ्चभेदश्च पञ्चनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदाः। एते भेदाः अष्टप्रकारस्य प्रकृतिबन्धस्य यथाक्रममनुक्रमेण भवन्ति। ननु उत्तरप्रकृतिबन्ध एवंविकल्पो वर्तते इत्यस्मिन् सूत्रे सूचितं न वर्तते कस्मादुच्यते उत्तरप्रकृतिबन्धोऽयम्? साधूक्तं भवता, पूर्वसूत्रे "आद्यो ज्ञानदर्शन" इत्यादावाद्यशब्दो गृहीतो वर्तते। यद्ययं प्रकृतिबन्ध आद्यस्तर्हि पञ्चभेदादिभेद उत्तरप्रकृतिबन्धोऽयं भवति। २० उत्तरप्रकृतिबन्धस्य भेदाः किं सूत्रपर्यन्तं वक्ष्यन्ते? "आदितस्तिसृणाम्" इत्यादि बन्धत्रयस्य सूत्राणि यावन्नायान्ति तावदुत्तरप्रकृतिबन्धो वेदितव्यः पारिशेष्यात् स्थित्यनुभवप्रदेशबन्धेभ्य उद्धरितत्वात्।

अथ ज्ञानावरणं यत्पञ्चभेदमुक्तं तन्निरूपणार्थं योगोऽयमुच्यते—

मतिश्रुतावधिमनःपर्ययकेवलानाम् ॥ ६ ॥ २५

मतिश्च श्रुतञ्च अवधिश्च मनःपर्ययश्च केवलञ्च मतिश्रुतावधिमनःपर्ययकेवलानि तेषां मतिश्रुतावधिमनःपर्ययकेवलानाम्, एतेषामुक्तस्वरूपाणां पञ्चानां मत्यादीनां ज्ञानानामावरणानि पञ्च भवन्तीति ज्ञानावरणस्योत्तरप्रकृतयः पञ्च भवन्तीति ज्ञातव्यम्। इह किञ्चिद्विचार्यते मनःपर्ययज्ञानशक्तिः केवलज्ञानशक्तिश्चाभव्यप्राणिनि[3] वर्तते, न वा वर्तते? वर्तत इति

---

१ शब्द्यते आ०, ज०, द०। २ स्थूल– आ०, ज०, द०। ३ –प्राणिषु व– आ०, ज०, द०।

चेत्; तर्हि अभव्यः कथमुच्यते ? यदि न वर्तते; तर्हि मनःपर्ययज्ञानावरणं केवलज्ञानावरणञ्चे-त्यावरणद्वयं तत्र वृथैवोच्यते ? युक्तमुक्तं भवता; आदेशवचनान्न तत्र दोषो वर्तते। किं तदादेशवचनम् ? द्रव्यार्थिकनयस्यादेशान्मनःपर्ययकेवलज्ञानशक्तिरस्त्येव, पर्यायार्थिकनयस्या-देशान्मनःपर्ययकेवलज्ञानशक्तिद्वयमभव्ये न वर्तते। एवञ्चेत्तर्हि भव्याभव्यविकल्पद्वयं न सङ्ग-

५ च्छते तद्द्वयोरपि तच्छक्तिसम्भवात् ? सत्यम्; शक्तिसद्भावापेक्षया भव्याभव्यविकल्पौ न वर्तेते। किं तर्हि ? व्यक्तिसम्भवासम्भवापेक्षया भव्याभव्यौ स्तः; सम्यग्दर्शनज्ञानचारित्रैर्यस्य जन्तोः व्यक्तिर्भविष्यति स भवति भव्यः। यस्य तु सम्यग्दर्शनज्ञानचारित्रैर्व्यक्तिर्न भविष्यति स अभव्य इत्युच्यते कनकपाषाणान्धपाषाणवत्। यथा कनकपाषाणस्य कनकं व्यक्तं भवति इतरपाषाणस्य तु शक्तिरूपेण विद्यमानमपि कनकं व्यक्तं न भवति।

१० अथ दर्शनावरणस्य का नवोत्तरप्रकृतयः इत्यनुयोगे सूत्रमुच्यते स्वामिना—

चक्षुरचक्षुरवधिकेवलानां निद्रा-निद्रानिद्राप्रचला-प्रचलाप्रचलास्त्यानगृद्धयश्च ॥ ७ ॥

चक्षुश्च लोचनद्वयम्। अचक्षुश्च अपरेन्द्रियाणि अवधिश्च अवधिदर्शनम्, केवलञ्च केवलदर्शनं चक्षुरचक्षुरवधिकेवलानि तेषां चक्षुरचक्षुरवधिकेवलानाम्। एतेषां चतुर्णां दर्शना-

१५ नामावरणानि चत्वारि भवन्ति चक्षुर्दर्शनावरणम् अचक्षुर्दर्शनावरणम्, अवधिदर्शनावरणं केवलदर्शनावरणञ्चेति। तथा निद्रा च निद्रानिद्रा च प्रचला च प्रचलाप्रचला च स्त्या-नगृद्धिश्च निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयः एताः पञ्च निद्रा दर्शनावरणानि पञ्च भवन्ति समुदितानि तु नव स्युः। चकारश्चतुर्भिः पञ्चभिश्च आवरणैः समुच्ची-यते। तत्र तावन्निद्रालक्षणम्—[1]मदखेदक्लमविनाशार्थं स्वपनं निद्रा उच्यते। निद्रावान्

२० पुमान् सुखेनैव [2]जागर्यते। निद्रायाः पुनःपुनः प्रवृत्तिर्निद्रा कथ्यते। निद्रानिद्रावान् पुमान् दुःखेन प्रतिबोध्यते। यत्कर्म आत्मानं प्रचलयति सा प्रचलेत्युच्यते। प्रचलावान् पुमान् उपविष्टोऽपि स्वपिति, शोकश्रममद[3]खेदादिभिः प्रचला उत्पद्यते सा नेत्रगात्र-विक्रियाभिः सूच्यते। प्रचलैव पुनः पुनरागच्छन्ती प्रचलाप्रचला उच्यते। यस्यां बलविशेष-प्रादुर्भावः [4]स्वप्ने भवति सा स्त्यानगृद्धिरुच्यते। धातूनामनेकार्थत्वात् स्त्यायतिर्धातुः

२५ स्वपनार्थ इह वेदितव्यः। गृद्धिरपि दीप्त्यर्थे ज्ञातव्यः। तेनायमर्थः—स्त्याने स्वप्ने गृद्ध्यति दीप्यते यो निद्राविशेषः सा स्त्यानगृद्धिरित्युच्यते। स्वप्नदीप्तिरिति यावत्। दीप्तिरपि किम् ? तेजःसंधुक्षणमित्यर्थः। यदुदयाज्जीवो बहुतरं दिवाकृत्यं रौद्रं कर्म करोति सा स्त्यानगृद्धिरु-च्यते। निद्रादीनां कारणानि आवरणरूपाणि कर्माणि वेदितव्यानि। उक्तञ्च—

---

१ –मदस्वेद– आ०, द०। २ –जागर्ति आ०, द०, ज०। ३ –मदस्वेदा– आ०, द०। ४ –स्वयमेव भ– आ०, द०, ज०।

"[1]थीणुदयेणुट्ठविदो सोवदि कम्मं करेदि जप्पदि य ।
णिद्दाणिद्दुदयेण य ण दिट्ठिमुग्घादिदुं सक्को ॥
पयलापयलुदयेण य वहेदि लाला चलंति अंगाइं ।
णिद्दुदये गच्छंतो ठाइ पुणो वइसदि पडेई ॥
पयलुदयेण य जीवो ईसुम्मीलिय सुवेदि सुत्तोवि । ५
ईसं ईसं जाणइ मुहुं मुहुं सोवदे मंदं ॥" [गो० क० गा० २३–२५]

अथ वेदनीयोत्तरप्रकृती आवेदयति—

सदसद्वेद्ये ॥८॥

सच्च असच्च सदसती ते च ते वेद्ये सदसद्वेद्ये। सद्वेद्यं प्रशस्तं वेद्यम् असद्वेद्यमप्रशस्तं वेद्यम् । यदुदयाद् देवमनुष्यतिर्यग्गतिषु शारीरं मानसञ्च सुखं लभते तद्भवति सद्वेद्यम्। १० यदुदयान्नरकादिगतिषु शारीरमानसादिदुःखं नानाप्रकारं प्राप्नोति तदसद्वेद्यम्। एते तृतीयस्याः प्रकृतेर्द्वे उत्तरप्रकृती भवतः ।

अथ मोहनीयप्रकृतेरुत्तरप्रकृतीर्निरूपयति—

दर्शनचारित्रमोहनीयाकषायकषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदा अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसञ्ज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः ॥९॥ १५

मोहनीयशब्दः [2]प्रत्येकं प्रयुज्यते । तेनायमर्थः—दर्शनमोहनीयञ्च चारित्रमोहनीयञ्च । वेदनीयशब्दश्च प्रत्येकं प्रयुज्यते । तेनायमर्थः–अकषायवेदनीयञ्च कषायवेदनीयञ्च । दर्शनचारित्रमोहनीयाकषायकषायवेदनीयानि तानि आख्या नामानि यासां मोहनीयोत्तरप्रकृ- २० तीनां ताः दर्शनचारित्रमोहनीयाकषायकषायवेदनीयाख्याः। मोहनीयस्य कर्मणश्चतस्र उत्तरप्रकृतय एवं भवन्ति । कथम्भूतास्ताश्चतस्रोऽपि ? त्रिद्विनवषोडशभेदाः । भेदशब्दः प्रत्येकं प्रयुज्यते । तेनायमर्थः–त्रिभेदाश्च द्विभेदे च नवभेदाश्च षोडशभेदाश्च यासां चतुर्णामुत्तरप्रकृतीनां तास्त्रिद्विनवषोडशभेदाः । अस्य विशेषणस्यायमर्थः–दर्शनमोहनीयं त्रिभेदं चारित्रमोहनीयं द्विभेदम् अकषायवेदनीयं नवभेदं कषायवेदनीयं षोडशभेदमिति यथासङ्ख्यं वेदितव्यम्। २५

---

१ स्त्यानगृद्ध्युदयेन उत्थापिते स्वपिति कर्म करोति जल्पति च। निद्रानिद्रोदयेन च न दृष्टिमुद्घाटयितुं शक्यः ॥ प्रचलाप्रचलोदयेन च वहति लाला चलन्ति अङ्गानि। निद्रोदये गच्छन् तिष्ठति पुनः वसति पतति ॥ प्रचलोदयेन च जीव ईषदुन्मील्य स्वपिति सुप्तोऽपि । ईषदीषज्जानाति मुहुर्मुहुः स्वपिति मन्दम् ॥ २ प्रत्येकं प्रत्येकं प्र– आ०, ज०, द० ।

तत्र तावद् दर्शनमोहनीयं त्रिभेदं निरूपयति–सम्यक्त्वमिथ्यात्वतदुभयानि। सम्यक्त्वञ्च मिथ्यात्वञ्च तदुभयञ्च सम्यक्त्वमिथ्यात्वतदुभयानि तत्त्रिविधमपि दर्शनमोहनीयं बन्धं प्रति एकं भूत्वा सत्कर्मापेक्षया कर्मसत्तामात्रापेक्षया द्रव्यरूपेण त्रिविधं व्यवतिष्ठते। शुभपरिणामसंरुद्धनिजरसम्, कोऽर्थः ? शुभपरिणामनिराकृतफलदानसामर्थ्यं मिथ्यात्वमेवोदासीनत्वेन स्थितमा-
५ त्मनः श्रद्धानं नैव निरुणद्धि मिथ्यात्वञ्च वेदयमानमात्मस्वरूपं लोकमध्ये आत्मानं सम्यग्दृष्टिं ख्यापयत् सम्यक्त्वाभिधेयं मिथ्यात्वमुच्यते। यदि सम्यक्त्वं नाम दर्शनमोहनीयमीदृशं वर्तते तर्हि मिथ्यात्वं नाम दर्शनमोहनीयं कीदृशमिति चेत् ? उच्यते; यदुदयात् सर्वज्ञवीतरागप्रणीतसम्यग्दर्शनज्ञानचारित्रलक्षणोपलक्षितमोक्षमार्ग[1]पराङ्मुखः सन्नात्मा तत्त्वार्थश्रद्धाननिरुत्सुकः[2] तत्त्वार्थश्रद्धानपराङ्मुखः अशुद्धतत्त्वपरिणामः सन् हिताहितविवेकविकलः जडादिरूपतयाऽव-
१० तिष्ठते तन्मिथ्यात्वं नाम दर्शनमोहनीयमुच्यते। तर्हि तदुभयं किं कथ्यते ? मिथ्यात्वमेव सामिशुद्धस्वरसम्, ईषन्निराकृतफलदानसामर्थ्यं सम्यग्मिथ्यात्वापरनामधेयं तदुभयमुच्यते। सामिशब्द ईषदर्थे वर्तते। अर्धार्थे इति केचित्। तेन सामिशुद्धस्वरसमिति कोऽर्थः ? ईषत्प्रक्षालितार्द्धप्रक्षालितकोद्रववत् क्षीणाक्षीणस्वरसमित्यर्थः।

अथ चारित्रमोहनीयस्य कौ द्वौ भेदौ ? अकषायकषायौ। अकषायश्च कषायश्च
१५ अकषायकषायौ। अकषाय इति कोऽर्थः ? ईषत्कषाय अकषायवेदनीयमित्यर्थः। तस्य नव भेदा भवन्ति। ते के नव भेदाः ? हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदाः। हास्यञ्च रतिश्चारतिश्च शोकश्च भयञ्च जुगुप्सा च स्त्रीवेदश्च पुंवेदश्च नपुंसकवेदश्च हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदाः। तत्र हास्यं वर्करादिस्वरूपं यदुदयादाविर्भवति तद्धास्यम्। यदुदयाद्देशपुरग्राममन्दिरादिषु तिष्ठन् जीवः परदेशादिगमने[3] च औत्सुक्यं न करोति सा रति-
२० रुच्यते। रतेर्विपरीता अरतिः। यदुदयाद् अनुशेते शोचनं करोति स शोक उच्यते। यदुदयात् त्रासलक्षण उद्वेग उत्पद्यते तद् भयमुच्यते। यदुदयात्परदोषानाविष्करोति आत्मदोषान् संवृणोति सा जुगुप्सा कथ्यते। यदुदयात्स्त्रीपरिणामानङ्गीकरोति स स्त्रीवेदः। यदुदयात् पुंस्त्वपरिणामान् प्राप्नोति स पुंवेदः। यदुदयान्नपुंसकभावान् प्रतिपद्यते स नपुंसकवेदः। उक्तञ्च त्रिवेदानां लक्षणम्—

२५ "श्रोणिमार्दवभीतत्वमुग्धत्वक्लीबतास्तनाः।
पुंस्कामेन समं सप्त लिङ्गानि स्त्रैणसूचने॥
[4]खरत्वं मोहनं स्ताब्ध्यं शौडीर्यं श्मश्रुधृष्टता।
स्त्रीकामेन समं सप्त लिङ्गानि नरवेदने॥

१ मोक्षसन्मार्ग– आ०, ज०, द०। २ –श्रद्धानप्रत्यनीकः आ०, द०, ज०। ३ –गमनेन औ– आ०, द०, ज०। ४ स्वरसंमोहनम् आ०, द०, ज०।

यानि स्त्रीपुंसलिङ्गानि पूर्वाणीति चतुर्दश ।
शक्तानि तानि मिश्राणि षण्ढभावनिवेदने ॥" [　　　]

कषायवेदनीयं षोडशप्रकारं कस्मात् ? एकशः एकैकं प्रति अनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानसञ्ज्वलनविकल्पा यतः कारणात् । के ते क्रोधमानमायालोभाश्चत्वारः । तद्यथा—अनन्तानुबन्धिनः क्रोधमानमायालोभाश्चत्वारः अप्रत्याख्यानावरणाः क्रोधमानमायालोभाश्च-त्वारः प्रत्याख्यानावरणाः क्रोधमानमायालोभाश्चत्वारः सञ्ज्वलनाः क्रोधमानमायालोभाश्च-त्वारः । अनन्तानुबन्धिन इति कोऽर्थः ? अनन्तं मिथ्यादर्शनमुच्यते, अनन्तभवभ्रमणहेतुत्वात् । अनन्तं मिथ्यात्वम् अनुबध्नन्ति सम्बन्धयन्ति इत्येवंशीला ये क्रोधमानमायालोभास्ते अनन्ता-नुबन्धिनः । अनन्तानुबन्धिषु कषायेषु सत्सु जीवः सम्यक्त्वं न प्रतिपद्यते तेन ते सम्यक्त्व-घातकाः भवन्ति । येषामुदयात् स्तोकमपि देशव्रतं संयमासंयमनामकं जीवो धर्तुं न क्षमते ते १० अप्रत्याख्यानावरणाः क्रोधमानमायालोभास्तेषु विध्वस्तेषु श्रावकव्रतम् अर्थिकाणां च व्रतं जीवः प्राप्नोति तेन ते देशप्रत्याख्यानमावृण्वन्तः अप्रत्याख्यानावरणाः क्रोधमानमायालोभा उच्यन्ते । येषामुदयाज्जीवो महाव्रतं पालयितुं न शक्नोति ते प्रत्याख्यानावरणाः क्रोधमानमायालोभा उच्यन्ते । तेषु विध्वस्तेषु जीवः संयमं सर्वविरतिनामकं प्राप्नोति षष्ठादिगुणस्थानान्यर्हति । सञ्ज्वलना इति कोऽर्थः ? संशब्द एकीभावे वर्तते । तेनायमर्थः—संयमेन सह अवस्थानतया १५ एकीभूततया ज्वलन्ति नोकषायवत् यथाख्यातचारित्रं विध्वंसयन्ति ये ते सञ्ज्वलनाः क्रोध-मानमायालोभाः । अथवा येषु सत्स्वपि संयमो ज्वलति दीप्तिं प्राप्नोति प्रतिबन्धं न लभते ते संज्वलनाः क्रोधमानमायालोभा उच्यन्ते । एवमेते समुदिताः षोडशकषाया भवन्ति तेषां स्वभाव-प्रकटनार्थं दृष्टान्तगाथा एताः—

"[1]सिलपुढविभेदधूली जलराइसमाणवो हवे कोहो ।　२०
णारयतिरियणरामरगईसु उप्पायओ कमसो ॥
सिलअट्ठिकट्ठवेत्ते णियभेएणणुहरंतवो माणो ।
णारयतिरियणरामरगईसु उप्पायओ कमसो ॥
वेणुयमूलोरब्भयसिंगे गोमुत्तएवखोरुप्पि ।
सरिसी मायाणारयतिरियणरामरगईसु खिवदि जीवं ॥　२५
किमिरायचक्कतणुमलहरिद्दराएण सरिसओ लोहो ।
णारयतिरियमाणुसदेवेसुप्पायओ कमसो ॥" [गो० जी० गा० २८३–८६]

१ शिलापृथिवीभेदधूलिजलराशिसमानकः भवेत् क्रोधः । नारकतिर्यग्नरामरगतिषूत्पादकः क्रमशः ॥ शैलास्थिकाष्ठवेत्रान् निजभेदेनानुहरन् मानः । नारकतिर्यग्नरामरगतिषूत्पादकः क्रमशः ॥ वेणूपमूलोरभ्रकशृङ्गेण गोमूत्रेण च क्षुरप्रेण । सदृशी माया नारकतिर्यग्नरामरगतिषु क्षिपति जीवम् ॥ क्रिमिरागचक्रतनुमलहरिद्रारागेण सदृशो लोभः । नारकतिर्यग्मानुषदेवेषूत्पादकः क्रमशः ॥

एता मोहनीयस्य कर्मणः उत्तरप्रकृतयोऽष्टाविंशतिर्भवन्ति ।

अथेदानीमायुःकर्मोत्तरप्रकृतीराह—

नारकतैर्यग्योनमानुषदैवानि । १० ।

नरकेषु[1] भवं नारकं तिर्यग्योनिषु भवं तैर्यग्योनं मानुषेषु मनुष्येषु वा भवं मानुषं देवेषु ५ भवं दैवम् । नारकञ्च तैर्यग्योनञ्च मानुषञ्च दैवञ्च नारकतैर्यग्योनमानुषदैवानि । यदुदयात् तीव्रशीतोष्णदुःखेषु नरकेषु जीवः दीर्घकालं जीवति तत् नारकमायुः । यन्निमित्तं तिर्यग्योनिषु जीवति जीवः तत् तैर्यग्योनम् । यत्प्रत्ययात् मनुष्येषु जीवति जीवः तत् मानुषमायुः । यद्धेतुकं देवेषु दीर्घकालं जीवति जीवस्तद्दैवमायुः । एवमायुःप्रकृतेश्चतस्र उत्तरप्रकृतयो भवति ।

अथेदानीं नामकर्मप्रकृतेरुत्तरप्रकृतीराह—

१० **गतिजातिशरीराङ्गोपाङ्गनिर्माणबन्धनसङ्घातसंस्थानसंहननस्पर्श-रसगन्धवर्णानुपूर्व्यागुरुलघूपघातपरघातातपोद्योतोच्छ्वासविहा-योगतयः प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेय-यशःकीर्तिसेतराणि तीर्थकरत्वञ्च ॥ ११ ॥**

गतिश्च जातिश्च शरीरञ्च अङ्गोपाङ्गञ्च निर्माणञ्च बन्धनञ्च सङ्घातश्च संस्थानञ्च १५ संहननञ्च स्पर्शश्च रसश्च गन्धश्च वर्णश्च आनुपूर्व्यञ्च अगुरुलघु च उपघातश्च परघातश्च आतपश्च उद्योतश्च उच्छ्वासश्च विहायोगतिश्च ताः गतिजातिशरीराङ्गोपाङ्गनिर्माणब-न्धनसङ्घातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्व्यागुरुलघूपघातपरघातातपोद्योतोच्छ्वासविहा-योगतयः । एता एकविंशतिप्रकृतयः । तथा प्रत्येकशरीरञ्च त्रसश्च सुभगश्च सुस्वरश्च शुभश्च सूक्ष्मश्च पर्याप्तिश्च स्थिरश्च आदेयश्च यशःकीर्तिश्च येषु दशसु नामसु तानि प्रत्येकशरीरत्रससुभ-२० गसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशःकीर्तीनि तानि च तानि सेतराणि इतरनामसहितानि तानि प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशःकीर्तिसेतराणि विंशतिसङ्ख्यानि भ-वन्ति । कथम् ? प्रत्येकशरीरादितरत्साधारणशरीरं त्रसादितरः स्थावरः सुभगादितरः दुर्भगः । सुस्वरादितरः दुःस्वरः शुभादितरः अशुभः सूक्ष्मादितरो बादरः पर्याप्तेरितरा अपर्याप्तिः स्थि-रादितरः अस्थिरः आदेयादितरः अनादेयः यशःकीर्तेरितरा अयशःकीर्तिः तीर्थकरस्य भावः २५ कर्म वा तीर्थकरत्वं एताः समुदिताः द्विचत्वारिंशन्नामकर्मण उत्तरप्रकृतयो भवन्ति । अन्तर्भे-देस्तु मिलित्वा त्रिनवतिप्रकृतयो भवन्ति । तथैवोच्यते—यदुदयाज्जीवो भवान्तरं गच्छति सा गतिः शरीरनिष्पत्तिः सा चतुःप्रकारा भवति नरकगतिः तिर्यग्गतिः मनुष्यगतिः देवगतिश्चेति । यदुदयाज्जीवो नारकभावो[2] नारकशरीरनिष्पत्तिको भवति तन्नरकगतिनाम । यदुदयाज्जीवस्तिर्य-ग्भावस्तत्तिर्यग्गतिनाम । यदुदयाज्जीवो मनुष्यभावस्तन्मनुष्यगतिनाम । यदुदयाज्जीवो देवभाव-

१ नरके भवम् आ०, ज०, द०। २ नरकभावस्तन्नर- आ०, द०, ज०।

स्तद्देवगतिनाम। नरकादिगतिषु अव्यभिचारिणा सदृशत्वेन एकीकृतोऽर्थात्मा[1] जातिरुच्यते। सा पञ्चप्रकारा—एकेन्द्रियजातिनाम द्वीन्द्रियजातिनाम त्रीन्द्रियजातिनाम चतुरिन्द्रियजातिनाम पञ्चेन्द्रियजातिनाम। यदुदयाज्जीव एकेन्द्रिय इत्युच्यते तदेकेन्द्रियजातिनाम। यदुदयादात्मा द्वीन्द्रिय इत्यभिधीयते तद्द्वीन्द्रियजातिनाम। यदुदयाज्जीवस्त्रीन्द्रिय[2] इति शब्द्यते तत्त्रीन्द्रियजातिनाम। यदुदयाज्जन्मी चतुरिन्द्रिय इत्यभिधीयते तच्चतुरिन्द्रियजातिनाम। यदुदयात् ५ प्राणी पञ्चेन्द्रिय इति कथ्यते तत्पञ्चेन्द्रियजातिनाम। यदुदयाज्जीवस्य कायनिर्वृत्तिर्भवति तच्छरीरं पञ्चप्रकारम्—औदारिकवैक्रियिकाहारकतैजसकार्मणशरीरभेदात्। यदुदयादङ्गोपाङ्गव्यक्तिर्भवति तदङ्गोपाङ्गं त्रिप्रकारम्—औदारिकशरीराङ्गोपाङ्गनाम। वैक्रियिकशरीराङ्गोपाङ्गनाम। आहारकशरीराङ्गोपाङ्गनाम। तैजसकार्मणयोः शरीरयोरङ्गोपाङ्गानि न सन्ति तेन अङ्गोपाङ्गं त्रिप्रकारम्। किमङ्गं किमुपाङ्गमिति चेत्? उच्यते— १०

[3]"णलया बाहू य तहा णियंबपुट्ठी उरो य सीसं च।
अट्ठेव दु अंगाइं सेस उवंगाइं देहस्स॥" [कम्मप० ७४]

ललाटकर्णनासिकानेत्रोत्तराधरोष्ठाङ्गुलिनखादीनि [4]उपाङ्गान्युच्यन्ते। यदुदयात्परिनिष्पत्तिर्भवति—तन्निर्माणं द्विप्रकारं जातिनामकर्मोदयापेक्षं ज्ञातव्यम्। स्थाननिर्माण प्रमाणनिर्माणं चक्षुरादीनां स्थानं सङ्ख्यां च निर्मापयति। निर्मीयतेऽनेनेति निर्माणम्। [5]यथा नासि- १५ का नासिकास्थाने एकैक (व) भवति नेत्रे नेत्रयोः स्थाने द्वे एव भवतः कर्णौ कर्णयोः स्थाने द्वावेव भवतः। एवं[6] मेहनस्तनजघनादिषु ज्ञातव्यम्। शरीरनामकर्मोदयाद् गृहीतानां पुद्गलानां परस्परप्रदेशसंश्लेषणं बन्धनमुच्यते। तदपि पञ्चप्रकारम्—औदारिकशरीरबंधनं नाम। वैक्रियिकशरीरबन्धनं नाम। आहारकशरीरबन्धनं नाम। तैजसशरीरबन्धनं नाम। कार्मणशरीरबन्धनं नाम। यन्निमित्ताच्छरीराणां छिद्ररहितपरस्परप्रदेशप्रवेशादेकत्वभवनं भवति स सङ्घातः २० पञ्चप्रकारः—औदारिकशरीरसङ्घातनाम। वैक्रियकशरीरसङ्घातनाम। आहारकशरीरसङ्घातनाम। तैजसशरीरसङ्घातनाम। कार्मणशरीरसङ्घातनाम। यत्प्रत्ययात् शरीराकृतिनिष्पत्तिर्भवति तत्संस्थानं षट्प्रकारम्। ऊर्ध्वं मध्ये (ऊर्ध्वमध्ये) मध्ये च समशरीरावयवसन्निवेशव्यवस्थाविधायकं समचतुरस्रसंस्थानं नाम। नाभेरूर्ध्वं प्रचुरशरीरसन्निवेशः अधस्तु अल्पशरीरसंन्निवेशो न्यग्रोधपरिमण्डलसंस्थानं नाम। तस्माद्विपरीतसंस्थानविधायकं [7]स्वातिसंस्थानं वल्मीकापरनामधेयम्। २५ [8]पृष्ठप्रदेशे बहुपुद्गलप्रचयनिर्मापकं [9]कुब्जसंस्थानं नाम। विश्वाङ्गोपाङ्गाल्पत्वजनकं ह्रस्वत्वकारकं वामनसंस्थानं नाम। अवच्छिन्नावयवं [10]हुण्डसंस्थानं नाम। यदुदयात् अस्थ्नां बन्धनविशेषो भवति तत्संहननं षट्प्रकारम्। वज्राकारोभयास्थिसन्धिमध्ये सवलयबन्धनं सनाराचं वज्रवृषभ-

१ अर्थो जीवपदार्थः –ता० टि०। २ जन्तुस्त्री–ता०। ३ नलकौ बाहू च तथा नितम्बपृष्ठे उरश्च शीर्षञ्च। अष्टैव तु अङ्गानि शेषाणि उपाङ्गानि देहस्य॥ ४ –नीत्युच्यन्ते आ०, द०, ज०। ५ तथा आ०, द०, ज०। ६ एवं स्तन– आ०, द०, ज०। ७ स्वातिकसं– आ०, द०, ज०। ८ पृष्ठदेशे आ०, द०, ज०। ९ कुब्जकसं– आ०, द०, ज०। १० हुंडकसं–द०।

नाराचसंहननं नाम। तद्वलयरहितं वज्रनाराचसंहननं नाम। वज्राकारेण वलयेन च रहितं सनाराचं नाराचसंहननं नाम। एकास्थिसनाराचमन्यत्रानाराचमर्धनाराचसंहननं नाम। उभयास्थिपर्यन्ते कीलकसहितं कीलिकासंहननं नाम। अन्तरनवाप्तान्योन्यास्थिसन्धिकं बाह्ये सिरास्नायुमांसवेष्टितमसंप्राप्तासृपाटिकासंहननं नाम। असंप्राप्तासृपाटिकासंहननः आदितश्चतुःस्वर्गयुगलान्तं ग-
५ च्छति। कीलिकार्धनाराचसंहननः शेषचतुर्युगलपर्यन्तं गच्छति। नाराचसंहननो नवग्रैवेयकपर्यन्तं गच्छति। वज्रनाराचसंहननो नवानुदिशपर्यन्तं गच्छति। वज्रनाराचसंहननो नवानुदिशपर्यन्तं गच्छति। वज्रर्षभनाराचसंहननः पञ्चानुत्तरं मोक्षञ्च गच्छति। घर्मा वंशा मेघा अंजना अरिष्टा मघवी माघवी इति सप्तनरकनामानि। तत्र मेघायाः शिला इत्यपरं नाम। तत्र षट्संहननः संज्ञी जीवः मेघान्तं व्रजति। [1]सप्तमनरकं वज्रर्षभनाराचसंहननो गच्छति। षष्ठं [2]नरक-
१० मर्धनाराचपर्यन्तो गच्छति। कीलिकान्तसंहननः पञ्चमं चतुर्थञ्च नरकं गच्छति। एकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियेषु असंप्राप्तासृपाटिकासंहननं भवति। वज्रर्षभनाराचसंहननं त्वसंङ्ख्येयवर्षायुष्केषु भवति। चतुर्थकाले षट्संहननानि भवन्ति। पञ्चमकाले त्रीणि संहननानि भवन्ति। षष्ठकाले एकमसंप्राप्तासृपाटिकासंहननं भवति। विदेहेषु विद्याधरक्षेत्रेषु म्लेच्छखण्डेषु च मनुष्याणां तिरश्चाञ्च षट्संहननानि
१५ वेदितव्यानि। नागेन्द्रपर्वतात् परतस्तिरश्चां [3]च षट्संहननानि भवन्ति। कर्मभूमिजानां स्त्रीणामर्धनाराचकीलिकासंप्राप्तासृपाटिकासंहननत्रयं भवति, आदिसंहननत्रयं न भवतीति निश्चयः। आदिसप्तगुणस्थानेषु षट्संहननानि भवन्ति। अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायोपशान्तकषायलक्षणेषु च[4] चतुर्षु उपशमश्रेणिसम्बन्धिगुणस्थानेषु आदिसंहननत्रयं भवति। क्षपकश्रेणौ अपूर्वकरणानिवृत्तिकरणसूक्ष्मसाम्परायक्षीणकषायसयोगकेवलिलक्षणेषु पञ्चगुण-
२० स्थानेषु आदिसंहननमेव भवति।

[5]अथ स्पर्शादिप्रकृतिविचारः क्रियते—यत्पाकेन स्पर्श [6]उत्पद्यते स स्पर्शं अष्टप्रकारो भवति कर्कशनाम कोमलनाम गुरुनाम लघुनाम स्निग्धनाम रूक्षनाम शीतनाम उष्णनाम। यदुदयेन रसभेदो भवति स रसः पञ्चप्रकारः—तिक्तनाम कटुकनाम कषायनाम अम्लनाम मधुरनाम। यदुदयेन गन्धो भवति स गन्धो द्विप्रकारः—सुरभिगन्धनाम दुरभिगन्धनाम। यदुदयेन वर्णभेदो
२५ भवति स वर्णः पञ्चप्रकारः—कृष्णवर्णनाम नीलवर्णनाम रक्तवर्णनाम पीतवर्णनाम शुक्लवर्णनाम। यदुदयेन पूर्वशरीराकार (कारा) नाशो भवति तदानुपूर्व्यं चतुःप्रकारम्—नरकगतिप्रायोग्यानुपूर्व्यनाम तिर्यग्गतिप्रायोग्यानुपूर्व्यनाम मनुष्यगतिप्रायोग्यानुपूर्व्यनाम देवगतिप्रायोग्यानुपूर्व्यनाम। यदुदयेन लोहपिण्डवत् गुरुत्वेनाधो न भ्रश्यति अर्कतूलवल्लघुत्वेन यत्र तत्र नोड्डीयते च तत् अगुरुलघुनाम। यदुदयेन स्वयमेव गले पाशं बद्ध्वा वृक्षादौ अवलम्ब्य उद्वे-
३० गान्मरणं करोति प्राणापाननिरोधं कृत्वा म्रियते इत्येवमादिभिरनेकप्रकारैः शस्त्रघातभृगुपाताग्निझम्पापातजलनिमज्जनविषभक्षणादिभिरात्मघातं करोति तदुपघातनाम। यदुदयेन परशस्त्रादिना

१ सप्तम न– द०। २ षष्ठं नरकपर्यन्तमर्द्धनाराचसंहननो गच्छति द०। ३ च नास्ति द०, आ०,। ४ च नास्ति आ०, द०। ५ अथ आ०, द०। ६ उत्पाद्यते आ०, द०।

घातो भवति तत्परघातनाम। यदुदयेन आदित्यवदातापो भवति तदातपनाम। यदुदयेन चन्द्रज्योतिरिङ्गणादिवत् उद्योतो भवति तदुद्योतनाम। यदुदयेन उच्छ्वासो भवति तदुच्छ्वासनाम। यदुदयेन आकाशे गमनं भवति सा विहायोगतिः द्विप्रकारा--गजवृषभहंसमयूरादिवत् प्रशस्तविहायोगतिनाम। खरोष्ट्रमार्जारकुक्कुरसर्पादिवत् अप्रशस्तविहायोगतिनाम। शरीरनामकर्मोदयेन निष्पाद्यमानं शरीरमेकजीवोपभोगकरण यदुदयेन भवति तत्प्रत्येकशरीरनाम। यदुदयेन ५ बहूनां जीवानामुपभोगहेतुः शरीरं भवति तत्साधारणशरीरनाम। उक्तञ्च—

"[1]साहारणमाहारो साहारणआणपाणगहणं च।
साहारणजीवाणं साहारणलक्खणं एयं॥" [पञ्चसं० १।८२]
"गूढसिरसंधिपव्वं समभंगमहीरुहं च छिण्णरुहं।
साहारणं सरीरं तव्विवरीयं च पत्तेयं॥ १०
कंदे मूले बल्लीपवालसदुलयकुसुमफलबीए।
समभंगे तदणंता विसमे सदि होंति पत्तेया॥" [गो० जी० गा० १८६-८७]

यदुदयेन द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियेषु जन्म भवति तत्त्रसनाम। यदुदयेन पृथिव्यप्तेजोवायुवनस्पतिकायेषु[2] एकेन्द्रियेषूत्पद्यते तत्स्थावरनाम। यदुदयेन जीवः परप्रीतिजनको भवति दृष्टः श्रुतो वा तत्सुभगनाम। यदुदयेन रूपलावण्यगुणसहितोऽपि दृष्टः श्रुतो वा परेषाम- १५ प्रीतिजनको भवति तद्दुर्भगनाम। यदुदयेन चित्तानुरञ्जकस्वर उत्पद्यते तत्सुस्वरनाम। यदुदयेन खरमार्जारकाकादिस्वरवत् कर्णशूलप्रायः स्वर उत्पद्यते तद्दुःस्वरनाम। यदुदयेन रमणीयो भवति तच्छुभनाम। यदुदयेन विरूपको भवति तदशुभनाम। यदुदयेन सूक्ष्मं शरीरं भवति तत्सूक्ष्मनाम। यदुदयेन परेषां बाधाकरं बाध्यञ्च शरीरं भवति तद्बादरनाम। यदुदयेन आहारकशरीरेन्द्रियानपानभाषामनोलक्षणाः षट्पर्याप्तयः उत्पद्यन्ते तत्पर्याप्तिनाम। यदुदयेन अपरिपूर्णोऽपि जीवो २० म्रियते तदपर्याप्तिनाम। स्थिरत्वकारक[3] स्थिरनाम। अस्थिरभावकारकमस्थिरनाम। प्रभावयुक्तशरीरकारकमादेयनाम। प्रभारहितशरीरकारकमनादेयनाम। पुण्यगुणकीर्तनकारणं[4] यशःकीर्तिनाम। पापदोषप्रकटन[5]कारणमयशःकीर्तिनाम। आर्हन्त्यकारणं तीर्थकरत्वनाम। एवं द्वाचत्वारिंशत् पिण्डप्रकृतयः नामकर्मणो भवन्ति विस्तरतस्त्रिनवतिः। अत्र द्विविधमपि निर्माणनाम कर्म एका प्रकृतिरिति ज्ञातव्यमेवं त्रिनवतिर्भवन्ति। २५

१ साधारणमाहारः साधारणमानापानग्रहणञ्च। साधारणजीवानां साधारणलक्षणम् एतत्॥ गूढशिरःसन्धिपर्व समभङ्गमहीरुहं च छिन्नरुहम्। साधारणं शरीरं तद्विपरीतञ्च प्रत्येकम॥ कन्दे मूले त्वक्प्रवालशाखादलकुसुमफलबीजे। समभङ्गे तदनन्ताः विषमे सति भवन्ति प्रत्येकाः। २ –षु उत्प- आ०, द०, ज०। ३ –कारण आ०, द०, ज०। ४ –कारकम् आ०, द०, ज०। ५ –नता कारक- आ०, द०, ज०।

अथ गोत्रस्योत्तरप्रकृती उच्येते—

उच्चैर्नीचैश्च ॥१२॥

यदुदयेन सर्वलोकपूजिते इक्ष्वाकुवंशे सूर्यवंशे सोमवंशे नाथवंशे कुरुवंशे हरिवंशे उग्रवंशे इत्यादिवंशे जीवस्य जन्म भवति तदुच्चैर्गोत्रमुच्यते। यदुदयेन निन्दिते दरिद्रे ५ भ्रष्टे इत्यादिकुले जीवस्य जन्म भवति तन्नीचैर्गोत्रम्। चकारः परस्परसमुच्चये वर्तते। तेनायमर्थः—न केवलमुच्चैर्गोत्रं नीचैश्च गोत्रम्। गोत्रप्रकृतेरुत्तरप्रकृती द्वे भवतः।

अथेदानीमन्तरायप्रकृतेरुत्तरप्रकृतय उच्यन्ते—

दानलाभभोगोपभोगवीर्याणाम् ॥१३॥

दानस्यान्तराये दातुमिच्छुरपि दातुं न शक्नोति लाभस्यान्तराये लब्धुमना अपि न लभ- १० ते भोगस्यान्तराये भोक्तुकामोऽपि न भुङ्क्ते उपभोगस्यान्तराये उपभोक्तुमिच्छन्नपि नोपभुङ्क्ते वीर्यस्यान्तराये उत्साहमुद्यमं चिकीर्षुरपि नोत्सहते। एते पञ्च भेदा अन्तरायप्रकृतेरुत्तरप्रकृति-भेदाः भवन्ति। अत्र समासशुद्धिः। दानञ्च लाभश्च भोगश्चोपभोगश्च वीर्यञ्च दानलाभभो-गोपभोगवीर्याणि तेषां दानलाभभोगोपभोगवीर्याणां पञ्चानां पञ्चान्तरायाः पञ्चोत्तरप्रकृतयो भवन्तीति क्रियाकारकसम्बन्धः। इति प्रकृतिबन्धस्वरूपं समाप्तम्।

१५ अथ स्थितिबन्धस्वरूपमुच्यते—

आदितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपम-
कोटीकोट्यः परा स्थितिः ॥१४॥

आदितः ज्ञानावरणमारभ्य वेदनीयं यावत् तिसृणां ज्ञानावरणदर्शनावरणवेदनीय-लक्षणानां प्रकृतीनामन्तरायस्य चाष्टमस्य कर्मणः सागरोपमानां कोटीनां कोट्यः त्रिंशत् २० परा उत्कृष्टा स्थितिर्भवति। सा स्थितिः कीदृशस्य जीवस्य भवति ? मिथ्यादृष्टेः पञ्चेन्द्रियस्य सञ्ज्ञिनः पर्याप्तकस्य ज्ञातव्या। अन्येषामेकेन्द्रियादीनां परमागमात् सम्प्रत्ययो विधातव्यः सम्यक्प्रतीतिर्ज्ञेया। परमागमे एकेन्द्रियादीनां कीदृशी स्थितिः चतुर्णां कर्मणामिति चेत् ? उच्यते; एकेन्द्रियपर्याप्तकस्य लग्नानामेकसागरोपमस्य सप्तभागीकृतस्य त्रयो भागा भवन्ति। द्वीन्द्रियपर्याप्तकस्य पञ्चविंशतिसागरोपमानां सप्तभागीकृतानां त्रयो भागा भवन्ति। त्रीन्द्रि-२५ यपर्याप्तकस्य पञ्चाशत्सागरोपमाणां सप्तभागीकृतानां त्रयो भागा भवन्ति। चतुरिन्द्रिय-पर्याप्तकस्य सागरोपमशतस्य सप्तभागीकृतस्य त्रयो भागा भवन्ति। असञ्ज्ञिपञ्चेन्द्रिय-पर्याप्तकस्य सागरोपमसहस्रस्य सप्तभागीकृतस्य त्रयो भागा भवन्ति। सञ्ज्ञिपञ्चेन्द्रिया-पर्याप्तकस्य [1]अन्तःत्रिंशत्सागरोपमकोटीकोट्यः भवन्ति। अपर्याप्तैकेन्द्रियद्वीन्द्रियत्रीन्द्रिय-चतुरिन्द्रियासञ्ज्ञिपञ्चेन्द्रियाणां पर्याप्तैकेन्द्रियादिदत्ता एव[2] भागा भवन्ति। परन्तु ३० पल्योपमाऽसङ्ख्येयभागोना वेदितव्याः इति परमागमात् सम्प्रत्ययः। उक्तञ्च—

---

१ अन्तःसा– आ०, द०, ज०। २ एकभागा ता०।

"[1]एइंदियवियलिंदियसयलिंदियासण्णिअपज्जत्तयाणं बोधव्वा।

एक्कं तहप्पणवीसं पंचासं तह सयं सहस्सं च ॥

"तिहयं सत्तविहत्तं सायरसंखा ठिदी एसा।"[पञ्चसं० ४।४८६]

अथेदानीं मोहनीयस्योत्कृष्टस्थितिं प्राह—

सप्ततिर्मोहनीयस्य ॥ १५ ॥ ५

मिथ्यादृष्टेः पञ्चेन्द्रियस्य सञ्ज्ञिनः मोहनीयस्य कर्मणः सप्ततिः सागरोपमकोटीकोटयः परा उत्कृष्टा स्थितिर्भवति। एषा स्थितिश्चारित्रमोहनीयापेक्षया भवति। दर्शनमोहनीयापेक्षया तु चत्वारिंशत्सागरोपमकोटीकोटयो वेदितव्याः। परेषां परमागमादवसेयम्। कोऽसौ परमागम इति चेद्? उच्यते; पर्याप्तैकद्वित्रिचतुरिन्द्रियाणामेकपञ्चविंशतिपञ्चाशत्शतसागरोपमाणि। तेषामपर्याप्तानामपि तान्येव, परन्तु पल्योपमाऽसङ्ख्येयभागोनानि। पर्याप्तासञ्ज्ञिपञ्चेन्द्रियस्य सागरोपमसहस्रं तस्यैवापर्याप्तस्य तदेव परन्तु पल्योपमासङ्ख्येयभागोनम्। तथा चोक्तम्— १०

"[2]एक्कं पणवीसंपि य पंचासं तह सयं सहस्सं च।

ताणं सायरसंखा ठिदी एसा मोहणीयस्स ॥" [ ]

अयन्तु विशेषो मोहनीयस्येयं स्थितिः सप्तगुणा सप्तहृता च कर्तव्या। कोऽर्थः? पूर्ववत् सागराणां सप्तभागान् कृत्वा त्रयो भागा न गृहीतव्याः किन्तु एकसागरः परिपूर्णः पञ्चविंशतिसागराः परिपूर्णाः पञ्चाशत्सागराः परिपूर्णाः शतसागराः परिपूर्णाः सहस्रसागराश्च परिपूर्णाः गृह्यन्ते इत्यर्थः। १५

अथेदानीं नामगोत्रयोरुत्कृष्टस्थितिरुच्यते—

विंशतिर्नामगोत्रयोः ॥ १६ ॥ २०

नाम च गोत्रञ्च नामगोत्रे तयोर्नामगोत्रयोः नामगोत्रयोः प्रकृत्योर्विंशतिः सागरोपमकोटीकोटयः परा उत्कृष्टा स्थितिर्भवति। एषापि मिथ्यादृष्टेः पञ्चेन्द्रियस्य पर्याप्तस्य सञ्ज्ञिनो वेदितव्याः। पर्याप्तैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाऽसञ्ज्ञिपञ्चेन्द्रियाणामेकं पञ्चविंशतिः पञ्चाशत् शतं सहस्रञ्चानुक्रमेण सागरोपमानि यानि पूर्वमुक्तानि तेषां सप्तसप्तभागीकृतानां द्वौ द्वौ भागौ गृह्येते। तथाहि—एकसागरोपमस्य सप्तभागाः क्रियन्ते तेषां मध्ये द्वौ भागौ एकेन्द्रियाणां नामगोत्रयोः परा स्थितिर्भवति। पञ्चविंशतिसागराणां सप्तभागाः क्रियन्ते तन्मध्ये द्वौ भागौ गृह्येते। द्वीन्द्रियाणां नामगोत्रयोः परा स्थितिर्भवति। पञ्चाशत्सागरो- २५

---

१ एकेन्द्रियविकलेन्द्रियसकलेन्द्रियासंज्ञ्यपर्याप्तकानां बोद्धव्या। एकं तथा पञ्चविंशतिः पञ्चाशत् तथा शतं सहस्रं च ॥ त्रिशतं सप्तविभक्तं सागरसंख्या स्थितिरेषा ॥ २ एकं पञ्चविंशतिश्च पञ्चाशत् तथा शतं सहस्रञ्च। तासां सागरसंख्या स्थितिरेषा मोहनीयस्य ॥

पमाणां सप्तभागाः क्रियन्ते तन्मध्ये द्वौ भागौ गृह्येते त्रीन्द्रियाणां नामगोत्रयोः परा स्थितिर्भवति शतसागराणां सप्तभागाः क्रियन्ते तन्मध्ये द्वौ भागौ गृह्येते । चतुरिन्द्रियाणां नामगोत्रयोः परा स्थितिर्भवति । सहस्रसागराणां सप्तभागाः क्रियन्ते तन्मध्ये द्वौ भागौ गृह्येते असञ्ज्ञिपञ्चे-न्द्रियाणां नामगोत्रयोः परा स्थितिर्भवति । अपर्याप्तैकद्वित्रिचतुरसञ्ज्ञिपञ्चेन्द्रियाणां द्वौ द्वावेव ५ भागौ परं पल्योपमाऽसङ्ख्येयभागहीनौ वेदितव्यौ ।

अथायुषः प्रकृतेरुत्कृष्टा स्थितिः [1]प्रतिपाद्यते—

त्रयस्त्रिंशत्सागरोपमाण्यायुषः ॥ १७ ॥

त्रयस्त्रिंशच्च तानि सागरोपमाणि त्रयस्त्रिंशत्सागरोपमाणि आयुषः परा उत्कृष्टा स्थितिर्भवति । कोटीकोटय इति न ग्राह्यं पुनः सागरोपमग्रहणात् । एषापि स्थितिः पञ्चे-१० न्द्रियस्य सञ्ज्ञिनः पर्याप्तकस्य वेदितव्या । असञ्ज्ञिनः आयुषः स्थितिः पल्योपमासङ्ख्येयभागो भवति । कस्मात् ? यतः असञ्ज्ञिपञ्चेन्द्रियः तिर्यङ् स्वर्गे नरके वा पल्योपमाऽसङ्ख्येयभाग-मायुर्बध्नाति । एकेन्द्रियविकलेन्द्रियास्तु पूर्वकोटीप्रमाणमायुर्बद्ध्वा [2]पश्चाद्विदेहादावुत्पद्यन्ते ।

अथेदानीमष्टानां प्रकृतीनां जघन्या स्थितिरुच्यते—

अपरा द्वादशमुहूर्ता वेदनीयस्य ॥ १८ ॥

१५ वेदनीयस्य कर्मण अपरा जघन्या स्थितिर्द्वादशमुहूर्ता भवति । चतुर्विंशतिघटिका-प्रमाणा इत्यर्थः । एतां स्थितिं सूक्ष्मसाम्परायगुणस्थाने बध्नातीति वेदितव्यम् । प्रकृतीनामनु-क्रमोल्लङ्घनं सूत्राणां लघुत्वार्थं ज्ञातव्यम् ।

अथ नामगोत्रयोः जघन्यस्थितिप्रतिपत्त्यर्थं सूत्रमिदमुच्यते—

नामगोत्रयोरष्टौ ॥ १९ ॥

२० नाम च गोत्रञ्च नामगोत्रे तयोर्नामगोत्रयोरष्टौ मुहूर्ताः षोडशघटिका जघन्या स्थिति-र्भवति । इयमपि स्थितिर्दशमगुणस्थाने[3] वेदितव्या ।

अथेदानीमुद्धरितपञ्चप्रकृतीनां जघन्यस्थितिकथनार्थं सूत्रमिदमाहुः—

शेषाणामन्तर्मुहूर्ताः ॥ २० ॥

शेषाणां ज्ञानावरणदर्शनावरणान्तरायमोहनीयायुषां जघन्या स्थितिरन्तर्मुहूर्ता २५ अन्तर्मुहूर्तप्रमाणा भवति । तत्र ज्ञानदर्शनावरणान्तरायाणां निकृष्टा स्थितिः सूक्ष्मसाम्पराये ज्ञातव्या । मोहनीयस्य अनिवृत्तिकरणगुणस्थाने बादरसाम्परायगुणस्थानाऽपरनाम्नि बोद्धव्या । आयुषो जघन्या स्थितिः सङ्ख्येयवर्षायुःषु तिर्यक्षु मनुष्येषु[4] चावसेया ।

अथेदानीं तृतीयस्य बन्धस्य अनुभवनाम्नः स्वरूपनिरूपणार्थं सूत्रमिदमुच्यते—

---

१ प्रतिपद्यते आ०, ज०, द० । २ –देहे उत्प– आ०, ज०, द० । ३ –स्थाने च वेदि–आ०, ज०, द० । ४ चावसेया आ०, ज०, द० ।

विपाकोऽनुभवः । २१

विशिष्टो विविधो वा पाक उदयः विपाकः, यो विपाकः स अनुभव इत्युच्यते अनुभागसञ्ज्ञकश्च[1] । तत्र विशिष्टः पाक आस्रवाध्यायप्रोक्ततीव्रमन्दमध्यमभावास्रवविशेषाद्वेदितव्यः । द्रव्यक्षेत्रकालभवभावलक्षणकारणभेदोत्पादितनानात्वो विविधोऽनुभवो ज्ञातव्यः । अनुभव इति कोऽर्थः ? आत्मनि फलस्य दानं कर्मदत्तफलानामात्मना स्वीकरणमित्यर्थः । यदा शुभपरिणामानां प्रकर्षो भवति तदा शुभप्रकृतीनां प्रकृष्टोऽनुभवो भवति, अशुभप्रकृतीनां तु निकृष्टोऽनुभवो भवति । यदा अशुभपरिणामानां प्रकर्षो भवति तदा अशुभप्रकृतीनां प्रकृष्टोऽनुभवो भवति, शुभप्रकृतीनां तु निकृष्टोऽनुभवो भवति । सोऽनुभवोऽमुना प्रकारेण प्रत्ययवशात् परिणामकारणवशात् स्वीकृतो द्विप्रकारो भवति—स्वमुखपरमुखभेदात् । तत्र सर्वमूलप्रकृतीनामनुभवः स्वमुखेनैव भवति । कथम् ? मतिज्ञानावरणं मतिज्ञानावरणरूपेणैव भवति । उत्तरप्रकृतीनां सदृशजातीयानां परमुखेनापि भवति परन्तु आयुःकर्मदर्शनमोहचारित्रमोहान् वर्जयित्वा । कथम् ? यदा जीवो नरकायुर्भुङ्क्ते तदा तिर्यगायुर्मनुष्यायुर्देवायुर्वा न भुङ्क्ते । तेन आयुःप्रकृतयः तुल्या अपि स्वमुखेनैव भुज्यन्ते न तु परमुखेन । तथा दर्शनमोहं भुञ्जानः पुमान् चारित्रमोहं न भुङ्क्ते । चारित्रमोहं भुञ्जानः पुमान् दर्शनमोहं न भुङ्क्ते । एवं तिसृणां प्रकृतीनां तुल्यजातीयानामपि परमुखेनानुभवो न भवति ।

[2]अत्राह कश्चित्—पूर्वोपार्जितानेकविधकर्मविपाकोऽनुभव इत्युच्यते तं जानीमो वयम्, एतत्तु न विद्मो वयम् । एतत् किम् ? अयमनुभवः किंप्रसङ्ख्यातोऽन्वर्थो वर्तते अप्रसङ्ख्यातोऽनन्वर्थो वा इति प्रश्ने आचार्यः प्राह—प्रसङ्ख्यातः प्रकृतीनां नामानुसारेणानुभवो भुज्यते इत्यर्थप्रकटनार्थं सूत्रमिदमाहुः—

स यथानाम ॥ २२ ॥

स अनुभवः प्रकृतिफलं जीवस्य भवति । कथम् ? यथानाम प्रकृतिनामानुसारेण । तेन ज्ञानावरणस्य फलं ज्ञानाभावो भवति सविकल्पस्यापि । एवं सर्वत्र सविकल्पस्य कर्मणः फलं सविकल्पं ज्ञातव्यम् । दर्शनावरणस्य फलं दर्शनशक्तिप्रच्छादनता । वेदनीयस्य फलं सुखदुःखप्रदानम् । मोहनीयस्य फलं मोहोत्पादनम् । आयुषः फलं भवधारणलक्षणम् । नाम्नः फलं नानानामानुभवनम् । गोत्रस्य फलं नीचत्वोच्चत्वानुभवनम् । अन्तरायस्य फलं विघ्नानुभवनम् । एवमष्टानामपि कर्मप्रकृतीनां सविकल्पानां रसानुभवनसम्प्रत्ययः सञ्जायते ।

अथाह कश्चित्—विपाकः खलु अनुभवः आक्षिप्यते अङ्गीक्रियते प्रतिज्ञायते भवद्भिः तच्च कर्म अनुभूतमास्वादितं सत् किमाभरणमिवावतिष्ठते अथवा निष्पीतसारमास्वादितसामर्थ्यं सत् गलति पतति प्रच्यवते इति प्रश्ने सूत्रमिदमुच्यते—

ततश्च निर्जरा ॥ २३ ॥

१ –संज्ञश्च आ०, ज०, द० । २ अथाह ता० ।

ततस्तस्माद्विपाकादनन्तरमात्मने पीडानुग्रहदानानन्तरं दुःखसुखदानानन्तरं निर्जरा भवति पूर्वस्थितेः[1] प्रक्षयात् अवस्थानाभावात्कर्मणो निवृत्तिर्भवति उपार्जितकर्मत्यागो भवति एकदेशेन क्षयो भवतीत्यर्थः। अथवा ततस्तस्मात्फलदानलक्षणात्कारणान्निर्जरा भवति। किंवत्? भुक्तान्नपानादिविकारवत्। विण्मूत्रादिविकारवत् पततीत्यर्थः। सा निर्जरा द्विधा ५ भवति—सविपाका अविपाका चेति। तत्र [2]चतुर्गतिभवमहासमुद्रे एकेन्द्रियादिजीवविशेषैः अवघूर्णिते नानाजातिभेदैः सम्भृते दीर्घकालं पर्यटतो जीवस्य शुभाशुभस्य क्रमपरिपाककाल-प्राप्तस्य कर्मोदयावलिप्रवाहानुप्रविष्टस्य आरब्धफलस्य कर्मणो या निवृत्तिः सा सविपाकनिर्जरा कथ्यते। यच्च कर्म विपाककालमप्राप्तमनुदीर्णमुदयमनागतम् उपक्रमक्रियाविशेषबलादुदीर्य उदयमानीय आस्वाद्यते सहकारफलकदलीफलकण्टकिफलादिपाकवत् बलाद्विपाच्य भुज्यते सा १० अविपाकनिर्जरा कथ्यते। चकारात् **"तपसा निर्जरा च"** [त० सू० ९।३] इति वक्ष्यमाण-सूत्रार्थो गृह्यते। अयमत्र भावः—निर्जरा स्वतः परतश्च भवतीति सूत्रार्थो वेदितव्यः। संवराद-नन्तरं वक्ष्यमाणाऽपि निर्जरा उद्देशलघ्वर्थमिह गृह्यते। अन्यथा **"विपाकोऽनुभवः"** [त० सू० ८।२१] इति सूत्रं पुनरप्यनुवदितुं योग्यं भवति।

अथ प्रदेशबन्धस्वरूपं निरूप्यते—

१५ **नामप्रत्ययाः सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाह-स्थिताः सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशाः ॥ २४ ॥**

नामेत्युक्ते विश्वकर्मप्रकृतय उच्यन्ते। नाम्नः सर्वकर्मप्रकृतिसमूहस्य प्रत्ययाः हेतवः नामप्रत्ययाः ईदृग्विधाः। के? अनन्तानन्तप्रदेशाः। अनन्ताः सन्तः अनन्तगुणाः अनन्तानन्ताः अनन्तानन्ताश्च ते प्रदेशा अष्टधा कर्मप्रकृतियोग्यपुद्गलस्कन्धाः अनन्तानन्तप्रदेशाः ते २० खलु अभव्येभ्योऽनन्तगुणाः। कोऽर्थः? अभव्यास्तावदनन्ता वर्तन्ते तेभ्य अनन्तगुणा अनन्तानन्ता इत्युच्यन्ते। परन्तु सिद्धानामनन्तभागप्रमाणा वर्तन्ते। ईदृग्विधाः कर्मयोग्यपुद्गल-स्कन्धाः क्व वर्तन्ते? सर्वात्मप्रदेशेषु। सर्वे च ते आत्मनः प्रदेशाः सर्वात्मप्रदेशास्तेषु सर्वात्म-प्रदेशेषु। एकैकस्मिन्नात्मनः प्रदेशे अनन्तानन्ताः कर्मप्रकृतियोग्यपुद्गलस्कन्धा वर्तन्ते इत्यर्थः। ईदृग्विधाः कर्मप्रदेशाः आत्मप्रदेशान्तमूर्ध्वमधस्तात्तिर्यक् च वर्तन्त इत्यर्थः। ईदृग्विधाः कर्मप्रदेशाः २५ केषु कालेषु वर्तन्ते? सर्वतः। सर्वेषु भवेषु सर्वतः। **"सार्वविभक्तिकस्तस् इत्येके"** [ ] इति वचनात् पञ्चम्यास्तस् इति नाशङ्कनीयम्। तेनात्र सप्तम्यर्थे तस्प्रत्ययो वेदितव्यः। तेनायमर्थः—एकैकस्य प्राणिनोऽतीता भवा अनन्तानन्ता भवन्ति भविष्यन्तस्तु भवा कस्यचित् सङ्ख्येया भवन्ति कस्यचिदसङ्ख्येया भवन्ति कस्यचिदनन्ताश्च भवा भवन्ति। तेषु सर्वेष्वपि भवेषु प्रत्येकमनन्तानन्ताः कर्मप्रदेशाः प्रतिप्राणि प्रत्यात्मप्रदेशं भवन्तीति सर्वतःशब्देन

१ –स्थितिप्र– आ०, ज०, द०। २ चतुर्गतौ भव– ता०।

कालविशेषो ज्ञातव्यः। ईदृग्विधाः प्रदेशाः कस्माद् भवन्ति ? योगविशेषात्। कायवाङ्मनः-कर्मलक्षणात् योगविशेषात् योगविशेषकारणात् जीवेन पुद्गलाः कर्मत्वेन गृह्यन्ते। "[1]जोगा पयडिपदेसा ठिदिअणुभागा कसायदो होंति" [गो० क० गा० २५७] इति वचनात्।
पुनरपि कथम्भूतास्ते अनन्तानन्तप्रदेशाः ? सूक्ष्मैकक्षेत्रावगाहस्थिताः। एकक्षेत्रमात्मन एकप्रदेशलक्षणं तस्मिन्नवगाहः[2] अवकाशो येषां ते एकक्षेत्रावगाहाः, सूक्ष्माश्च ते एकक्षेत्रावगाहाश्च सूक्ष्मैकक्षेत्रावगाहाः सूक्ष्मैकक्षेत्रावगाहाश्च ते स्थिताः सूक्ष्मैकक्षेत्रावगाहस्थिताः। अस्यायमर्थः—कर्मप्रदेशाः सूक्ष्मा वर्तन्ते न तु स्थूलाः। यस्मिन्नाकाशप्रदेशे आत्मप्रदेशो वर्तते तस्मिन्नेवाऽऽकाशप्रदेशेऽनन्तानन्ताः कर्मप्रदेशाः वर्तन्ते तेन एकक्षेत्रावगाहा इत्युच्यन्ते। स्थिता इत्युक्ते तस्मिन्नेव प्रदेशे कर्मयोग्यपुद्गलस्कन्धाः स्थिता वर्तन्ते न तु गच्छन्तः। अनन्तानन्तप्रदेशा इत्युक्ते सङ्ख्येयाश्च असङ्ख्येयाश्च अनन्ताश्च न भवन्ति। किन्तर्हि ? अनन्तानन्ताः। एकक्षेत्रावगाहा इत्युक्ते घनाङ्गुलस्यासङ्ख्येयभागक्षेत्रावगाहिनो वर्तन्ते। अयन्तु विशेषः—एकसमयद्विसमयत्रिसमयचतुःसमयेत्यादिसङ्ख्येयसमयासङ्ख्येयसमयस्थितिका भवन्ति। पञ्चवर्णा भवन्ति। लवणरसस्य मधुररसान्तर्भावात् मधुराम्लकटुतिक्तकषायलक्षणाः पञ्चरसाः भवन्ति। सुरभिदुरभिद्विर्गन्धा भवन्ति। पूर्वोक्ताष्टस्पर्शाश्च[3] भवन्ति।

अथात्राह कश्चित्—बन्धपदार्थानन्तरं पुण्यपापपदार्थद्वयकथनं पूर्वं चर्चितं तत्तु बन्धपदार्थमध्ये अन्तर्गर्भितमिति समाहितमुत्तरप्रदानविषयीकृतम्[4]। तत्र पुण्यबन्धः को वर्तते, कश्च पापबन्ध इति प्रश्ने पुण्यप्रकृतिपरिज्ञानार्थं सूत्रमिदमुच्यते—

सद्वेद्यशुभायुर्नामगोत्राणि पुण्यम् ॥ २५ ॥

आयुश्च नाम च गोत्रञ्च आयुर्नामगोत्राणि शुभानि प्रशस्तानि तानि च तानि आयुर्नामगोत्राणि शुभायुर्नामगोत्राणि। सच्च समीचीनं सुखप्रदानसमर्थं वेद्यं सद्वेद्यम्। सद्वेद्यञ्च शुभायुर्नामगोत्राणि च सद्वेद्यशुभायुर्नामगोत्राणि। एतानि चत्वारि कर्माणि पुण्यं भवन्ति। तथाहि—तिर्यगायुर्मनुष्यायुर्देवायुस्त्रितयं शुभायुः। मनुष्यदेवगतिद्वयं पञ्चेन्द्रियजातिः पञ्चशरीराणि अङ्गोपाङ्गत्रितयं समचतुरस्रसंस्थानं वज्रर्षभनाराचसंहननं प्रशस्तवर्णः प्रशस्तो रसः प्रशस्तो गन्धः प्रशस्तः स्पर्शः मनुष्यगतिप्रायोग्यानुपूर्व्यं देवगतिप्रायोग्यानुपूर्व्यमगुरुलघुः परघात उच्छ्वास आतप उद्योतः प्रशस्तविहायोगतिः त्रसो बादरः पर्याप्तिः प्रत्येकशरीरं स्थिरः शुभः सुभगः सुस्वरः आदेयो यशःकीर्तिः निर्माणं तीर्थकरनाम एताः सप्तत्रिंशन्नामप्रकृतयः पुण्यमुच्यन्ते। उच्चैर्गोत्रं सद्वेद्यञ्चेति द्वाचत्वारिंशत् प्रकृतयः पुण्यं पुण्यसंज्ञा भवन्ति।

अथ पापपदार्थपरिज्ञानार्थं सूत्रमिदमुच्यते—

---

१ योगात् प्रकृतिप्रदेशौ स्थित्यनुभागौ कषायतो भवतः। २ –गाहे अव– आ०, ज०, द०। ३ –स्पर्शा भवन्ति आ०, ज०, द०। ४ –उत्तर प्रदानं वि– ता०, द०।

अतोऽन्यत्पापम् ॥ २६ ॥

अत एतस्मात् पुण्याभिधानकर्मप्रकृतिवृन्दात् यदन्यत् अन्यतरत् तत्कर्म पापं पापपदार्थ इत्यभिधीयते स द्व्यशीतिप्रकारः–पञ्च ज्ञानावरणानि नव दर्शनावरणानि षट्विंशतिर्मोहनीयानि पञ्चान्तरायाः नरकगतितिर्यग्गती ? एकद्वित्रिचतुरिन्द्रियजातयश्च तत्र प्रथमसंस्थानवर्जानि पञ्च संस्थानानि प्रथमसंहननवर्जानि पञ्चसंहननानि अप्रशस्तवर्णोऽ-शस्तगन्धोऽप्रशस्तरसोऽप्रशस्तस्पर्शो नरकगतिप्रायोग्यानुपूर्व्यं तिर्यग्गतिप्रायोग्यानुपूर्व्यमुपघातोऽप्रशस्तविहायोगतिः स्थावरः सूक्ष्मः अपर्याप्तिः साधारणशरीरमस्थिरः अशुभो दुर्भगो दुःस्वर अनादेयोऽयशःकीर्तिरिति चतुस्त्रिंशन्नामप्रकृतयः। असद्वेद्यं नरकायुर्नीचगोत्रञ्चेति पापं पापपदार्थो भवति। स उभयप्रकारोऽपि पुण्यपापपदार्थोऽवधेर्मनःपर्ययस्य केवलज्ञानस्य च प्रत्यक्षप्रमाणत्रयस्य गोचरो गम्यो भवति तत्कथितागमस्य चानुमेयः स्यादिति भद्रम्।

इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ अष्टमः पादः समाप्तः।

१ इत्यनवद्यगद्यपद्यविद्याविनोदनोदितप्रमोदपीयूषरसपानपावनमतिसभाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोऽलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीदेवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण च सकलविद्वज्जनविहितचरणसेवस्य विद्यानन्दिदेवस्य संछर्दितमिथ्यामतिदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायामष्टमोऽध्यायः समाप्तः। ८। आ०, ब०, ज०,

*

नवमोऽध्यायः

अथोमास्वामिनं नत्वा पूज्यपादञ्च योगिनम् ।
विद्यानन्दिनमाध्याय संवरं विवृणोम्यहम् ॥ १ ॥

आस्रवनिरोधः संवरः ॥ १ ॥

नूतनकर्मग्रहणकारणमास्रव उच्यते । आस्रवस्य निरोधः प्रतिषेधः आस्रवनिरोधः संवरो भवति । भावद्रव्यसंवरभेदात् संवरो द्विप्रकारः । तत्र भावसंवरः भवकारणपापक्रियानिरोधः । तथा चाऽभ्यधायि— ५

"[1]चेदणपरिणामो जो कम्मस्सासवणिरोहणे हेदू ।
सो भावसंवरो खलु दव्वासवरोहणे अण्णो ॥" [द्रव्यसं० गा० ३४]

संसारकारणक्रियानिरोधे सति संसारकारणक्रियानिरोधलक्षणभावसंवरः । भावसंवरपूर्वको द्रव्यसंवरः । कर्मपुद्गलग्रहणविच्छेद इत्यर्थः । स उभयप्रकारोऽपि संवरः गुणस्थानापेक्षया उच्यते—मिथ्यात्वगुणस्थाने यत्कर्म आस्रवति तस्य कर्मणः सासादनसम्यग्दृष्ट्यादिशेषगुणस्थाने संवरो भवति । मिथ्यादर्शनप्रधात्वेन यत्कर्म आस्रवति, तत्किम् ? तत्षोडशप्रकृतिलक्षणम् । तत्रैकं तावन्मिथ्यात्वं द्वितीयो नपुंसकवेदः तृतीयं नरकायुः चतुर्थी नरकगतिः पञ्चमी एकेन्द्रियजातिः षष्ठी द्वीन्द्रियजातिः सप्तमी त्रीन्द्रियजातिः अष्टमी चतुरिन्द्रियजातिः नवमं हुण्डकसंस्थानं दशममसम्प्राप्तासृपाटिकासंहननमेकादशं नरकगतिप्रायोग्यानुपूर्व्यं द्वादश आतपः त्रयोदशः स्थावरः चतुर्दशः सूक्ष्मः पञ्चदशः अपर्याप्तकः षोडशं साधारणशरीरम् । असंयमस्तावत् त्रिविधो भवति । ते के त्रयो विधाः ? अनन्तानुबन्धिकषायोदयः अप्रत्याख्यानकषायोदयः प्रत्याख्यानकषायोदयश्चेति त्रिविधासंयमहेतुकस्य कर्मणः संवरो ज्ञातव्यः । कस्मिन् सति ? तदभावे त्रिविधासंयमाभावे[2] सति । स एव निरूप्यते—अनन्तानुबन्धिकषायोदयकल्पितासंयमास्रवाणां पञ्चविंशतिप्रकृतीनामेकेन्द्रियादयः सासादनसम्यग्दृष्टिपर्यन्ता बन्धका भवन्ति । बन्धकाभावे तासामुत्तरत्र संवरो भवति । कास्ताः पञ्चविंशतिप्रकृतयः ? एका निद्रानिद्रा द्वितीया प्रचलाप्रचला तृतीया स्त्यानगृद्धिः अनन्तानुबन्धिक्रोधमानमायालोभाश्चत्वारः अष्टमः स्त्रीवेदः नवमं तिर्यगायुः दशमो तिर्यग्गतिः चत्वारि मध्यसंस्थानानि चत्वारि मध्यसंहननानि एकान्नविंशतितमा तिर्यग्गतिप्रायोग्यानुपूर्वी विंशतितम उद्योतः एकविंशतितमी अप्रशस्तविहा- १० १५ २० २५

---

१ चेतनपरिणामो यः कर्मण आस्रवनिरोधने हेतुः । स भावसंवरः खलु द्रव्यास्रवरोधनेऽन्यः ॥ २ -भावेऽपि आ०, ज०, द० ।

योगतिः द्वाविंशतितमो दुर्भगः त्रयोविंशो दुःस्वरः [1]चतुर्विंशतितममनादेयं पञ्चविंशतितमं नीचैर्गोत्रमिति। अप्रत्याख्यानावरणकषायोदयकल्पितासंयमकारणानां दशानां प्रकृतीनामेके-न्द्रियादयो जीवा असंयतसम्यग्दृष्टिपर्यन्ता बन्धका भवन्ति। बन्धकाभावात् तदुपरि तासां दशानां प्रकृतीनां संवरो भवति। कास्ताः दश प्रकृतयः? अप्रत्याख्यानावरणक्रोधमानमायालो-
५ भाश्चत्वारः पञ्चमं मनुष्यायुः षष्ठी मनुष्यगतिः सप्तममौदारिकशरीरम् अष्टममौदारिकशरीराङ्गो-पाङ्गं नवमं वज्रर्षभनाराचसंहननं दशमं मनुष्यगतिप्रायोग्यानुपूर्व्यम्। सम्यग्मिथ्यात्वगुणेन आयुर्न बध्यते। प्रत्याख्यानावरणक्रोधमानमायालोभानां चतसृणां प्रकृतीनां प्रत्याख्यानकषायो-दयहेतुकासंयमास्रवाणामेकेन्द्रियादयो देशसंयतपर्यन्ता बन्धका भवन्ति। बन्धकाभावात्तदुपरि तासां संवरो भवति। प्रमादानीतस्य कर्मणः प्रमत्तसंयतादुपरि संवरो भवति। कस्मात्? तद-
१० भावात् बन्धकाभावात्। किं तत् कर्म? असद्वेद्यमरतिः शोकः अस्थिरः अशुभः अयशःकीर्तिः। देवायुर्बन्धारम्भस्य हेतुः प्रमाद एव तत्प्रत्यासन्नोऽप्रमादोऽपि हेतुः। तदुपरि तस्य संवरो भवति कषाय एवास्रवो यस्य कर्मणो न प्रमादादिस्तस्य कर्मणः प्रमादनिरोधनिरास्रवो ज्ञातव्यः। स च कषायः प्रमादादिविरहितः तीव्रमध्यमजघन्यत्वेन गुणस्थानत्रये व्यवस्थितः। तत्र अपूर्वकरण-गुणस्थानस्यादौ सङ्ख्येयभागे निद्राप्रचले द्वे कर्मप्रकृती बध्येते तदुपरि सङ्ख्येये भागे त्रिंश-
१५ त्प्रकृतयो बध्यन्ते। कास्ताः प्रकृतयः? देवगतिः पञ्चेन्द्रियजातिः वैक्रियिकाहारकतैजसकार्म-णानि चत्वारि शरीराणि समचतुरस्रसंस्थानं वैक्रियिकशरीराङ्गोपाङ्गम् आहारकशरीराङ्गोपाङ्गम्। वर्णो गन्धो रसः स्पर्शः देवगतिप्रायोग्यानुपूर्व्यम्[2] अगुरुलघुः उपघातः परघातः उच्छ्वासः प्रश-स्तविहायोगतिस्त्रसो बादरः पर्याप्तकः प्रत्येकशरीरं स्थिरः शुभः सुभगः सुस्वरः आदेयं निर्माणं [3]तीर्थंकरत्वञ्चेति। अपूर्वकरणस्यान्तसमये चतस्रः प्रकृतयो बन्धमायान्ति। कास्ताः?
२० हास्यं रतिर्भयं जुगुप्सा चेति। एताः षट्त्रिंशत्प्रकृतयः तीव्रकषायास्रवा भवन्ति। तदभा-वात् कथिताद् भागादुपरि संवरो भवति। अनिवृत्तिबादरसाम्परायस्य नवमस्य गुणस्थानस्य प्रथमसमयादारभ्य सङ्ख्येयेषु भागेषु पुंवेदः क्रोधसञ्ज्वलनश्च द्वौ बध्येते। तदुपरि सङ्ख्ये-येषु भागेषु मानमायासञ्ज्वलनौ बध्येते। अनिवृत्तिबादरसाम्परायस्यान्तसमये लोभसञ्ज्व-लनो बध्यते। एताः पञ्चप्रकृतयः मध्यमकषायास्रवाः। तदभावे कथितस्य भागस्योपरि संवरो
२५ भवति। सूक्ष्मसाम्पराये षोडशानां प्रकृतीनां बन्धो भवति। तदुपरि तासां संवरः। कास्ताः षोडशप्रकृतयः? पञ्च ज्ञानावरणानि चत्वारि दर्शनावरणानि यशःकीर्तिः उच्चैर्गोत्रं पञ्चान्त-रायाः। एताः मन्दकषायास्रवः षोडश। उपशान्तकषायक्षीणकषायसयोगकेवलिनामेकेनैव योगेन एकस्या एव प्रकृतेर्बन्धो भवति। तदभावात् अयोगकेवलिनस्तस्याः संवरो भवति। काऽसावेका प्रकृतिः? सद्वेद्यमिति।

अथाह कश्चित्—गुणस्थानेषु [4]संवरस्वरूपं निरूपितं भवद्भिः परन्तु गुणस्थानानां स्वरूपं

१ चतुर्विंशम- ता०। २ -पूर्वी आ०, ज०, द०। ३ तीर्थकरञ्चेति आ०, ज०, द०। ४ -संवररूपम् आ०, ज०, द०।

तावन्न विज्ञायते तत्स्वरूपं विज्ञापयितुं योग्यमिति गुणस्थानानां स्वरूपं निरूप्यते—तत्त्वार्थविपरीतरुचिः मिथ्यादृष्टिः प्रथमं गुणस्थानं भवति। दर्शनमोहस्य भेदास्त्रयः-सम्यक्त्वमिथ्यात्वसम्यग्मिथ्यात्वविकल्पात्। तेषामुदयाभावेऽनन्तानुबन्धिक्रोधमानमायालोभानां चोदयाभावे सति प्रथमसम्यक्त्वमौपशमिकं नाम समुत्पद्यते। तस्य कालोऽन्तर्मुहूर्तः। तस्यान्तर्मुहूर्तस्य मध्ये उत्कर्षेण आवलिकाषट्के उद्धरिते सति जघन्येनैकस्मिन् समये चोद्धरिते सति अनन्तानुबन्धिक्रोधमानमायालोभानां मध्ये अन्यतमस्योदये सति शेषस्य मिथ्यादर्शनकारणस्यानुदये सति सासादनसम्यग्दृष्टिर्जीव उच्यते। तद् द्वितीयं गुणस्थानं भवति। सासादनसम्यग्दृष्टेः मिथ्यादर्शनानुदयेऽपि अनन्तानुबन्ध्यन्यतमोदयान यत् ज्ञानत्रयं तदज्ञानत्रयमेव। कथमिति चेत्? यस्मात्कारणात्तेऽनन्तानुबन्धिनः कषाया अनन्तमिथ्यादर्शनानुबन्धनान्मिथ्यादर्शनोदयलक्षणं फलमुत्पादयन्ति मिथ्यादर्शनमेवात्मनि प्रवेशयन्ति। परिहृतसासादनगुणः पुमानवश्यमेव मिथ्यात्वगुणस्थानं गच्छतीति सासादनवर्णनम्। अथ मिश्रगुणस्थानस्वरूपं कथ्यते—सम्यग्मिथ्यात्वकर्मोदयात् मनाक्कलुषपरिणामः पुमान् भवति क्षीणाक्षीणमदशक्तिकोद्रवोत्पादितमनाक्कलुषपरिणामवत्। तेन कारणेन सम्यग्मिथ्यादृष्टिर्जीवस्तत्त्वार्थरुच्यरुचिरूपो भवति। सम्यग्मिथ्यादृष्टेः[1] पुरुषस्य यदज्ञानत्रयं तत्सत्यासत्यरूपं वेदितव्यम्। चारित्रमोहकर्मोदयाज्जीवोऽतीवाविरतो भवति सोऽसंयतसम्यग्दृष्टिरुच्यते। श्रावकव्रतानि प्रतिपालयन् पुमान् देशविरतो भवति तत्पञ्चमं गुणस्थानम्। अप्रमत्तोऽपि सन् अन्तर्मुहूर्तं प्रमादं भजन् प्रमत्तसंयतो भवति तत् षष्ठं गुणस्थानम्। यो जङ्घासेचनादिनिद्रादिप्रमादं न भजते स पुमान् अप्रमत्तसंयतो भवति तत् सप्तमं गुणस्थानम्। अपूर्वकरणमनिवृत्तिबादरसाम्परायसंज्ञं सूक्ष्मसाम्परायसंज्ञञ्च एतानि त्रीणि गुणस्थानानि अष्टमनवमदशमगुणस्थानानि भवन्ति। तेषु त्रिषु गुणस्थानेषु द्वे श्रेणी वर्तेते। उपशमकश्रेणिः क्षपकश्रेणिश्च। यस्यामात्मा मोहनीयं कर्म उपशमयन् आरोहति सा[2] उपशमकश्रेणिः। यस्यामात्मा मोहनीयं कर्म क्षपयन् आरोहति सा क्षपकश्रेणिरुच्यते। तत्रोपशमश्रेणिमान् पुमान् अष्टमं नवमं दशममेकादशञ्च गुणस्थानं गत्वा पतति। क्षपकश्रेणिमान् पुमान् अष्टमं नवमं दशमञ्च गुणस्थानं गत्वा एकादशं गुणस्थानं वर्जयित्वा द्वादशं क्षीणकषायसंज्ञमारोहति। अपूर्वकरणे अष्टमगुणस्थाने य उपशमकः क्षपकश्च वर्तते स जन्मापूर्वान् करणान् परिणामान् प्राप्नोति तेन तदष्टमं गुणस्थानमपूर्वकरणमित्युच्यते। अस्मिन् गुणस्थाने कर्मोपशमः कर्मक्षयो न वर्तते किन्तु सप्तमनवमगुणस्थानयोर्मध्ये पतितत्वात् उपशमः क्षपकश्चोपचारेणोच्यते घृतघटवत्। यथा मृन्मयोऽपि घटो घृतघट उच्यते घृतसमीपवर्तित्वात्। अस्मिन् गुणस्थाने नानाजीवाऽपेक्षया अन्तर्मुहूर्तस्य एकस्मिन्नपि क्षणेऽन्योन्यमवश्यमेव परिणामा विषमा भवन्ति, प्रथमक्षणे ये परिणामा उत्पन्नास्ते [3]परिणामाश्च अपूर्वाः परिणामाः द्वितीया-

१–दृष्टिपु– आ०, ज०, द०। २ उपशमश्रेणिः आ०, द०, ज०। ३ परिणामा अपूर्वाश्च परि– ता०।

दिषु क्षणेषु उत्पद्यन्ते तेनेदं गुणस्थानमपूर्वकरणमित्यन्वर्थसंज्ञं भवति। अथ अनिवृत्तिबादर-साम्परायगुणस्थानस्वरूपमुच्यते–साम्परायशब्दे कषायो लभ्यते यत्र साम्परायस्य कषायस्य स्थूलत्वेनोपशमः क्षयश्च वर्तते तदनिवृत्तबादरसाम्परायसंज्ञं गुणस्थानमुच्यते। तत्र जीवा उपशमकाः क्षपकाश्च भवन्ति। एकस्मिन् समये नानाजीवापेक्षयापि एकरूपाः परिणामाः

५ भवन्ति। यतः परिणामानां परस्परं स्वरूपानिवृत्तिस्तेन कारणेनानिवृत्तिकरणबादरसाम्पराय-संज्ञं नवमगुणस्थानमुच्यते। साम्परायस्य कषायस्य सूक्ष्मतया उपशमात् क्षपणाच्च सूक्ष्मसाम्प-रायसंज्ञं दशमं गुणस्थानं भवति। तत्रोपशमकाः क्षपकाश्च जीवा भवन्ति। [1]उपशान्तमोहसंज्ञं त्वेकादशं गुणस्थानं [2]तस्योपशमात्। क्षीणमोहसंज्ञं द्वादशन्तु गुणस्थानं सर्वस्य मोहस्य क्षपणात् भवति। सम्प्राप्तकेवलज्ञानदर्शनो जीवो यत्र भवति तत्सयोगिजिनसंज्ञं त्रयोदशं

१० गुणस्थानं भवति। पञ्चलघ्वक्षरकालस्थितिकमयोगिजिनसंज्ञं चतुर्दशं गुणस्थानं वेदितव्यम्। अपूर्वकरणगुणस्थानमादिं कृत्वा [3]क्षीणकषायगुणस्थानपर्यन्तेषु गुणस्थानेषु उत्तरोत्तरक्षणेषु जीवस्योत्कृष्टोत्कृष्टपरिणामविशुद्धिर्वेदितव्या। निकृष्टत्वेन मिथ्यात्वगुणस्थानस्य कालोऽन्तर्मु-हूर्तो भवति। अभव्यापेक्षया मिथ्यात्वगुणस्थानस्य काल उत्कृष्ट अनाद्यनन्तः, भव्यस्य मिथ्या-त्वगुणस्थाने कालोऽनादिसान्तः। सासादनस्य कालः उपशमसम्यक्त्वकालस्यान्तर्मुहूर्तलक्षणस्य

१५ प्रान्ते निकृष्ट एक समयः उत्कृष्ट आवलिषट्कम्। मिश्रस्य कालोऽन्तर्मुहूर्तः। असंयतसम्यग्दृष्टेर्नि-कृष्टः कालोऽन्तर्मुहूर्तः उत्कृष्टकालः षट्षष्टिसागरोपमाणि। देशसंयतस्य कालो निकृष्टो मुहूर्त-मात्रः उत्कृष्टस्तु पूर्वकोटी किञ्चिदूना। प्रमत्तसंयतादिक्षीणकषायपर्यन्तानामुत्कृष्टः कालोऽन्त-मुहूर्तः। सयोगिजिनकालः पूवकोटी किञ्चिदूना। जघन्यकालस्तु परमागमाद् वेदितव्यः। उप-शमश्रेणौ सर्वत्रोत्कृष्टः कालोऽन्तर्मुहूर्तमात्रः[4]।

२० अथेदानीं संवरस्य हेतुभूतान् भावसंवरविशेषान् संविवक्षुः सूत्रमिदमाह—

स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः ॥ २ ॥

भवकारणात् मनोवाक्कायव्यापारात् आत्मनो गोपनं रक्षणं गुप्तिः। सम्यगयनं जन्तुपीडापरित्यागार्थं वर्तनं समितिः। संसारसागरादुद्धृत्य इन्द्रनरेन्द्रधरणेन्द्रचन्द्रादिवन्दिते पदे आत्मानं धरतीति धर्मः। [5]कायादिस्वभावानुचिन्तनमनुप्रेक्षा। क्षुधातृषादिवेदना-

२५ समुत्पत्तौ उपार्जितकर्मनिर्जरणार्थं परि समन्तात् सहनं परीषहः तस्य जयः परीषहजयः। सामायिकादिपञ्चभेदसहितं चारित्रम्। गुप्तिश्च समितिश्च धर्मश्च अनुप्रेक्षा च परीषहजयश्च चारित्रञ्च गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्राणि तैर्गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचा-रित्रैः। एतैः षड्भिः सान्तर्भेदैः संयमपरिणामैः कृत्वा स पूर्वोक्तः संवरो भवति। करणनिर्दे-शेनैव पूर्वोक्तः संवरो विज्ञायते। स इति ग्रहणं किमर्थमिति चेत्? स ग्रहणं निर्धारणार्थम्।

३० तेनायमर्थः–गुप्त्यादिभिः कृत्वैव संवरो भवति जलनिमज्जनकपालग्रहणशिरोमुण्डनशिखाधारणा-

---

१ उपशान्तकषायमोह– आ०, द०, ज०। २ सर्वस्योप– ता०। ३ क्षीणकषायप– आ०, द०, ज०। ४–मात्रम् ता०। ५ कायादिस्वभावादिचि– आ०, द०, ज०।

दिदीक्षाचिह्नोद्वहननिजमस्तकच्छेदनदेवादिपूजनरागद्वेषादिमलिनदेवताराधनादिभिः संवरो न भवतीत्यर्थः । कस्मात् ? रागद्वेषमोहादिभिरुपार्जितस्य कर्मणोऽपरथा निवर्तनाभावात् ।

अथ संवरस्य निर्जरायाश्च कारणविशेषकथनार्थं सूत्रमिदमाचष्टे—

तपसा निर्जरा च ॥३॥

तपसा कृत्वा निर्जरा एकदेशकर्मगलनं भवति, चकारात्संवरश्च भवति । ननु दशलाक्षणिकधर्ममध्येऽपि तपो वर्तते तेनैव संवरनिर्जरे भविष्यतः किमर्थमत्र तपोग्रहणसूत्रम् ? युक्तमुक्तं भवता; अत्र तपोग्रहणं नूत्नकर्मसंवरणपूर्वककर्मक्षयकारणत्वप्रतिपादनार्थं प्रधानत्वेन संवरविधायकत्वकथनार्थं च तपोग्रहणमत्र वर्तते । [1] ननु तपः खल्वभ्युदयदायकमागमे प्रतिपादितं संवरनिर्जरासाधकं कथम् ? तथा चोक्तम्—

"दाणे लब्भइ भोउ पर इंदत्तणु वि तवेण ।
जम्मणमरणविवज्जियउ पउ लब्भइ णाणेण ॥"[2] [परमात्मप्र० २।७२]

साधूक्तं भवता—एकमपि तप इन्द्रादिपदं ददाति संवरनिर्जरे च करोति । यथैकमपि छत्रं छायां करोति घर्मजलनिषेधञ्च[3] कुर्यात् एकस्याप्यनेककार्यविलोकनाद्वह्निवत् । यथा एकोऽपि वह्निर्विक्लेदनादिकरणात् पावको भवति भस्मसात्करणाद् दाहकश्चोच्यते तथा तपोऽप्यभ्युदयकर्मक्षयकारणं भवतीति नास्त्यागमविरोधः ।

अथ गुप्त्यादीनां संवरहेतूनां स्वरूपनिरूपणार्थं प्रबन्धः [4]कथ्यते । तत्रादौ गुप्तिस्वरूपनिरूपणार्थं सूत्रमिदमाहुः—

सम्यग्योगनिग्रहो गुप्तिः ॥४॥

सम्यक्प्रकारेण लोकसत्कारख्यातिपूजालाभाकाङ्क्षारहितप्रकारेण योगस्य कायवाङ्मनःकर्मलक्षणस्य निग्रहो निरोधः सम्यग्योगनिग्रहो विषयसुखाभिलाषार्थप्रवृत्तिनिषेध इत्यर्थः । यः सम्यग्योगनिग्रहो मनोवाक्कायव्यापारनिषेधनं सा गुप्तिरित्युच्यते । योगनिग्रहे सति आर्त्तरौद्रध्यानलक्षणसंक्लेशप्रादुर्भावो न भवति तस्मिंश्च सति कर्म नास्रवति तेन गुप्तिः संवरप्रसिद्ध्यर्थं वेदितव्या । सा त्रिप्रकारा–कायगुप्तिवाग्गुप्तिमनोगुप्तिविकल्पात् ।

अथ गुप्तिषु यो मुनिरसमर्थो भवति तस्य मुनेः निष्पापप्रवृत्तिप्रतिपादनार्थं समितिसूत्रमुच्यते—

ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः ॥५॥

ईर्या च भाषा च एषणा च आदाननिक्षेपौ च उत्सर्गश्च ईर्याभाषैषणादाननिक्षेपोत्सर्गाः । एते पञ्च समितयो भवन्ति । सम्यक्शब्दः पूर्वसूत्रोक्तोऽत्रापि ग्राह्यः । तेनैवं सम्बन्धो भवति ।

---

१ ननु वरं तपः आ०, द०, ज० । २ "दानेन लभ्यते भोगः परं इन्द्रत्वमपि तपसा । जन्ममरणविवर्जितं पदं लभ्यते ज्ञानेन ॥" ३ –निषेधनञ्च ता० । ४ रच्यते ता० ।

सम्यगीर्यासमितिः सम्यग्भाषासमितिः सम्यगेषणासमितिः सम्यगादाननिक्षेपसमितिः[1] सम्यगुत्सर्गसमितिश्चेति। तत्र सम्यगीर्यासमितिरुच्यते–तीर्थयात्राधर्मकार्याद्यर्थं गच्छतो मुनेश्चतुःकरमात्रमार्गनिरीक्षणपूर्वकं सावधानदृष्टेरव्यग्रचेतसः सम्यक्विज्ञातजीवस्थानस्वरूपस्य सम्यगीर्यासमितिर्भवति। कानि तानि जीवस्थानानि? तत्स्वरूपनिरूपणार्थमियं गाथा—

५ "बादरसुहमेगिंदियबितिचउरिंदियअसण्णिसण्णी य।
पज्जत्तापज्जत्ता भूदा ये चोद्दसा होंति[2] ॥" [गो० जीव० गा० ७२]

सम्यग्भाषासमितिरुच्यते–हितं परिमितमसन्दिग्धं सत्यमनसूयं प्रियं कर्णामृतप्रायमशङ्काकरं कषायानुत्पादकं सभास्थानयोग्यं मृदु धर्माविरोधि देशकालाद्युचितं हास्यादिरहितं वचोऽभिधानं सम्यक्भाषासमितिर्भवति। सम्यगेषणासमितिरुच्यते—शरीरदर्शनमात्रेण प्राप्तमयाचितममृतसंज्ञमुद्गमोत्पादनादिदोषरहितमजिनहिङ्ग्वादिभिरस्पृष्टं परार्थं निष्पन्नं काले भोजनग्रहणं सम्यगेषणासमितिर्भवति। सम्यगादाननिक्षेपसमितिरुच्यते—धर्मोपकरणग्रहणविसर्जने सम्यगवलोक्य[3] मयूरबर्हेण प्रतिलिख्य तदभावे वस्त्रादिना प्रतिलिख्य स्वीकरणं विसर्जनञ्च सम्यगादाननिक्षेपसमितिर्भवति। एतेन गोपुच्छमेषरोमादिभिः प्रतिलेखनं मुनेः प्रतिषिद्धं भवति। सम्यगुत्सर्गसमितिरुच्यते—प्राणिनामवरोधेनाङ्गमलत्यजनं शरीरस्य च स्थापनं दिगम्बरस्योत्सर्गसमितिर्भवति। एते पञ्च प्राणिनां पीडापरिहारस्याभ्युपाया [5]अवसातव्याः। इत्थं प्रवर्तमानस्यासंयमपरिणामनिमित्तस्य कर्मण आस्रवाभावो भवति तेन च संवरः समाढौकते।

अथ संवरकारणस्य धर्मस्य विकल्पपरिज्ञानार्थं सूत्रमिदं ब्रुवन्ति—

उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्य-
ब्रह्मचर्याणि धर्मः ॥ ६ ॥

कायस्थितिकारणपिण्डाणाद्यन्वेषणाय परगृहान् पर्यटतो मुनेः दुष्टपापिष्ठपञ्चजनानामसह्यगालिप्रदान[6]कर्करवचनावहेलनपीडाजननकायविनाशनादीनां समुत्पत्तौ [7]मनोऽनच्छतानुत्पादः क्षमा कथ्यते।

"ज्ञानं पूजां कुलं जातिं बलमृद्धिं तपो वपुः।
२५ अष्टावाश्रित्य मानित्वं स्मयमाहुर्गतस्मयाः ॥" [रत्नक० श्लो० २५]

इति श्लोककथितस्याष्टविधस्य मदस्य समावेशात् परकृतपराभिभवनिमित्ताभिमानमुक्तिर्मार्दवमुच्यते। मृदोर्भावः कर्म वा मार्दवमिति निरुक्तेः। मनोवचनकायकर्मणामकौटिल्यमार्जवमभिधीयते। सत्सु दिगम्बरेषु महामुनिषु तदुपासकेषु च श्रेष्ठेषु लोकेषु साधु यद्वचनं तत्सत्यमित्य-

१ –निक्षेपणासमितिः आ०, द०, ज०। २ बादरसूक्ष्मैकेन्द्रियद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिनश्च। पर्याप्तापर्याप्ता भूता ये चतुर्दश भवन्ति ॥ ३ –गालोक्य आ०, द०, ज०। ४ –लोक्य दयोपकरणेन प्रति– आ०, द०, ज०। ५ अवस्थातव्याः आ०, द०, ज०। ६ –वर्वरव– आ०, द०, ज०। ७ मनोऽनवस्थानु– आ०, द०, ज०।

भिलप्यते । ननु सत्यवचनं भाषासमितावन्तर्गर्भितं वर्तत एव किमर्थमत्र तद्ग्रहणम् ? साधूक्तं भवता ; भाषासमितौ प्रवर्तमानो यतिः साधुषु असाधुषु च भाषाव्यापारं विदधन् हितं मितञ्च ब्रूयात् , [1]अन्यथा असाधुषु अहितभाषणेऽमितभाषणे च रागानर्थदण्डदोषो भवेत्, तदा तस्य का भाषासमितिः न कापीत्यर्थः । सत्यवचने त्वयं विशेषः–सन्तः प्रव्रज्यां प्राप्तास्तद्भक्ताः वा ये वर्तन्ते तेषु यद्वचनं साधु तत् सत्यम् , तथा च ज्ञानचारित्रादिशिक्षणे प्रचुरमपि अमितमपि वचनं वक्तव्यम्। इतीदृशो भाषासमितिसत्यवचनयोर्विशेषो वर्तते । [2]उत्कृष्टतासमागतगार्द्धय-परिहरणं शौचमुच्यते । मनोगुप्तौ मानसः परिस्पन्दः सर्वोऽपि [3]निषिध्यते तन्निषेधे योऽसमर्थस्तस्य परकीयवस्तुषु अनिष्टप्रणिधानपरिहरणं शौचमिति मनोगुप्तिशौचयोर्महान् भेदः । भगवती-आराधनायां तु[4] शौचस्य लाघवमित्यपरसंज्ञा वर्तते । धर्मोपचयार्थं धर्मोपबृंहणार्थं समितिषु प्रवर्तमानस्य पुरुषस्य तत्प्रतिपालनार्थं प्राणव्यपरोपणषडिन्द्रियविषयपरिहरणं संयम उच्यते । स संयमो द्विविधः—अपहृतसंज्ञक उपेक्षासंज्ञकश्च । तत्र अपहृतसंज्ञकस्त्रिविधः । तद्यथा–प्रासुकवसतिभोजनादिमात्रबाह्यसाधनस्य स्वाधीनज्ञानादिकस्य मुनेर्जन्तूपनिपाते आत्मानं ततोऽपहृत्य दूरीकृत्य जीवान् पालयत उत्कृष्टः संयमो भवति । मृदुना[5] मयूरपिच्छेण प्रमृज्य परिहरतो मध्यमः संयमः । उपकरणान्तरेण प्रमृज्य परिहरतो निकृष्टः संयमः इत्यपहृतसंयमस्त्रिविधः । अथोपेक्षासंयम उच्यते—देशकालविधानज्ञस्य परेषामनुरोधेन व्युत्सृष्टकायस्य त्रिगुप्तिगुप्तस्य मुनेः रागद्वेषयोरनभिष्वङ्ग उपेक्षासंयमः । उपार्जितकर्मक्षयार्थं तपस्विना तप्यते इति तपः,तद् द्वादशविधं वक्ष्यमाणविस्तरं ज्ञातव्यम्। संयमिनां योग्यं ज्ञानसंयमशौचोपकरणादिदानं त्याग उच्यते । नास्ति अस्य किञ्चन किमपि अकिञ्चनो निष्परिग्रहः तस्य भावः कर्म वा आकिञ्चन्यम्। निजशरीरादिषु संस्कारपरिहाराय ममेदमित्यभिसन्धिनिषेधनमित्यर्थः । तदाकिञ्चन्यं चतुःप्रकारं भवति–स्वस्य परस्य च जीवितलोभपरिहरणं स्वस्य परस्य च आरोग्यलोभपरिहणं स्वस्य परस्य च इन्द्रियलोभपरित्यजनं स्वस्य परस्य चोपभोगलोभोज्झनञ्चेति । पूर्वानुभुक्तवनितास्मरणं वनिताकथास्मरणं वनितासङ्गासक्तस्य शय्यासनादिकञ्च अब्रह्म तद्वर्जनात् ब्रह्मचर्यं परिपूर्णं भवति । स्वेच्छाचारप्रवृत्तिनिवृत्त्यर्थं गुरुकुलवासो वा ब्रह्मचर्यमुच्यते । गुप्तिसूत्रं प्रवृत्तिनिग्रहार्थम्, तत्रासमर्थानां [6]प्रवृत्त्यभ्युपायप्रदर्शनार्थं द्वितीयं समितिसूत्रम्। इदन्तु तृतीयं सूत्रं दशविधधर्मकथकं पञ्चसमितिषु प्रवर्तमानस्य मुनेः प्रमादपरिहरणार्थं बोद्धव्यम् । क्षमा च मार्दवञ्च आर्जवञ्च सत्यञ्च शौचञ्च संयमश्च तपश्च त्यागश्च आकिञ्चन्यञ्च ब्रह्मचर्यञ्च क्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्याणि । उत्तमानि दृष्टप्रयोजनपरिवर्जनानि च तानि क्षमादीनि तानि तथोक्तानि, एतानि दश धर्म इति धर्मसंज्ञानि संवरकारणानि वेदितव्यानीति क्रियाकारकसम्बन्धः । तप्तलोहपिण्डवत् क्रोधादिपराभूतेन मुनिना उत्तमक्षमादीनि स्वपरहितैषिणा कर्तव्यानि ।

१ अन्यथा साधुषु ता० । २ उत्कृष्टसमा– आ०, द०, ज० । ३ निषेध्यते आ०, द०, ज० । ४ "अज्जवमद्दवलाघवतुट्ठी पल्हादणं च गुणा" भग० आरा० गा० ४०० । ५ मृदुना दयापकरणेन प्र– आ०, द०, ज० । ६ प्रवृत्तिनिवृत्त्यभ्यु– आ०, द०, ज० ।

अथेदानीमनुप्रेक्षानिरूपणार्थं सूत्रमिदमुच्यते—

अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्यातत्त्वानुचिन्तनमनुप्रेक्षाः ॥ ७ ॥

अनित्यश्च अशरणश्च संसारश्च एकत्वञ्च अन्यत्वञ्च अशुचिश्च आस्रवश्च निर्जरा ५ च लोकश्च बोधिदुर्लभा च धर्मश्च अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मास्तेषां स्वाख्याः निजनिजनामानि तासां तत्त्वमर्थस्तस्यानुचिन्तनं पुनः पुनः स्मरणमनुप्रेक्षा भवति। न नित्यमनित्यम्। न शरणमशरणम्। संसरन्ति पर्यटन्ति यस्मिन्निति संसारः। एकस्यात्मनो भाव एकत्वम्। शरीरादेरन्यस्य भावोऽन्यत्वम्। न शुचिः कायोऽशुचिः। आस्रवतीति आस्रवः। कर्मागमनं संवृणोति अभिनवकर्मप्रवेशं कर्तुं न ददाति इति १० संवरः। एकदेशेन कर्मणां निर्जरणं गलनमधःपतनं शटनं निर्जरा। लोक्यन्ते जीवादयः पदार्था यस्मिन् इति लोकः। बोधनं बोधिः संसारभोगवैराग्यमित्यर्थः। बोधिश्चासौ दुर्लभा बोधिदुर्लभा। उत्तमपदे धरतीति धर्मः। इति निजनिजनामानुसारेण तत्त्वानुचिन्तनमनुप्रेक्षा [1]भवतीति संक्षेपेणानुप्रेक्षार्थो ज्ञातव्यः।

अथ किञ्चिद् विस्तरेणार्थः कथ्यते—काय इन्द्रियविषया भोगोपभोगव- १५ स्तूनि समुदायप्राप्तानि यानि वर्तन्ते तानि सर्वाणि अनित्यानि अध्रुवाणि अनवस्थितस्वरूपाणि वर्तन्ते। किंवत्? मेघजालवत् इन्द्रचापवत् विद्युदुन्मेषवत्[2] जलबुद्बुदवत् गिरिनदीप्रवाहवत् खलजनमैत्रीवत् चेत्यादयो दृष्टान्तास्तत्र बहवः सन्ति। गर्भाद्यवस्थाविशेष[3]सदोपलभ्यमानसंयोगविपर्ययत्वात् पूर्वोक्तेषु जडो जीवो ध्रुवत्वं मनुते, न च किञ्चित् [4]संसारे समुत्पन्नं वस्तु ध्रुवं विलोक्यते जीवस्य ज्ञानदर्शनोपयोग- २० स्वरूपादन्यत्रेति[5] चिन्तनमनित्यत्वानुप्रेक्षा भवति। तां चिन्तयतो भव्यजीवस्य शरीरपुत्रकलत्रादिषु भोगोपभोगेषु अनुबन्धो न भवति, वियोगावसरेऽपि दुःखं नोत्पद्यते, भुक्तोज्झितस्रक्चन्दनादिषु यथा विरक्तो भवति तथा शरीरादिषु विरक्तो भवति। १। यथा मृगबालकस्य निर्जने वने बलवता मांसाकाङ्क्षिणा क्षुधितेन द्वीपिना गृहीतस्य किञ्चिच्छरणं न वर्तते तथा जन्मजरामरणरोगा[6]दिदुःखमध्ये पर्यटतो जीवस्य किमपि शरणं न वर्तते, सम्पुष्टोऽपि २५ कायः सहायो न भवति भोजनादन्यत्र [7]दुःखागमने। प्रयत्नेन सञ्चिता अपि [8]रायो भवान्तरं नानुगच्छन्ति। संविभक्तसुखा अपि सुहृदो मरणकाले न परिरक्षन्ति। रोगग्रस्तं पुमांसं सङ्गता अपि बान्धवा न प्रतिपालयन्ति। सुचरितो जिनधर्मो दुःखमहासमुद्रसन्तरणोपायो भवति। यमेन नीयमानमात्मानमिन्द्रधरणेन्द्रचक्रवर्त्यादयोऽपि शरणं न भवन्ति, तत्र जिनधर्म

---

१ भवन्तीति आ०, द०, ज०। २ –मेघवत् आ०, द०, ज०। ३ –शेषमदोप– आ०, द०, ज०। ४ संसारस– आ०, द०, ज०। ५ –न्यत्वेति ता०। ६ –रोगादिषु दुः– आ०, द०, ज०। ७ दुःखागमे आ०, द०, ज०। ८ धनानि।

एव शरणम् । एवं भावना अशरणानुप्रेक्षा भवति । एतां भावनां भावयतो भव्यजीवस्य भवसमुद्भवभावेषु ममता न भवति, रत्नत्रयमार्गे सर्वज्ञवीतरागप्रणीते निश्चलो भवति ।२। पूर्वोक्तपञ्चप्रकारे[1] संसारे नानाकुयोनिकुलकोटयनेकशतसहस्रसङ्कटे पर्यटन् जीवो विधियन्त्र-चोदितो यः पिता स कदाचिद् भ्राता स एव पुत्रः पौत्रश्च सञ्जायते । या जननी सा भगिनी भवति कदाचिद् भार्या कदाचित् पुत्री कदाचित् पौत्री च भवति । यः स्वामी वर्तते सः दासोऽपि ५ भवति यो दासो वर्तते स स्वामी चकास्ति । एवं रङ्गगतशैलूषवज्जीवो नानावेषान् धरति । किमन्यदुच्यते, स्वस्य स्वयं पुत्रो भवति । एवं संसारस्वरूपानुचिन्तनं कुर्वतो भव्यजीवस्य संसारदुःखाद् भयमुत्पद्यते, तस्माच्च वैराग्यं जायते । तेन तु संसारसमुद्रतरणे प्रयत्नं [2]कुरुते इति संसारानुप्रेक्षा ।३। आत्मा एक एव जन्म प्राप्नोति तथा जरां मरणञ्च । तद्दुःखमेक एव भुङ्क्ते जीवस्य परमार्थतो न कश्चिद् बन्धुर्वर्तते न शत्रुर्जागर्ति एक एव जायते एक १० एव म्रियते । व्याधिजरामरणादिदुःखानि स्वजनो परजनो वा न सहते[3] बन्धुवर्गो मित्रवर्गश्च पितृवनात् परतो नानुगच्छति । अविनश्वरो जिनधर्म एव जीवस्य सर्वदा सहायो भवतीति चिन्तयतो भव्यजीवस्य[4] स्वजनपरजनेषु प्रीत्यप्रीती नोत्पद्येते तस्माच्च निस्सङ्गो भवति ततश्च मुक्तावेवोत्तिष्ठते इत्येकत्वानुप्रेक्षा ।४। जीवात् कायादिकस्य पृथक्त्वानुचिन्तनमन्यत्वानुप्रेक्षा भवति । तथाहि—जीवस्य[5] बन्धं प्रति एकत्वे सत्यपि लक्षणभेदात् काय १५ इन्द्रियमय आत्माऽनिन्द्रियोऽन्यो वर्तते, कायोऽज्ञ आत्मा ज्ञानवान्, कायोऽनित्य आत्मा नित्यः काय आद्यन्तवान् आत्मा अनाद्यन्तवान्, कायानां बहूनि कोटिलक्षाणि अतिक्रान्तानि आत्मा संसारे निरन्तरं परिभ्रमन् स एव तेभ्योऽन्यो वर्तते । एवं यदि जीवस्य कायादपि पृथक्त्वं वर्तते तर्हि कलत्रपुत्रगृ[6]हवाहनादिभ्यः पृथक्त्वं कथं न बोभोति अपि तु बोभवीत्येव । एवं भव्यजीवस्य समाहितचेतसः कायादिषु निःस्पृहस्य तत्त्वज्ञानभावनापरस्य कायादेर्भिन्नत्वं २० चिन्तयतो वैराग्योत्कृष्टता भवति । तेन तु अनन्तस्य मुक्तिसौख्यस्य प्राप्तिर्भवतीत्यन्यत्वानु-प्रेक्षा । ५ । अयं कायोऽतीवाशुच्युत्पत्तिस्थानं दुर्गन्धोऽपवित्रो मृदुधातुरुधिरसमेधितो वर्चो-गृहवदशुचिभाण्डं मक्षिकापक्षसदृशच्छविमात्रप्रच्छादितोऽतिदुर्गन्धरसनिस्यन्दिस्रोतोबिल-समाकुलः पवित्रमपि वस्तु समाश्रितं तत्क्षणमेव निजरवं प्रापयति अङ्गारवत् । अस्य कायस्य जलादिप्रक्षालनचन्दनकर्पूरकुङ्कुमाद्यनुलेपनराजाह्लादिधूपनेष्टकादिप्रघर्षणचूर्णादिवासनपुष्पादिभि- २५ रधिवासनादिभिरशुचित्वमपाकर्तुं न शक्यते । सम्यग्दर्शनज्ञानचारित्राणि पुनर्भाव्यमानानि जीवस्यातिविशुद्धिं कुर्वन्तीति चिन्तयतो भव्यजीवस्य [7]वर्ष्मणि वैराग्यं समुत्पद्यते, तेन तु संसारसमुद्रसन्तरणाय मनः सावधानं भवतीत्यशुचित्वानुप्रेक्षा । ६ । इह जन्मनि परत्र-च[8] आस्रवा जीवस्यापायं कुर्वन्ति । इन्द्रियकषायाव्रतक्रिया महानदीप्रवाहवेगवत्तीव्रा भवन्ति ।

---

१ प्रकारसं– आ०, द०, ज० । २ कुरु इति आ०, द०, ज० । ३ नापहरति ता० । ४ स्वजने पर– आ०, द०, ज० । ५ –स्य सम्बन्ध– आ०, द०, ज० ६ –गृहगवादिभ्यः ता० । ७ वर्ष्मभिः आ०, द०, ज० । ८ पसवा आ०, द०, ज० ।

स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि इन्द्रियाणि यथासख्यं गजमत्स्यभ्रमरशलभमृगादीन् दुःखार्णवे पातयन्ति, क्रोधमानमायालोभाश्च शिपिविष्टबाहुबलिकृष्णचमरादिवत् वधबन्धापकीर्तिपरिक्लेशप्रभृतीन् प्रतिपादयन्ति । इह जन्मनि परत्र च नरकादिगतिगर्तेषु नानादुःखाग्निप्रज्वलितेषु पर्यटयन्ति । एवमाद्यास्रवदोषानुचिन्तने भव्यजीवस्य उत्तमक्षमादिभिः शुभम-
५ तिर्न परिस्खलतीत्यास्रवानुप्रेक्षा ।७। यः पुमान् कच्छपवत् संवृतात्मा भवति तस्यापदो न भवन्ति विकृता इव।[1] यथा महासमुद्रे नौकायाः छिद्रपिधानेऽविद्यमाने क्रमेण प्रविष्टजलेन नावो निमज्जने सति नावाश्रितानामवश्यमेव विनाशो भवति विवरपिधाने तु निर्विघ्न वाञ्छितदेशान्तरप्राप्तिर्भवति तथा कर्मागमनद्वारसंवरणे सति श्रेयःप्रतिबन्धो न भवति।
[2]एवमाध्यायतो जीवस्य संवरणे नित्यमेवोद्यम उत्पद्यते संवराच्च निर्वाणपदप्राप्तिर्भवतीति
१० संवरानुप्रेक्षा ।८। अबुद्धिपूर्वा कुशलमूला च निर्जरा द्विप्रकारा भवति । तत्राऽबुद्धिपूर्वा अकुशलानुबन्धापरनामिका नरकादिषु कर्मफलोदयजा जायते । परीषहसहने तु शुभानुबन्धा निरनुबन्धा च द्विप्रकारापि कुशलमूला निर्जरा उच्यते । एवं निर्जरायाः दोषान् गुणांश्च भावयतो भव्यजीवस्य कर्मनिर्जरणार्थं [3]प्रवृत्तिर्भवतीति निर्जराऽनुप्रेक्षा ।९। अधस्तादुपरि तिर्यक् च सर्वत्राकाशोऽनन्तो वर्तते तस्यानन्ताकाशस्यालोकाकाशापरसंज्ञस्यातिशयेन मध्यप्रदेशे लोको वर्तते
१५ तस्य लोकस्य स्वभावसंस्थानाद्यनुचिन्तनं कुर्वतो भव्यजीवस्य तत्त्वज्ञानस्य विशुद्धिर्भवतीति लोकानुप्रेक्षा । १० । एकस्मिन् निगोताङ्गे सिद्धानामनन्तगुणा जीवा भवन्ति एवं विश्वोऽपि लोकः स्थावरैः प्राणिभिर्निरन्तरम्भृतो वर्तते तस्मिन् लोके त्रसत्वं दुर्लभम् । किंवत् ? महार्णवे पतितवज्रसिकताया एकं रजोवत् । तत्र च त्रसेषु विकलत्रयं भूयिष्ठं वर्तते । तत्र पञ्चाक्षत्वमतिदुर्लभम् । किंवत् ? सर्वगुणेषु कृतज्ञतावत् । तत्रापि पञ्चेन्द्रियाः पशवो मृगाः पक्षिणः
२० करकेन्दुकादयो बहवो वर्तन्ते तेषु पञ्चेन्द्रियेष्वपि मनुष्यजन्मातीवदुर्लभम् । किंवत् ? मार्गे पतितरत्नोच्चयवत् । मनुष्यजन्मनिर्गमने तु पुनर्मनुष्यजन्मप्राप्तिरतीवदुर्लभा । किंवत् ? भस्मीभूतवृक्षस्य भस्मनः पुनः तरुभवनवत् । मनुष्यजन्मप्राप्तौ च सुदेशो दुर्लभस्तस्मिन् [4]सुकुलं दुर्लभं तस्मिन्निन्द्रियाणि दुर्लभानि तेषु सम्पदो दुर्लभास्तासु आरोग्यताऽतिदुर्लभा एतेषु विश्वेष्वपि सामग्र्येषु प्राप्तेषु जैनधर्मश्चेन्न भवेत्तर्हि मनुष्यजन्म
२५ निरर्थकं भवति । किंवत् ? लोचनविहीनवदनवत् । एवं कष्टलभ्यं जिनधर्मं प्राप्य यो विषयसुखेषु रज्जति स पुमान् भस्मने गन्धसारतरुवरं दहति । यस्तु विषयसुखेभ्यो विरक्तस्तस्य तपोभावनाधर्मभावनासुखमरणादिलक्षणोपलक्षिता समाधिरतीव दुर्लभः । समाधौ च सति विषयसुखविरक्ततालक्षणो बोधिलाभः सफलो भवति । एवं भावयतो भव्यजीवस्य बोधिं लब्ध्वा कदाचिदपि प्रमादो न भवतीति बोधिदुर्लभानुप्रेक्षा । ११ । सर्वज्ञवीतरागप्रणीतः
३० सर्वजीवदयालक्षणः सत्याधिष्ठानो विनयमूल उत्तमक्षमाबलः ब्रह्मचर्यगुप्त उपशमप्रधानो

---

१ विप्रकृता इव ता० । २ एवमात्यायध्यायतो ता० । ३ प्रकृति- ता० । ४ सत्कुलम् ता० ।

नियतिलक्षणो विषयव्यावृत्तिरूप इत्यर्थः निष्परिग्रहतालम्बनो धर्मो भवति, अस्य धर्मस्यालाभात् प्राणिनोऽनादिकाले संसारे पर्यटन्ति पापकर्मोदयसमुत्पन्नमसातं भुञ्जते, धर्मस्य तु प्राप्तौ नानाऽभ्युदयसुखं भुक्त्वा परमनिर्वाणं लभन्ते, इति चिन्तनं कुर्वतो भव्यजीवस्य धर्मे अकृत्रिमः स्नेहो भवति तेन[1] तु सदा तं प्रतिपद्यते इति धर्मानुप्रेक्षा ।१२। एवं द्वादशानुप्रेक्षा सन्निधाने जीव उत्तमक्षमादीन् धरति तेन त्वतिशयेन संवरो भवति । अनुप्रेक्षां भावयन् ५ पुमान् उत्तमक्षमादीन् प्रतिपालयति परीषहांश्च सहते तेन द्वयोर्मध्येऽनुप्रेक्षाग्रहणम् । [2]भवन्ति चात्र काव्यानि—

अध्रौव्यं भुवने न कोपि शरणं [3]दृष्टो भवश्चैकता
, जन्तोरन्यतयाऽशुचिस्तनुरियं कर्मास्रवः संवरः ।
सारं निर्जरणं विधेरसुखकृल्लोको दुरापा भवे १०
बोधिर्दुर्लभधर्म एव सदनुप्रेक्षा इति द्वादश ॥

[4]सद्दृग्बोधचरित्ररत्ननिचयं मुक्त्वा शरीरादिकं
न स्थेयोऽभ्रतडित्सुरेन्द्रधनुरम्भोबुद्बुदाभं क्वचित् ।
एवं चिन्तयतोऽभिषङ्गविगमः स्याद्भुक्तमुक्ताशने
यद्वत्तद्विलयेऽपि नोचितमिदं संशोचनं श्रेयसे ॥ १५

नो कश्चिच्छरणं नरस्य मरणे जन्मादिदुःखोत्करे
व्याघ्राघ्रातमृगात्मजस्य विजने वाब्धौ पतत्रेरिव ।
पोताद् भ्रष्टतनोर्धनं [5]तनुरमा जीवेन पुत्रादयो
नो यान्त्यन्यभवं परन्तु शरणं धर्मः सतामर्हतः ॥

जीवः कर्मवशाद् भ्रमन् भववने भूत्वा पिता जायते २०
पुत्रश्चापि निजेन मातृभगिनीभार्यादुहित्रादिकः ।
राजा पत्तिरसौ नृपः पुनरिहाप्यन्यत्र शैलूषवत्
नानावेषधरः कुलादिकलितो दुःख्येव मोक्षादृते ॥

संसारप्रभवं सुखासुखमथो निर्वाणजं सच्छिवं
भुञ्जेऽहं खलु केवलो न च परो बन्धुः श्मशानात् परम् । २५
नायात्येव सहायतां व्रजति मे धर्मः सुशर्मद्रुमः
स्फूर्जज्जीवनदः सदाऽस्तु महतामेकत्वमेतच्छ्रिये ॥

नोऽनित्यं जडरूपमैन्द्रियकमाद्यन्ताश्रितं वर्ष्म यत्
सोऽहं तानि बहूनि चाश्रयमयं खेदोऽस्ति सङ्गादतः ।

---

१ तेन सदा आ०, द०, ज० । २ भवति चात्र काव्यम् आ०, द०, ज०, । ३ दुष्टो आ०, द०, ज० । ४ आ०,द०,ज० प्रतिषु न सन्ति एते श्लोकाः । ५ तनुः शरीरम् जीवेन अमा-सह इत्यर्थः ।

नीरक्षीरवदङ्गतोऽपि यदिमेऽन्यत्वं ततोऽन्यद्भृशं
साक्षात्पुत्रकलत्रमित्रगृहरैरत्नादिकं मत्परम् ॥

अङ्गं शोणितशुक्रसम्भवमिदं विण्मूत्रपात्रं न च
स्नानालेपनधूपनादिभिरदः पूतं भवेज्जातुचित् ।
५ कर्पूरादिपवित्रमत्र निहितं तच्चापवित्रं यथा
पीयूषं विषमङ्गनाधरगतं रत्नत्रयं शुद्धये ॥

स्पर्शान्नागपती रसात्तिमिरगाद् गन्धात् त्वयं षट्पदो
रूपाच्चैव पतङ्गको मृगततिर्गीतात् कषायापदाम् ।
शर्वो दोर्बलिधर्मपुत्रचमरा दृष्टान्तभाजः क्रमा-
१० द्धिंसादेर्धनसम्पदादिकगणः कर्मास्रवः किं मुदे ॥

वाराशौ जलयानपात्रविवरप्रच्छादने तद्गतो
यद्वत् पारमियर्ति विघ्नविगतः सत्संवरः स्यात्तथा ।
संसारान्तगतश्चरित्रनिचयाद्धर्मादनुप्रेक्षणाद्
वैराग्येण परीषहक्षमतया संपद्यतेऽसौ चिरात् ॥

१५ श्वभ्रादौ विधियोगतो भवति या पापानुबन्धा च सा
तामाप्नोति कुधीरबुद्धिकलितः पुण्यानुबन्धा परा ।
गुप्त्यादिश्च परीषहादिविजयाद्या सत्तपोभिः कृता
सद्भिः सा प्रविधीयते मुनिवरैः चेत्थं द्विधा निर्जरा ।

पाताले नरका निकोतनिलयो मध्ये त्वसंख्ये मताः
२० सद्भिर्द्वीपमहार्णवाश्च गिरयो नद्यो मनुष्यादयः ।
सूर्याचन्द्रमसादयश्च गगने देवा दिवीत्थं त्रिधा
लोको वातनिवेशितोऽस्ति न कृतो रुद्रादिभिः शाश्वतः ॥

सिद्धानन्तगुणा निकोतवपुषि स्युः प्राणिनः स्थावरैः
लोकोऽयं निचितस्त्रसत्ववरपञ्चाक्षत्वदेशान्वयम् ।
२५ दुःप्रापं खविरुक्सुधर्मविषया भावं विरागं तपो
धर्मद्योतसुखा मुमोचनमियं बोधिर्भवेद् दुर्लभा ॥

लक्ष्म प्राणिदयादि सद्विनयता मूलं क्षमादि स्मृतम्
स्वालम्बस्तु परिग्रहत्यजनता धर्मस्य सोऽयं जिनैः ।
प्रोक्तोऽनेन विना भ्रमन्ति भविनः संसारघोरार्णवे
३० तस्मिन्नभ्युदयं भजन्ति सुधियो निःश्रेयसं जाग्रति ॥

एता द्वादश भावना विरचिता वैराग्यसंवृद्धये
विद्यानन्दिभुवाऽनुरागवशतो धर्मस्य धीमच्छ्रये ।
दोषज्ञश्रुतसागरेण विदुषां दोषौघविच्छित्तये
येऽन्तः सम्यगनुस्मरन्ति मुनयो नित्यं पदं यान्ति ते ॥

अथ परीषहसहनफलप्रदर्शनेनोत्साहनार्थं सूत्रमिदमाहुः— ५

मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः ॥८॥

मार्गात् संवरणलक्षणादच्यवनमप्रच्युतिरस्खलनमिति यावत् मार्गाच्यवनम् । निर्जरा :कर्मणां गलनं पतनं शटनमेकदेशेन क्षयकरणमित्यर्थः । मार्गाच्यवनं निर्जरा च मार्गाच्यवननिर्जरे तयोरर्थः प्रयोजनं यस्मिन् परीषहसहनकर्मणि तत् मार्गाच्यवननिर्जरार्थम् । परिषोढव्याः परि समन्तात् सहनीया मर्षणीयाः क्षमितव्या इत्यर्थः । ते के ? परीषहाः । १० वक्ष्यमाणलक्षणोपलक्षिताः क्षुधादयो द्वाविंशतिः । अथवा मार्गः सम्यग्दर्शनज्ञानचारित्राणि तस्मादच्यवनं तदनुशीलनं तदभ्यसनम्, तदर्थं निर्जरार्थञ्च परीषहाः षोढव्याः । तेषां सहनेन कर्मणामागमनद्वाराणि पिहितानि भवन्ति । तच्च संवर एव कथ्यते । औपक्रमिकं कर्म्मणां फलं भुञ्जाना मुनयो निर्जीर्णकर्माणश्च क्रमान्मोक्षं लभन्ते । तेनायमर्थः-संवरनिर्जरामोक्षाणां साधनं परीषहसहनमित्यर्थः । १५

अथ परीषहस्वरूपं परीषहसङ्ख्याञ्च परिज्ञापयितुं सूत्रमिदमाहुः—

क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाचनाऽलाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाऽज्ञानादर्शनानि ॥ ९ ॥

क्षुच्च बुभुक्षा, पिपासा च उदकादिपानेच्छा, शीतञ्च [1]शैशिर्यम् [2]उष्णश्च परिताप- २० लक्षणः, दंशमशकाश्च वनमक्षिकाः क्षुद्रजन्तुविशेषाः,नग्नस्य भावः कर्म वा नाग्न्यम्, नाग्न्यञ्च अरतिश्च स्त्री च चर्या च निषद्या च शय्या च आक्रोशश्च वधश्च याचना च अलाभश्च रोगश्च तृणस्पर्शश्च मलश्च सत्कारपुरस्कारश्च प्रज्ञा च अज्ञानञ्च अदर्शनञ्च तानि तथोक्तानि । इतरेतरद्वन्द्वः । एते सर्वे वेदनाविशेषाः द्वाविंशतिपरीषहाः मुमुक्षुणा सहनीयाः । सङ्ख्या निरूपिता । इदानीं स्वरूपं निरूप्यते-यो मुनिर्निरवद्यमाहारं मार्गयति तस्याहारस्याप्राप्तौ २५ स्तोकाहारप्राप्तौ वा अप्रनष्टवेदनोऽपि सन् अकालेऽयोग्यदेशे च भुक्तिं नेच्छति, षडावश्यकपरिहाणिमीषदपि न सहते, ज्ञानध्यानभावनापरो भवति, बहून वारान् स्वयमेवानशनमवमौदर्यञ्च कृतवान् वर्तते, अनेकवारांश्च परकारितमनशनमवमौदर्यञ्च कृतवान् वर्तते,

१ शैशर्यम् आ०, द०, ज० । २ उष्णश्च परितापलक्षणम् आ०, द०, ज० ।

रसहीनभोजनञ्च [1]विधत्ते, तेन च शीघ्रमेव परिशुष्यच्छरीरो भवति। किंवत् ? तप्ताम्बरीषनिपतितकतिपयाम्बुबिन्दुवत्। समुद्भूतबुभुक्षावेदनोऽपि सहनशीलः सन् पुरुषो यो भिक्षालाभादलाभं बहुगुणं मन्यते, [2]क्षुधाबाधां प्रति चिन्तां न कुरुते, तस्य क्षुत्परीषहविजयो वेदितव्यः ।१। यो मुनिर्नदीतडागवापीप्रमुखजलमज्जनजलावगाहनजलपरिषेचनपरित्यागी भवति, अनियतोपवेशनस्थाना (नोऽ) नियतवसतिश्च भवति। किंवत् ? पक्षिवत्। अतिक्षारातिस्निग्धातिरूक्षातिविरुद्धभोजने सति ग्रीष्मत्वातपदाहज्वरोपवासादिभिः कायेन्द्रियोन्माथिनीं समुद्भूतां तृषं न प्रतिचिकीर्षति, तृड्वह्निज्वालां सन्तोषेणाभिनव[3]मृदुनिपूर्णशिशिरसुरभिपानीयेन यः प्रशमयति स पिपासापरीषहविजयं लभते ।२। यो मुनिः परिहृतपञ्चवस्त्रो भवति अनियतावासश्च भवति। किंवत् ? पक्षिवत्। वृक्षमूले चतुष्पथे पर्वताग्रे [4]वर्षादित्रिषु कालेषु तिष्ठति, भूञ्झावातसम्पातं महद्धिम[5]मातपञ्च सहते, तत्प्रतीकार[6]प्राप्तिव्यपगतकाङ्क्षो भवति, पूर्वानुभूतपावकादिशीतप्रतीकारहेतुभूतद्रव्याणां नाध्येति, सम्यग्ज्ञानभावनागर्भगृहे यो वसति तस्य शीतपरीषहविजयो वेदितव्यः।३। यो मुनिर्निर्मरुति निरम्भसि तपतपनरश्मिपरिशुष्कनिपतितच्छदरहितच्छायवृक्षे विपिनान्तरे स्वेच्छया स्थितो भवति, असाध्यपित्तोत्पादितान्तर्दाहश्च भवति, दावानलदाहपरुषमारुतागमनसञ्जनितकण्ठकाकुदसंशोषश्च भवति, उष्णप्रतीकारहेतुभूतबह्वनुभूत[7]चूतपानकादिकस्य न स्मरति, जन्तुपीडापरिहृतिसावधानमनाश्च यो भवति तस्योष्णपरीषहजयो भवति, पवित्रचारित्ररक्षणं भवति ।४। दंशग्रहणेन सिद्धं मशकग्रहणं किमर्थम् ? उपलक्षणार्थम्। यथा काकेभ्यो घृतं रक्षणीयम् [8]कथं श्वमार्जारादिभ्यो [9]न रक्षणीयं रक्षणीयमेव तथा दंशमशकोपद्रवं यो मुनिः सहते सः पिशुकपुत्तिकापिपीलिकाकीट[10]मक्षिकामत्कुणवृश्चिकाद्युपद्रवमपि सहते इत्यर्थः। परं तेषां स्वयं बाधां न कुरुते केवलं मुक्तिलाभसङ्कल्पमात्रं वस्त्रं परिदधाति तस्य मुनेर्दंशमशकपरीषहविजयो भवति।५। नाग्न्यं नाम जात्यसुवर्णवदकलङ्कं परं विषयिभिरशक्तकैः [11]शेफविकारवद्भिश्च धर्तुं न शक्यते। तद्धरतां परप्रार्थनं न भवति। नाग्न्यं हि नाम याचनावनजन्तुघातादिदोषरहितमपरिग्रहत्वात् मुक्तिप्रापणाद्वितीयकारणं परेषां बाधाया अकारकम्। यो मुनिस्तन्नाग्न्यं बिभर्ति तस्य मनसि विकृतिर्नोत्पद्यते, स्त्रीरूपमतीवापवित्रं मृतक[12]रूपसमानमहर्निशं भावयति। ब्रह्मचर्यमक्षुण्णं तस्य भवति। एवमचेलव्रतधारणं नाग्न्यं निष्पापं ज्ञातव्यम्।६। यो मुनिः हृषीकविषयेषु निरुद्यमो भवति, सङ्गीतादिरहितशून्यगृहदेवमन्दिरवृक्षकोटरशिलाकन्दरादिषु वसति, स्वाध्यायध्यानभावनासु रतिं करोति, सर्वप्राणिषु सर्वदा

१ विद्यते आ०,द०, ज०। २ क्षुधो बाधाम् ता०। ३ मृदुना पूर्ण-आ०,द०,ज०। ४ वर्षादिषु त्रिषु आ०, द०, ज०। ५ -मतापञ्च ता०। ६ -प्राप्ते व्य- आ०, द०, ज०। ७ -पूतपा- ता०, आ०, ज०। ८ कथञ्च मार्जारादि- आ०, द०, ज०। ९ न रक्षणीयमेव ता०। १० -मशकामक्षुणवृ- ता०। ११ शोकवि- आ०, द०, ज०। १२ -रूपकस- आ०, द०, ज०।

परमकारुणिको भवति, दृष्टश्रुतानुभूतभोगस्मरणभोग[1]कथाकर्णनविषमेषुशरप्रवेशनिश्छिद्र-हृदयो भवति तस्य मुनेररतिपरीषहविजयो वेदितव्यः। ७। यो [2]मुनिः रमणशीलेषु स्थानेषु आरामेषु गृहादिषु तेषु च स्थानेषु अभिनवतारुण्यविलासैः मधुपानमदचपललोचनैः पीडयन्तीषु स्त्रीषु विद्यमानास्वपि कच्छपवत् संवृतान्तः[3]करणकरणोऽतिमनोहरेषद्धसन-कोमलालापविलासविभ्रमसमीक्षणवर्करविधान[4]मदमन्थरगतिकामेषुव्यापारनिरर्थीकरणचारित्रो भवति, नेत्रवक्त्रभ्रूविकारशृङ्गाराकाररूपसहेलाविजृम्भितपीनोन्नतस्तनजघनोरुमूलकक्षानाभि-निरीक्षणादिभिरनुपद्रुतचित्तो भवति तस्य मुनेः स्त्रीपरीषहविजयो[5] भवति। ८। यो मुनिः चिरकालसेवितगुरुकुलब्रह्मचर्यो भवति, बन्धमोक्षपदार्थमर्म जानाति, संयमायतन-यतिजनविनयभक्त्यर्थं गुरुजनेनानुज्ञातो देशान्तरं गच्छति, नभस्वानिव निस्सङ्गो भवति, उपवाससामिभोजनगृहवस्तुसङ्ख्याघृतादिरसपरिहरणादिकायक्लेशसहनशीलकायो भवति, देशकालानुसारेण संयमाविरोधिगमनं करोति, चरणावरणरहितः [6]कठिनशर्करोपल-कण्टकमृत्खण्डपीडनसञ्जातपादबाधोऽपि बाधां न मन्यते, गृहस्थावस्थोचितवाहनयानादि-कानां न स्मरति, कालानुसारेण षडावश्यकानां परिहाणि न करोति तस्य मुनेश्चर्यापरीषह-जयो वेदितव्यः। ९। यो मुनिः पितृवनशून्यागारपर्वतगुहागह्वरादिषु पूर्वानभ्यस्तेषु निवासं करोति, भास्करनिजेन्द्रियज्ञानोद्योतपरीक्षितप्रदेशे क्रियाकाण्डकरणार्थं नियतकालां निषद्यामा-श्रयति, तत्र च दूरक्षहर्यक्षतरक्षुद्वीपिगजादि[7]नानाभयानकपाकसत्त्वशब्दश्रवणादिनापि निर्भयो भवति, देवतिर्यग्मनुष्याचेतनकृतोपसर्गान् यथासम्भवं सहमानोऽपि वीरासनकुक्कुटासना-दिषु अविघटमानशरीरो भवति, मोक्षमार्गान्न प्रच्यवते, मन्त्रविद्यादिप्रतीकारं न करोति, पूर्वोक्त-दुष्टश्वापदबाधाञ्च सहते तस्य मुनेर्निषद्यापरीषहजयो भवति। १०। यो मुनिर्ज्ञानानुशी-लनध्यानविधानमार्गगमनादिखेदवान् भवति, मुहूर्तमेकं निद्रानुभवनार्थमुच्चावचपरुषभूमिषु भूरिशर्करोपलकपालसङ्कटेषु शीतोष्णेषु स्थानकेषु शय्यां करोति, एकपार्श्वे दण्डवत् पतित्वा जन्तुपीडां परिहरन् काष्ठवन् मृतकवत् पार्श्वमपरिवर्तमानः शेते, ज्ञानभावनानुरञ्जितचेताः भूतप्रेतादिविहितनानोपसर्गोऽपि अचलिताङ्गोऽअमितकाल (लं) तद्विहितबाधां क्षमते, शार्दूला-दिमानयं प्रदेशोऽचिरादस्मात् पलायनं श्रेयस्करं विभावयन्तः कदा भविष्यतीत्यविहितखेदः शय्यापरीषहजयं लभते। ११। यो मुनिर्मिथ्यादर्शनोद्धततीव्रक्रोधसहितानामज्ञानिजनानाम-वज्ञानं निन्दामसभ्यवचनानि च लम्भितोऽपि शृण्वन्नपि क्रुधग्निज्वालां न प्रकटयति, आक्रो-शेषु अकृतचेतास्तत्प्रतीकारं विधातुं शीघ्रं शक्नुवन्नपि निजपापकर्म्मोदयं परिचिन्तयन् तद्वाक्यान्यश्रुत्वा तपोभावनापरान्तरङ्गो निजहृदये कषायविषमविषकणिकामपि न करोति स मुनिराक्रोशपरीषहविजयी भवति। १२। यो मुनिर्निशातशस्त्रमुषंढिमुद्गरमुशलकुन्तगोः-

१ -कथावर्णन आ०, द०, ज०। २ मुनिरषडक्षीणेषु स्था- ता०। ३ -करणः आ०, द०, ज०। ४ -धानपदम- आ०, द०, ज०। ५ -यो वेदितव्या ता०। ६ कठिनकर्करोपल- आ०, द०, ज०। ७ -दिना भया- आ०, द०, ज०।

फणागोलकप्रदरपदूषकम्बातर्जनकपाषाणादिभिस्ताड्यमानपीड्यमानशरीरोऽपि वधकेषु ईषदपि मनःकलुषतां न करोति, पूर्वकृतपापकर्मणः फलमिदमायातममी [1]चर्पटकाः किं कर्तुं समर्थाः कायोऽप्ययं तोयबुद्बुदवद्विघटनस्वरूपो दुःखहेतुरेतैर्बाध्यते सम्यग्दर्शनज्ञानचारित्राणि मम केनचिदपि हन्तुं न शक्यन्ते इति विचिन्तयन् काष्ठकुद्दा[2]लतक्षणगन्धसारद्रवानुलेपनादिषु समानमानसो भवति स वधपरीषहजयं लभते । एतदुक्तम्—

"अज्ञानभावादशुभाशयाद्वा करोति चेत् कोपि नरः खलत्वम् ।
तथापि सद्भिः शुभमेव चिन्त्यं न मथ्यमानेऽप्यमृते विषं हि ॥ [ ]

अन्यच्च—

"आकृष्टोऽहं हतो नैव[3] हतो वा न द्विधाकृतः ॥
मारितो न हृतो धर्मो मदीयोऽनेन बन्धुना ॥" [ ] ।१३।

यो मुनिः बहिरभ्यन्तरतपोविधानभावनाकृतकृशतर[4]शरीरः तपतपनतापशोषिताङ्गो विध्यापिताङ्गार इव निश्छायकायः अस्थिशिराजालत्वङ्मात्रशेषशरीरयन्त्रोऽपि [5]विधावसथजायुप्रभृत्यर्थं दीनवचनवदनवैवर्ण्यकरसंज्ञादिकरणैर्न किमपि याचते, भिक्षासमयेऽपि विद्युदुद्योतवद् दुरुपलक्ष्यवर्ष्मा स याचनापरीषहक्षमो भवति । १४ । यो मुनिरङ्गीकृतैकवारनिर्दोषभोजनः चरण्युरिवानेकदेशचारी मौनवान् वाचंयमः समो वा सकृत् निजशरीरदर्शनमात्रतन्त्रः करयुगलमात्राऽमत्रः बहुभिर्दिवसैरप्यनेकमन्दिरेषु भोजनमलब्ध्वापि अनार्तरौद्रचेताः दात्र्यदातृपरीक्षणपराङ्मुखो लाभादलाभो वरं तपोवृद्धिहेतुः परमं तप इति सन्तुष्टचेता भवति स मुनिरलाभविजयी वेदितव्यः । १५ । यो मुनिर्विश्वाशुचिनिधानं परित्राणवर्जितमध्रुवं शरीरं जानाति, तत्संस्कारं न करोति, गुणमाणिक्या[6]वपनसङ्ग्रहणवर्द्धनावनकारणं विज्ञाय तस्य स्थितिनिमित्तं भोजनाङ्गीकारं प्रचुरोपकारं करोति कुर्वन्नपि भोजनमक्षम्रक्षणव्रणविलेपनगर्तपूरणवदतत्परतया करोति । सकृदुपभोगस्य सेवा, मुहुर्मुहुरुपभोगस्यासेवा विरुद्धाहार उच्यते । अपथ्याहारसेवनं वैषम्यमुच्यते । तादृशाहारपानसेवनसमुत्पन्नपवनादिविकाररोगोऽपि सन् समकालसमुत्पन्नव्याधिशतसहस्रोऽपि तद्वशवर्ती न भवति, जल्लमलसर्वौषधर्द्धिप्रभृतिसम्प्राप्ततपऋद्धिसंयोगेऽपि कायनिस्पृहः सन् रोगप्रतीकारं नापेक्षते स रोगपरीषहविजयी भवति । १६ । यो मुनिः शुष्कतृणपत्रपरुषशर्करोपलनिशितकण्टकमृत्तिकाशूलकटफलकशिलादिव्यधनविहितपादवेदनोऽपि सन् तत्राविहितचेताः चर्यायां शय्यायां निषद्यायाञ्च जन्तुपीडां परिहरन् निरन्तरमेवाप्रमत्तचेताः तृणस्पर्शपरीषहसहः [7]स हि वेदितव्यः । १७ । यो मुनिरम्बुकायिकप्राणिपीडापरिहरणचेताः मरणपर्यन्तमस्नानव्रतधारी भवति तीव्रतपन-

१ वर्पटकाः ता० । २ –दालक्षण– आ०, द०, ज० । ३ नैवं आ०, द०, ज० । ४ –कृतकृशतश ता० । ५ विधाव्यसथ– आ०,द०,ज० । ६ –क्यावसन– द० । ७ स वेदि– आ०,द०, ज० ।

भानुसञ्जनितपरितापसमुत्पन्नप्रस्वेदवशमरुदानीतपांशुनिचयोऽपि किलासकच्छूदद्रूकण्डूया- दिके विकारे समुत्पन्नेऽपि सङ्घट्टनप्रमर्दनकण्डूयनादिकं तदुत्पन्नजन्तुपीडापरिहारार्थं न करोति, ममाङ्गे मलं वर्तते अस्य भिक्षोरङ्गे कीदृशं नैर्मल्यं वर्तत इति सङ्कल्पनं न करोति, अवगमचरित्रपूतपानीयप्रधावनेन कर्ममलकर्दमापनयनार्थं च सदैवोद्यतमतिर्भवति केशलोचा- संस्कारखेदं न गणयति स मुनिर्मलपरीषहस[1]हनशीलो भवति । १८ । यो मुनिः ५ पूजनप्रशंसनात्मके सत्कारे क्रियारम्भाद्यग्रतःकरणामन्त्रणालक्षणे पुरस्कारे केनाप्य- विहिते सति एवं मनसि न करोति यदहं चिरतरतपस्वी महातपोऽनुष्ठाता च स्वसमयपरसमय- निर्णयविधायकः अनेकवारपरवादिविजयी ईदृशस्यापि मम न कश्चित् प्रणामं करोति न कोपि भक्तिं विदधाति नापि सम्भ्रमं सृजति नाप्यासनादिप्रदानं विधत्ते, वरं मिथ्यादृष्टयो येऽल्प- शास्त्रज्ञमपि निजपक्षीयं तपस्विनं गृहस्थं [2]चातीवभक्तिमन्तः सकलज्ञसम्भावनेन सम्मानयन्ति, १० निजसमयप्रभावनार्थं नैते तत्त्वज्ञानपरा अपि परमार्हताः, वरं व्यन्तरादयः किल पूर्वमतितीव्र- तपसां झटिति चर्च्चनं कुर्वन्तीति श्रुतिर्मिथ्या वर्तते, यदि न मिथ्या तर्हि मादृशानां तपस्विनां पूजादिकं व्यन्तरादयः किमिति न कुर्वन्तीति दुर्ध्यानपरो न भवति स मुनिः सत्कारपुरस्कार- परीषहसहनशीलो भवति । १९ । यो मुनिस्तर्कव्याकरणच्छन्दोल[3]ङ्कारसारसाहित्याध्यात्म- शास्त्रादिनिधानाङ्गपूर्वप्रकीर्णकनिपुणोऽपि सन् ज्ञानमदं न करोति, ममाग्रतः प्रवादिनः सिंह- १५ शब्दश्रवणात् वनगजा इव पलायन्ते भास्करप्रभायां ज्योतिरिङ्गणा इव न प्रभासन्ते इति च मदं नाधत्ते स मुनिः प्रज्ञापरीषहविजयी भवति । २० । यो मुनिः सकलशास्त्रार्थसुवर्णपरीक्षाकषपट्ट- स[4]मानधिषणोऽपि मूर्खैरसहिष्णुभिर्वा मूर्खोऽयं बलीवर्द इत्याद्यवक्षेपवचनमाप्यमानोऽपि सहते, अत्युत्कृष्टदुश्चरतपोविधानञ्च विधत्ते, सदा अप्रमत्तचेताश्च सन् ब्रह्मवर्चसं नापेक्षते स मुनि- रज्ञानपरीषहजयं लभते । २१ । यो मुनिरत्युत्कृष्टवैराग्यभावनाविशुद्धान्तरङ्गो भवति, विज्ञात- २० समस्तवस्तुतत्त्वश्च स्यात्, जिनायतनत्रिविधसाधुजिनधर्मपूजनसम्माननतन्निष्ठो भवति, चिरदी- क्षितोऽपि सन्नेवं न चिन्तयति अद्यापि ममातिशयवद्बोधनं न सञ्जायते उत्कृष्टश्रुतव्रतादिवि- धायिनां किल प्रातिहार्यविशेषाः प्रादुर्भवन्ति, इति श्रुतिर्मिथ्या वर्तते दीक्षेयं निष्फला व्रतधारणञ्च फल्गु एव वर्तते इति सम्यग्दर्शनविशुद्धिसन्निधानादेवं न मनसि करोति तस्य मुनेरदर्शनपरीषहजयो भवतीत्यवसानीयम् । २२ । इत्थं सङ्कल्पप्राप्तान् परीषहान् संक्लिष्ट- २५ चेताः क्षममाणः रागद्वेषमोहादिपरिणामोत्पन्नास्रवनिरोधे सति महान्तं संवरं लभते ।

अथामी परिषहाः भवारण्यमतिक्रमितुमुद्यतस्य मुनेः किं सर्वे भवन्ति आहोस्वित् किमस्ति कश्चिद् विशेषः इति प्रश्ने सति उत्तरं दीयते । एते पूर्वोक्तलक्षणद्वाविंशतिपरीषहाश्चा-

---

१ –सहशीलो ता० । २ वातीव– आ०, द०, ज० । ३ –लङ्कारसाहि– आ०, द०, ज० । ४ –पदसमानाधिकरणोऽपि ज० । पदज्ञानाधि– द०

रित्रान्तरमुद्दिश्य भाज्याः भवन्ति योजनीयाः स्युरित्यर्थः। तत्र सूक्ष्मसाम्परायच्छद्मस्थवीत रागयोः कति भवन्तीति प्रश्ने सूत्रमिदमुच्यते—

सूक्ष्मसाम्परायच्छद्मस्थवीतरागयोश्चतुर्दश ॥ १० ॥

सूक्ष्मसाम्परायो दशमगुणस्थानवर्ती मुनिः। केवलज्ञानकेवलदर्शनावरणद्वयं छद्मशब्दे-
५ नोच्यते। छद्मनि तिष्ठतीति छद्मस्थः। छद्मस्थश्चासौ वीतरागः छद्मस्थवीतरागः अन्त-
र्मुहूर्तेन समुत्पत्स्यमानकेवलज्ञानः, क्षीणकषायो (ये) द्वादशे गुणस्थाने वर्तमानः साधुः छद्मस्थवीतराग इत्युच्यते, वीतरागच्छद्मस्थश्चोच्यते। सूक्ष्मसाम्परायश्च छद्मस्थवीतरागश्च सूक्ष्मसाम्परायच्छद्मस्थवीतरागौ तयोः सूक्ष्मसाम्परायछद्मस्थवीतरागयोः। अधिकरणे सप्तमी-द्विवचनम्। तेनायमर्थः—सूक्ष्मसाम्पराये मुनौ छद्मस्थवीतरागे च साधौ चतुर्दशपरीषहा
१० भवन्ति। के ते चतुर्दश परीषहाः सम्भवन्ति? क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधाला-भरोगतृणस्पर्शमलप्रज्ञाज्ञानानीति चतुर्दशेति निर्द्धारणादपरे परीषहा न भवन्तीति ज्ञातव्यम्। ननु छद्मस्थवीतरागे मोहनीयस्य कर्मणोऽभावो वर्तते तेन मोहनीयकृताष्टपरीषहा नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्कारादर्शनलक्षणा न भवन्तीति युक्तमेव, सूक्ष्मसा-म्पराये तु मोहनीयोदयो वर्तते तत्सद्भावात् तत्सम्बन्धिनोऽप्यष्टापि परीषहाः कथं न भवन्तीति
१५ चतुर्दशैव भवन्तीति कथमु[1]च्यते? साधूक्तं भवता; सूक्ष्मसाम्पराये सर्व एव मोहोदयो न वर्तते। किन्तर्हि? सञ्ज्वलनलोभकषायोदयोऽस्ति। सोऽपि बादरो न वर्तते किन्त्वतिसूक्ष्मो वर्तते तेन सूक्ष्मसाम्परायोऽपि वीतरागछद्मस्थसदृशो वर्तते तेन तस्मिन्नपि चतुर्दशपरीषहा भवन्तीति घटते। ननु छद्मस्थवीतरागे मोहोदयस्याभावो वर्तते सूक्ष्मसाम्पराये च तस्य मोहोदयस्य मन्दत्वमस्ति तेन द्वयोरपि क्षुत्पिपासादीनाञ्चतुर्दशानामपि परीषहानामभावो वर्तते
२० तत्सहनं कथमुच्यते भवद्भिरिति? आह—साधूक्तं भवता; यद्यपि अनयोश्चतुर्दशपरीषहा न वर्तन्त एव तथापि तत्सहनशक्तिमात्रं वर्तते तेन तयोस्ते दीयन्ते, यथा सर्वार्थसिद्धिदेवानां महातमःप्रभापृथ्वीगमनं यद्यपि न वर्तते तथापि तद्गमनशक्तित्वात्तेषां तद्गतिरुपयुज्यते।

अथाह कश्चित्—शरीरयुक्तात्मनि परिषहसहनं प्रतिज्ञातं भवद्भिः[2]घातिसङ्घातघातने समुत्पन्नकेवलज्ञानेऽघातिकर्मचतुष्कफलानुभवनपरिचरति भगवति सयोगिजिने शरीरवति
२५ [3]कियन्तः परीषहा उत्पद्यन्त इति पर्यनुयोगे तत्परीषहकथनार्थं सूत्रमिदमुच्यते—

एकादश जिने ॥ ११ ॥

एकेनाधिका दश एकादश। शाकपार्थिवादिदर्शनाधिकशब्दलोपः। यथा शाकप्रियः पार्थिवः शाकपार्थिवः प्रियशब्दो लुप्यते तथात्राधिकशब्दलोपः। अथवा एकश्च दश च एकादश ह्रस्वस्य दीर्घता। एकादशपरीषहाः जिने जितघातिकर्मणि भगवति भवन्ति वेदनीयकर्मसद्भावात्,

---

१ -मुच्यते भवद्भिरित्याह सा- आ०। २ घातिसंघातने सत्युत्प- ता०। ३ कियन्तः कियन्तः परी- आ०, द०।

वेदनीयाश्रयास्ते[1] उपचर्यन्ते। ते के ? क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलसंज्ञका एकादश। ननु मोहनीयोदयसहायभावाभावात् क्षुत्पिपासादिवेदनाऽभावे कथमेते उत्पद्यन्ते ? साधूक्तं भवता;वेदनाया अभावेऽपि वेदनाद्रव्यकर्मसद्भावो वर्तते तदपेक्षया परीषहोपचारो विधीयते। कथमिति चेत् ? निश्शेषज्ञानावरणकर्मणि नष्टे सति करणक्रमव्यवधानरहितसमस्तवस्तुप्रद्योतकसकलविमलकेवलज्ञाने विद्यमाने भगवति चिन्तानिरोधलक्षणं ध्यानं यद्यपि न वर्तते तथापि चिन्ताकार्यकर्माभावफलापेक्षया ध्यानं भगवति यथोपचर्यते तथा परीषहा अपि उपचारमात्रेण दीयन्ते, अन्यथा वेदनासद्भावे कवलाहारस्यापि प्रसङ्गः सञ्जायते। तेन बुभुक्षादिलक्षणो वेदनोदयो भगवति न वर्तते कथं कवलाहारः स्यात् ? तथा चोक्तमार्षे—

> “न भुक्तिः क्षीणमोहस्य तवानन्तसुखोदयात्।
> क्षुत्क्लेशबाधितो जन्तुः कवलाहारभुग्भवेत्॥
> असद्वेद्योदयाद् भुक्तिं त्वयि यो योजयेदधीः।
> मोहानिलप्रतीकारे तस्यान्वेष्यं जरद्घृतम्॥
> असद्वेद्यविषं घातिविध्वंसध्वस्तशक्तिकम्।
> त्वय्यकिञ्चिरं (त्करं) मन्त्रशक्त्ये[2]वापवनं (बलं) विषम्॥
> असद्वेद्योदयो घातिसहकारिव्यपायतः।
> त्वय्यकिञ्चित्करो नाथ सामग्र्या हि फलोदयः॥” [आदिपु० २५।३९-४२]

पञ्चविंशतितमे पर्वणि श्लोकचतुष्टयमिदम्।

अथवा **“साध्याहाराणि वाक्यानि भवन्ति”** [ ] इति वचनादत्र सूत्रे सोपस्कारतया व्याख्यानं क्रियते। एकादशजिने ‘न सन्ति’ इति वर्णत्रयं[4]प्रक्षिप्यते। तेनायमर्थ उत्पद्यते—जिने केवलिनि एकादश क्षुदादयः परीषहा न सन्ति न वर्तन्ते। अथवा **“एकेन अधिका न दश परिषहा जिने,एकादश जिने”** इति व्याख्यानन्तु प्रमेयकमलमार्तण्डे [पृ० ३०७] वर्तते।

अथ सूक्ष्मसाम्परायादिषु गुणस्थानेषु व्यस्ताः परीषहा योजिता भवद्भिः। कस्मिंश्चिद्गुणस्थाने समस्ता अपि वर्तन्ते इति प्रश्नसद्भावे सूत्रमाहुराचार्याः—

बादरसाम्पराये सर्वे॥ १२॥

बादरः स्थूलः साम्परायः कषायो यस्मिन् गुणस्थाने सबादरसाम्परायः तद्योगान्मुनिरपि बादरसाम्परायस्तस्मिन् सर्वे परीषहा भवन्ति। अस्यायमर्थः–बादरसाम्पराय इत्युक्ते नवममेव गुण-

---

१ तदुपचर्यन्ते ता०। २ –वापवं विषम् ता०। अपबलम्– अपगतशक्तिकमित्यर्थः। ३ सामग्र्यादिफलो– आ०, द०, ज०। ४ संक्षिप्यते आ०, द०, ज०।

स्थानं केवलं न गृहीतव्यं किन्त्वर्थबलेन प्रमत्तसंयताप्रमत्तसंयतापूर्वकरणानिवृत्तिकरणगुणस्थान-चतुष्टयं ग्राह्यं तेषु सर्वे परीषहाः सङ्गच्छन्ते अक्षीणाशयदोषत्वात्। तथा च सामायिकचारित्रे छेदोपस्थापनायाञ्च परिहारविशुद्धिसंयमे च त्रिषु चारित्रेषु सर्वे परीषहाः प्रत्येकं सम्भवन्ति पारिशेषात्।

५ अथ ज्ञातमेतत् परीषहाणां गुणास्थानदानम्। कस्याः प्रकृतेः के परीषहाः कर्तव्या भवन्तीति न ज्ञायते इति प्रश्ने सूत्रमिदमुच्यते—

ज्ञानावरणे प्रज्ञाज्ञाने ॥ १३ ॥

ज्ञानस्यावरणं यस्य मुनेः स ज्ञानावरणस्तस्मिन् ज्ञानावरणे। अथवा ज्ञानस्यावरणं ज्ञानावरणं तस्मिन् ज्ञानावरणे कर्मणि सति प्रज्ञा च अज्ञानञ्च प्रज्ञाज्ञाने द्वौ परीषहौ भवतः। १० ननु ज्ञानावरणे सति अज्ञानपरीषहो भवतीति युक्तमेव, परमिदं न युक्तम्, प्रज्ञापरीषहो ज्ञानावरणविनाशे खलु जायते, ज्ञानमदो भवति, स प्रज्ञापरीषहो ज्ञानावरणे सति कथमुत्पद्यते? साधूक्तं भवता; प्रज्ञा हि क्षायोपशमिकी वर्तते तेन प्रज्ञामदो मतिश्रुतावरणक्षयोपशमे सति सञ्जायते अवधिमनःपर्ययकेवलज्ञानावरणे सति प्रज्ञा मदं जनयत्येव सर्वावरणक्षये तु मदो नोत्पद्यते।

१५ अथापरयोः प्रकृत्योः सद्भावे अपरपरीषहद्वयसूचनार्थं सूत्रमुच्यते—

दर्शनमोहान्तराययोरदर्शनालाभौ ॥ १४ ॥

दर्शनमोहश्च अन्तरायश्च दर्शनमोहान्तरायौ तयोर्दर्शनमोहान्तराययोः, अदर्शनञ्च अलाभश्चादर्शनालाभौ। दर्शनमोहे कर्मणि सति अदर्शनपरीषहो भवति अन्तराये कर्मणि लाभान्तराये कर्मणि सति अलाभपरीषहो भवत्येवं यथाक्रमं ज्ञातव्यम्।

२० अथ मोहनीयं कर्म द्विप्रकारं वर्तते दर्शनमोहश्चारित्रमोहश्चेति। तत्र दर्शनमोहे अदर्शनपरीषहो भवद्भिरुक्तश्चारित्रमोहे कति परीषहाः भवन्तीत्यनुयोगे सति सूत्रमिदमुच्यते—

चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कार-पुरस्काराः ॥ १५ ॥

नग्नस्य भावो नाग्न्यम्, न रतिररतिः, स्तृणाति आच्छादयति परगुणान् निजदोषान् २५ इति स्त्री, निषीदन्त्युपविशन्ति यस्यां सा निषद्या, आक्रोशनमाक्रोशः, याचतिर्याचना, नाग्न्यञ्च अरतिश्च स्त्री च निषद्या च आक्रोशश्च याचना च सत्कारपुरस्कारश्च नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः। चारित्रमोहे कर्मणि उदिते सति एते सप्त परीषहाः पुंवेदोदयादिनिमित्ता भवन्तीति वेदितव्यम्। मोहोदये सति प्राणिपीडा भवति प्राणिपीडापरिहारार्थं निषद्यापरीषह उत्पद्यते इति वेदितव्यम्।

३० अथापरपरीषहनिमित्तकर्मविशेषपरिज्ञानार्थं सूत्रमिदमुच्यते—

वेदनीये शेषाः ॥ १६ ॥

वेदनीये कर्मणि सति शिष्यन्ते ध्रियन्ते इति शेषा एकादश परीषहा भवन्ति **"ज्ञानावरणे प्रज्ञाज्ञाने"** [त० सू० ९ । १३] इति द्वौ परीषहावुक्तौ । **"दर्शनमोहान्तराययोरदर्शनालाभौ"** [त० सू० ९।१४] इति च द्वावुक्तौ। **"चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः"** [त० सू० ९।१५] इति सप्त परीषहाः सम्भाविताः, ५ एवं सूत्रत्रयेण समुदिता एकादशोक्तास्तेभ्यो ये उद्धरितास्ते शेषा इत्युच्यन्ते । ते के क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलसंज्ञका एकादश परीषहाः वेदनीये भवन्ति जिने योजिता इत्यर्थः ।

अथ पूर्वोक्ताः परीषहा एकस्मिन् पुरुषे युगपत् कति भवन्तीति प्रश्ने सूत्रमिदमुच्यते स्वामिना— १०

एकादयो भाज्या युगपदेकस्मिन्नेकान्नविंशति[१]ः (तेः) ॥१७॥

एक आदिर्येषां ते एकादयः । कस्मिंश्चिदात्मनि एकः परीषहो कस्मिंश्चिद् द्वौ कस्मिंश्चित्त्रयः इत्यादिकृत्वा एकोनविंशतिपर्यन्तमेकस्मिन्नात्मनि युगपत् समकालं भवन्तीति भाज्याः यथासम्भवं योजनीयाः। अत्र आ एकान्नविंशतिरिति शब्दो वर्तते स तु आङ् अभिविध्यर्थः । अभिविधिरिति कोऽर्थः ? अभिव्याप्तिः । एकोनविंशतिमभिव्याप्येत्यर्थः । कथम् ? शीतोष्ण- १५ परीषहयोर्मध्ये अन्यतरो भवति शीतमुष्णो वा। शय्यापरीषहे सति निषद्याचर्ये न भवतः, निषद्यापरीषहे शय्याचर्ये द्वौ न भवतः, चर्यापरीषहे शय्यानिषद्ये द्वौ न भवतः । इति त्रयाणामसम्भवे एकान्नविंशतिरेकस्मिन् युगपद् भवति। ननु प्रज्ञाज्ञाने परस्परविरुद्धे तत्राप्येकस्य हानिः कथं न भवति ? साधूक्तं भवता; श्रुतज्ञानापेक्षया प्रज्ञामद उत्पद्यते अवधिमनःपर्ययकेवलज्ञानापेक्षया अज्ञानपरीषहोऽपि भवतीति को विरोधः । २०

अथ गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयलक्षणाः पञ्च संवरहेतव उक्ताः । इदानीं चारित्रं संवरहेतुर्वक्तव्यस्तद्भेदपरिज्ञानार्थं योगोऽयमुच्यते—

सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातमिति चारित्रम् ॥१८॥

सामायिकञ्च छेदोपस्थापना च परिहारविशुद्धिश्च सूक्ष्मसाम्परायश्च यथाख्यातञ्च २५ सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्परायथाख्यातम् । समाहारो द्वन्द्वः । एतत्सामायिकादिकं पञ्चकं चारित्रं भवतीति वेदितव्यम् । इति शब्दः समाप्त्यर्थे वर्तते तेन यथाख्यातेन चारित्रेण परिपूर्णः कर्मक्षयो भवतीति ज्ञातव्यम् । यद्यपि दशलाक्षणिके धर्मे यः संयम उक्तः स चारित्रमेव तथाप्यत्र पर्यन्ते चारित्रनिरूपणं साक्षात्परमनिर्वाणकारणं चारित्रं भवतीति ज्ञापनार्थं वेदितव्यम् । तत्र सामायिकस्य लक्षणं दिग्देशानर्थदण्डविरतिसामायिक- ३०

---

१ एकोनविंशतिः आ०, द०, ज० ।

प्रोषधोपवासेत्यधिकारे प्रोक्तमेव। [1]अपरेषां चतुर्णां लक्षणं कथयिष्यामः। तत्र सामायिकं द्विप्रकारम्–परिमितकालमपरिमितकालञ्चेति। स्वाध्यायादौ सामायिकग्रहणं परिमितकालम्। ईर्यापथादावपरिमितकालं वेदितव्यम्। प्रमादेन कृतो योऽत्यर्थः प्रबन्धो हि हिंसादीनामव्रतानामनुष्ठानं तस्य विलोपे सर्वथा परित्यागे सम्यगागमोक्तविधिना प्रतिक्रिया पुनर्व्रता-
५ रोपणं छेदोपस्थापना, छेदेन दिवसपक्षमासादिप्रव्रज्याहापनेनोपस्थापना व्रतारोपणं छेदोपस्थापना। सङ्कल्पविकल्पनिषेधो वा छेदोपस्थापना भवति। परिहरणं परिहारः प्राणिवधनिवृत्तिरित्यर्थः। परिहारेण विशिष्टा शुद्धिः [2]कर्ममलकलङ्कप्रक्षालनं यस्मिन् चारित्रे तत्परिहारविशुद्धिः चारित्रमिति वा विग्रहः। तल्लक्षणं यथा—द्वात्रिंशद्वर्षजातस्य बहुकालतीर्थकरपादसेविनः प्रत्याख्याननामधेयनवमपूर्वप्रोक्तसम्यगाचारवेदिनः प्रमादरहितस्य अतिपुष्कल-
१० चर्यानुष्ठायिनस्तिस्रः सन्ध्या वर्जयित्वा द्विगव्यूतिगामिनो मुनेः परिहारविशुद्धिचारित्रं भवति। तथा चोक्तम्—

"[3]बत्तीसवासजम्मो वासपुधत्तं च तित्थयरमूले।
पच्चक्खाणं पढिदो संभूणदुगाऊअविहारो॥" [ ]

त्रिवर्षादुपरि नववर्षाभ्यन्तरे वर्षपृथक्त्वमुच्यते। अतीव सूक्ष्मलोभो यस्मिन् चारित्रे तत्
१५ सूक्ष्मसाम्परायं चारित्रम्। सर्वस्य मोहनीयस्योपशमः क्षयो वा वर्तते यस्मिन् तत् परमौदासीन्यलक्षणं जीवस्वभावदशं यथाख्यातचारित्रम्। यथा स्वभावः स्थितस्तथै[4]वाख्यातः कथित आत्मनो यस्मिन् चारित्रे तद् यथाख्यातमिति निरुक्तेः। यथाख्यातस्य अथाख्यातमिति च द्वितीया संज्ञा वर्तते। तत्रायमर्थः–चिरन्तनचारित्रविधायिभिर्यदुत्कृष्टं चारित्रमाख्यातं कथितं तादृशं चारित्रं पूर्वं जीवेन न प्राप्तम्, अथ अनन्तरं मोहक्षयोपशमाभ्यां तु प्राप्तं यच्चारित्रं तत् अथाख्यात-
२० मुच्यते। सामायिकाच्छेदोपस्थानाचारित्रं गुणैः प्रकृष्टं छेदोपस्थापनाचारित्रात् परिहारविशुद्धिचारित्रं गुणैः प्रकृष्टं परिहारविशुद्धिचारित्रात्सूक्ष्मसाम्परायचारित्रं गुणैः प्रकृष्टं सूक्ष्मसाम्परायचारित्रात् यथाख्यातचारित्रं गुणैः प्रकृष्टं तेन कारणेनोत्तरगुणप्रकर्षज्ञापनार्थं सामायिकादीनामनुक्रमेण वचनम्।

अथ संवरस्य निर्जरायाश्च हेतुभूतस्य तपसः स्वरूपनिरूपणार्थं प्रबन्धो रच्यते। तत्तपो
२५ द्विप्रकारम्–बाह्यमाभ्यन्तरञ्च। तत्र बाह्यं षट्प्रकारमाभ्यन्तरञ्च षट्प्रकारम्। तत्र बाह्यषट्प्रकारस्य तपसः सूचनार्थं सूत्रमिदमु[5]च्यते भगवद्भिः—

अनशनावमौदर्यवृत्तिपरिसङ्ख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः॥ १९॥

---

१ परेषाम् आ०, द०, ब०। २ कर्मफल– आ०, द०, ज०। ३ "तीसं वासो जम्मे वासपुधत्तं च तित्थयरमूले। पच्चक्खाणं पढिदो सञ्झूणदुगाऊयविहारो॥" –गो० जी० गा० ४७२। त्रिंशद्वर्षजन्मा वर्षपृथक्त्वं खलु तीर्थकरमूले। प्रत्याख्यानं पठितः संध्योनद्विगव्यूतिविहारः॥ ४ तथैव ख्यातः आ०, द०, ज०। ५ सूच्यते ता०।

अनशनञ्च अवमौदर्यञ्च वृत्तिपरिसङ्ख्यानञ्च रसपरित्यागश्च विविक्तशय्यासनञ्च कायक्लेशश्च अनशनावमौदर्यवृत्तिपरिसङ्ख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशाः। एते षट् संयमविशेषा बाह्यं तपो भवति। तत्र तावदनशनस्य स्वरूपं निरूप्यते—तदात्वफलमनपेक्ष्य संयमप्राप्तिनिमित्तं रागविध्वंसनार्थं कर्मणां चूर्णीकरणार्थं सद्ध्यानप्राप्त्यर्थं शास्त्राभ्यासार्थञ्च यत् क्रियते उपवासस्तदनशनमुच्यते। संयमे सावधानार्थं वातपित्तश्लेष्मादिदोषोपशमनार्थं ज्ञानध्यानादिसुखसिद्ध्यर्थं यत्स्तोकं भुज्यते तदवमौदर्यम्। आशानिरासार्थमेकमन्दिरादिप्रवृत्तिविधानं तद्विषये सङ्कल्पविकल्पचिन्तानियन्त्रणं वृत्तेर्भोजनप्रवृत्तेः परि समन्तात् सङ्ख्यानं मर्यादागणनमिति यावद् वृत्तिपरिसङ्ख्यानमुच्यते। हृषीकमदनिग्रहनिमित्तं निद्राविजयार्थं स्वाध्यायादिसुखसिद्ध्यर्थं रसस्य वृष्यस्य घृतादेः परित्यागः परिहरणं रसपरित्यागः। विविक्तेषु शून्येषु गृहगुहागिरिकन्दरादिषु पाणिपीडारहितेषु शय्यासनं विविक्तशय्यासनं पञ्चमं तपः। किमर्थम्? आबाधाविरहार्थं ब्रह्मचर्यसिद्ध्यर्थं स्वाध्यायध्यानादिप्राप्त्यर्थं तद्विधातव्यम्। कायस्य क्लेशो दुःखं कायक्लेशः। उष्णर्तौ आतपे स्थितिः वर्षर्तौ तरुमूलनिवासित्वं शीतर्तौ निवारणस्थाने शयनं नानाप्रकारप्रतिमास्थानञ्चेत्येवमादिकः कायक्लेशः षष्ठं तपः किंकृते क्रियते? शरीरदुःखसहनार्थं शरीरसुखानभिवाञ्छार्थं जिनधर्मप्रभावनाद्यर्थञ्च। यदृच्छया समागतः परीषहः, स्वयमेव कृतः कायक्लेशः इति परीषहकायक्लेशयोर्विशेषः। यस्माद् बाह्यवस्त्वपेक्षया[1]अदः षट्प्रकारं तपो भवति परेषाम[2]ध्यक्षेण च भवति तेनेदं तपो बाह्यमुच्यते।

अथेदानीमाभ्यन्तरतपःप्रकारसूचनार्थं सूत्रमिदमुच्यते—

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥ २० ॥

प्रकृष्टो यः शुभावहो विधिर्यस्य साधुलोकस्य स प्रायः प्रकृष्टचारित्रः। प्रायस्य साधुलोकस्य चित्तं यस्मिन् कर्मणि तत् प्रायश्चित्तमात्मशुद्धिकरं कर्म। अथवा प्रगतः प्रणष्टः अयः प्रायः अपराधस्तस्य चित्तं शुद्धिः प्रायश्चित्तम्। कौरस्करादित्वात्सकारागमः।

"प्राय इत्युच्यते लोकश्चित्तं तस्य मनो भवेत्।
तस्य शुद्धिकरं कर्म प्रायश्चित्तं तदुच्यते॥" [ ]

प्रायश्चित्तञ्च विनयश्च वैयावृत्त्यञ्च स्वाध्यायश्च व्युत्सर्गश्च ध्यानञ्च प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानानि एतानि षट् संयमस्थानानि उत्तरमभ्यन्तरं तपो भवति। अभ्यन्तरस्य मनसो नियमनार्थत्वात्तत्र प्रमादोत्पन्नदोषनिषेधनं प्रायश्चित्तम्। ज्येष्ठेषु मुनिषु आदरो विनय उच्यते। शरीरप्रवृत्त्या यात्रादिगमनेन द्रव्यान्तरेण वा यो ग्लानो मुनिस्तस्य पादमर्दनादिभिरारा[4]धनं वैयावृत्त्यमुच्यते। ज्ञानभावनायामलसत्वपरिहारः स्वाध्याय उच्यते। इदं शरीरं मदीयमिति सङ्कल्पस्य परिहृतिर्व्युत्सर्गः। मनोविभ्रमपरिहरणं ध्यानमुच्यते।

१-या तु षट्- आ०, द०, ज०। २-मध्यक्षणे च आ०, द०, ज०। ३-किरस्करा- [illegible]। ४-राधना आ०, ज०।

अथेदानीमुक्तानां प्रायश्चित्तादीनां प्रकारसङ्ख्याप्रतिपादनार्थं सूत्रमिदमाहुः—

नवचतुर्दशपञ्चद्विभेदा यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥

नव च चत्वारश्च दश च पञ्च च द्वौ च नवचतुर्दशद्वयस्ते भेदा येषां ध्यानात् प्राग्वर्तिनां प्रायश्चित्तादिव्युत्सर्गान्तानां ते नवचतुर्दशपञ्चद्विभेदाः यथाक्रमं यथासंख्यं ५ पञ्चानां भेदा भवन्तीत्यर्थः। तेन नवभेदं प्रायश्चित्तं चतुर्भेदो विनयः दशभेदं वैयावृत्त्यं पञ्चभेदः स्वाध्यायो द्विभेदो व्युत्सर्ग इति। ध्यानस्य तु बहुतरं वक्तव्यं वर्तते तेन तत्प्रबन्धो भिन्नः करिष्यते।

अथेदानीं प्रायश्चित्तस्य नवानां भेदानां निर्भेदनार्थं सूत्रमिदमुच्यते स्वामिना—

आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेद-

१० **परिहारोपस्थापनाः ॥ २२ ॥**

आलोचनञ्च प्रतिक्रमणञ्च तदुभयञ्च विवेकश्च व्युत्सर्गश्च तपश्च छेदश्च परिहारश्च उपस्थापना च तास्तथोक्ताः। एकान्तनिषण्णाय प्रसन्नचेतसे विज्ञातदोषदेशकालाय गुरवे तादृशेन शिष्येण विनयसहितं यथा भवत्येवमवञ्चनशीलेन शिशुवत्सरलबुद्धिना आत्मप्रमादप्रकाशनं निवेदनमाराधनाभगवतीकथितदशदोषरहितमालोचनमुच्यते। के ते दश दोषा इति १५ चेत्? उच्यते—

"[1]आकंपिय अणुमाणिय जं दिट्ठं बादरं च सुहुमं च।
छण्णं सद्दाउलियं बहुजणमव्वत्ततस्सेवी॥" [भ० आरा० गा० ५६२]

अस्यायमर्थः—आकम्पितम्-उपकरणादिदानेन गुरोरनुकम्पामुत्पाद्य आलोचयति।१। अनुमानितं वचनेनानुमान्य वा आलोचयति।२। यद्दृष्टं यल्लोकैः दृष्टं तदेवालोचयति २० ।३। बादरञ्च स्थूलमेवालोचयति।४। सुहुमं च सूक्ष्ममल्पमेव दोषमालोचयति।५। छण्णं केनचित् पुरुषेण निजदोषः प्रकाशितः, भगवन्, यादृशो दोषोऽनेन प्रकाशितस्तादृशो दोषो ममापि वर्तते इति प्रच्छन्नमालोचयति।६। सद्दाउलियं शब्दाकुलितं यथा भवत्येवं यथा गुरुरपि न शृणोति तादृशकोलाहलमध्ये आलोचयति।७। बहुजनं बहून् जनान् प्रत्यालोचयति।८। अव्यक्तम्-अव्यक्तस्याप्रबुद्धस्याग्रे आलोचयति।९। तत्सेवी यो गुरुस्तं दोषं सेवते २५ तदग्रे आलोचयति।१०। इत्थंविधमालोचनं यदि पुरुषमालोचयति तदा एको गुरुरेक आलोचकः पुमानिति पुरुषस्य द्व्याश्रयमालोचनम्। स्त्री चेदालोचयति तदा चन्द्रसूर्यदीपादिप्रकाशे एको गुरुः द्वे स्त्रियौ अथवा द्वौ गुरू एका स्त्री इत्येवं स्त्र्यालोचनं त्र्याश्रयं भवति। आलोचनरहितमालोचयतो वा प्रायश्चित्तमकुर्वतो महदपि तपोऽभिप्रेतफलप्रदं न भवति। निजदोषमुच्चार्योच्चार्य मिथ्या मे दुष्कृतमस्त्विति प्रकटीकृतप्रतिक्रियं प्रतिक्रमणमुच्यते। ३० प्रतिक्रमणं गुरुणानुज्ञातेन शिष्येणैव कर्तव्यम्। आलोचनां प्रदाय प्रतिक्रमणा आचार्येणैव

---

1 आकम्पितमनुमानितं यद्दृष्टं बादरञ्च सूक्ष्मञ्च। छन्नं शब्दाकुलितं बहुजनमव्यक्तं तत्सेवी।

कर्तव्या । शुद्धस्याप्यशुद्धत्वेन यत्र सन्देहविपर्ययौ भवतः, अशुद्धस्यापि शुद्धत्वेन वा यत्र निश्चयो भवति तत्र तदुभयमालोचनप्रतिक्रमणद्वयं भवति । यद्वस्तु नियतं भवति तद्वस्तु चेन्निजभाजने पतति मुखमध्ये वा समायाति यस्मिन् वस्तुनि गृहीते वा कषायादिकमुत्पद्यते तस्य सर्वस्य वस्तुनस्त्यागः क्रियते तद्विवेकनाम प्रायश्चित्तं भवति । नियतकालं कायस्य वाचो मनसश्च त्यागो व्युत्सर्ग उच्यते । उपवासादिपूर्वोक्तं षड्विधं बाह्यं तपस्तपोनाम प्रायश्चित्तं ५ भवति । दिवसपक्षमासादिविभागेन दीक्षाहापनं छेदो नाम प्रायश्चित्तं भवति । दिवसपक्षमासादिविभागेन दूरतः परिवर्जनं परिहारो नाम प्रायश्चित्तं भवति । महाव्रतानां मूलच्छेदनं विधाय पुनरपि दीक्षाप्रापणम् उपस्थापना नाम प्रायश्चित्तं भवति । अत्राचार्यमपृष्ट्वा आतापनादिकरणे आलोचना भवति । पुस्तकपिच्छ्यादिपरोपकरणग्रहणे आलोचना भवति । परोक्षे प्रमादतः आचार्यादिवचनाकरणे आलोचना भवति । आचार्यमपृष्ट्वा आचार्यप्रयोजनेन गत्वा १० आगमने आलोचना भवति । परसङ्घमपृष्ट्वा स्वसंघागमने आलोचना भवति । देशकालनियमेन अवश्यकर्तव्यस्य व्रतविशेषस्य धर्मकथादिव्यासङ्गेन विस्मरणे सति पुनःकरणे आलोचना भवति । एवंविधेऽन्यस्मिन् कार्यस्खलने आलोचनैव प्रायश्चित्तं भवति । षडिन्द्रियेषु [१]वागादिदुःपरिणामे प्रतिक्रमणं भवति । आचार्यादिषु हस्तपादादिसंघट्टने प्रतिक्रमणं भवति । व्रतसमितिगुप्तिषु स्वल्पातिचारे प्रतिक्रमणं भवति । पैशुन्यक- १५ लहादिकरणे प्रतिक्रमणं भवति । वैयावृत्त्यस्वाध्यायादिप्रमादे प्रतिक्रमणं भवति । गोचरगतस्य कामलतोत्थाने प्रतिक्रमणं भवति । परसंक्लेशकरणादौ च प्रतिक्रमणं भवति । दिवसरात्र्यन्ते भोजनगमनादौ आलोचनाप्रतिक्रमणद्वयं भवति । लोचनखच्छेदस्वप्नेन्द्रियातिचाररात्रिभोजनेषु उभयम् । पक्षमासचतुर्माससंवत्सरादिदोषादौ चोभयं भवति । मौनादिना विना लोचविधाने व्युत्सर्गः । उदरकृमिनिर्गमे व्युत्सर्गः । हिममसकादिमहावातादिसंह- २० र्षातिचारे व्युत्सर्गः । आर्द्रभूम्युपरि गमने व्युत्सर्गः । हरिततृणोपरि गमने व्युत्सर्गः । कर्दमोपरि गमने व्युत्सर्गः । जानुमात्रजलप्रवेशे व्युत्सर्गः । परनिमित्तवस्तुनः स्वोपयोगविधाने व्युत्सर्गः । नावादिना नदीतरणे व्युत्सर्गः । पुस्तकपतने व्युत्सर्गः । प्रतिमापतनेव्युत्सर्गः । पञ्चस्थावरविघाताद्दृष्टदेशतनुमलविसर्गादिषु व्युत्सर्गः । पक्षादिप्रतिक्रमणक्रियान्त[२]र्व्याख्यानप्रवृत्त्यन्तादिषु व्युत्सर्गः, [३]एवमुच्चारप्रश्रवणादिषु च प्रसिद्धो व्युत्सर्गः[४] । एवमुपवा- २५ सादिकरणं छेदकरणं परिहारकरणमुपस्थापनाकरणं सर्वमेतत्परमागमाद् वेदितव्यम् । नवविधप्रायश्चित्तफलं तावत् भावप्रसा[५]दनमनवस्थाया अभावः शल्यपरिहरणं धर्मदार्ढ्यादिकञ्च वेदितव्यम् ।

अथ विनयभेदानाह—

ज्ञानदर्शनचारित्रोपचाराः ॥ २३ ॥ ३०

---

१ वागादिषु प--आ०, द०, ज० । २ -तव्याख्या- आ०, द०, ज० । ३ एवं प्रायश्चित्तमुच्चार- ता० । ४-सर्ग एव ता० । ५-प्रसादनम् आ०, द०, ज० ।

ज्ञानञ्च ज्ञानविनयः दर्शनञ्च दर्शनविनयः चारित्रञ्च चारित्रविनयः उपचारश्च उपचारविनयः ज्ञानदर्शनचारित्रोपचाराः। एवमधिकृत एव विनयशब्दोऽत्र योजितव्यः। अनलसेन देशकालद्रव्यभावादिशुद्धिकरणेन बहुमानेन मोक्षार्थं ज्ञानग्रहणं ज्ञानाभ्यासो ज्ञानस्मरणादिकं यथाशक्ति ज्ञानविनयो वेदितव्यः। तत्त्वार्थश्रद्धाने शङ्कादिदोषरहितत्वं दर्शनविनय
५ उच्यते। ज्ञानदर्शनवतः पुरुषस्य दुश्चरचरित्रे विदिते सति तस्मिन् पुरुषे भावतो[1]ऽतीवभक्तिविधानं भवति। स्वयं चारित्रानुष्ठानञ्च चारित्रविनयो भवति। आचार्योपाध्यायादिषु अध्यक्षेषु अभ्युत्थानं वन्दनाविधानं [2]करकुड्मलीकरणम्, तेषु परोक्षेषु सत्सु कायवाङ्मनोभिः करयोटनं गुणसङ्कीर्तनमनुस्मरणं स्वयं ज्ञानानुष्ठायित्वञ्च उपचारविनयः। विनये सति ज्ञानलाभो भवति आचारविशुद्धिश्च सञ्जायते, सम्यगाराधनादिकञ्च पुमाँल्लभते। इति विनयफलं
१० ज्ञातव्यम्।

अथ वैयावृत्त्यभेदमाह—

आचार्योपाध्यायतपस्विशैक्षग्लानगणकुलसङ्घसाधुमनोज्ञानाम् ॥ २४ ॥

आचार्यश्च उपाध्यायश्च तपस्वी च शैक्षश्च ग्लानश्च गणश्च कुलञ्च संघश्च साधुश्च मनोज्ञश्च ते तथोक्ताः। तेषां दशविधानां पुरुषाणां दशविधं वैयावृत्त्यं भवति। आचरन्ति
१५ व्रतान् यस्मादित्याचार्यः। मोक्षार्थमुपेत्याधीयते शास्त्रं तस्मादित्युपाध्यायः। महोपवासादितपोऽनुष्ठानं विद्यते यस्य स तपस्वी। शास्त्राभ्यासशीलः शैक्षः। रोगादिपीडितशरीरो ग्लानः। वृद्धमुनिसमूहो गणः। दीक्षकाचार्यशिष्यसङ्घातः कुलम्। ऋषिमुनियत्यनागारलक्षणश्चातुर्वर्ण्यश्रमणसमूहः सङ्घः। ऋष्यार्यिकाश्रावकश्राविकासमूहो वा सङ्घः। चिरदीक्षितः साधुः वक्तृत्वादिगुणविराजितो लोकाभिसम्मतो विद्वान् मुनिर्मनोज्ञ उच्यते। तादृशोऽसंयतसम्यग्दृ-
२० ष्टिर्वा मनोज्ञ उच्यते। एतेषां दशविधानां व्याधौ सति प्रासुकौषधभक्तपानादिपथ्यवस्तुवसतिकासंस्तरणादिभिर्वैयावृत्त्यं कर्तव्यम्। धर्मोपकरणैः परीषहविनाशनैः मिथ्यात्वादिसम्भवे सम्यक्त्वे प्रतिष्ठापनं बाह्यद्रव्यासम्भवे कायेन श्लेष्माद्यन्तर्मलाद्यपनयनादिकं तदनुकूलानुष्ठानञ्च वैयावृत्त्यमुच्यते। तदनुष्ठाने किं फलम्? समाधिप्राप्तिः विचिकित्साया अभावः वचनवात्सल्यादिप्राकट्यञ्च वेदितव्यम्।

२५ अथ स्वाध्यायभेदानाह—

वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः ॥ २५ ॥

वाचना च पृच्छना च अनुप्रेक्षा च आम्नायश्च धर्मोपदेशश्च वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः। एते पञ्च स्वाध्याया उच्यन्ते। पञ्चानां लक्षणम् यथा यो गुरुः पापक्रियाविरतो भवति अध्यापनक्रियाफलं नापेक्षते स गुरुः शास्त्रं पाठयति शास्त्रस्यार्थं वाच्यं कथयति ग्रन्था-
३० र्थद्वयञ्च व्याख्याति एवं त्रिविधमपि शास्त्रप्रदानं पात्राय ददाति उपदिशति सा वाचना कथ्यते। पृच्छना प्रश्नः अनुयोगः। शास्त्रार्थं जानन्नपि गुरुं पृच्छति। किमर्थम्? सन्देहविनाशाय। निश्चितोऽप्यर्थः किमर्थं पृच्छयते? बलाधाननिमित्तं ग्रन्थार्थप्रबलतानिमित्तं सा पृच्छना। निजोन्नति-

---

१ –तोऽतिभक्ति-ता०। २ अञ्जलिकरणम्।

परप्रतारणोपहासादिनिमित्तं यदि भवति तदा संवरार्थिका न भवति। परिज्ञातार्थस्य एकाग्रेण मनसा यत्पुनः पुनरभ्यसनमनुशीलनं सा अनुप्रेक्षा लक्ष्यते। अष्टस्थानोच्चारविशेषेण यच्छुद्धं घोषणं पुनः पुनः परिवर्तनं स आम्नायः कथ्यते। दृष्टादृष्टप्रयोजनमनपेक्ष्य उन्मार्गविच्छेदनार्थं सन्देहच्छेदनार्थमपूर्वार्थप्रकाशनादिकृते केवलमात्मश्रेयोऽर्थं महापुराणादिधर्मकथाद्यनुकथनं धर्मोपदेश उच्यते। तदुक्तम्— ५

"हितं ब्रूयात् मितं ब्रूयात् ब्रूयाद्धर्म्यं यशस्करम्।
प्रसङ्गादपि न ब्रूयादधर्म्यमयशस्करम्॥" [ ]

अस्य पञ्चविधस्यापि स्वाध्यायस्य च किं फलम्? प्रज्ञातिशयो भवति प्रशस्ताध्यवसायश्च सञ्जायते परमोत्कृष्टसंवेगश्चकास्ति। कोऽर्थः? प्रवचनस्थितिर्जागर्ति तपोवृद्धिर्बोभोति, अतिचारविशोधनं वर्वर्ति, संशयोच्छेदो जाघटीति, मिथ्यावादिभयाद्यभावो भवति। १०

अथ व्युत्सर्गस्वरूपनिरूपणं विधीयते—

बाह्याभ्यन्तरोपध्योः॥ २६॥

बाह्यश्च अभ्यन्तरश्च बाह्याभ्यन्तरौ, तौ च तौ उपधी परिग्रहौ बाह्याभ्यन्तरोपधी तयोर्बाह्याभ्यन्तरोपध्योः। सम्बन्धे षष्ठीद्विवचनम्। तेनायमर्थः—बाह्यस्योपधेरभ्यन्तरस्य चोपधेर्व्युत्सर्गो व्युत्सर्जनं परित्यागो द्विविधो भवति। वास्तुधनधान्यादिरुपात्तो बाह्योपधिः। १५ कोपादिक आत्मदुष्परिणामोऽभ्यन्तरोपधिः। नियतकालो यावज्जीवं वा शरीरत्यागः अभ्यन्तरोपधित्याग उच्यते। महाव्रते धर्मे प्रायश्चित्ते अत्र च यद्यप्यनेकवारान् व्युत्सर्ग उक्तस्तथापि न पुनरुक्तदोषः[1], कस्यचित् पुरुषस्य क्वचित् त्यागशक्तिरिति[2] पुरुषशक्त्यपेक्षयाऽनेकत्र[3] भणनमुत्तरोत्तरोत्साहात्यागार्थं वाऽनेकत्र भणनं न दोषाय भवति। तस्य व्युत्सर्गस्य किं फलम्? निःसङ्गत्वं निर्भयत्वं जीविताशानिरासो दोषोच्छेदनं मोक्षमार्गभावनापरत्व- २० मित्यादि।

अथ ध्यानं बहुवक्तव्यमिति यदुक्तं तस्य स्वरूपनिरूपणार्थं प्रबन्धो रच्यते। तत्र तावद् ध्यानस्य प्रयोक्ता ध्यानस्वरूपं ध्यानकालनिर्द्धारणं चैतत्त्रयं मनसि [4]कृत्वा सूत्रमिदमाहुराचार्याः—

उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात्॥ २७॥ २५

उत्तमसंहननं वज्रर्षभवज्रनाराचनाराचलक्षणं यस्य स उत्तमसंहननस्तस्योत्तमसंहननस्येत्यनेन [5]ध्यानस्य कर्ता प्रोक्तः। एवंविधस्य पुरुषस्य ध्यानं भवति। किन्नाम ध्यानम्? एकाग्र-

---

१–रुक्तो दोषः आ०, द०, ज०। २ त्यागे शक्तिः आ०, द०, ज०। ३ –नेकशः भ– आ०, द०, ज०। ४ धृत्वा आ०, द०, ज०। ५ ध्यानकर्ता आ०, द०, ज०।

चिन्तानिरोधः। एकमग्रं मुखमवलम्बनं द्रव्यं पर्यायः तदुभयं स्थूलं सूक्ष्मं वा यस्य स एकाग्रः एकाग्रस्य चिन्तानिरोधः आत्मार्थं परित्यज्यापरचिन्तानिषेध एकाग्रचिन्तानिरोधे ध्यानमुच्यते। नानार्थावलम्बनेन चिन्ता परिस्पन्दवती भवति सा चिन्ता ध्यानं नोच्यते। चिन्ताया अपरसमस्तमुखेभ्यः समग्रावलम्बनेभ्यो व्यावर्त्य एकस्मिन्नग्रे प्रधानवस्तुनि नियमनं निश्चली-
५ करणमेकाग्रचिन्तानिरोधः स्यात्—इत्यनेनैकाग्रचिन्तानिरोधलक्षणं ध्यानस्वरूपं प्रतिपादितम्। मुहूर्त इति घटिकाद्वयं मुहूर्तस्यान्तर्मध्ये अन्तर्मुहूर्तः। आ मर्यादीकृत्यान्तर्मुहूर्तात्। एतावानेव कालो ध्यानस्य भवतीत्यनेन ध्यानकालनिर्द्धारणं विहितम्। एकाग्रचिन्ताया दुर्धरत्वादन्तर्मुहूर्त्तात् परतः एकाग्रचिन्तानिरोधो न भवति। चपलापि चिन्ता यद्यन्तर्मुहूर्तं स्थिरा भवति तदा अचलत्वेन ज्वलन्ती सा [1]सर्वकर्मविध्वंसं करोति। चिन्ताया निरोधः खलु ध्यानं भवद्भिरुक्तं
१० निरोधस्तु अभाव उच्यते तेन एकाग्रचिन्तानिरोध एकाग्रचिन्ताया अभावो यदि ध्यानं भवति तर्हि ध्यानमसदविद्यमानं स्यात् अबालबालेयशृङ्गवत्। युक्तमुक्तं भवता-अन्यचिन्तानिवृत्त्यपेक्षया असत् स्वविषयाकारप्रवृत्त्यपेक्षाया सत्, अभावस्य भावान्तरत्वात्। अथवा निरोधनं निरोधः इत्ययं शब्दो भावे न भवति। किन्तर्हि भवति? कर्मणि भवति। तत्कथम्? निरुध्यत इति निरोधः "अकर्तरि च कारके संज्ञायाम्" [ ] इति वचनात् कर्मणि घञ्
१५ प्रत्ययः। तेनायमर्थः-चिन्ता चासौ निरोधश्च चिन्तानिरोधः एकाग्रचिन्तानिश्चलत्वमित्यर्थः। अत्रायं भाव- अपरिस्पन्दमानं ज्ञानमेव ध्यानमुच्यते। किंवत्? अपरिस्पन्दमानाग्निज्वालावत्। यथा अपरिस्पन्दमानाग्निज्वाला शिखा इत्युच्यते तथा अपरिस्पन्देनावभासमानं ज्ञानमेव ध्यानमिति तात्पर्यार्थः। अत्र त्रिषूत्तमसंहननेषु आद्यसंहननेनैव मोक्षो भवति अपरसंहननद्वयेन तु ध्यानं भवत्येव परं मुक्तिर्न भवति।

२० अथ ध्यानस्य भेदा उच्यन्ते—

आर्तरौद्रधर्म्यशुक्लानि ॥ २८ ॥

दुःखम् अर्दनमर्तिं वा ऋतमुच्यते, ऋते दुःखे भवमार्तम्। रुद्रः क्रूराशयः प्राणी, रुद्रस्य कर्म रौद्रं रुद्रे वा भवं रौद्रम्। धर्मो वस्तुस्वरूपम्, धर्मादनपेतं धर्म्यम्। मलरहितं जीवपरिणामोद्भवं शुचिगुणयोगाच्छुक्लम्। आर्तश्च रौद्रश्च धर्म्यश्च शुक्लश्च आर्तरौद्रधर्म्यशुक्लानि,
२५ एतानि चत्वारि ध्यानानि भवन्ति। एतच्चतुर्विधमपि ध्यानं सङ्कुच्य द्विविधं भवति-प्रशस्ताऽप्रशस्तभेदात्। पापास्रवहेतुत्वादप्रशस्तमार्तरौद्रद्वयम्। कर्ममलकलङ्कनिर्दहनसमर्थं धर्म्यशुक्लद्वयं प्रशस्तम्।

अथ प्रशस्तस्य [2]स्वरूपमुच्यते-

परे मोक्षहेतू ॥ २९ ॥

३० परे धर्म्यशुक्ले द्वे ध्याने मोक्षहेतू मोक्षस्य परमनिर्वाणस्य हेतू कारणे मोक्षहेतू

---

१ सर्वे कर्म- आ०, द०, ज०। २ स्वरूपं निरूप्यते आ०, ज०। कथ्यते द०।

भवतः। तत्र धर्म्यं ध्यानं पारम्पर्येण मोक्षस्य हेतुस्तद् गौणतया मोक्षकारणमुपचर्यते, शुक्लध्यानन्तु साक्षात् तद्भवे मोक्षकारणमुपशमश्रेण्यपेक्षया तु तृतीये भवे मोक्षदायकम्। यदि परे धर्म्यशुक्लध्याने मोक्षहेतू वर्तेते तर्हि आर्तरौद्रे द्वे ध्याने संसारस्य हेतू भवत इति अर्थापत्त्यैव ज्ञायते तृतीयस्य साध्यस्याभावात्। ५

अथार्तध्यानस्वरूपमाह—

आर्तममनोज्ञस्य सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥३०॥

न [1]मनो जानातीति अमनोज्ञमप्रियं वस्तु चेतनमचेतनञ्च। तत्र चेतनं कुत्सितरूपदुर्गन्धशरीरदौर्भाग्यादिसहितं कलत्रादिकं त्रासाद्युत्पादकमुद्वेगजननञ्च शत्रुसर्पादिकञ्च, अचेतनं परप्रयुक्तं शस्त्रादिकं विषकण्टकादिकञ्च बाधाविधानहेतुत्वात्। एतस्य सम्प्रयोगे सम्बन्धे संयोगे सति तद्विप्रयोगाय तस्यामनोज्ञस्य विप्रयोगाय विनाशार्थं स्मृतिसमन्वाहारः स्मृतेश्चिन्तायाः १० समन्वाहारः अपराध्यानरहितत्वेन पुनः पुनश्चिन्तने प्रवर्तनं स्मृतिसमन्वाहारः। कथमेतस्य मत्तो विनाशो भविष्यतीति चिन्ताप्रबन्ध इत्यर्थः।

अथ द्वितीयस्यार्तस्य लक्षणमाह—

विपरीतं मनोज्ञस्य ॥ ३१ ॥

मनो जानाति चित्ताय रोचते मनोज्ञं तस्य मनोज्ञस्य [2]प्रियस्य वस्तुनोऽर्थकथनं विपरीतं पूर्वोक्तादर्थाद् विपरीत[3]चिन्तनं विपर्यस्ताध्यानं द्वितीयमार्तं भवति। किन्तद् विपरीतम्? १५ मनोज्ञस्य [4]इष्टस्य निजपुत्रकलत्रस्वापतेयादेर्विप्रयोगे वियोगे सति तत्संयोगाय स्मृतिसमन्वाहारो [5]विकल्पश्चिन्ताप्रबन्ध इष्टसंयोगापरनामकं द्वितीयमार्तध्यानं वेदितव्यम्।

अथ तृतीयार्तध्यानलक्षणमाह—

वेदनायाश्च ॥ ३१॥ २०

अत्र चकारः परस्परसमुच्चये वर्तते। तेनायमर्थः—न केवलं मनोज्ञस्य विपरीतं वेदनायाश्च विपरीतम्। वेदनायाः कस्माद् विपरीतम्? मनोज्ञात्। तेनायमर्थः—वेदनाया दुःखस्य सम्प्रयोगे सति तद्विप्रयोगाय स्मृतिसमन्वाहारस्तृतीयमार्तं भवति। वेदनया पीडितस्याऽस्थिरचित्तस्य परित्यक्तधीरत्वस्य वेदना[6]संन्निधाने सति कथमेतस्याः वेदनायाः विनाशो भविष्यतीति वेदनावियोगाय पुनः पुनश्चिन्तनमङ्गविक्षेपणमाक्रन्दनं वाष्पजलविमोचनं पापोऽयं रोगो २५ मामतीव बाधते कदायं रोगो [7]विनङ्क्ष्यतीति स्मृतिसमन्वाहारस्तृतीयमार्तध्यानं भवतीत्यर्थः।

अथ चतुर्थस्यार्तध्यानस्य लक्षणं निर्दिश्यते—

निदानञ्च ॥ ३३ ॥

अत्र चकार आर्तेन सह समुच्चीयते। तेनायमर्थः—न केवलं पूर्वोक्तं प्रकारं तृतीयमार्त-

---

१ मनो ज्ञातीति ता०। २ प्रियवस्तु– आ०, द०, ज०। ३ –तच्चिचच्चिन्तनम् आ०, द०, ज०। ४ इष्टनिज– आ०, द०, ज०। ५ विकल्पचि– आ०, द०, ज०। ६ संविधाने आ०, द०, ज०। ७ विनश्यतीति आ०, द०, ज०।

ध्यानं भवति किन्तु निदानञ्च चतुर्थमार्तध्यानं भवति, अनागतभोगाकाङ्क्षालक्षणं निदानमुच्यते इत्यभिप्रायः ।

अथैतच्चतुर्विधमप्यार्तध्यानं कस्योत्पद्यते इति तस्य स्वामित्वसूचनार्थं सूत्रमिदमाहुः—

तदविरतदेशविरतप्रमत्तसंयतानाम् ॥ ३४ ॥

५ न विरता न व्रतं प्राप्ता अविरताः मिथ्यादृष्टिसासादनमिश्रासंयतसम्यग्दृष्टिगुणस्थानचतुष्टयवर्तिनोऽविरता उच्यन्ते । देशविरताः संयतासंयताः, श्रावका इत्यर्थः । प्रमत्तसंयताश्चारित्राऽनुष्ठायिनः पञ्चदशप्रमादसहिता महामुनय उच्यन्ते । अविरताश्च देशविरताश्च प्रमत्तसंयताश्च अविरतदेशविरतप्रमत्तसंयतास्तेषामविरतदेशविरतप्रमत्तसंयतानां तत्पूर्वोक्तमार्तध्यानं भवति । तत्र आद्यगुणस्थानपञ्चकवर्तिनां चतुर्विधमप्यार्तं सञ्जायते असंयमपरिणाम-
१० सहितत्वात् । प्रमत्तसंयतानां तु चतुर्विधमप्यार्तध्यानं भवति अन्यत्र निदानात् । देशविरतस्यापि निदानं न स्यात् सशल्यस्य व्रतित्वाघटनात् । अथवा स्वल्पनिदानशल्येनाणुव्रतित्वाविरोधाद् देशविरतस्य चतुर्विधमप्यार्तं सङ्गच्छत एव । प्रमत्तसंयतानां [1]त्वार्त्तत्रयं प्रमादस्योदयाधिक्यात् कदाचित् सम्भवति ।

अथ रौद्रध्यानस्य लक्षणं स्वामित्वं चैकेनैव सूत्रेण सूचयितुं सूत्रमिदमाहुः—

१५ **हिंसाऽनृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ॥ ३५ ॥**

हिंसा च प्राणातिपातः अनृतञ्चाऽसत्यभाषणं स्तेयञ्च परद्रव्यापहरणं विषयसंरक्षणञ्च इन्द्रियार्थभोगोपभोगसम्यक्प्रतिपालनयत्नकरणं हिंसानृतस्तेयविषयसंरक्षणानि तेभ्यः हिंसानृतस्तेयविषयसंरक्षणेभ्यः । पञ्चमीबहुवचनमेतत् । एतेभ्यश्चतुर्भ्यो रौद्रं रौद्रध्यानं समुत्पद्यते इति
२० वाक्यशेषः । तद् रौद्रध्यानं हिंसानृतस्तेयविषयसंरक्षणस्मृतिसमन्वाहारलक्षणमविरतदेशविरतयोर्भवति पञ्चगुणस्थानस्वामिकमित्यर्थः । ननु अविरतस्य रौद्रध्यानं जाघटीत्येव देशविरतस्य तत्कथं सङ्गच्छते ? साधूक्तं भवता; य एकदेशेन विरतस्तस्य कदाचित् प्राणातिपाताद्यभिप्रायात् धनादिसंरक्षणत्वाच्च कथं न घटते परमयन्तु विशेषः-देशसंयतस्य रौद्रमुत्पद्यते एव परं नरकादिगतिकारणं तन्न भवति सम्यक्त्वरत्नमण्डितत्वात् । तदुक्तम्—

२५ **"सम्यग्दर्शनशुद्धाः नारकतिर्यङ्नपुंसकस्त्रीत्वानि ।**
दुष्कुलविकृताल्पायुर्दरिद्रताञ्च व्रजन्ति नाप्यव्रतिकाः॥" [रत्नक० श्लो० ३५]

प्रमत्तसंयतस्य तु रौद्रध्यानं न भवत्येव रौद्रध्यानारम्भे [2]असंयमस्य सद्भावात् ।

[3]अथाद्य मोक्षकारणधर्म्यध्यानप्रकारलक्षणस्वामित्वादि निर्देष्टुकामस्तत्प्रकारनिरूपणार्थं सूत्रमिदमाह—

---

१ तु तच्चार्तत्रयम् ता० । २ असंयतस्य तद्भावात् आ०, द०, ज० । ३ अथाद्य मोक्षकारणं धर्म्यध्यानलक्षणं स्वामित्वमिदमाहुः आ०, द०, ज० ।

आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ॥ ३६ ॥

आज्ञा च अपायश्च विपाकश्च संस्थानञ्च आज्ञापायविपाकसंस्थानानि तेषां विचयनं विचय आज्ञापायविपाकसंस्थानविचयस्तस्मै आज्ञापायविपाकसंस्थानविचयाय धर्म्यध्यानं भवति। किन्तद् धर्म्यध्यानम् ? स्मृतिसमन्वाहारः-चिन्ताप्रबन्धः। किमर्थं चिन्ताप्रबन्धः ? आज्ञाविपाकाय आज्ञाविचयाय आज्ञाविवेकाय आज्ञाविचारणायै । तथा अपायविचयाय ५ स्मृतिसमन्वाहारः धर्म्मध्यानं भवति । तथा विपाकविचयाय स्मृतिसमन्वाहारो धर्म्यध्यानं भवति । तथा संस्थानविचयाय स्मृतिसमन्वाहारो धर्म्मध्यानं भवति। कोऽसौ आज्ञाविचयः ? यथावदुपदेष्टुः पुरुषस्याभावे सति आत्मनश्च कर्मोदयान्मन्द-बुद्धित्वे सति पदार्थानामतिसूक्ष्मत्वे सति हेतुदृष्टान्तानाञ्च उपरमे सति य आसन्नभव्यः सर्वज्ञप्रणीतं शास्त्रं प्रमाणीकृत्य सूक्ष्मवस्त्वर्थं मन्यते अयं वस्त्वर्थ इत्थ- १० मेव वर्तते । इत्थं कथम् ? यादृशमर्थं जैनागमः कथयति सोऽर्थस्तादृश एवान्यथा न भवति **"नान्यथावादिनो जिनाः"** [ ] इति वचनात्। अतिगहनपदार्थ-श्रद्धानेनार्थावधारणमाज्ञाविचय[१] उच्यते। अथवा स्वयमेव विज्ञातवस्तुतत्त्वो विद्वान् तद्वस्तु-तत्त्वं प्रतिपादयितुमिच्छुर्निजसिद्धान्ताऽविरोधेन तत्त्वस्य समर्थनार्थं तर्कनयप्रमाणयोज-नपरः सन् स्मृतिसमन्वाहारं विदधाति चिन्ताप्रबन्धं करोति। किमर्थं स्मृतिसमन्वाहारं करोति? १५ सर्वज्ञवीतरागस्याज्ञाप्रकाशनार्थम् । सर्वज्ञवीतरागप्रणीततत्त्वार्थप्रकटनार्थं स पुमान् आज्ञाविचयलक्षणं धर्म्यं ध्यानं प्राप्नोति। १। मिथ्यादृष्टयो जन्मान्धसदृशाः सर्वज्ञवीतराग-प्रणीतसन्मार्गपराङ्मुखाः सन्तो मोक्षमाकाङ्क्षन्ति तस्य तु मार्गं न सम्यक् परिजानते तं मार्ग-मतिदूरं परिहरन्तीति सन्मार्गविनाशचिन्तनमपायविचय उच्यते। अथवा मिथ्यादर्शनमिथ्या-ज्ञानमिथ्याचारित्राणामपायो विनाशः कथममीषां प्राणिनां भविष्यतीति स्मृतिसमन्वाहा- २० रोऽपायविचयो भण्यते । २ । ज्ञानावरणाद्यष्टककर्मणां द्रव्यक्षेत्रकालभवभावहेतुकं फला-नुभवनं यज्जीवः चिन्तयति स विपाकविचयः समुत्पद्यते। ३ । त्रिभुवनसंस्थानस्वरूपवि-चयाय स्मृतिसमन्वाहारो संस्थानविचयो निगद्यते।

ननु धर्म्यादनपेतं धर्म्यमिति भवद्भिरुक्तं तत्कोऽसौ धर्मो यस्मादनपेतं धर्म्यमुच्यते इति चेत् ? उच्यते-उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्यदशलक्षणो २५ धर्मः । निजशुद्धबुद्धैकस्वभावात्मभावनालक्षणश्च धर्मः । अगार्यनगारचारित्रञ्च धर्मः। सूक्ष्मबादरादिप्राणिनां रक्षणञ्च धर्मः । तदुक्तम्—

"धम्मो वत्थुसहावो खमादिभावो य दसविहो धम्मो ।
चारित्तं खलु धम्मो जीवाणं रक्खणं धम्मो ॥" [कत्ति० अणु० गा० ४७६]

तस्मादुक्तलक्षणाद्धर्मादनपेतमपरिच्युतं ध्यानं धर्म्यमुच्यते । ईदृग्विधं चतुर्विधमपि ३०

---

१ -यमुच्यते आ०, द०, ज० ।

धर्म्यमप्रमत्तसंयतस्य साक्षाद् भवति अविरतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतानां तु गौण-वृत्त्या धर्म्यध्यानं वेदितव्यमिति ।

अथ शुक्लध्यानमपि चतुर्विधं भवति । तत्र प्रथमशुक्लध्यानद्वयस्य तावत् स्वामित्व-मुच्यते—

५ **शुक्ले चाद्ये पूर्वविदः ॥ ३७ ॥**

शुक्लध्यानं[1] खलु चतुर्विधमग्रे वक्ष्यति । तन्मध्ये आद्ये द्वे शुक्ले शुक्लध्याने पृथक्त्ववि-तर्कविचारैकत्ववितर्कविचारसंज्ञे पूर्वविदः सकलश्रुतज्ञानिनो भवतः श्रुतकेवलिनः सञ्जायेते इत्यर्थः । चकारात् धर्म्यध्यानमपि भवति । **"व्याख्यानतो विशेषप्रतिपत्ति-र्नहि सन्देहादलक्षणम्"** [ ] इति वचनात् श्रेण्यारोहणात् पूर्वं धर्म्यं ध्यानं भवति ।
१० श्रेण्योस्तु द्वे शुक्लध्याने भवतस्तेन सकलश्रुतधरस्यापूर्वकरणात्पूर्वं धर्म्यं ध्यानं योजनीयम् । अपूर्वकरणेऽनिवृत्तिकरणे सूक्ष्मसाम्पराये उपशान्तकषाये चेति गुणस्थानचतुष्टये पृथक्त्ववितर्क-विचारं नाम प्रथमं शुक्लध्यानं भवति । क्षीणकषायगुणस्थानेषु एकत्ववितर्कविचारं भवति ।

अथापरशुक्लध्यानद्वयं कस्य भवतीति प्रश्ने सूत्रमिदमाहुः—

परे केवलिनः ॥ ३८ ॥

१५ परे सूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तिनाम्नी द्वे शुक्लध्याने केवलिनः प्रक्षीणसमस्त-ज्ञानावृतेः सयोगकेवलिनोऽयोगकेवलिनश्चानुक्रमेण ज्ञातव्यम् । कोसावनुक्रमः ? सूक्ष्मक्रिया-प्रतिपाति सयोगस्य व्युपरतक्रियानिवर्ति अयोगस्य ।

अथ येषां स्वामिनः प्रोक्तास्तेषां भेदपरिज्ञानार्थं सूत्रमिदमाहुः–

पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि ॥ ३९ ॥

२० वितर्कशब्दः प्रत्येकं प्रयुज्यते तेनायं विग्रहः–पृथक्त्ववितर्कश्च एकत्ववितर्कश्च पृथक्त्वै-कत्ववितर्के ते च सूक्ष्मक्रियाप्रतिपाति च व्युपरतक्रियानिवर्ति च पृथक्त्वैकत्ववितर्कसूक्ष्मक्रि-याप्रतिपातिव्युपरतक्रियानिवर्तीनि । सूक्ष्मक्रियापादविहरणात्मकक्रियारहिता पद्मासनेनैव गमनं तस्या अप्रतिपातोऽविनाशो [2]वर्तते यस्मिन् शुक्लध्याने तत्सूक्ष्मक्रियाप्रतिपाति । व्युपरता विनष्टा सूक्ष्मापि क्रिया व्युपरतक्रिया तस्यां [3]सत्यामतिशयेन वर्तते इत्येवं शीलं यच्छुक्लध्यानं तद्-
२५ व्युपरतक्रियानिवर्ति । एतानि चत्वारि शुक्लध्यानानि भवन्ति ।

एतेषां चतुर्णां शुक्लध्यानानां प्रतिनियतयोगावलम्बनत्वपरिज्ञानार्थं सूत्रमिदमाहुः स्वामिनः—

त्र्येकयोगकाययोगायोगानाम् ॥ ४० ॥

योगशब्दः प्रत्येकं प्रयुज्यते । तेनायं विग्रहः–त्रयः कायवाङ्मनःकर्मलक्षणा योगा
३० यस्य स त्रियोगः । त्रिषु योगेषु मध्ये एकः कोऽपि योगो यस्य स एकयोगः । कायस्य योगो

---

१ –ध्यानं चतु– आ०, द०, ज० । २ विद्यते ता० । ३ सत्यां न्यतिशयेन ता०, द०, ज० ।

यस्य स काययोगः। न विद्यते योगो यस्य स अयोगः। त्रियोगश्च एकयोगश्च त्र्येकयोगौ तौ च काययोगश्चायोगश्च त्र्येकयोगकाययोगायोगास्तेषां त्र्येकयोगकाययोगायोगानाम्। अस्यायमर्थः-पृथक्त्ववितर्कं त्रियोगस्य भवति। मनोवचनकायानामवष्टम्भेनात्मप्रदेशपरिस्पन्दनम् आत्मप्रदेशचलनम्। ईदृग्विधं पृथक्त्ववितर्कमाद्यं शुक्लध्यानं भवतीत्यर्थः। एकत्ववितर्कं शुक्लध्यानं त्रिषु योगेषु मध्ये मनोवचनकायानां मध्येऽन्यतमावलम्बनेनात्मप्रदेशपरिस्पन्दनमात्मप्रदेशचलनं द्वितीयमेकत्ववितर्कं शुक्लध्यानं भवति। सूक्ष्मक्रियाप्रतिपाति काययोगावलम्बनेनात्मप्रदेशपरिस्पन्दनमात्मप्रदेशचलनं तृतीयं शुक्लध्यानं सूक्ष्मक्रियाप्रतिपाति भवति। व्युपरतक्रियानिवर्तिशुक्लध्यानेनैकमपि योगमवलम्ब्य आत्मप्रदेशपरिस्पन्दनमात्मप्रदेशचलनं भवति। ५

अथ चतुर्षु शुक्लध्यानेषु मध्ये पृथक्त्ववितर्कैकत्ववितर्कयोर्विशेषपरिज्ञानार्थं[1] सूत्रमिदमाहुः— १०

एकाश्रये सवितर्कवीचारे पूर्वे ॥ ४१ ॥

पूर्वे द्वे ध्याने पृथक्त्ववितर्कमेकत्ववितर्कञ्च। एते द्वे ध्याने कथम्भूते? एकाश्रये। एकोऽद्वितीयः परिप्राप्तसकलश्रुतज्ञानपारसमाप्तिः पुमानाश्रयो ययोस्ते एकाश्रये। एते द्वे ध्याने परिपूर्णश्रुतज्ञानेन पुंसा आरभ्येते इत्यर्थः। पुनरपि कथम्भूते पूर्वे द्वे ध्याने? सवितर्कवीचारे। वितर्कश्च वीचारश्च वितर्कवीचारौ वितर्कवीचाराभ्यां सह वर्तेते सवितर्कवीचारे पृथक्त्वमपि वितर्कसहितमेकत्वमपि वितर्कसहितम्। तथा पृथक्त्वमपि वीचारसहितमेकत्वमपि वीचारसहितमिति तावदनेन सूत्रेण स्थापितम्। तेन पृथक्त्ववितर्कवीचारं प्रथमं शुक्लमेकत्ववितर्कवीचारं द्वितीयं शुक्लमित्येवं भवति। १५

अथैकत्ववितर्कवीचारे योऽसौ वीचारशब्दः स्थापितः स न सिद्धान्ताभिमतस्तन्निषेधार्थं सिंहावलोकनन्यायेन भगवान् सूत्रमिदं ब्रवीति— २०

अवीचारं द्वितीयम् ॥ ४२ ॥

न विद्यते वीचारो यस्मिन् तदवीचारं द्वितीयमेकत्ववितर्कमित्यर्थः। तेन आद्यं शुक्लध्यानं सवितर्कं सवीचारञ्च स्यात् द्वितीयं शुक्लध्यानं सवितर्कमवीचारं भवेत् तेनाद्यं पृथक्त्ववितर्कवीचारं द्वितीयन्तु एकत्ववितर्कावीचारमित्युभेऽपि ध्यानेऽन्वर्थसंज्ञे वेदितव्ये। २५

अथान्वर्थसंज्ञाप्रतिपत्त्यर्थं सूत्रमिदमुच्यते—

वितर्कः श्रुतम् ॥ ४३ ॥

विशेषेण विशिष्टं वा तर्कणं सम्यगूहनं वितर्कः श्रुतं श्रुतज्ञानम्। वितर्क इति कोऽर्थः? श्रुतज्ञानमित्यर्थः। प्रथमं शुक्लध्यानं द्वितीयं शुक्लध्यानं श्रुत[2]ज्ञानबलेन ध्यायते इत्यर्थः।

---

१ –ज्ञापनार्थम् आ०, द०, ज०। २ ज्ञानेन आ०, द०, ज०।

अथ वीचारशब्देन किं लभ्यते इति प्रश्ने सूत्रमिदमाहुः—

वीचारोऽर्थव्यञ्जनयोगसङ्क्रान्तिः ॥ ४४ ॥

अर्थश्च व्यञ्जनश्च योगश्च अर्थव्यञ्जनयोगास्तेषां सङ्क्रान्तिः अर्थव्यञ्जनयोगसङ्क्रातिः वीचारो भवतीति तात्पर्यम्। अर्थो ध्येयो ध्यानीयो ध्यातव्यः पदार्थः द्रव्यं पर्यायो वा। ५ व्यञ्जनं वचनं शब्द इति यावत्। योगः कायवाङ्मनःकर्मसङ्क्रान्तिः परिवर्तनम्। तेनायमर्थः— द्रव्यं ध्यायति द्रव्यं त्यक्त्वा पर्यायं ध्यायति पर्यायञ्च परिहृत्य पुनर्द्रव्यं ध्यायति इत्येवं पुनः पुनः [1]सङ्क्रमणमर्थसङ्क्रान्तिरुच्यते। तथा श्रुतज्ञानशब्दमवलम्ब्य अन्यं श्रुतज्ञानशब्दमवलम्बते, तमपि परिहृत्य अपरं श्रुतज्ञानवचनमाश्रयति एवं पुनः [2]पुनस्त्यजन्नाश्रयमाणश्च व्यञ्जनसङ्क्रान्तिं लभते। तथा काययोगं मुक्त्वा वाग्योगं मनोयोगं वा आश्रयति तमपि विमुच्य काययोग- १० मागच्छति एवं पुनः पुनः कुर्वन् योगसङ्क्रान्तिं प्राप्नोति। अर्थव्यञ्जनयोगानां सङ्क्रान्तिः परिवर्तनं वीचारः कथ्यते। नन्वेवंविधायां सङ्क्रान्तौ सत्यामनवस्थानहेतुत्वाद् ध्यानं कथं घटते? साधूक्तं भवता; ध्यानसन्तानोऽपि ध्यानं भवत्येव बहुत्वाद् दोषो न [3]विमृश्यते। द्रव्यसन्तानः पर्यायः शब्दस्य शब्दान्तरं सन्तानः, योगस्य योगान्तरञ्च सन्तानस्तद्ध्यानमेव भवतीति नास्ति दोषः। तस्मात्कारणात् सङ्क्रान्तिलक्षणवीचारादपरविशेषकथितं चतुःप्रकारं धर्म्यं ध्यानं शुक्लञ्च १५ ध्यानं संसारविच्छित्तिनिमित्तं चतुर्दशपूर्वप्रोक्तगुप्तिसमितिदशलक्षणधर्मद्वादशानुप्रेक्षाद्वाविंशतिपरीषहजयचारित्रलक्षणबहुविधोपायं मुनिर्ध्यातुं योग्यो भवति। गुप्त्यादिषु कृतपरिकर्मा विहिताभ्यासः सन् परद्रव्यपरमाणुं द्रव्यस्य सूक्ष्मत्वं भावपरमाणुं पर्यायस्य सूक्ष्मत्वं वा ध्यायन् सन् समारोपितवितर्कसामर्थ्यः सन्नर्थव्यञ्जने कायवचसी च पृथक्त्वेन सङ्क्रमता मनसा असमर्थशिशूद्यमवत् प्रौढार्भकवदव्यवस्थितेन अतीक्ष्णेन कुठारादिना शस्त्रेण चिराद् वृक्षं २० छिन्दन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च मुनिः पृथक्त्ववितर्कवीचारध्यानं भजते। स एव पृथक्त्ववितर्कवीचारध्यानभाक् मुनिः समूलमूलं मोहनीयं कर्म निर्दिधक्षन् मोहकारणभूतसूक्ष्मलोभेन सह निर्दग्धुमिच्छन् भस्मसात्कर्तुकामोऽनन्तगुणविशुद्धिकं योगविशेषं समाश्रित्य प्रचुरतराणां ज्ञानावरणसहकारिभूतानां प्रकृतीनां बन्धनिरोधस्थितिह्रासौ च विदधन् सन् श्रुतज्ञानोपयोगः सन् परिहृतार्थव्यञ्जनसङ्क्रान्तिः सन्नप्रचलितचेताः क्षीणकषायगुणस्थाने २५ स्थितः सन् [4]बालवायजमणिरिव निष्कलङ्कः सन् वैडूर्यरत्नमिव निरुपलेपः सन् पुनरधस्तादनिवर्तमान एकत्ववितर्कवीचारं ध्यानं ध्यात्वा निर्दग्धघातिकर्मेन्धनो जाज्वल्यमानकेवलज्ञानकिरणमण्डलः सन् मेघपटलविघटनाविर्भूतो[5] देवः सविता इव प्रकाशमानो भगवांस्तीर्थकरपरमदेवः सामान्यानगारकेवली वा गणधर[6]वरकेवली वा त्रिभुवनपतीनामभिगम्य पूजनीयश्च [7]सञ्जायमानः प्रकर्षेण देशोनां पूर्वकोटीं भूमण्डले विहरति। स भगवान् यदा अन्तर्मुहूर्तशेषा-

---

१ सङ्क्रममर्थ– ता०। २ पुनस्त्यजनादाश्रयणाच्च आ०, द०, ज०। ३ विस्मृश्यते ता०। ४ वैडूर्यमणिः। ५ –भूभो वेवः आ०, ज०। –भूभो केवः द०। ६ –धरचरकेवली ता०। –धरदेवके– द०। ७ सञ्जयमानः ता०।

युर्भवति अन्तर्मुहूर्तस्थितिवेद्यनामगोत्रश्च भवति तदा विश्वं वाग्योगं मनोयोगं बादरकाययोगञ्च परिहृत्य सूक्ष्मकाययोगे स्थित्वा सूक्ष्मक्रियाप्रतिपातिध्यानं समाश्रयति। यदा त्वन्तर्मुहूर्तशेषायुःस्थितिः ततोऽधिकस्थितिवेद्यनामगोत्रकर्मत्रयो भवति तदात्मोपयोगातिशयव्यापारविशेषो यथाख्यातचारित्रसहायो महासंवरसहितः शीघ्रतरकर्मपरिपाचनपरः सर्वकर्मरजः[1]समुद्घायनसामर्थ्यस्वभावः दण्डकपाटप्रतरलोकपूरणानि निजात्मप्रदेशप्रसरणलक्षणानि चतुर्भिः समयैः ५ करोति तथैव चतुर्भिः समयैः समुपहरति ततः समानविहितस्थित्यायुर्वेद्यनामगोत्रकर्मचतुष्कः पूर्वशरीरप्रमाणो भूत्वा सूक्ष्मकाययोगावलम्बनेन सूक्ष्मक्रियाप्रतिपातिध्यानं ध्यायति। तदनन्तरं व्युपरतक्रियानिवर्तिनामधेयं समुच्छिन्नक्रियानिवृत्त्यपरनामकं ध्यानमारभते। समुच्छिन्नः प्राणापातप्रचारः सर्वकायवाङ्मनोयोगसर्वप्रदेशपरिस्पन्दक्रियाव्यापारश्च यस्मिन् तत् समुच्छिन्नक्रियानिवर्ति ध्यानमुच्यते। तस्मिन् समुच्छिन्नक्रियानिवर्तिनि ध्याने सर्वास्रवबन्धनिरोधं १० करोति, सर्वशेषकर्मचतुष्टयविध्वंसनं विदधाति, परिपूर्णयथाख्यातचारित्रज्ञानदर्शनश्च भवति, सर्वसंसारदुःखसंश्लेषविच्छेदनं जनयति। स भगवान् अयोगिकेवली तस्मिन् काले ध्यानाग्निनिर्दग्धकर्मम[2]लकलङ्कबन्धनः सन् दूरीकृतकिट्टधातुपाषाणस[3]ञ्जातजातरूपसदृशः परिप्राप्तात्मस्वरूपः परमनिर्वाणं ग[4]च्छति। अत्र अन्त्यशुक्लध्यानद्वये यद्यपि चिन्तानिरोधो नास्ति तथापि ध्यानङ्करोतीत्युपचर्यते। कस्मात्? ध्यानकृत्यस्य योगापहारस्याऽघातिघातस्योपचारनिमित्तस्य १५ सद्भावात्। यस्मात् साक्षात्कृतसमस्तवस्तुस्वरूपेऽर्हति भगवति न किञ्चिद् ध्येयं स्मृतिविषयं वर्तते। तत्र यद् ध्यानं तत् असमकर्म्मणां समकरणनिमित्तं या चेष्टा कर्मसमत्वे वर्तते तत्क्षययोग्यसमता लौकिकी या मनीषा तदेव निर्वाणं सुखम्। तत्सुखं मोहक्षयात्, दर्शनं दर्शनावरणक्षयात्, ज्ञानं ज्ञानावरणक्षयात्, अनन्तवीर्यमन्तरायक्षयात्, जन्ममरणक्षय आयुःक्षयात्, अमूर्त्तत्वं नामक्षयात्, नीचोच्चकुलक्षयो गोत्रक्षयात्, इन्द्रियजनितशुभक्षयो वेद्यक्षयात्। एकस्मि- २० न्निष्टे वस्तुनि स्थिरा मतिर्ध्यानं कथ्यते। आर्तरौद्रधर्म्यापेक्षया या तु चञ्चला मतिर्भवत्यशुभा शुभा वा तच्चित्तं कथ्यते भावना वा कथ्यते अनेकनययुक्ता अनुप्रेक्षा वा कथ्यते चिन्तनं वा कथ्यते श्रुतज्ञानपदालोचनं वा कथ्यते ख्यापनं वा कथ्यते। इत्येवं द्विप्रकारं तपो नूतनकर्मादीनाञ्च (कर्मास्रव) निषेधकारणं यतस्तेन संवरकारणं पूर्वकर्मधूलिविधूननं यतस्तेन निर्जराकारणं पञ्चविंशतिसूत्रे व्याख्यातं वेदितव्यम्। २५

अथ सर्वे सद्दृष्टयः किं समाननिर्जरा भवन्ति उतश्चिदस्ति तेषां निर्जराविशेष इति प्रश्ने सूत्रमिदमाहुः—

सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ॥ ४५ ॥ ३०

---

१ –समुदयेन साम– आ०, द०, ज०। २ –मलबन्ध– आ०, द०, ज०। ३ सञ्जात उत्पन्न सुवर्णरूपसदृशः आ०, द०, ज०। ४ संगच्छति आ०, द०, ज०।

सम्यग्दृष्टिश्च श्रावकश्च विरतश्चाऽनन्तवियोजकश्च दर्शनमोहक्षपकश्च उपशमकश्च उपशान्तमोहश्च क्षपकश्च क्षीणमोहश्च जिनश्च सम्यग्दृष्टिश्रावकविरताऽनन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः। एते दशविधपुरुषा अनुक्रमेणाऽसंख्येयगुणनिर्जरा भवन्ति। तथाहि—एकेन्द्रियेषु विकलत्रये च प्रचुरतरकालं भ्रान्त्वा पञ्चे-
५ न्द्रियत्वे सति कालादिलब्धिसञ्जनितविशुद्धपरिणामक्रमेणापूर्वकरणपङ्क्त्यो[१]रुत्प्लवमानोऽयं जीवः प्रचुरतरनिर्जरावान् भवति। स एव तु औपशमिकसम्यक्त्वप्राप्तिकारणनैकट्ये सति सम्यग्दृष्टिः सन्नसङ्ख्येयगुणनिर्जरां लभते। स एव तु प्रथमसम्यक्त्वचारित्रमोहकर्मभेदाप्रत्याख्यानक्षयोपशमहेतुपरिमाणप्राप्त्यवसरे प्रकृष्टविशुद्धिः श्रावकः सन् तस्मादसङ्ख्येयगुणनिर्जरां प्राप्नोति। स एव तु प्रत्याख्यानावरणकषायक्षयोपशमहेतुभूतपरिणाम-
१० विशुद्धो विरतः सन् श्रावकादसङ्ख्येयगुणनिर्जरां विन्दति। स एव त्वनन्तानुबन्धिकषायचतुष्टयस्य यदा वियोजको वियोजनपरो विघटनपरो भवति तदा प्रकृष्टपरिणामविशुद्धिः सन् विरतादप्यसङ्ख्येयगुणनिर्जरामासादयति। स एव तु दर्शनमोहप्रकृतित्रयशुष्कतृणराशिं यदा निर्दग्धुमिच्छन् भवति तदा प्रकृष्टपरिणामविशुद्धिः सन् दर्शनमोहक्षपकनामा ना[२] अनन्तवियोजकादसङ्ख्येयगुणनिर्जरां प्रपद्यते। एवं स पुमान् क्षायिकसद्दृष्टिः सन् श्रेण्यारोहणमि-
१५ च्छन् चारित्रमोहोपशमे प्रवर्तमानः प्रकृष्टविशुद्धिः सन उपशमकनामा सन् क्षपकनामकादसङ्ख्येयगुणनिर्जरामधिगच्छति। स एव तु समस्तचारित्रमोहोपशमकारणनैकट्ये सति सम्प्राप्तोपशान्तकषायापरनामकः दर्शनमोहक्षपकादसङ्ख्येयगुणनिर्जरां प्रतिपद्यते। स एव तु चारित्रमोहक्षपणे सम्मुखो[३] भवन् प्रवर्द्धमानपरिणामविशुद्धिः सन् क्षपकनाम दधन् उपशान्तमोहादुपशान्तकषायापरनामकादसङ्ख्येयगुणनिर्जरामश्नुते। स पुमान् यस्मिन् काले समग्रचारि-
२० त्रमोहक्षपणपरिणामेषु सम्मुखः क्षीणकषायाभिधानं [४]प्रहमाणो भवति तदा क्षपकनामकादसङ्ख्येयगुणनिर्जरामासीदति। स एवैकत्ववितर्कावीचारनामशुक्लध्यानाग्निभस्मसात्कृतघातिकर्मसमूहः सन् जिननामधेयो भवन् क्षीणमोहादसङ्ख्येयगुणनिर्जरामादत्ते।

अथात्राह कश्चित्—सम्यक्त्वसामीप्ये चेदसङ्ख्येयगुणनिर्जरा [५]भवति परस्परमेषां निर्जरापेक्षया समत्वं न भवति तर्हि एते विरतादयः किं विरताविरतवन्निर्ग्रन्थत्वसंज्ञां न
२५ लभन्ते? नैवम्; विरतादयो निर्जरागुणभेदेऽपि निर्ग्रन्थसंज्ञा प्राप्नुवन्त्येव। कुतः? नैगमादिनयव्याप्तेः। तन्निर्ग्रन्थनामस्थापनाद्यर्थं सूत्रमिदमाहुः—

पुलाक[६]वकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ॥४६॥

पुलाकाश्च वकुशाश्च कुशीलाश्च निर्ग्रन्थाश्च स्नातकाश्च पुलाकवकुशकुशीलनिर्ग्रन्थस्नातकाः। एते पञ्च प्रकारा निर्ग्रन्थाः [७]इत्युच्यन्ते। तत्रोत्तरगुणभावबाधारहिताः क्वचित्

---

१ 'रु' इत्यधिकं वर्तते। २ पुमान्। ३ सन्मुखः ता०, द०, ज०। ४ प्रहयमाणः ता०। प्रहणमाणः आ०, द०। प्रह्यमाणः ज०। ५ भवन्ति आ०, द०, ज०। ६ –बकुश– आ०। ७ कथ्यन्ते आ०, द०, ज०।

कदाचित् कथञ्चित् व्रतेष्वपि परिपूर्णत्वमलभमाना अविशुद्धपुलाकसदृशत्वात् पुलाका उच्यन्ते । मलिनतण्डुलसमानत्वात् पुलाकाः कथ्यन्ते

"भक्तसिक्थे च संक्षेपे सारधान्ये पुलाकवाक् ॥" [ ] इति वचनात् ।

निर्ग्रन्थत्वे स्थिता अविध्वस्तव्रताः शरीरोपकरणर्द्धिभूषणयशःसुखविभूत्याकाङ्क्षिणः अविविक्तपरिच्छदानुमोदनशबलयुक्ता ये ते वकुशा उच्यन्ते। अविविक्तशब्देन असंयतः परिच्छदशब्देन ५ परिवारः अनुमोदनमनुमतिः शबलशब्देन कर्बुरत्वं तद्युक्ता वकुशा इत्यर्थः। शबलपर्यायवाचको वकुशशब्दो वेदितव्यः । कुशीला द्विप्रकाराः-प्रतिसेवनाकषायकुशीलभेदात् । तत्र प्रतिसेवनाकुशीला अविविक्तपरिग्रहाः सम्पूर्णमूलोत्तरगुणाः कदाचित्कथञ्चिदुत्तरगुणानां विराधनं विदधतः प्रतिसेवनाकुशीला भवन्ति । सञ्ज्वलनापरकषायोदयरहिताः सञ्ज्वलनकषायमात्रवशवर्तिनः कषायकुशीलाः प्रतिपाद्यन्ते[1] । यथा जले लकुटरेखा सद्यो मिलति १० तथा अप्रकटकर्मोदया मुहुर्तादुपरि समुत्पद्यमानकेवलज्ञानदर्शनद्वया निर्ग्रन्थाः कथ्यन्ते । [3]तीर्थकरकेवलीतरकेवलीभेदाद् द्विप्रकारा अपि केवलिनः स्नातका उच्यन्ते । चारित्रपरिणामोत्कर्षापकर्षभेदेऽपि सति नैगमसङ्ग्रहादिनयाधीनतया विश्वेऽपि पञ्चतये निर्ग्रन्थाः कथ्यन्ते जात्याचाराध्ययनादिभेदेऽपि[4] द्विजन्मवत् ।

अथ पुलाकादीनां विशेषपरिज्ञानार्थं सूत्रमिदमुच्यते— १५

संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानविकल्पतः साध्याः ॥ ४७ ॥

अन्तरविराधने सति पुनः सेवना प्रतिसेवना, दोषविधानमित्यर्थः । ततः संयमश्च श्रुतश्च प्रतिसेवना च तीर्थञ्च लिङ्गञ्च लेश्याश्च उपपादश्च स्थानानि च संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानानि तेषां विकल्पा भेदाः संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थान- २० विकल्पाः तेभ्यः ततः पुलाकादयः पञ्चतये महर्षयः संयमादिभिरष्टभिर्भेदैरन्योन्यभेदेन साध्या व्यवस्थापनीया व्याख्यातव्या इत्यर्थः । तथाहि-पुलाकवकुशप्रतिसेवनाकुशीलाः सामयिकच्छेदोपस्थापनानामसंयमद्वये वर्तन्ते । सामयिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्परायनामसंयमचतुष्टये कषायकुशीलाः भवन्ति । निर्ग्रन्थाः स्नातकाश्च यथाख्यातसंयमे सन्ति । पुलाकवकुशप्रतिसेवनाकुशीलेषु उत्कर्षेणाभिन्नाक्षरदशपूर्वाणि श्रुतं भवति । कोऽर्थः ? २५ अभिन्नाक्षराणि एकेनाप्यक्षरेण अन्यूनानि दशपूर्वाणि भवन्तीत्यर्थः । कषायकुशीला निर्ग्रन्थाश्च चतुर्दशपूर्वाणि श्रुतं धरन्ति । जघन्यतया पुलाकः आचारवस्तुस्वरूपनिरूपकं श्रुतं धरति । वकुशकुशीलनिर्ग्रन्थास्तु प्रवचनमातृकास्वरूपनिरूपकं श्रुतं निकृष्टत्वेन धरन्ति । प्रवचनमातृका इति कोऽर्थः ? पञ्चसमितयस्तिस्रो गुप्तयश्चेत्यष्टौ प्रवचनमातरः कथ्यन्ते । समितिगुप्तिप्रतिपादकमागमं जानन्तीत्यर्थः । ३०

---

१ इत्युच्यन्ते आ०, द०, ज०। २ लगुड- ता० । ३ तीर्थकर- आ०, द०, ज० । ४ -पि जन्मवत् आ०, द०, ज० ।

स्नातकानां केवलज्ञानमेव भवति तेन तेषां श्रुतं न भवति । महाव्रतलक्षणपञ्चमूलगुणविभावरीभोजनविवर्जनानां मध्येऽन्यतमं बलात् परोपरोधात्प्रतिसेवमानः पुलाको विराधको भवति । रात्रिभोजनवर्जनस्य विराधकः कथमिति चेत् ? उच्यते–श्रावकादीनामुपकारोऽनेन भविष्यतीति छात्रादिकं रात्रौ भोजयतीति विराधकः स्यात् । वकुशो द्विप्रकारः–
५ उपकरणवकुशशरीरवकुशभेदात् । तत्र नानाविधोपकरणसंस्कारप्रतीकाराकाङ्क्षी उपकरणवकुश उच्यते । वपुरभ्यङ्गमर्दनक्षालनविलेपनादिसंस्कारभागी शरीरवकुशः प्रतिपाद्यते । एतयोरियं प्रतिसेवना । प्रतिसेवनाकुशीलकषायकुशीलयोर्मध्ये यः प्रतिसेवनाकुशीलः स मूलगुणान् न विराधयति उत्तरगुणमन्यतमं विराधयति अस्यैषा प्रतिसेवना । यः कषायकुशीलो निर्ग्रन्थः [1]स्नातकश्च तेषां विराधना काचिन्न वर्त्तते तेन ते अप्रतिसेवना । सर्वेषां तीर्थकर-
१० परमदेवानां तीर्थेषु पञ्चप्रकारा अपि निर्ग्रन्था भवन्ति । लिङ्गं द्विप्रकारं–द्रव्यभावभेदात् । तत्र पञ्चप्रकारा अपि निर्ग्रन्था भावलिङ्गिनो भवन्ति द्रव्यलिङ्गन्तु भाज्यम्–व्याख्यानेयमित्यर्थः । तत्किम् ? केचिदसमर्था महर्षयः शीतकालादौ कम्बलशब्दवाच्यं कौशेयादिकं गृह्णन्ति, न तत् प्रक्षालयन्ति न सीव्यन्ति न प्रयत्नादिकं कुर्वन्ति, अपरकाले परिहरन्ति । केचिच्छरीरे उत्पन्नदोषा लज्जितत्वात् तथा कुर्वन्तीति व्याख्यानमाराधनाभगवतीप्रोक्ताभि-
१५ प्रायेणापवादरूपं ज्ञातव्यम् । "उत्सर्गापवादयोरपवादो विधिर्बलवान्" [ ] इति उत्सर्गेण तावद् यथोक्त[2]माचेलक्यञ्च प्रोक्तमस्ति । आर्यासमर्थदोषवच्छरीराद्यपेक्षया अपवादव्याख्याने न दोषः, अमुमेवाधारं गृहीत्वा जैनाभासाः केचित्सचेलत्वं मुनीनां स्थापयन्ति तन्मिथ्या, "साक्षान्मोक्षकारणं निर्ग्रन्थलिङ्गम्" [ ] इति वचनात् । अपवादव्याख्यानं तूपकरणकुशीलापेक्षया कर्तव्यम् । पीतपद्मशुक्ललक्षणास्तिस्रो लेश्याः
२० पुलाकस्य भवन्ति । कृष्णनीलकापोतपीतपद्मशुक्ललक्षणाः षडपि लेश्याः वकुशप्रतिसेवनाकुशीलयोर्भवन्ति । ननु कृष्णनीलकापोतलेश्यात्रयं वकुशप्रतिसेवनाकुशीलयोः कथं भवति ? सत्यम्; तयोरुपकरणासक्तिसम्भवमार्त्तध्यानं कादाचित्कं सम्भवति, तत्सम्भवादादिलेश्यात्रयं सम्भवत्येवेति । मतान्तरम्–परिग्रहसंस्काराकाङ्क्षायां स्वयमेवोत्तरगुणविराधनायामार्तसम्भवादार्ताविनाभावि च लेश्याषट्कम् । पुलाकस्यार्तकारणाभावान्न षट् लेश्याः । किन्तूत्तरास्तिस्र-
२५ एव । कापोततेजःपद्मशुक्ललेश्याचतुष्टयं कषायकुशीलस्य देयं दातव्यं दानीयमिति यावत् । कषायकुशीलस्य या कापोतलेश्या दीयते सापि पूर्वोक्तन्यायेन वेदितव्या तस्याः सञ्ज्वलनमात्रान्तरङ्गकषायसद्भावात् परिग्रहासक्तिमात्रसद्भावात् सूक्ष्मसाम्परायस्य । निर्ग्रन्थस्नातकयोश्च निःकेवला शुक्लैव लेश्या वेदितव्या । अयोगिकेवलिनान्तु लेश्या नास्ति । पुलाकस्योत्कृष्टतया उत्कृष्टस्थितिषु सहस्रारदेवेषु अष्टादशसागरोपमजीवितेषु उपपादो भवति । वकुशप्रतिसेवना-
३० कुशीलयोरारणाच्युतस्वर्गयोर्द्वाविंशतिसागरोपमस्थितिषु देवेषूपपादो भवति । कषायकुशीलनिर्ग्रन्थयोः सर्वार्थसिद्धौ त्रयस्त्रिंशत्सागरोपमस्थितिषु देवेषूपपादो भवति । जघन्योपपादो

१ स्नातकाश्च ता० । २ –मचेलक्यञ्च प्रो– आ०, द०, ज० ।

विश्वेषामपि सौधकर्मकल्पे द्विसागरोपमस्थितिषु देवेषु वेदितव्यः । स्नातकस्य परमनिर्वृत्तौ उपपादः । स्थानान्यसङ्ख्येयानि संयमस्थानानि[1] तानि तु कषायकारणानि भवन्ति कषायतरतमत्वेन भिद्यन्ते इति कषायकारणानि । तत्र सर्वनिकृष्टानि लब्धिस्थानानि इति कोऽर्थः ? संयमस्थानानि पुलाककषायकुशीलयोर्भवन्ति । तौ च[2] समकालमसङ्ख्येयानि संयमस्थानानि व्रजतः ततस्तदनन्तरं कषायकुशीलेन सह गच्छन्नपि पुलाको विच्छिद्यते निवर्तते ५ इत्यर्थः । ततः कषायकुशील एकाक्येव असंख्येयानि संयमस्थानानि गच्छति तदनन्तरं कषायकुशीलप्रतिसेवनाकुशीलवकुशाः संयमस्थानानि असङ्ख्येयानि युगपत्सह गच्छन्ति प्राप्नुवन्तीत्यर्थः । तदनन्तरं वकुशो निवर्तते व्युच्छिद्यते इत्यर्थः । ततोऽपि प्रतिसेवनाकुशीलाः संयमस्थानान्यसङ्ख्येयानि [3]व्रजित्वा व्युच्छिद्यते निवर्तते इत्यर्थः । ततः कषायकुशीलाः संयमस्थानान्यसङ्ख्येयानि व्रजित्वा सोऽपि व्युच्छिद्यते । तदुपरि अकषायस्थानानि १० निर्ग्रन्थः प्राप्नोति सोऽपि संयमस्थानान्यसङ्ख्येयानि गत्वा व्युच्छिद्यते । तदुपरि एकं संयमस्थानं स्नातको व्रजित्वा परमनिर्वाणं लभते स्नातकस्य संयमलब्धिरनन्तगुणा भवतीति सिद्धम् ।

[4]इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ नवमः पादः समाप्तः ।

१ -नि तु ता०, द० । २ 'च' नास्ति ता० । ३ ध्वजित्वा ता० ।

४ इत्यनवद्यगद्यपद्यविद्याविनोदनोदितप्रमोदपीयूषरसपानपावनमतिसभाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोऽलङ्कारसाहित्यादिशास्त्रनिशितमतिना यतिना श्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण सकलविद्वज्जनविहितचरणसेवस्य विद्यानन्दिदेवस्य संछर्दितमिथ्यामतदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसर्वार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भनिर्भरावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां नवमोऽध्यायः । आ०, द०, ज, ।

दशमोऽध्यायः

अथेदानीं मोक्षस्वरूपं प्रतिपादयितुकामो भगवानुमास्वामी पर्यालोचयति–मोक्षस्तावत् केवलज्ञानप्राप्तिपूर्वको भवति । तस्य केवलज्ञानस्योत्पत्तिकारणं [1]किमिति ? इदमेवेति निर्धार्य सूत्रमिदमाह—

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥ १ ॥

५ मोहस्य क्षयो विध्वंसः मोहक्षयस्तस्मान्मोहक्षयात् । आवरणशब्दः प्रत्येकं प्रयुज्यते । तेन ज्ञानावरणं दर्शनावरणञ्च ज्ञानदर्शनावरणे ते च अन्तरायश्च ज्ञानदर्शनावरणान्तराया-स्तेषां क्षयः ज्ञानदर्शनावरणान्तरायक्षयस्तस्मात् ज्ञानदर्शनावरणान्तरायक्षयात् । चकारादायु-स्त्रिकनामत्रयोद[2]शक्षयाच्च केवलं केवलज्ञानमुत्पद्यते । त्रिषष्टिप्रकृतिक्षयात् केवलज्ञानं भवती-त्यर्थः । अष्टाविंशतिप्रकृतयो मोहस्य । पञ्च ज्ञानावरणस्य । नव दर्शनावरणस्य । पञ्च अन्तराय-

१० स्य । मनुष्यायुर्वर्जमायुस्त्रयः साधारणातपपञ्चेन्द्रियरहितचतुर्जातिनरकगतिनरकगत्यानुपूर्वी-स्थावरसूक्ष्मतिर्यग्गतितिर्यग्गत्यानुपूर्व्योद्योतलक्षणास्त्रयोदशनामकर्मणः प्रकृतयश्चेति त्रिषष्टिः । ननु मोहज्ञानदर्शनावरणान्तरायक्षयात् केवलमिति सिद्धे सूत्रगुरुकरणं किमर्थम् ? वाक्यभेदः कर्मणां क्षयानुक्रमप्रतिपादनार्थः । कोऽसावनुक्रमः ? मोहक्षयः पूर्वमेव भवति । तदनन्तरं क्षीण-कषायगुणस्थाने ज्ञानदर्शनावरणान्तरायक्षयो भवति तत्क्षये केवलमुत्पद्यते । मोहक्षयानुक्रम

१५ उच्यते–भव्यः प्राणी सम्यग्दृष्टिर्जीवः परिणामविशुद्ध्या वर्द्धमानः असंयतसम्यग्दृष्टिदेशसंयत-प्रमत्तसंयताऽप्रमत्तसंयतगुणस्थानेष्वन्यतमगुणस्थाने अनन्तानुबन्धिकषायचतुष्टयदर्शनमोह-त्रितयक्षयो भवति । ततः क्षायिकसम्यग्दृष्टिर्भूत्वा अप्रमत्तगुणस्थाने [3]अथाप्रवृत्तकरणम-ङ्गीकृत्य अपूर्वकरणाभिमुखो भवति । अथाऽप्रवृत्तकरणं किम् ? अपूर्वचारित्रम् अथवा अथानन्तरम् अप्रवृत्तकरणं कथ्यते । तदपि किम् ? परिणामविशेषा इत्यर्थः । कीदृशास्ते अथा-

२० प्रवृत्तकरणशब्दवाच्या विशिष्टपरिणामा इति चेत् ? उच्यते–[4]एकस्मिन्नेकस्मिन् समये एकैकजी-वस्यासंख्यलोकमा[5]नावच्छिन्नाः परिणामा भवन्ति । तत्राप्रमत्तादिगुणस्थाने पूर्वपूर्वसमये प्रवृत्ता यादृशाः परिणामास्तादृशा एव, अथानन्तरमुत्तरसमयेषु आ समन्तात्प्रवृत्ता विशिष्ट-चारित्ररूपाः परिणामाः अथाप्रवृत्तकरणशब्दवाच्या भवन्ति । अपूर्वकरणप्रयोगेणापूर्वकरण-क्षपकगुणस्थाननामा भूत्वा अभिनवशुभाभिसन्धिना भवन्ति । धर्म्यशुक्लध्यानाभिप्रायेण

२५ कृशीकृतपापप्रकृतिस्थित्यनुभागः सन् संवर्द्धितपुण्यकर्मानुभवः सन् अनिवृत्तिक[6]रणं लब्ध्वा, अनिवृत्तिबादरसाम्परायक्षपकगुणस्थानमधिरोहति। तत्राऽप्रत्याख्यानकषायप्रत्याख्यानकषायाष्टकं

---

१ किमिदमिदमेवेति आ०, द०, ज० । २ –दशकक्ष– ता० । ३ अथाऽप्रमत्तक– आ०, द०, ज० । ४ एकस्मिन् समये आ०, द०, ज० । ५ –मानाछिन्नाः ता० । ६ –करणलब्ध्या ता० ।

नष्टं विधाय नपुंसकवेदविनाशं कृत्वा स्त्रीवेदं समूलकाषं कषित्वा हास्यरत्यरतिशोकभयजुगुप्सालक्षणं नोकषायषट्कं पुंवेदञ्च क्षपयित्वा क्रोधसञ्ज्वलनं मानसञ्ज्वलने मानसञ्ज्वलनं मायासञ्ज्वलने मायासञ्ज्वलनं लोभसञ्ज्वलने लोभसञ्ज्वलनं क्रमेण बादरकिट्टिविभागेन विनाशमानयति। बादरकिट्टिरिति कोऽर्थः? उपायद्वारेण फलं भुक्त्वा निर्जीर्यमाणमुद्धृतशेषमुपहृतशक्तिकं कर्म किट्टिरित्युच्यते आज्यकिट्टिवत्। सा किट्टिर्द्विधा ५ भवति–बादरकिट्टिसूक्ष्मकिट्टिभेदादिति किट्टिशब्दार्थो वेदितव्यः। तदनन्तरं लोभसञ्ज्वलनं कृशीकृत्य सूक्ष्मसाम्परायक्षपको भूत्वा निःशेषं मोहनीयं निर्मूल्य क्षीणकषायगुण[1]स्थानं स्फेटितमोहनीयभारः सन्नधिरोहति। तस्य गुणस्थानस्यापान्त्यसमयेऽन्त्यसमयात् प्रथमसमये द्विचरमसमये निद्राप्रचले द्वे प्रकृती क्षपयित्वा अन्त्यसमये पञ्च ज्ञानावरणानि चत्वारि दर्शनावरणानि पञ्च अन्तरायान् क्षपयति। तदनन्तरं केवलज्ञानकेवलदर्शनस्वभावं केवलपर्याय- १० मचिन्त्यविभूतिमाहात्म्यं प्राप्नोति।

अथ केवलज्ञानोत्पत्ति[2]कारणं कथयित्वेदानीं मोक्षकारणं मोक्षस्वरूपञ्चाचक्षते भगवन्तः—

बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः॥ २॥

बन्धस्य हेतवो मिथ्यादर्शनाविरतिप्रमादकषाययोगास्तेषामभावो नूतनकर्मणामप्रवेशो बन्धहेत्वभावः पूर्वोपार्जितकर्मणामेकदेशक्षयो निर्जरा। बन्धहेत्वभावश्च निर्जरा च बन्ध- १५ हेत्वभावनिर्जरे ताभ्यां बन्धहेत्वभावनिर्जराभ्याम्। द्वाभ्यां कारणाभ्यां कृत्वा कृत्स्नानां विश्वेषां कर्मणाम्, विशिष्टम्–अन्यजनासाधारणं प्रकृष्टम्–एकदेशकर्मक्ष[3]यलक्षणाया निर्जराया उत्कृष्टमात्यन्तिकं मोक्षणं मोक्षः कृत्स्नकर्मविप्रमोक्षो मोक्ष उच्यते। पूर्वपदेन मोक्षस्य हेतुरुक्तः। द्वितीयपदेन मोक्षस्वरूपं प्रतिपादितमिति वेदितव्यम्। नन्वत्र सप्तसु तत्त्वेषु पट्त[4]त्त्वस्वरूपं प्रोक्तं निजरास्वरूपं न प्रोक्तम्। सत्यम्; यदि सर्वकर्मक्षयो मोक्षः प्रोक्तस्ततः सामर्थ्यादेव ज्ञायते यदेकदेशेन २० कर्मक्षयो निर्जरा तेन पृथक्सूत्रं निर्जरालक्षणप्रतिपादकं न विहितमिति वेदितव्यम्। कर्मक्षयो द्विप्रकारो भवति प्रयत्नाप्रयत्नसाध्यविकल्पात्। तत्र अप्रयत्नसाध्यश्चरमोत्तमशरीरस्य नारकतिर्यग्देवायुषां भवति। प्रयत्नसाध्यस्तु कर्मक्षयः कथ्यते–चतुर्थपञ्चमषष्ठसप्तमेषु गुणस्थानेषु मध्येऽन्यतमगुणस्थानेऽनन्तानुबन्धिकषायचतुष्टयस्य मिथ्यात्वप्रकृतित्रयस्य क्षयो भवति। अनिवृत्तिबादरसाम्परायसंज्ञकनवमगुणस्थानस्यान्तर्मुहूर्तस्य नव भागाः क्रियन्ते। तत्र प्रथमभागे निद्रा- २५ प्रचलाप्रचला-स्त्यानगृद्धिनरकगतितिर्यग्गत्येकेन्द्रियजातिद्वीन्द्रियजातित्रीन्द्रियजातिचतुरिन्द्रियजातिनरकगतिप्रायोग्यानुपूर्वीतिर्यग्गतिप्रायोग्याऽनुपूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारणाऽभिधानिकानां षोडशानां कर्मप्रकृतीनां प्रक्षयो भवति। द्वितीयभागे मध्यमकषायाष्टकं नष्टं विधीयते। तृतीयभागे नपुंसकवेदच्छेदः क्रियते। चतुर्थे भागे स्त्रीवेदविनाशः सृज्यते। पञ्चमे भागे

---

१ –स्थाने आ०, द०, ज०। २ –नोत्पत्ति क– आ०, द०, ज०। ३ –क्षयनामनिज– अ०, द०, ज०। ४ –तत्त्वरूपम् आ०, द०, ज०।

नोकषायषट्कं प्रध्वंस्यते। षष्ठे भागे पुंवेदाभावो रच्यते। सप्तमे भागे सञ्ज्वलनक्रोधविध्वंसः कल्प्यते। अष्टमे भागे सञ्ज्वलनमानविनाशः प्रणीयते। नवमे भागे सञ्ज्वलनमायाक्षयः क्रियते। लोभसञ्ज्वलनं दशमगुणस्थाने प्रान्ते विनाशं गच्छति। निद्राप्रचले [1]द्वादशस्य गुणस्थानस्योपान्त्यसमये विनश्यतः। पञ्चज्ञानावरणचक्षुरचक्षुरवधिकेवलदर्शनावरणचतुष्टयपञ्चान्तरायाणां ५ तदन्त्यसमये क्षयो भवति। सयोगिकेवलिनः कस्याश्चिदपि प्रकृतेः क्षयो नास्ति। चतुर्दशगुणस्थानस्य द्विचरमसमये द्वासप्ततिप्रकृतिनां क्षयो भवति। कास्ताः? अन्यतरवेदनीयम्, देवगतिः, औदारिकवैक्रियकाहारकतैजसकार्मणशरीरपञ्चकम्, तद्बन्धनपञ्चकम्, तत्संघातपञ्चकम्, संस्थानषट्कम्, औदारिकवैक्रियकाहारकशरीरोपाङ्गत्रयम्, संहननषट्कम्, प्रशस्ताप्रशस्तवर्णपञ्चकम्, सुरभिदुरभिगन्धद्वयम्, प्रशस्ताप्रशस्तरसपञ्चकम्, स्पर्शाष्टकम्, १० देवगतिप्रायोग्यानुपूर्व्यम्, अगुरुलघुत्वम्, उपघातः, परघातः, उच्छ्वासः, प्रशस्ताप्रशस्तविहायोगतिद्वयम्, पर्याप्तिः, प्रत्येकशरीरम्, स्थिरत्वमस्थिरत्वम्, शुभत्वमशुभत्वम्, दुर्भगत्वम्, सुस्वरत्वम्, दुःस्वरत्वम्, अनादेयत्वम्, अयशस्कीर्तिः, निर्माणम्, नीचैर्गोत्रम् इति। अयोगिकेवलिचरमसमये त्रयोदश प्रकृतयः क्षयमुपयान्ति। कास्ताः? अन्यतरवेदनीयम्, मनुष्यायुः, मनुष्यगतिः, पञ्चेन्द्रियजातिः, मनुष्यगतिप्रायोग्या- १५ नुपूर्वी, त्रसत्वम्, बादरत्वम्, पर्याप्तकत्वम्, शुभगत्वम्, आदेयत्वम्, यशःकीर्तिः, तीर्थकरत्वम् उच्चैर्गोत्रञ्चेति।

अथैतासां द्रव्यकर्मप्रकृतीनां क्षयान्मोक्षो भवति आहोस्वित् भावकर्मप्रकृतीनामपि क्षयान्मोक्षो भवतीति प्रश्ने सूत्रमिदमाहुः—

औपशमिकादिभव्यत्वानाञ्च ॥ ३ ॥

२० औपशमिको भाव आदिर्येषां मिश्रौदयिकभावानां ते औपशमिकादयो भावास्ते च भव्यत्वञ्च औपशमिकादिभव्यत्वानि तेषामौपशमिकादिभव्यत्वानाम्। एतेषां चतुर्णां भावकर्मणां विप्रमोक्षो मोक्षो भवति। चकारः परस्परसमुच्चये वर्तते, तेनायमर्थः—न केवलं पौद्गलिककृत्स्नकर्मविप्रमोक्षो मोक्षः किन्तु औपशमिकादिभव्यत्वानां भावकर्मणां विप्रमोक्षो मोक्षो भवति। भव्यत्वं हि पारिणामिको भावस्तेन भव्यत्वग्रहणात् पारिणामिकेषु भावेषु २५ भव्यत्वस्यैव [1]प्रक्षयो भवति नान्येषां [2]जीवत्वसत्त्ववस्तुत्वामूर्तत्वादीनां पारिणा[3]मिकानां क्षयो वर्तते, तत्क्षये शून्यत्वादिप्रसङ्गात्। ननु द्रव्यकर्मनाशे तन्निमित्तानामौपशमिकादीनां भावानां स्वयमेवाभावः सिद्धः किमनेन सूत्रेणेति चेत्? सत्यम्; नायमेकान्तो निमित्ताभावेऽपि कार्यभावदर्शनात्। दण्डाद्यभावेऽपि घटादिदर्शनात्। अथवा सामर्थ्याल्लब्धस्यापि भावकर्मक्षयस्य सूत्रं स्पष्टार्थम्।

३० अथाह कश्चित्—भावानामुपरमो मोक्ष आक्षिप्तो भवद्भिस्तथा औपशमिकादिभावप्रक्षय-

---

१ द्वादशगुण- आ०, द०, ज०। २ प्रक्षयो मोक्षो भ- ता०। ३ जीवत्ववस्तु- आ०, द०, ज०।

वत् सर्वक्षायकभावनिवृत्तिः प्राप्नोति ? सत्यम्; क्षायिकभावप्रक्षयो भवत्येव यदि विशेषो न निगद्यते। विशेषस्त्वाचार्येण सूचित एव वर्तते। कोऽसौ विशेष इति प्रश्ने अपवादसूत्रमुच्यते—

अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥

सम्यक्त्वञ्च ज्ञानदर्शनञ्च सिद्धत्वञ्च सम्यक्त्वज्ञानदर्शनसिद्धत्वानि,केवलानि निःकेवलानि एतानि सम्यक्त्वज्ञानदर्शनसिद्धत्वानि तेभ्यः केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः। एभ्यश्चतुर्भ्यः क्षायिकभावेभ्यः अन्यत्र एतानि चत्वारि वर्जयित्वा अन्येषां भावानां प्रक्षयान्मोक्षो भवति। तर्हि अनन्तवीर्यानन्तसुखादीनामपि प्रक्षयो भविष्यति, चतुर्भ्योऽवशेषत्वात्। सत्यम्; ज्ञानदर्शनयोरन्तर्भावोऽनन्तवीर्यस्य तेन सत्य (तत्) क्षयो नास्ति, अनन्तवीर्यं विना अनन्तज्ञानप्रवृत्तिर्न भवति यतः। सुखं तु ज्ञानदर्शनयोः पर्यायः, तत एव सुखस्यापि क्षयो न भवति। ननु सिद्धानां निराकारत्वादभावो भविष्यति ? सत्यम्; चरमशरीराकारास्ते वर्तन्ते, तेन तेषामभावोऽपि नास्ति "सायारमणायारा लक्खणमेयं तु सिद्धाणं।" [ ]

इति वचनात्। ननु शरीरानुकारी यदि जीवः प्रतिज्ञातो भवद्भिस्तर्हि शरीराभावात् स्वभावेन लोकाकाशप्रदेशप्रमाणो जीव इति भवतां मते सति त्रैलोक्यप्रमाणप्रदेशप्रसरणं भविष्यति। सत्यम्; नोकर्मसम्बन्धे कारणे सति संहरणं विसर्पणञ्च भवति। नोकर्मसम्बन्धलक्षणकारणभावात्, पुनः संहरणं विसर्पणञ्च न भवति।

एवं चेद् यथा कारणाभावात् संहरणं विसर्पणञ्च न भवति तथा गमनकारणकर्माभावे सति ऊर्ध्वगमनमपि न भविष्यति, अधस्तिर्य्यग्गमनयोरभाववत्। एवञ्च सति यत्रैव जीवो मुक्तस्तत्रैव तिष्ठति, तन्न—

तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् ॥ ५ ॥

तस्य सर्वकर्मविप्रमोक्षस्य अनन्तरं पश्चात्तदनन्तरमूर्ध्वमुपरिष्टात् गच्छति व्रजति। कोऽसौ ? मुक्तो जीव इति शेषः। कियत्पर्यन्तमूर्ध्वं गच्छति ? आलोकान्तान्—लोकपर्यन्तमभियातीत्यर्थः।

आलोकान्तादूर्ध्वं गच्छतीत्यत्र ऊर्ध्वगमनस्य हेतुर्नोक्तः, हेतुं विना कथं पक्षसिद्धिरित्युपन्यासे सूत्र[1]मिदमुच्यते—

पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च ॥ ६ ॥

पूर्वश्चासौ प्रयोगः पूर्वप्रयोगस्तस्मात् पूर्वप्रयोगात्। पूर्वं किल जीवेन संसारस्थितेन बहून्[2]वारान् यन्मुक्तिप्राप्त्यर्थं प्रणिधानं कृतम् ऊर्ध्वगमनध्यानाभ्यासो विहितस्तस्य प्रणिधानस्याभावेऽपि तदावेशपूर्वकमासंस्कारक्षयादूर्ध्वगमनं भवत्येव इत्येको हेतुरुक्तः। तथोर्ध्वगमनस्य

१ –मिदमाहुः आ०, ज०। २ –वारान् मुक्ति– आ०, ज०।

द्वितीयं हेतुमाह—असङ्गत्वात् । न विद्यते सङ्गः कर्मभिर्यस्य जीवस्य स भवत्यसङ्गः । असङ्गस्य भावोऽसङ्गत्वं तस्मादसङ्गत्वात् । अस्यायमर्थः–कर्मभाराक्रान्तो जीवस्तदावेशवशात् संसारे नियतं गच्छति । कर्मभाराक्रान्तवशीकरणाभावे सति ऊर्ध्वमेव गच्छति, इति द्वितीयो हेतुरुक्तः । तथा बन्धच्छेदात् । बन्धस्य छेदनं छेदस्तस्माद् बन्धच्छेदात् । अस्यायमर्थः–मनु-
५ ष्यादिभवान्तरप्रापकगतिजात्यादिनामादिसमस्तकर्मबन्धछेदान्मुक्तजीवस्योर्ध्वगमनमेव[1] भवतीति तृतीयो हेतुरुक्तः । तथागतिपरिणामात् । गत्यूर्ध्वगमनं परिणामः स्वभावो यस्य जीवस्य स भवति गतिपरिणामस्तस्माद् गतिपरिणामात् । अस्यायमर्थः—जीवस्तावदूर्ध्वगमनस्वभावः परमागमे प्रतिपादितः । तस्य तु जीवस्य यद्विविधगतिविकारो भवति तस्य कारणं कर्मैव । नष्टे च कर्मणि जीवस्य गतिपरिणामादूर्ध्वगमनस्वभावादूर्ध्वगमनमेव भवति । चकारः
१० परस्परं हेतूनां समुच्चये वर्तते । तेनायमर्थः—न केवलं पूर्वप्रयोगादसङ्गतत्वाच्चोर्ध्वं गच्छति, न केवलमसङ्गत्वात् बन्धच्छेदाच्चोर्ध्वं गच्छति । तथा तैरेव पूर्वप्रयोगासङ्गबन्धच्छेदप्रकारैर्गतिपरिणामाच्चोर्ध्वं गच्छति ।

अत्राह कश्चित्–हेतुरूपोऽर्थः प्रचुरोऽपि दृष्टान्तसमर्थनं विना वस्तुसाधनसमर्थो न भवति "**पक्षे हेतुदृष्टान्तसाधितं वस्तु परमार्थम् ।**" [ ] इति वचनात् । इत्यु-
१५ पन्यासे पूर्वोक्तानामूर्ध्वगमनहेतूनां क्रमेण दृष्टान्तसूचनं सूत्रमाह—

आविद्धकुलालचक्रवद् व्यपगतलेपालाबुवदेरण्ड-बीजवदग्निशिखावच्च ॥७॥

आविद्धं भ्रामितं यत्कुलालचक्रं कुम्भकारभ्रामितम्[2] आविद्धकुलालचक्रम् । आविद्धकुलालचक्रमिव आविद्धकुलालचक्रवत् । कुम्भकारप्रयोगेण यत्कृतं करदण्डचक्रसंयोगपूर्वकं भ्रमणं
२० तद्भ्रमणं कुम्भ[3]कारशयदण्डचक्रसंयोगे विरतेऽपि सति पूर्वप्रयोगाद् यथा आसंस्कारक्षयाच्चक्रस्य भ्रमणं भवति तथा मुक्तस्याप्यूर्ध्वगमनं भवतीति पूर्वहेतोः पूर्वदृष्टान्तः । व्यपगतलेपालाबुवत् । व्यपगतो विश्लिष्टो लेपो यस्मा[4]दलाबुफलात शुष्कतुम्बकफलात् तद् व्यपगतलेपं, तच्च तदलाबु च तुम्बफलं व्यपगतलेपालाबु, व्यपगतलेपाबु इव व्यपगतलेपाबुवत् । यथा मृत्तिकालेपोत्पादितगुरुत्वम् अलाबु जले क्षिप्तं सत् जलस्याधो गच्छति बुडति निमज्जति ।
२५ जलक्लेदविश्लिष्टमृत्तिकाबन्धनं सत् लघुतरं सदूर्ध्वमेव गच्छति तथा जीवोऽपि विश्लिष्टकर्मकर्दम ऊर्ध्वमेव गच्छति । इति द्वितीयहेतोर्द्वितीयदृष्टान्तः । एरण्डबीजवत् । एरण्डस्य वातारिवृक्षस्य यद्बीजमेरण्डबीजम्, एरण्डबीजमिव एरण्डबीजवत् । यथैरण्डबीजकोशलक्षणबन्धच्छेदात् गतिं करोति तथा जीवोऽपि कर्मबन्धच्छेदादूर्ध्वगमनं करोति । इति तृतीयस्य

---

१ –स्योर्ध्वं गमन– आ०, द०, ज० । २ –भ्रमितम् ता० । ३ –काराशय– आ०, द०, ज० । ४ –दालाबु– ता, द० ।

हेतोस्तृतीयो दृष्टान्तः। तथा अग्निशिखावत्। अग्नेः शिखा प्रदीपकलिका अग्निशिखा अग्निशिखेव अग्निशिखावत्। यथा अग्निशिखा तिर्यग्गमनप्रकृतिमारुतसम्बन्धरहिता सती स्वभावादूर्ध्वं गच्छति तथा मुक्तजीवोऽपि कर्माऽभावे ऊर्ध्वगमनस्वभावा[1]दूर्ध्वमेव गच्छति। इति चतुर्थस्य हेतोश्चतुर्थो दृष्टान्तः। असङ्गबन्धच्छेदयोः को विशेषः ? परस्परप्राप्तिमात्रं सङ्गः। परस्परानुप्रवेशोऽविभागेनावस्थितिर्बन्ध इत्यसङ्गबन्धच्छेदयोर्भेदः। ५

अथ यद्यूर्ध्वगमनस्वभावो जीवस्तर्हि मुक्तः सन्नूर्ध्वगमनं कुर्वन्नेव त्रिभुवनमस्तकात् परतोऽपि किं न गच्छतीति प्रश्ने सति सूत्रमिदमाहुः—

धर्मास्तिकायाभावात् ॥ ८ ॥

धर्मास्तिकायस्याभावो धर्मास्तिकायाभावस्तस्माद् धर्मास्तिकायाभावात् परतो न गच्छतीति वाक्यशेषः। अस्यायमर्थः—गत्युपकारकारणं धर्मास्तिकायः, स तु धर्मास्तिकायो लोकान्तात् परतोऽलोके न वर्तते तेन मुक्तजीवः परतोऽपि न गच्छति। यदि परतोऽपि गच्छति तदा लोकालोकविभागो न भवति। तदुक्तम्— १०

"संते वि धम्मदव्वे अहो ण गच्छेइ तहय तिरियं वा।
उड्ढगमणसहावो मुक्को जीवो हवे जम्हा॥" [तत्त्वसा० गा० ७१]

अथ मुक्तजीवा गतिजातिप्रभृतिकर्महेतुरहिता अमी अभेदव्यवहारा भविष्यन्तीति शङ्कायां कथञ्चिद् भेदव्यवहारस्थापनार्थमिदं सूत्रमाहुः— १५

क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसङ्ख्याल्पबहुत्वतः साध्याः ॥ ९ ॥

क्षेत्रञ्च कालश्च गतिश्च लिङ्गञ्च तीर्थञ्च चारित्रञ्च प्रत्येकबुद्धबोधितश्च ज्ञानञ्च अवगाहनञ्च अन्तरञ्च सङ्ख्या च अल्पबहुत्वञ्च क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसङ्ख्याल्पबहुत्वानि तेभ्यस्ततः। एभिर्द्वादशभिः क्षेत्रादिभिः प्रश्नैः सिद्धाः साध्या विकल्पनीया भवन्ति भेदव्यवहारवन्तो वर्तन्ते इत्यर्थः। कस्मात् ? प्रत्युत्पन्नभूतानुग्रहतन्त्रनययुग्मार्पणवशात्। प्रत्युत्पन्नो नयः ऋजुसूत्रः। भूताऽनुग्रहतन्त्रो नयो व्यवहारः। तथाहि—क्षेत्रव्यवहारस्तावत् कस्मिन् क्षेत्रे सिद्धाः सिद्ध्यन्ति। प्रत्युत्पन्नग्राहिनयात् ऋजुसूत्रनयान्निश्चयनयादिति यावत् स्वप्रदेशलक्षणे सिद्धिक्षेत्रे सिद्ध्यन्ति। भूतग्राहिनयाद् व्यवहारनयादाकाशप्रदेशे जन्मोद्दिश्य पञ्चदशसु कर्मभूमिषु वा सिद्ध्यन्ति। संहरणमुद्दिश्यार्धतृतीयद्वीपलक्षणे मानुषक्षेत्रे सिद्धाः सिद्ध्यन्ति। तत्संहरणं द्विप्रकारं स्वकृतं परकृतञ्च। चारणविद्याधराणामेव स्वकृतम्। देवचारणविद्याधरैः कृतं परकृतम्। अथ कस्मिन् काले सिद्धः सिद्ध्यति ? प्रत्युत्पन्ननयादेकस्मिन्समये सिद्ध्यन् सिद्धो भवति। ऋजुसूत्राद्याश्चत्वारो २० २५

१ –भावं ऊ–आ०, द०, ज०।

नयाः प्रत्युत्पन्नविषया वर्तन्ते । शेषास्त्रयो नया नैगमसङ्ग्रहव्यवहाराख्या उभयविषया[1] इति वेदितव्यम् । भूतप्रज्ञापननयाज्जन्मतः संहरणाच्चेति द्विप्रकारादविशेषेण उत्सर्पिण्यवसर्पिण्योर्जातः सिद्ध्यति । विशेषेण तु अवसर्पिण्याः सुषमदुःषमाया अन्ते भागे दुःषमसुषमायाञ्च जातः सिद्ध्यति । दुःषमसुषमायां जातो दुःषमायां सिद्ध्यति । दुःषमायां जातो दुःषमायां न ५ सिद्ध्यति । [2]अन्यदा दुःषमदुःषमायां जातः सुषमसुषमायां जातः सुषमायां जातः दुःषमायाम् अन्त्यभागरहितायां सुषमदुःषमायाञ्च जातो नैव सिद्ध्यति । संहरणापेक्षया उत्सर्पिण्यवसर्पिण्याञ्च सर्वस्मिन् काले च सिद्ध्यति । अथ कस्यां गतौ सिद्धः सिद्ध्यति ? सिद्धगतौ मनुष्यगतौ वा सिद्ध्यति । अथ केन लिङ्गेन सिद्धिर्भवति ? [3]अवेदत्वेन त्रिभिर्वेदैर्वा सिद्धिर्भवति भावतो न तु द्रव्यतः । द्रव्यतस्तु पुंवेदेनैव सिद्धिर्भवति । अथवा लिङ्गशब्देन निर्ग्रन्थ- १० लिङ्गेन सिद्धिर्भवति । भूतनयापेक्षया सग्रन्थलिङ्गेन वा सिद्धिर्भवति **"साहारणासाहारणे।"** [सिद्धभ० ५] इति वचनात् । अथ कस्मिंस्तीर्थे सिद्धिर्भवति ? तीर्थकरतीर्थे गणधरानगारकेवलिलक्षणेतरतीर्थे च सिद्धिर्भवति । अथ केन चारित्रेण सिद्धिर्भवति ? इत्यनुयोगे विशेषव्यपदेशरहितेन एषोऽहं सर्वसावद्ययोगविरतोऽस्मीत्येवं रूपेण साममायिकेन ऋजु[4]सूत्रतया यथाख्यातेनैकेन सिद्धिर्भवति । व्यवहारनयात् पञ्चभिश्चारित्रैः सिद्धिर्भवति । परिहारविशुद्धि- १५ संज्ञकचारित्ररहितैश्चतुर्भिश्चारित्रैर्वा सिद्धिर्भवति । स्वशक्तिनिमित्तज्ञानात् प्रत्येकबुद्धाः सिद्ध्यन्ति । परोपदेशनिमित्तज्ञानात् बोधितबुद्धाः सिद्ध्यन्ति एतद्विकल्पद्वयमपि मिलित्वा एकोऽधिकारः । अथ केन ज्ञानेन सिद्धिर्भवतीति प्रश्ने ऋजुसूत्रनयादेकेन केवलज्ञानेन सिद्धिर्भवति । व्यवहारनयात् पश्चात्कृत[5]मतिज्ञानश्रुतज्ञानद्वयेन मतिश्रुतावधिज्ञानत्रयेण मतिश्रुतमनःपर्ययज्ञानत्रयेण वा सिद्धिर्भवति, मतिश्रुतावधिमनःपर्ययज्ञानचतुष्टयेन वा सिद्धि- २० र्भवति । अस्यायमर्थः-मतिश्रुतयोः पूर्वं स्थित्वा पश्चात् केवलज्ञानं [6]समुत्पाद्य सिद्धा भवन्ति । तथा मतिश्रुतावधिषु पूर्वं स्थित्वा पश्चात् केवलमुत्पाद्य सिद्ध्यन्ति । अथवा मतिश्रुतमनःपर्ययेषु स्थित्वा केवलं लब्ध्वा सिद्ध्यन्ति । तथा मतिश्रुतावधिमनःपर्ययेषु पूर्वं स्थित्वा पश्चात् केवलमुत्पाद्य सिद्ध्यन्ति । तथा चोक्तम्—

"पच्छायडेय सिद्धे दुगतिगचदुणाणपंचचदुरयमे ।

२५ **पडिवडिदापडिवडिदे संजमसंमत्तणाणमादीहिं ॥"** [सिद्ध भ० ४]

अथ केनावगाहनेन निर्वृत्तिर्भवतीति प्रश्ने तदुच्यते-जीवप्रदेशव्यापित्वं तावदवगाहनमुच्यते । तदवगाहनं द्विप्रकारम् उत्कृष्टावगाहनं जघन्यावगाहनञ्चेति । तत्रोत्कृष्टमवगाहनं सपादानि पञ्चधनुःशतानि । जघन्यावगाहनमर्द्धचतुर्थारत्नयः । यः किल षोडशे वर्षे सप्तहस्त-

---

१ -या तु इ- आ०, द०, ज० । २ यदा आ०, द०, ज० । ३ आवेदेन आ०, द०, ज० । ४ -सूत्रनयात् आ०,द०, ज० । ५ -मतिश्रुत- ता० । ६ उत्पाद्य ता० ।

परिणामशरीरो भविष्यति स गर्भाष्टमे वर्षे अर्धचतुर्थारत्निप्रमाणो भवति, तस्य च मुक्तिर्भवति। मध्ये नाना भेदावगाहनेन सिद्धिर्भवति। सिध्यतां पुरुषाणां किमन्तरं भवतीति प्रश्ने निकृष्टत्वेन द्वौ समयौ भवतः उत्कर्षेण अष्टसमया अन्तरं भवति। द्वावपि भेदौ जघन्यस्य। जघन्येन एकः समयः। उत्कर्षेण षण्मासा अन्तरं भवति। अथ कया सङ्ख्यया सिद्ध्यन्ति ?
५ जघन्येन एकसमये एकः सिद्ध्यति। उत्कर्षेण अष्टोत्तरशतसंख्या एकसमये सिद्ध्यन्ति। अथाल्पबहुत्वमुच्यते—प्रत्युत्पन्ननयात् सिद्धिक्षेत्रे सिद्ध्यन्ति तेषामल्पबहुत्वं नास्ति। भूतपूर्वनयात्तु विचार्यते–क्षेत्रसिद्धा द्विप्रकाराः जन्मक्षेत्रतः संहरणक्षेत्रतश्च। क्षेत्राणां विभागः कर्मभूमिरकर्मभूमिश्च। तथा क्षेत्रविभागः समुद्रद्वीपाः ऊर्ध्वमधस्तिर्यक् च। तत्र ऊर्ध्वलोकसिद्धा अल्पे। अधोलोकसिद्धाः संख्येयगुणाः। तिर्यक्लोकसिद्धाः संख्येयगुणाः। सर्वस्तोकाः
१० समुद्रसिद्धाः। द्वीपसिद्धाः संख्येयगुणाः। एवमविशेषेण व्याख्यानम्। विशेषेण तु सर्वस्तोकाः लवणोदसिद्धाः। कालोदसिद्धाः संख्येयगुणाः। जम्बूद्वीपसिद्धाः संख्येयगुणाः। धातकीखण्डसिद्धाः संख्येयगुणाः। पुष्करद्वीपार्धसिद्धाः संख्येयगुणा इति। एवं कालादिविभागेऽपि परमागमानुसारेणाल्पबहुत्वं बोद्धव्यम्। तथाहि—कालस्त्रिप्रकारः उत्सर्पिणी अवसर्पिण्यनुत्सर्पिण्यनवसर्पिणी चेति। तत्र सर्वतः स्तोकाः उत्सर्पिणीसिद्धाः। अवसर्पिणीसिद्धा विशेषा-
१५ धिकाः। अनुत्सर्पिण्यनवसर्पिणीसिद्धाः संख्येयगुणाः। ऋजुसूत्रनयापेक्षया तु एकसमये सिद्ध्यन्तीत्यल्पबहुत्वं नास्ति। गतिं प्रति विचार्यते–ऋजुसूत्रापेक्षया सिद्धगतौ सिद्ध्यन्तीति तत्राल्पबहुत्वं नास्ति। व्यवहारापेक्षयापि मनुष्यगतौ सिद्ध्यन्तीति तत्राप्यल्पबहुत्वं नास्ति। एकान्तरगतावल्पबहुत्वमस्तीति तद्विचार्यते। सर्वतः स्तोकाः तिर्यग्योन्यन्तरगतिसिद्धाः। मनुष्ययोन्यन्तरगतिसिद्धाः संख्येयगुणाः। नारकयोन्यन्तरगतिसिद्धाः संख्येयगुणाः। स्वर्ग-
२० योन्यन्तरगतिसिद्धाः संख्येयगुणाः। लिङ्गं प्रति अल्पबहुत्वं विचार्यते—ऋजुसूत्र नयापेक्षया अवेदात्सिद्ध्यन्तीति नास्ति अल्पबहुत्वम्। व्यवहारनयात्तु सर्वतः स्तोकाः नपुंसकवेदसिद्धाः स्त्रीवेदसिद्धाः संख्येयगुणाः। पुंवेदसिद्धाः संख्येयगुणाः। तथा चोक्तम्—

"वीस णपुंसयवेया थीवेया तह य होंति चालीसा।
२५ पुंवेया अडयाला समये गते सिद्धा य॥" [　　]

एवं तीर्थचारित्रादिभेदैरप्यल्पबहुत्वं परमागमात्सिद्धम्।

एषा तत्त्वार्थवृत्तिर्यैर्विचार्य्यते शिष्येभ्यः उपदिश्यते च तैर्जिनवचनामृतस्वादिभिः पुरुषैः शृण्वद्भिः पठद्भिश्च परम[1]मुक्तिसुखामृतं निजकरे कृतं देवेन्द्रनरेन्द्रसुखं किमुच्यते।

---

१ परमसुखा– आ०, द०, ज०।

श्रीवर्द्धमानमकलङ्कसमन्तभद्रः श्रीपूज्यपादसदुमापतिपूज्यपादम् ।
विद्यादिनन्दिगुणरत्नमुनीन्द्रसेव्यं भक्त्या नमामि परितः श्रुतसागराप्त्यै ॥

इति सूरिश्रीश्रुतसागरविरचितायां तात्पर्यसंज्ञायां तत्त्वार्थवृत्तौ
दशमः पादः समाप्तः ।

१ श्रीकुन्दकुन्दाचार्यश्रीमदुमास्वामिश्रीविद्यानन्दिसूरिश्रीश्रुतसागर सूरिभ्यो नमो नमः । ग्रन्थाग्रम् ९००४। श्रीरस्तु । ता० । इत्यनवद्यगद्यपद्यविद्याविनोदितप्रमोदपीयूषरसपानपावनमतिसभाजरत्नराजमतिसागरयतिराजराजितार्थनसमर्थेन तर्कव्याकरणछन्दोऽलङ्कारसाहित्यादिशास्त्रनिशितमतिय-ना श्रीमद्देवेन्द्रकीर्तिभट्टारकप्रशिष्येण शिष्येण सकलविद्वज्जनविहितचरणसेवस्य श्रीविद्यानन्दिदेवस्य संछर्दितमिथ्यामतदुर्गरेण श्रुतसागरेण सूरिणा विरचितायां श्लोकवार्तिकराजवार्तिकसवार्थसिद्धिन्यायकुमुदचन्द्रोदयप्रमेयकमलमार्तण्डप्रचण्डाष्टसहस्रीप्रमुखग्रन्थसन्दर्भावलोकनबुद्धिविराजितायां तत्त्वार्थटीकायां दशमोऽध्यायः समाप्तः । इति तत्त्वार्थस्य श्रुतसागरी टीका समाप्ता । आ०, द०, ज० ।

तत्त्वार्थवृत्ति

[हिन्दी-सार]

तत्त्वार्थवृत्ति

हिन्दी-सार

इस पञ्चम कालमें गणधरदेवके समान श्रीनिर्ग्रन्थाचार्य उमास्वामि भट्टारकसे भव्यवर द्वैयाकने प्रश्न किया कि-भगवन् , आत्मा का हित क्या है ? उमास्वामि भट्टारक द्वैयाक भव्यके प्रश्नका 'सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्रके द्वारा प्राप्त होने वाला मोक्ष आत्माका हित है' यह उत्तर देनेके पहिले इष्टदेवको नमस्कार कर मङ्गल करते हैं—

"मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥"

आत्माके ज्ञानादि गुणोंको घातने वाले ज्ञानावरणादि कर्मोंका भेदन करके जो समस्त तत्त्व अर्थात् मोक्षोपयोगी पदार्थोंके पूर्णज्ञाता हैं, तथा जिनने मोक्षमार्गका नेतृत्व किया है उन परमात्मा को उक्तगुणों की प्राप्तिके लिए नमस्कार करता हूं ।

द्वैयाक ने पूंछा कि मोक्षका स्वरूप क्या है ?

उमास्वामि भट्टारकने कहा—समस्त कर्ममलोंसे रहित आत्माकी शुद्ध अवस्थाका नाम मोक्ष है । इस अवस्थामें आत्मा स्थूल और सूक्ष्म दोनों प्रकारके शरीरोंसे रहित हो अशरीरी हो जाता है । अपने स्वाभाविक अनन्तज्ञान निर्बाध अनन्त सुख आदि गुणोंसे परिपूर्ण हो चिदानन्द स्वरूप हो जाता है । यह आत्माकी अन्तिम विलक्षण अवस्था है । यह शुद्ध दशा सदा एकसी बनी रहती है । इसका कभी विनाश नहीं होता । यह दशा इन्द्रियज्ञानका विषय न होनेसे अत्यन्त परोक्ष है, इस लिए विभिन्न वादी मोक्षके स्वरूपकी अनेक प्रकारसे कल्पना करते हैं । जैसे—

(१) सांख्यका मत है कि-पुरुषका स्वरूप चैतन्य है । ज्ञान चैतन्यसे पृथक् वस्तु है । ज्ञान प्रकृतिका धर्म है, यही ज्ञेय अर्थात् पदार्थोंको जानता है । चैतन्य पदार्थोंको नहीं जानता । मोक्ष अवस्थामें आत्मा चैतन्य स्वरूप रहता है ज्ञान स्वरूप नहीं ।

इस मतमें ये दूषण हैं—ज्ञानसे भिन्न चैतन्य कोई वस्तु नहीं है । चैतन्य ज्ञान बुद्धि आदि पर्यायवाची हैं इनमें अर्थभेद नहीं है । स्व तथा पर पदार्थोंका जानना चैतन्यका स्वरूप है । यदि चैतन्य अपने स्वरूप तथा पर पदार्थोंको नहीं जानता तो वह गधेके सींगकी तरह असत् ही हो जायगा । निराकार अर्थात् ज्ञेयको न जानने वाले चैतन्यकी कोई सत्ता नहीं है ।

(२) वैशेषिक-बुद्धि, सुख, दुख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म और संस्कार इन आत्माके नव विशेष गुणोंके अत्यन्त उच्छेद होनेको मोक्ष कहते हैं । ये विशेषगुण आत्मा और मनके संयोगसे उत्पन्न होते है । चूँकि मोक्षमें आत्माका मनसे संयोग नहीं रहता अतः इन गुणोंका अत्यन्त उच्छेद हो जाता है—

इस मतमें सबसे बड़ा दूषण यह है कि—यदि आत्माके बुद्धि आदि विशेष गुण नष्ट हो जाते हैं तो आत्माका स्वरूप ही क्या बचता है ? अपने विशेष लक्षणोंसे रहित वस्तु अवस्तु ही हो जायगी।

(३) बौद्ध मानते हैं कि—जिस प्रकार तैलके न रहनेसे दीपक बुझ जाता है उसी प्रकार राग-स्नेहके क्षय हो जानेसे आत्मा-ज्ञानसन्तानका शान्त हो जाना मोक्ष है।

इनकी यह प्रदीपनिर्वाणकी तरह आत्मनिर्वाणकी कल्पना भी उचित नहीं है। कारण आत्माका अत्यन्त अभाव नहीं हो सकता, वह सत् पदार्थ है।

मोक्षके कारणोंके विषयमें भी विवाद है—

नैयायिक आदि ज्ञानको ही मोक्ष कारण मानते हैं इनके मतमें चारित्रका उपयोग तत्त्वज्ञानकी पूर्णतामें होता है। कोई श्रद्धान मात्रसे मोक्षकी प्राप्ति मानते हैं। मीमांसक क्रियाकाण्डरूप चारित्रसे मोक्षकी प्राप्ति स्वीकार करते हैं। किन्तु जिसप्रकार रोगी औषधिके ज्ञानमात्रसे या ज्ञानशून्य हो जिस किसी दवाके पीलेनेमात्रसे अथवा रुचि या विश्वास रहित हो मात्र दवाके ज्ञान या उपयोगमात्रसे नीरोग नहीं हो सकता उसी प्रकार अकेले श्रद्धान, ज्ञान या चारित्रसे भवरोगका विनाश नहीं हो सकता। देखो—

लंगड़ेको इष्टदेशका ज्ञान है पर क्रिया न होनेसे उसका ज्ञान उसी तरह व्यर्थ है जिसप्रकार अन्धेकी क्रिया ज्ञानशून्य होने से। श्रद्धानरहित व्यक्तिका ज्ञान और चारित्र दोनों ही कार्यकारी नहीं है। अतः श्रद्धान, ज्ञान और चारित्र तीनों मिलकर ही कार्यकारी हैं।

मोक्षमार्ग क्या है ?

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १ ॥

सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्र तीनों मिलकर ही मोक्ष का मार्ग हैं।

मोक्षोपयोगी तत्त्वोंके प्रति दृढ़ विश्वास करना सम्यग्दर्शन है। तत्त्वोंका संशय, विपर्यय और अनिश्चिततासे रहित यथावत् ज्ञान सम्यग्ज्ञान है। संसारको बढ़ानेवाली क्रियाओंसे विरक्त तत्त्वज्ञानीका कर्मोंका आस्रव करनेवाली क्रियाओंसे विरत होना सम्यक् चारित्र है।

इस सूत्रमें 'सम्यक्' शब्दका सम्बन्ध दर्शन, ज्ञान और चारित्रसे कर लेना चाहिए।

सम्यग्दर्शनका स्वरूप—

तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥ २ ॥

पदार्थके अपने स्वरूपको तत्त्व कहते हैं। तत्त्वार्थ अर्थात् पदार्थोंके यथावत् स्वरूपकी श्रद्धा या रुचिको सम्यग्दर्शन कहते हैं।

अर्थ शब्दके प्रयोजन, वाच्य, धन, हेतु, विषय, प्रकार, वस्तु, द्रव्य आदि अनेक अर्थ होते हैं। इनमें पदार्थ अर्थ लेना चाहिए धन आदि नहीं।

दर्शन शब्दका प्रसिद्ध अर्थ देखना है, फिर भी दर्शन शब्द जिस 'दृशिर्' धातुसे बना है उसके अनेक अर्थ होते हैं, अतः मोक्षमार्गका प्रकरण होनेसे यहाँ देखना अर्थ न लेकर रुचि करना, दृढ़ विश्वास करना अर्थ लेना चाहिए। यदि देखना अर्थ किया जायगा

तो देखना तो सभी आंखवाले प्राणियोंको होता है अतः सभीके सम्यग्दर्शन मानना होगा। देखना मात्र मोक्षका मार्ग नहीं हो सकता।

सम्यग्दर्शन दो प्रकारका है–एक सराग सम्यग्दर्शन और दूसरा वीतराग सम्यग्दर्शन।

प्रशम संवेग अनुकम्पा आर आस्तिक्यसे पहिचाना जानेवाला सम्यग्दर्शन सराग सम्यग्दर्शन है। रागादि दोषोंके उपशमको प्रशम कहते हैं। विविध दुःखमय संसारसे डरना संवेग है। प्राणिमात्रके दुःख दूर करनेकी इच्छासे चित्तका दयामय होना अनुकम्पा है। देव, शास्त्र, व्रत और तत्त्वोंमें दृढ़प्रतीतिका आस्तिक्य कहते हैं। वीतराग सम्यग्दर्शन आत्मविशुद्धि रूप होता है।

सम्यग्दर्शनकी उत्पत्तिके प्रकार—

तन्निसर्गादधिगमाद्वा ॥ ३ ॥

यह सम्यग्दर्शन स्वभावसे अर्थात् परोपदेशके विना और अधिगमसे अर्थात् परोपदेशसे उत्पन्न होता है।

शंका–निसर्गज सम्यग्दर्शनमें भी अर्थाधिगम तो अवश्य ही रहता है क्योंकि पदार्थोंके के ज्ञान हुए बिना श्रद्धान कैसा? तब इन दोनों सम्यग्दर्शनोंमें वास्तविक भेद क्या है?

समाधान—दोनों ही सम्यग्दर्शनोंमें अन्तरङ्ग कारण दर्शनमोह कर्मका उपशम या क्षयोपशम समान है। इस अन्तरङ्ग कारणकी समानता रहनेपर भी जो सम्यग्दर्शन गुरूपदेशके बिना उत्पन्न हो वह निसर्गज कहा जाता है, जो गुरूपदेशसे हो वह अधिगमज। निसर्गज सम्यग्दर्शनमें भी प्रायः गुरूपदेश अपेक्षित रहता है पर उसे स्वाभाविक इसलिए कहते हैं कि उसके लिए गुरुको विशेष प्रयत्न नहीं करना पड़ता सहज ही शिष्यको सम्यग्दर्शन ज्योति प्राप्त हो जाती है।

शंका–"जो पहिले कहा जाता है उसीका विधान या निषेध होना है" यह व्याकरण का प्रसिद्ध नियम है। अतः इस सूत्रमें 'तत्' पद न भी दिया जाय फिर भी पूर्वसूत्रसे 'सम्यग्दर्शन' का सम्बन्ध जुड़ ही जाता है तब इस सूत्र में 'तत्' पद क्यों दिया गया है?

समाधान—जिस प्रकार सम्यग्दर्शन शब्द पूर्ववर्ती है उसी प्रकार मोक्षमार्ग शब्द भी पूर्ववर्ती है। मोक्षमार्ग प्रधान है। अतः "समीपवर्तियोंमें भी प्रधान बलवान् होता है" इस नियमके अनुसार इस सूत्रमें मोक्षमार्गका सम्बन्ध जुड़ सकता है। इस दोषको दूर करनेके लिए और सम्यग्दर्शनका सम्बन्ध जोड़नेके लिए इस सूत्रमें 'तत्' पद दिया गया है।

तत्त्व क्या हैं—

जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥ ४ ॥

जीव अजीव आस्रव बन्ध संवर निर्जरा और मोक्ष ये सात तत्त्व हैं।

जिसमें ज्ञान-दर्शनादिरूप चेतना पायी जाय वह जीव है। जिसमें चेतना न हो वह अजीव है। कर्मोंके आने को आस्रव कहते हैं। आए हुए कर्मोंका आत्मप्रदेशोंसे सम्बन्ध होना बन्ध है। कर्मोंके आनेको रोकना संवर है। पूर्वसंचित कर्मोंका क्रमशः क्षय होना निर्जरा है। समस्त कर्मोंका पूर्णरूपसे आत्मासे पृथक् होना मोक्ष है।

संसार और मोक्ष जीवके ही होते हैं अतः सर्वप्रथम जीव तत्त्व कहा है। जीव अजीवके निमित्तसे ही संसार या मोक्ष पर्यायको प्राप्त होता है अतः जीवके बाद अजीव का कथन किया है। जीव और अजीवके निमित्तसे ही आस्रव होता है अतः इसके बाद आस्रव तथा आस्रवके बाद बन्ध होता है अतः उसके बाद बन्ध का निर्देश किया है। बन्ध को रोकनेवाला संवर होता है अतः बन्ध के बाद संवर तथा जिसने आगामी कर्मोंका संवर कर लिया है उसीके संचित कर्मोंकी निर्जरा होती है इसलिए उसके अनन्तर निर्जराका कथन किया गया है। सबके अन्तमें मोक्ष प्राप्त होता है अतः मोक्षका निर्देश अन्तमें किया गया है

पुण्य और पापका आस्रव और बन्ध तत्त्वमें अन्तर्भाव हो जाता है अतः उन्हें पृथक् नहीं कहा है।

प्रश्न–आस्रव बन्ध संवर निर्जरा और मोक्ष ये पांच तत्त्व द्रव्य और भावरूप होते हैं। उनमें द्रव्यरूप तत्त्वोंका अजीवमें तथा भावरूप तत्त्वोंका जीवमें अन्तर्भाव किया जा सकता है, अतः दो ही तत्त्व कहना चाहिए ?

उत्तर–इस मोक्षशास्त्रमें मोक्ष तो प्रधान है अतः उसे तो अवश्य कहना ही होगा। मोक्ष संसारपूर्वक होता है। अतः संसारका कारण बन्ध और आस्रव भी कहने चाहिए, इसी तरह मोक्षके कारण संवर और निर्जरा भी। तात्पर्य यह कि प्रधान कार्य संसार और मोक्ष तथा उनके प्रधान कारण आस्रव बन्ध और संवर निर्जराका कथन किया गया है। संवर और निर्जराका फल मोक्ष है तथा आस्रव और बन्धका फल संसार। यद्यपि संसार और मोक्ष में आस्रवादि चारोंका अन्तर्भाव किया जा सकता है फिर भी जिस प्रकार 'क्षत्रिय आए हैं, शूरवर्मा भी' इस वाक्यमें सामान्य क्षत्रियोंमें अन्तर्भूत शूरवर्माका पृथक् कथन विशेष प्रयोजनसे किया जाता है उसी प्रकार विशेष प्रयोजनके लिए ही आस्रवादिक तत्त्वोंका भिन्न भिन्न रूपसे कथन किया है।

प्रश्न–जीवादिक सात द्रव्यवाची हैं तथा तत्त्वशब्द भाववाची है अतः इनमें व्याकरणशास्त्रके नियमानुसार एकार्थप्रतिपादकत्वरूप सामानाधिकरण्य नहीं बन सकता ?

उत्तर–द्रव्य और भावमें अभेद है अतः दोनों एकार्थप्रतिपादक हो सकते हैं। अथवा जीवादिकमें तत्त्वरूप भावका आरोप करके सामानाधिकरण्य बन जाता है। सामानाधिकरण्य होने पर भी मोक्ष शब्द पुल्लिंग तथा तत्त्वशब्द नपुंसकलिंग बना रह सकता है। क्योंकि बहुतसे शब्द अजहल्लिङ्ग अर्थात् अपने लिङ्गको न छोड़नेवाले होते हैं। इसी तरह वचनभेद भी हो जाता है। 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इस प्रथमसूत्रमें भी इसी तरह सामाधिकरण्य बन जाता है।

शब्दव्यवहार जिन अनेक निमित्तोंसे होता है, उन प्रकारोंको कहते हैं—

नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ॥

नाम स्थापना द्रव्य और भावसे सम्यग्दर्शनादि और जीवादि पदार्थोंका व्यवहारके लिए विभाग या निक्षेप (दृष्टिके सामने रखना) होता है।

शब्दकी प्रवृत्ति द्रव्य क्रिया जाति और गुणके निमित्तसे देखी जाती है। जैसे डवित्थ-लकड़ीके मृगमें काष्ठद्रव्यको निमित्त लेकर मृगशब्दका प्रयोग होता है। करनेवालेको कर्त्ता कहना क्रियानिमित्तक है। द्विजत्व जातिके निमित्तसे होनेवाला द्विजव्यवहार जातिनिमित्तक है। फीके लालगुणके निमित्तसे होनेवाला पाटलव्यवहार गुणनिमित्तक है। शब्दके इन द्रव्य गुणादि प्रवृत्तिनिमित्तोंकी अपेक्षा न करके व्यवहारके

लिए अपनी इच्छानुसार नाम रख लेना नाम निक्षेप है। जैसे किसी लड़केकी गजराज यह संज्ञा।

लकड़ीमें खोदे गए, सूतसे काढ़े गए, गोबर आदिसे लीपे गए वस्तुके आकारमें 'यह वही है' इस प्रकारकी स्थापना तदाकारस्थापना है। शतरंजके अतदाकार मुहरोंमें हाथी घोड़ा आदिकी कल्पना अतदाकारस्थापना है।

जो गुणवाला था, है तथा रहेगा वह द्रव्य है।

वर्तमान पर्यायवाला द्रव्य ही भाव कहलाता है।

जैसे–जीवनगुणकी अपेक्षाके बिना जिस किसी पदार्थको जीव कहना नामजीव है। उस आकारवाले या उस आकारसे रहित पदार्थमें उस जीवकी कल्पना स्थापना-जीव है। जैसे हाथी घोड़ेके आकारवाले खिलौनों को या शतरंजके मुहरोंको हाथी घोड़ा कहना। जीवशास्त्र को जाननेवाला किन्तु वर्तमानमें उसमें उपयुक्त न रहनेवाला आत्मा आगमद्रव्यजीव है। ज्ञाताका शरीर, कर्म, नोकर्म आदि नोआगमद्रव्यजीव हैं। सामान्य-रूपसे नोआगमद्रव्यजीव नहीं है क्योंकि कोई अजीव जीव नहीं बनता। पर्यायकी दृष्टिसे नोआगमद्रव्यजीवकी कल्पना हो सकती है। जैसे कोई मनुष्य मरकर देव होनेवाला है उसे आज भी भाविनोआगमद्रव्यदेव कह सकते हैं। अथवा जो आज जीवशास्त्रको नहीं जानता पर आगे जानेगा वह भी भाविनोआगमद्रव्यजीव कहा जा सकता है।

जीवशास्त्रको जानकर उसमें उपयुक्त आत्मा आगमभावजीव है। जीवन पर्यायसे युक्त आत्मा नोआगमभावजीव है।

इस तरह अनेक प्रकारके जीवोंमेंसे अप्रस्तुत जीवोंको छोड़कर प्रकृतजीवको पहिचाननेके लिए निक्षेपकी आवश्यकता है। तात्पर्य यह कि हमें किस समय कौनसा जीव अपेक्षित है यह समझना निक्षेपका प्रयोजन है। जैसे जब बच्चा शेरके लिए रो रहा हो तब स्थापना शेरकी आवश्यकता है। शेरसिंह पुकारनेपर शेरसिंह नामवाले व्यक्तिकी आवश्यकता है। आदि।

'नामस्थापनाद्रव्यभावतो न्यासः' इतना ही सूत्र बनानेसे प्रधानभूत सम्यग्दर्शना-दिका ही ग्रहण होता अतः प्रधानभूत सम्यग्दर्शनादि तथा उनके विषयभूत जीवादि सभीका संग्रह करनेके लिए खासतौरसे सर्वसंग्राहक 'तत्' शब्द दे दिया है।

नामादिनिक्षेपके विषयभूत जीवादि पदार्थों को जानने का उपाय बतलाते हैं—

प्रमाणनयैरधिगमः ॥ ६ ॥

प्रमाण और नयके द्वारा जीवादिपदार्थोंका ज्ञान होता है। प्रमाण स्वार्थ और परार्थके भेदसे दो प्रकारका है। श्रुत स्वार्थ और परार्थ दोनों प्रकार का है। अन्य प्रमाण स्वार्थ ही हैं। ज्ञानात्मकको स्वार्थ तथा वचनात्मक को परार्थ कहते हैं। नय वचन-विकल्परूप होते हैं।

सूत्रमें नय शब्दको अल्पस्वरवाला होनेसे प्रमाण शब्दके पहिले कहना चाहिए था लेकिन नयकी अपेक्षा प्रमाण पूज्य है अतः प्रमाण शब्द पहिले कहा गया है। नयकी अपेक्षा प्रमाण पूज्य इसलिये है कि प्रमाणके द्वारा जाने गये पदार्थोंके एक देशको ही नय जानता है। प्रमाण सम्पूर्ण पदार्थको जानता है। नय पदार्थके एकदेश को जानता है। प्रमाण सकलादेशी होता है और नय विकलादेशी। नय दो प्रकारका है एक द्रव्यार्थिक

तथा दूसरा पर्यायार्थिका भावनिक्षेप पर्यायार्थिक नयका विषय है तथा शेष द्रव्यार्थिक नयके। चारों ही निक्षेप प्रमाणके विषय होते हैं इसीलिए प्रमाण सकलादेशी कहलाता है।

जीवादि पदार्थोंके अधिगमके उपायान्तरको बतलाते हैं—

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ ७ ॥

निर्देश, स्वामित्व, साधन, अधिकरण, स्थिति और विधान इनके द्वारा भी जीवादि-पदार्थोंका ज्ञान होता है। स्वरूपमात्रका कहना निर्देश है। अधिकारीका नाम बतलाना स्वामित्व है। उत्पत्तिके कारणको साधन कहते हैं। आधार अधिकरण है। कालके प्रमाणको स्थिति कहते हैं। भेद का नाम विधान है।

